॥ श्रीगणेशायनमः ॥ ॥ श्री सरस्वत्यैनमः ॥ ॥ श्री सद्गुरुभ्योनमः ॥

समर्पणम्

"संहितासु विश्वेदेवाः" प्रबन्धो ग्रथितोमया ।
विश्वेदेवात्मकं शास्त्रं तेभ्य एव समर्प्यते ॥

॥ श्रीः ॥

वैदिक देवताशास्त्रान्तर्गता वैश्वदेवी संहिता

संहितासु विश्वेदेवाः

वाराणसेय संस्कृत विश्वविद्यालयस्य
विद्यावारिधि उपाधि सिद्ध्ये
प्रस्तुतः शोधप्रबन्धः ।

श्री, श्रीकृष्ण देवः
अनुसन्धाता

विक्रम संवत् २०२३
(१९६६)

निर्देशक :—
श्री पं० बलदेव उपाध्यायः
अनुसन्धान विभागाध्यक्षः
वाराणसेय संस्कृत विश्वविद्यालयस्य
वा रा ण सी ।

शो ध प्र ब न्धः

संहितासु विश्वेदेवाः

श्री, श्रीकृष्ण देवः
अनुसन्धाता

।। श्री: ।।

वैदिक देवता शास्त्रान्तर्गता वैश्वदेवी संहिता ।

संहितासु विश्वे देवा:

वाराणसेय संस्कृत विश्वविद्यालयस्य

विद्यावारिधि उपाधि सिद्धये

प्रस्तुत: शोध प्रबन्ध: ।

श्री, श्रीकृष्ण देव:

अनुसन्धाता

विक्रम संवत् २०२३

(१९६६)

निर्देशक:

श्री पं० बलदेव उपाध्याय:

अनुसन्धान विभागाध्यक्ष:

वाराणसेय संस्कृत विश्वविद्यालयस्य

वाराणसी ।

प्रा र्थ ना

विश्वे अद्य मरुतो विश्वऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वेनोदेवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ।।
(ऋ० १०, ३५, १३)

संहितासु विश्वेदेवाः

प्रबन्धानुक्रमणी

अध्यायः	विषयनाम	पत्राङ्काः
प्रारंभाध्यायः ।	प्राथमिक प्रकरण विमर्शः ।	१ - ३३
प्रथमाध्यायः ।	वैदिक देवतानां स्वरूप नामादि विमर्शः ।	३४ - ६७
द्वितीयोध्यायः।	विश्वेदेवानां स्वरूप विमर्शः ।	६८ - ११०
तृतीयोध्यायः ।	कर्मसु विनियोग विमर्शः ।	१११ - २२५
चतुर्थोध्यायः ।	कार्यविमर्शः ।	२२६- २५४
पन्चमोध्यायः।	वैज्ञानिक महत्व विमर्शः ।	२५५ - २६५
षष्ठोध्यायः ।	वैश्वदेवी मन्त्र संहिता विमर्शः ।	२६६ - ४७६
	सहायक गन्थ तालिका ।	४७७ - ४८६

।। इति प्रबन्धानुक्रमणी सम्पूर्णा ।।

---00---

।। प्रारंभाध्याय: ।।

प्राथमिक प्रकरण विमर्श:

(अत्रोक्ता विषया:)

प्राथमिकम्, मङ्गलम्, भूमिका, मन्त्रविचार:, मन्त्रप्रयोजनम्, शङ्का-समाहिति:, वेदापौरुषेयत्वविचार:, वेद लक्षणम्, देवता स्थान-नाम-भक्ति:, गणत्रयविचार:, अनुक्त देवता स्थानम्, सर्वानुक्रमणी-प्रोक्ता देवता:, देवतास्वरूप- विमर्श:, लिंगोक्ता देवता:, वैदिक मेथा-लाजी, भारतीयं देवताशास्त्रम्, विश्वेदेवा:, इति वैदिक: पक्षा:, विविध-रूपाणि, नैघण्टुकोक्ता संख्या, नरमेधोक्ता देवता:, वैदिक प्रार्थना, विश्वेश्वर-सरस्वती- विश्वेदेव प्रार्थना चेति ।

--००--

प्राथमिकम्

अयि भारतीया विपश्चिदपाश्चिमा मूर्धन्या विद्वांस: ,

जानन्त्येव तत्रभवन्तो भवन्तो यदनुसन्धान कार्ये,

तत्रापि विशेषत: पौर्वात्य भारतीय विषयाणां, ततो पि वैदिक विषयाणां, तस्मिन्नपि संस्कृत भाषायां शोध: प्रबन्ध लेखने कियत्यो विपत्तयो बाधाश्च जायन्ते । यथा - निदर्शकाभाव:, भाषा सौष्ठवाभाव: लेखन पद्धति ज्ञानाभाव:, संस्कृत टङ्कककानामभावादयश्च । देवनागराक्षर टङ्कनयन्त्रे सत्यपि तत्र इत्यादि चिन्हानाम्, अक्षराणाम्, अर्धाक्षराणां, संयुक्ताक्षराणाम्, उदात्तादि स्वराणान्च अभावो वरिवर्ति । टङ्कन काले प्रतिवाक्य ज्ञापनमपि परमावश्यकं भवति । अत: स्वाभाविकतया प्रबन्ध निर्माणे विलम्ब:, लेखने अशुद्धय:, स्खलनानि च, व्याकरणदृष्टया सन्धीनामभाव:, अशोभना भाषा प्रयोगा:, त्रुटिपूर्णं विषय प्रतिपादनं , टङ्कने कठिन·परिश्रम: सो पि महार्घ:, टङ्कनाक्षराणामभाव:, इत्यादि बाधा समूहे सत्यपि श्रीसद्गुरु कृपया समीचीना: पण्डित प्रकाण्डा निदर्शका मया लब्धा: । अन्ये सहयोगिना पि तथैव लब्धा: । तेषामाचार्याणां निष्क्रिणो न भवितुं शक्ये । केवलं सश्रद्धं हार्दिकं प्रणति पूर्वकं कृतज्ञता ज्ञापनमेव करोमि । वाराणसेय संस्कृत विश्व विद्यालयीय सरस्वती भवन पुस्तकालयस्य, काशी हिन्दू विश्वविद्यालयीय गायकवाड पुस्तकालयस्य, तथा गोयनका संस्कृतमहाविद्यालयीय विश्वनाथ पुस्तकालयस्येति त्रिभ्यो पि ग्रन्थपालेभ्यो धन्यवादान्वितरामि, येषां महता सहयोगेनैव प्रबन्ध लेखनस्य सम्भव: सन्जात: । अन्यासां त्रुटीनांकृते सोदारहृदयै: क्षान्तव्यो यंजन: । अन्ते विश्वस्मिन् प्रथम स्थापितस्य संस्कृत भाषा माध्यमस्य वाराणसेय संस्कृत विश्वविद्यालयस्य वर्तमानोप कुलपतीनां स्वनाम धन्यान परमादरणीयानाम्, उभयविध पाण्डित्य प्रकाण्डानां नानाविधोच्च पदवी समलङ्कृतानाम् अनुसन्धातृमूर्धन्यानां श्रीमतां सुरेन्द्र नाथ शास्त्रि प्रवराणां सश्रद्धमभिवादनं करोमि । येषां महत्या कृपया शुभाशीर्भिश्च प्रबन्ध: पूर्णतां गत: ।

पुनस्तावदेकवारं प्रबन्ध निर्देशकेभ्यो विद्वल्लजेभ्य: श्रीमद्भ्य: पण्डित बलदेव उपाध्याय महोदयेभ्यो विशिष्टरूपेण, तथाचान्येभ्य: सहयोगिभ्यश्च स प्रणति पूर्वकान् हार्दिकाननेकान् धन्यवादान् समर्प्य, प्रबन्ध गत त्रुटिसमूहान दुर्लीकरण प्रार्थनयासह तत्र भवतां श्रीमतां विदुषां मदनुग्रह कारिणीं कृपां याचित्वा ' विद्यावारिधि ' उपाधिसिद्धये शिव सङ्कल्पेन निर्मित: शोध प्रबन्ध: श्रीमतां पुरस्तात् समुपस्थाप्य, विश्वान्देवान् सम्प्रार्थ्य प्राथमिक निवेदनाद्विरमति।

विदुषां कृपापात्र:
श्री, श्रीकृष्ण देव:
अनुसन्धाता
वाराणसेय संस्कृत विश्वविद्यालयस्य,
वाराणसी ।

।।श्री: ।।

मङ्गलं देव वन्दनम्

आदिगुरुं सवितारं वामनमपरं तु विप्रकर्तारम् ।
तार्तीयं नैगमिकं चागमिकं गुरुं तुरीयन्च ।।१।।
पन्चमं सद्गुरुं नत्वा भवसागर तारकम् ।
स्वेष्टाश्च देवता: सर्वा निगमागम संस्तुता: ।।२।।
पूर्णाभिषिक्तौ जनकौ सर्वदा वेद सेवकौ ।
तदनुष्ठान कर्तारौ विद्या ब्रह्म स्वरूपिणौ ।।३।।
आशिषो गुरु विप्राणां गृहीत्वा स्मद्धितैषिणाम् ।
श्रीमतां बलदेवोपाध्यायानां चैव धीमताम् ।।४।।
तत्वावधानं स्वीकृत्य विद्यावारिधि सिद्धये ।
बहून ग्रन्थांश्चावलोक्य सिद्धिमार्ग प्रदर्शकान् ।।५।।
विषयो देवता शास्त्रान्तर्गतस्तु पुरस्कृत: ।
वेद सेवात्मकं कार्यं स्वीकृत्य हृष्ट मानस: ।।६।।
श्रीकृष्ण देव: काशीस्थो वैदिको वैदिकान्वय: ।
संहितासु विश्वेदेवा: प्रबन्धं लिखति ध्रुवम् ।।७।।
विद्योभय प्रवीणै वैदिक शास्त्रीय शोध कुशलै: परै: ।
आशीर्भिरनुग्राह्यो नूत्नो वेदेषु शोध कर्तैष: ।।८।।

-o-

प्रास्ताविकं प्रबन्धस्य पीठं तद्देश्व देविकम्

सुविदितमेव यत् सर्वविधं ज्ञानं विज्ञानं प्रज्ञानञ्च सनातनम् । तस्यानुभूतिर्यया कया च विधया यस्य भवति स तस्य द्रष्टा वा वक्ता वा भवति नतु कर्ता । कर्तृत्वंतु सर्व जगत्कारण बीजस्य शब्द ब्रह्मणो वेद पुरुषस्यैव । स वेदपुरुषः सर्वेषु वेदेषु किन्चिददार वाक्यादि भेदेन पुरुष सूक्तेन संस्तुतः । यथा :- सहस्र शीर्षा पुरुषः सहस्राक्षः सहस्रपात । स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ।। सर्वं दृष्टादृष्टं जगत व्याप्यापि दशाङ्गुलो वशिष्टः । एतावानस्य महिमा तो ज्यायांश्च पूरुषः। अतः स एव कर्ता, पाता, हर्ता च वर्तते । तदभिमुखान्येव सर्वाणि वेद वेदाङ्ग शास्त्र स्मृति पुराण ज्ञान विज्ञानानि । सर्वा निगमागम संस्तुताश्चोदिताश्च देवता अपि तदन्तर्भूता: । उक्तन्च ऋग्वेदे अस्यवामीयसूक्ते: ` इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः। परन्च तथोक्त सर्वं नाम विभूतीनां विशिष्ट रूप- स्थान- वर्ण- वयो वचनादि भेदेन अधिकारि भेदेन कार्य भेदेन च बहु विधानि रूपाणि जायन्ते । यथाव्यवहारे - एकस्यैव मूलभूतद्रव्यस्यात्मनो विशिष्टाकारादि कारणैः शङ्कर-विष्णु- दुर्गा- गणेश- सूर्य त्वन्च लोके विश्रुतम् । अथवा एक एव पुरुषः प्रातः काले सन्ध्यादि कार्यरतो ब्राह्मणो दृश्यते । परन्च वर्तमान परचक्र निरोधाय सैनिक शिक्षा सम्पत्तये तद्वेषधारी- चेत् क्षात्रियो भासते । स एव सायमुदर पोषणार्थं मापणे दृश्यते चेद्वणिक् । कस्मिंश्चित् प्रतिष्ठाने श्रम संलग्नश्चेद् विश्वकर्मेव भासते । अपरन्च स एव पुरुषः कस्यचित् पिता, पुत्रः, मातुलः, पितृव्यः, स्यालः, श्वशुरः, मित्रम्, शत्रुः, गुरुः, शिष्यादि रिति भेदेन तथा विधानि पदानुयोग्यानि कार्याणि करोति, तत्तत्काले संज्ञानुरूपं व्यवहरति च । इयमेव व्यवस्था श्रीमद् भगवतो वेद पुरुषस्य ।` यद्यत् पिण्डे तत्तद् ब्रह्माण्डे इत्यभियुक्तोक्त दिशा यत् पृथिव्या (भासते) दृश्यते, तथैवान्तरिक्षे, दिवि च । अत इदं परमावश्यकं सन्जातं यत् को यमग्नि:?को साविन्द्रः ? क एष विष्णुः ? को वा प्रजापतिरितिज्ञातुं प्रयतितव्यमिति ।

तदनुसारेण पूर्वैर्ऋषिभिराचार्यैश्च सहस्रसहस्राब्दीं यावत् प्रयतितम् । तथा च तासां देवतानां यद्रूपं, यत्फलम्, यदनुष्ठानं, यज्ज्ञानं, यद्विज्ञानं, यदाधि भौतिकं प्रत्यक्ष स्वरूपं, तदनुमानेन दैविकम् तदुपमानेन आधियज्ञात्मकं, शब्दे नौपनिषादिकेन आध्यात्मिकञ्च रूपादि यत् किमपि प्राप्तम्, अनुभूतं, प्रत्यक्षीकृतं तत् कृत्स्नं प्रदर्शितमेव पूर्वम् । इयमक्षुण्णा परम्परा द्वापरान्त यावत् प्रचलतिस्मेति दृश्यते । महाभारत कालेतु बहुविधं ज्ञानं विज्ञानञ्च लुप्तम् । परञ्च बहुविधं नूतमन्वेषणं, वेद श्रुति दर्शनं प्रस्फुरणमपि सञ्जातमिति महा भारत संहितया ज्ञायते । उक्तञ्च श्रीमद् भगवता श्रीकृष्णेन गीतायाम्:- " इमं विवस्वते योगं०" इति श्लोके ।

तस्मिन्सङ्गरान्ते बहूनां गुरु परम्पराणां तेषां विशिष्ट सिद्ध विद्यानां मन्त्राणां तदनुष्ठान विधानानाञ्च विनाशः सञ्जातः । तदा सप्त चिरजीविष्वन्यतमेन कृष्ण द्वैपायनेन व्यास महर्षिणा वशिष्टानां ज्ञान विज्ञानादीनां संरक्षणाय वेदस्य कर्मानुसारान् चत्वारो भेदाः तद्वेदशाखाव्यवस्थापनम्, तदनुसारि प्रयोग पद्धतीनां रचना, शिष्यै रनेक सूत्राणां ग्रथनं, पुरा- इतिहास लेखनादिकमलौकिकं कार्यं कृतमिति विषये न काचन विप्रतिपत्तिः । अतएव तस्य सत शिष्येण महता गौरवेणोद मुद्घोषितं यत् -" व्यासोच्छिष्टं जगत्सर्वम्" इति ।

ततो पि कालान्तरे भारतीय शास्त्राणा मपकर्षः, यवन म्लेच्छादिभिः कृतो ग्रन्थनाशः, लार्डमैकाले प्रभृतिभिः शिक्षाधुरीणै राङ्ग्ल लेखकैश्चकृतो मति विभ्रम इत्यादिभि रिदानीमीदृशी स्थितिर्विद्यते यत् सर्वेषु वेदान्तर्गत विषयेषु उपविषयेषु च नवीन पद्धत्या वैज्ञानिक सरण्या च प्रकाश आवश्यकः । एतत्पूर्वं बहुभि दैशिकैर्वैदेशिकैश्च बहु प्रपञ्चितो यं विषयः । तथा पि ते सर्वे प्रयत्ना एक देशिन एवेति मन्ये । यतो हि ईसा पूर्वं सर्वं बार्बरिकमित्यसत्कर्षेष्वारूढा एते भारतीय बुद्धिभेदकाः संशोधकाश्चतुः सहस्र वर्षेभ्यः प्रागेव ग्रथितानां ग्राम्यगीताना मयं सङ्ग्रह इति गृहीत कृत्यं मन्यमानाः, केचन पाञ्चभौतिकसृष्टयां प्रकृतिभूत मेघ- विद्युत गर्जन तर्जनादीनां वर्णन रूपावेदा इति ब्रुवाणः, तच्छिष्या स्तत्पद्धत्या शिक्षिताः कृष्णाङ्गला भारतीया अपि दासत्वेन स्वकीय न्यून गण्डेनचाक्रान्ताः सन्तः" साहेब वाक्यं प्रमाणम्" इति श्रुतिवाक्यवत् स्वीकुर्वन्तो वैदिक देवताशास्त्र विषये कल्पनायामारुह्य यथेच्छ मप्रमाणं लिखितवन्तः ।

तेषां श्री सायणाचार्यवत् का पि निश्चिता वेदार्थं पद्धति र्नास्ति । 'वदो हियज्ञार्थमभि प्रवृत्ता:' इति सिद्धान्तं स्वीकृत्य श्री सायणाचार्येर्यथा वेदा यज्ञ परार्थेन व्याख्याता: । श्रीमदाद्य शङ्कराचार्यै रुपनिषदां ब्रह्म परं व्याख्यानं कृतम् । नतथा एतेषां को पि सिद्धान्त: न च मन्त्रार्थं मीमांसा । यथा देवकामा इत्यस्य देवताकामा इति स्पष्टार्थमाच्छाद्य देवर् कामा द्विपतिका स्त्री इत्याङ्ग्ल भाष्य काराणामर्थ: । अत: प्रथममर्थं करणात्प्रागेव मन्त्रार्थं मीमांसा ज्ञानमावश्यकं भवति । तद्विषये किन्चित्प्रस्तूयते ।

मन्त्रोनाम अनुष्ठान कारक द्रव्य-गुण-देवता- क्रियादि लिङ्ग स्मारको वैदिक देश: । जैमिन्यादिभिस्तु- अभियुक्तानां याज्ञिकानां मन्त्रोयमिति समाख्यानं मन्त्रस्य लक्षण मित्युक्तम् ।

मन्त्रस्त्रिधा चतुर्धावा ?

स च मन्त्रो वयव भेदेन त्रिधा ऋग्यजु: साम भेदात् । तल्लक्षणानितु: - नियत पादाक्षरावसाना ऋच: । अनियत पादाक्षाण वसानानि यजूंषि । गीति: विशिष्टा मन्त्रा: सामानि । वेदस्यैतदवयव त्रितयातिरिक्त मन्त्रात्मका वयव हीनत्वे- नाथर्वणिको मन्त्रो पि निरुक्त ऋगवयवान्त र्भूतत्वात् । यथा परसम्बोधनार्था: प्रैषरूपा निगदामन्त्रायजुरन्त र्भूता: । अथर्वणिक मन्त्राणां त्रयीतो भेदेन तुरीयत्वेन निर्देशस्तु प्रयोजनवशात्तुरीयत्वेन विभक्त चतुर्थवेदे समाम्नातत्वादौपचारिक: । तदुक्तं कात्यायनेन:- ऋचो यजूंषि सामानि निगदा मन्त्रास्तेषामारम्भे व्यवस्था र्थंतस्तद्वचनात् ।

मन्त्रा: पुनश्चतुर्विधा: ।

ते च मन्त्रा: पुनर्विनियोग भेदेन चतुर्विधा: । १- करणमन्त्रा:, २- क्रिय- माणानुवादि मन्त्रा:, ३- अनुमन्त्रण मन्त्रा:, ४- जप मन्त्राश्चेति । अन्येतु अपरमपि प्रकारद्वयं कथयन्ति । १- परसम्बोधनार्थका: प्रैषरूपा निगदामन्त्रा: स्तुति रूपा मन्त्राश्चेति । वस्तुत स्त्वेतो द्वावपि प्रकारो पूर्वोक्त प्रकारेष्वन्तर्भवत: ।

तत्र यस्य मन्त्रस्योच्चारण समनन्तरमेव कर्म क्रियते स करण मन्त्रः । यथा याज्या पुरोनुवाक्या होमावाह्नादि मन्त्राः । कर्मानुष्ठान समकालमेव यो मन्त्र पठ्यते स क्रियमाणानुवादि मन्त्रः । यथा पशौ यूप परिव्ययणमन्त्रः , वसोर्धारा मन्त्राश्च । कर्म ~~कृत~~ समनन्तरं यो मन्त्रः पठ्यते सो नु मन्त्रण मन्त्रः । यथा प्रयाजाद्यनुमन्त्रण मन्त्राः । इतो भिन्ना ये यजमान वाचन जपादिकाः सन्निपत्योप कार्याराडुपकार्यङ्गानुष्ठान समये यथा कथन्चित् सम्बन्ध मभिधाय स्तुति प्रतिपादिका मन्त्राश्च ते सर्वे जपरूपाः । तत्र स्तुतिर्नाम गुणिनिष्ठ गुणभिधानम् । ये च पर सम्बोधकाः प्रैषादि रूपा मन्त्रा स्तेच निगदा इति संज्ञायन्ते ।

मन्त्र प्रयोजनम्

यतो हि मन्त्राणामर्थो स्ति, अतो मन्त्रैरेवार्थं स्मृत्वा कर्मकर्तव्यमिति । " प्रयोगसमवेतार्थ स्मारका मन्त्रा " इति मीमांसक समयात् , " मन्त्रान्तैः कर्मादिः सान्निपत्यो भिधानात् इति कात्यायना शयात्, " योर्थज्ञ इत्सकलं भद्र मश्नुते " इति निरुक्त कृधास्का भिप्रायाच्च । तत्र पूर्वोक्तानां त्रयाणां करणादीनां निगदानान्चानुष्ठेयार्थं स्मारकत्व रूपं दृष्टं प्रयोजनम् । अन्येषां जप स्तुति रूपादि मन्त्राणान्चादृष्टं प्रयोजनम् । नियमजन्या दृष्टत्वंतु पूर्वत्राप्यस्ति ।

अत्रैका शङ्का तत्समाहितिश्च

ननु सर्वमेतत् श्रौत कर्मसु विनियुक्तेषु मन्त्रेषूप पद्यते, भाष्यकाराणां तादृङ् मन्त्रार्थ व्याख्यान दर्शनात् । स्मार्त कर्मसु विनियुक्त मन्त्रेषु तु काव्यवस्थेति चे दुच्यतेः- स्मार्तेष्वपि कर्मसु विनियुक्ता मन्त्रा स्तथाव्याख्येया यथा ते तत्र तत्रानुष्ठेयार्थं स्मारकतया सङ्गता उपपन्नाश्च भवेयुः । तथा मन्त्रार्थ व्याख्याने विनिगमकानिच , विनियोग बलं, प्रकरणानुरोधः, सूत्रकार प्रस्थानं, भाष्यकृतां तथा व्याख्यान प्रवृत्ति दर्शनं, श्रुतीनामविरोध्यनेकार्यत्वस्यालङ्कारत्वंचेति । तथाहिः- एकस्य मन्त्रस्यानेके विनियोगाः सम्भवन्तीत्येतद्विनियोग बलम् । उक्तन्च मुण्डकोपनिषदि - " मन्त्रेषु यानिकर्माण्यपश्यन् कवयस्तानि त्रेतायां बहुधा सन्ततानि " कवयो ऋषय इति ।

यथा एकस्या एव गायत्र्या बहवो विनियोगा: । जपादारभ्यानेका स्त्रान्ता बलातिबला विद्यायामपिच । अथ च एकस्यैव मधुवाता इतितृचस्याग्नि चयने दधि मधुघृतै: कूर्माभ्यान्जने तथा च मधुपर्के दधिमधु घृत सम्मिश्रण लक्षण मधुपर्क प्राशने विनियोग: । पुन: श्रीमन्थ कर्मणि सक्तुमन्थ प्राशने पूजासु मधुस्नाने च विनियोग: । यथावा अग्निचयने "काण्डात्काण्डात्०" इत्यस्य मन्त्रस्य दूर्वेष्टकोपधाने, पुनर्याज्ञवल्कीये ग्रहकल्पे राहोरावाहने, तथा च कात्यायनीये यजुर्विधाने ग्राम नगरादिषु जनमरणोपशमन कर्मणि दूर्वा प्रवालायुत होमे च विनियोग इति दिक् । यस्माद्विनियोग: पृथक् पृथक् तस्मात्तद्बलादेव मन्त्रार्थोऽपि पृथक्पृथगेव व्याख्येय इति । प्रकरण वशात् यच्छब्दार्थ नियमनं स प्रकरणानुरोध: । यत: प्रकरणमपि शब्दार्थस्य नियामकमस्ति । तदुक्तं वाक्यपदीये - संयोगो विप्रयोगश्च साहचर्यं विरोधिता । अर्थ: प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधि: ।। सामर्थ्यमौचिती देश: कालो व्यक्ति: स्वरादय: । शब्दार्थस्यानवच्छेदे विशेषस्मृति हेतव: ।। अत्र प्रकरणं नाम श्रोतृ वक्तृ बुद्धिस्थ विषय सन्निधानम् । यथा आथर्वणिके कर्मविशेषे "कनक समिद्भि:" इत्यत्र कनकं कृष्ण धत्तूरो नतु सुवर्णम् । यथावा पुंसवने - "कूर्मपित्तं चोपस्थे कृत्वा" इत्यत्र मृण्मय: शराव: कूर्मपित्तं नतु कच्छप प्राणि शरीरजं पित्तम् । तथा च - नान्दीश्राद्धे दक्षिणा विषये - यवमूल मार्द्रक मुक्तम् । तन्न यवसंज्ञक धान्यस्य मूलम् । इदमेवास्य तात्पर्यं यत् एकएव मन्त्रो विनियोग भेदाद्भिन्न प्रकरणे प्राप्नोति तदा स प्रकृत प्रकरणानुरोधेन ~~प्रकृत~~ प्राकरणिक विषयानुगुण्येन च व्याख्येयो नतु पाश्चात्य पद्धत्या वैदिक देवता शास्त्रवत् यथेच्छया ।

सूत्रकृता मेकस्य मन्त्रस्यानेकेषु कर्मसु या विनियोग करण प्रवृत्ति: सा सूत्रकार प्रस्थानम् । सूत्रकृता - एकएव मन्त्रो विभिन्न क्रियासु विनियुक्तो दृष्ट चर: । यथा पारस्कराचार्येण "युवासुवासा: परिवीत०" इत्ययं मन्त्र: उपनयने मेखला बन्धने, समावर्तने उष्णीष्ण शिरोवेष्टने, कलशस्थापने तस्य कण्ठे सूत्र वेष्टने च विनियुक्त: । यथावा- "सुपर्णोऽसि०" इति विकृति च्छन्दस्कोऽयं मन्त्र: श्रौते ग्नि चयने उख्याग्ने रभिमन्त्रणे स्मार्ते पुंसवन कर्मणि गर्भाभि मन्त्रणे च विनियुक्त: ।

अथ च " दधिक्राव्णो अकारिषं" मन्त्रोऽयमश्वमेधे ब्राह्मणे ऋत्विजां वाचने, स्मार्ते उपाकर्मणि दधि प्राशने च विनियुक्तः । एतादृक् स्थले योग विभागाश्रयणं कर्तव्यमिति विशेषः । यथा - दधि + क्राव्णः इति । तथैव " शन्नोदेवी रभिष्टये" इत्ययं मन्त्रः श्रौते प्रवर्ग्यस्यादावन्ते पठ्यमाने शान्त्यध्याये विनियुक्तः । स्मार्ते तु-शनैश्चरावाहने - होमे - मार्जने च विनियुक्तः । एतादृक् स्थलेषु अध्याहारादिना पेदितमंशं पूरयित्वा मन्त्रार्थो व्याख्येयः । न चात्र विनिगमना विरहोवाच्यः । उवटाचार्यैः शुक्लयजुर्वेद भाष्ये " इषेत्वा छिन्द्मि " इत्यत्र प्रदर्शितं चैतत् । नचाख्यातं विना वाक्यं किंचिद्विधेति इत्यध्याहारेणानुषङ्गेन वा वाक्य परिपूर्तिः कर्तव्याः । ननु अध्याहारानुषङ्गयोः को विशेषः ? उच्यते - लौकिक पदस्याहरणमध्याहारः । प्रागुक्तमन्त्रावयवस्याहरणमनुषङ्गः । अत्रागत पदमुपलक्षणं तेनान्यत्सुबन्तादि पदस्याप्यध्याहारानुषङ्गौ कर्तव्याविति ध्येयम् । उक्तन्च :-

कार्यौ योगविभागश्च अध्याहारानुषङ्गकौ । विनियोग बलात् क्वापि देवतान्तरकल्पनम् ।।
स्मार्तादौ तद्गुणत्वाय मन्त्रव्याख्यान आदरात् । भाष्यकृतां पदव्येषानुसर्तव्या बुधैः सदा ।।

ननु सर्वानुक्रम कारैस्तत्तन्मन्त्रस्य ऋषिच्छन्दो देवत विनियोगा स्तावन्नियम्य प्रतिपादिता स्तत्कथं ते परिवर्तिताभवेयुरितिचेन्न । तैः प्रायः श्रौतप्रकरणानुरोधेन ते भिहिताः । तत्र च पूर्वोक्त हेतुभि दैवता विनियोगौ - परिवर्तन सहौ । तदर्थमेवोप क्रमे यजुः सर्वानुक्रम कारैः " मन्त्रार्थं भूताग्न्यादि का हविर्भाजः स्तुतिभाजोवा नः शाखो खा शम्योपवेश कपालेध्मोलूखलादयश्च प्रतिमाभूताः " इति सामान्य तया देवता निर्देशः प्रत्यपादि । उवटाचार्यै रपि - " यस्यहि यत्र हविर्भाक्त्वं स्तुति भाक्त्वं वा विद्यते सा तत्र देवता नतु रूढया " इति देवता निर्देशः प्रत्यपादि सामान्यतया । नतु नियम्य विशेषतयेति । ऋषि च्छन्दसी न परिवृत्तिसहे । तयोः सर्वत्र समानत्वा द्यथा श्रुततया समन्वयाच्च । क्वचित् क्वचिच्च देवता परिवृत्तिं विना - उक्त हेतुभिर्मन्त्रेष्वर्थान्तरेण व्याख्यातेष्वपि तदसङ्गत्या पत्तेः । अतएव " यत्काम ऋषिर्यस्यां देवता य मार्थपत्य-मिच्छं स्तुतिं प्रयुंक्ते तद्देवतः स मन्त्रो भवति " इति मन्त्र देवता लक्षण परं निरुक्तं सङ्गच्छते । मन्त्रार्थं व्याख्यानकृद् भाष्य काराणामपि तत्तत्र तथा व्याख्यान प्रवृत्ति-र्दृश्यते ।

यथा- 'चत्वारिशृङ्गा' इति प्रसिद्धो मन्त्रो निरुक्त कृता यास्काचार्येण यज्ञ परतया व्याख्यात: । महा भाष्यकृता पतन्जलिना व्याकरण प्रक्रियया शव्द ब्रह्म परतया व्याख्यात: । पुराण टीका कारैरग्निपरतया व्याख्यातश्चेति । एवमेवान्येषां श्रौते विनियुक्तानां सतामपि पुन: स्मार्ते विनियुक्तानां मन्त्राणां मुरारि मिश्र, शत्रुघ्न, जयराम, गदाधर कालनाथ, नित्यानन्द (प्रयोगपारिजातकार:) प्रभृति प्राचीनावर्चीनानां तत्रतत्र तथा व्याख्यानदर्शनात् ।

अविरोध्यनेकार्थस्य श्रुतेरलङ्कारत्वमेव। यथा - वेदान्ते विभिन्ना: साम्प्रदायिका:, शाङ्करा रामानुजा- वाल्लभा - माध्वा- निम्बार्का- रामानन्दय:, शाक्ता इत्यादय आचार्या एकामेव श्रुतिमुपाम्य विभिन्नं स्वाभिप्रायमाविरकार्षु: । परन्च तत्सर्वमेकस्यैव ब्रह्मण: सर्वविध भावेन प्रपञ्चितत्वादविरोधतया सु सहत्वाद् भूषणं नतु दूषणम् । किन्च श्रुतावप्येत दभिज्ञापकं लिङ्गं दृश्यते । बृहदारण्यके :- दम-दान-दया इति द- द- द इति त्रिकोप दशके ब्राह्मणे त्रि: कृत्वोच्चरितस्यैकस्यैव दकारस्य बोद्धव्य व्यक्ति भेदात्स्व स्वभावानुरूपार्थ त्रितयस्योपदेश निदर्शनादनेकार्थत्वं श्रुतेरलंकार:। दयानन्द प्रभृतिभिर्दैशिकै: कीथादि वैदेशिकैश्च व्याख्यातो र्थस्तु सर्वथा व्याख्याधर्म-प्रतिज्ञासिद्धान्त - संस्कृतिमर्यादाहीनो मन: कल्पित:- परम्परा विशुद्धि रहित: शव्द प्रामाण्य बुद्धिभेदकत्वात्सर्वथा विपरीतत्वाच्च वेद प्रामाण्य निष्ठावद्भिर्वैदिकै: पण्डितैश्च समुपेक्षित: ।

अतो वैदिक देवता शास्त्रे कर्मार्थ ब्रह्मार्थ बोध ज्ञाना भावे देवता वर्णनं सर्वथा नुपयुक्तमेव । तज्ज्ञानार्थं किन्चिन्मन्त्रार्थमीमांसा कृता ।

इत्थं मन्त्रार्थ सरणिं विचार्य तेषां मन्त्राणां त्रिकालाबाधित प्रामाण्य प्रतिपादनाय वेदस्य पौरुषेयत्वापौरुषेयत्व विषये पि किन्चित्प्रतिपाद्यते ।

वेद: पौरुषेयो वा अपौरुषेय: ?

प्रथमं तावत् पूर्व पक्ष: प्रस्तूयते । वेद: पौरुषेय: कृतत्वात् घटवत् । उक्तन्च 'वेदांश्चैके सन्निकर्षं पुरुषाख्या:' । आनुपूर्वीरूप वेदानां सर्वथा नित्यत्वा संभवात् शाकल तैत्तिरीय- याज्ञवल्क्यादि समाख्यया तत्कर्तृकत्वनिश्चयाच्च पौरुषेयत्वं सिद्धम् । पुरुषे तस्यापूर्णज्ञानात् अज्ञान विस्मृति प्रलपनाच्च दोष सम्बन्ध सम्भावनय

नित्यत्व रूप प्रमाण्यं न भवितुं शक्यते । तथा च वेदः प्रागभाव प्रतियोगिता वच्छेदक धर्मवान् वाक्यत्वात् रघुवंशादिवत् इत्यनुमानेन पौरुषेयत्वम् । न च सामान्य धर्मस्य प्रागभाव प्रतियोगितानवच्छेदक त्वेन वेदत्वस्यातथात्वादसिद्धिरिति वाच्यम् । वेदत्वस्याताादृशत्वेपि इदानींतन वेदत्वादीनां तदवच्छेदक तया नासिद्धिः । अन्यथा घटादीनामप्यपौरुषेयत्व प्रसङ्गः । वस्तुतस्तु वेदत्वं प्रागभाव प्रतियोगिता वच्छेदकं कार्यधर्मं त्वात् घटत्वव दित्यनुमानेन वेदत्वस्यापि तथात्वात् । अतः पौरुषेयत्वम् । एवमेव शाकलादिसमाख्या, बबरः प्रावाहणिरकामयत इत्याद्यनित्य संयोगः, सन्निकृष्टकाला वेदा इदानींतना इत्युपाद्यम्, त्रयोवेदा अजायन्त , अग्नेऋग्वेदो वायोर्युजुर्वेद इत्याद्युत्पत्ति वाक्य दर्शनम्, आसवादि पानेन प्रमत्तानां प्राचीनार्याणां पुरातन तमानि गोवाहिकादि ग्राम्य गीतानि यत्यांग्लाणा मनुमानम् । अतः स्वतः प्रामाण्या भावत् पूर्ववर्ति प्रबलैस्तर्कै वेदः पौरुषेय एवेति पूर्वपक्षः ।

अथोत्तरपक्षेण वेदापौरुषेयत्वं साधयिष्यते।वेदः अपौरुषेयः, अस्मर्यमाण कर्तृकत्वात् आकाशवत् । शब्दः आकाशगुणः । आकाशादेव वाय्वादीनामुत्पत्तिः । अतः आकाशस्य नित्यत्वाच्छब्दराशेर्वस्यापि नित्यत्वं सिध्यति। तथा च पूर्वोक्तानुमानस्यं वेदत्वं न प्रागभाव प्रतियोगितावच्छेदकं सामान्य धर्मत्वादित्यनुमानेन सत्प्रतिपक्षितत्वात् । तथा च वेदः प्रागभाव प्रतियोगितावच्छेदक धर्मा भाववानस्मर्यमाण कर्तृकत्वादात्मवदित्यन्वयिना अस्मर्यमाण कर्तृक वाक्यत्वादिति व्यतिरेकिणा च सत्प्रतिपक्षितम् । वेदशून्य कालाभावेन वेद प्रागभावा सिद्धेश्च । यतोहि पूर्वकालो न वेदशून्यः कालत्वा द्वर्तमान कालवत् । अतः पूर्व कालीनं वेदाध्ययनं गुर्वध्ययन पूर्वकं वेदाध्ययनत्वादिदानीं तन वेदाध्ययनवत् । तथा च लौकिकानां ग्रन्थानां कर्तारः आदौमध्ये न्तेवा अमुकेन कृतोयं ग्रन्थइति प्रतिज्ञापयन्ति तथा वेदस्य कर्तृत्व ज्ञापको मन्त्रो नास्त्येव, अपितु तस्मैनून मभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम् ।। इति ऋग्वेदिकीश्रुतिरेव स्वस्य नित्यत्वं विरूपत्वं शब्दत्व मपौरुषेयत्वन्च ज्ञापयति । तथा च ब्रह्म (वेदः) स्वयंम्वभ्यानर्षत् त ऋषयो भवं स्तदृषीणामृषित्वमिति श्रुतेः ।

तथा च स्मृति: - स्वयंभूरेण भगवान्वेदोगीतस्त्वयापुरा । शिवाद्याऋषि पर्यन्ता: स्मर्तारो स्य न कारका:।। काठकादि समाख्यातु श्रुतिस्मृति विरोधात्प्रवचन निमित्तत्वेनोपपादनीया । 'अग्नेर्ऋग्वेद:' इत्यादि श्रुति रप्यग्नि शब्देन ज्ञापित इति व्याख्येया । अनित्य संयोगो पि प्रवाह नित्यता मादायोप पादनीय: । यत्थं पूर्वपक्षीयाणां तर्काणां समाधानेन वेदस्यापौरुषेयत्वं सिद्धम् । इयं सिद्धि: निर्णयसागर मुद्रणालये मुद्रिताम् ऋक्संहिताभूमिकायां प्रतिपादिता । इति सायणाचार्य गागाभट्ट प्रभृतीनां वेदा पौरुषेयत्व विचार: ।

अथ नूतनै स्तर्कै रपौरुषेयत्वं प्रतिपाद्यते । वेद: सामर्थ्यवान् शब्दसमूह: । भगवता पतन्जलिना महाभाष्ये पस्पशान्हिके शब्द: इत्थं व्याख्यात: । यथा - 'प्रतीत पदार्थक: लोके ध्वनि: शब्द इत्युच्यते' । शब्दोनाम नादरूप: सार्थोध्वनि: । अर्थात् शब्द विचारोनाम नादस्यैव विचार इत्यवगम्यते । आधुनिकै र्विज्ञानाचार्यैरपि जातोमूलस्वरूपं ध्वनिरेव स्वी क्रियते । परन्च साधारणै पुरुषै: प्रयत्नशतैरपि सजगन्मूल ध्वनि: श्रोतुं न शक्यते । वातावरणेनैव ध्वनि: श्रूयते । श्राव्या ध्वनि लहर्य: स्थूल स्वरूपा: । ताभिर्यदा वातावरणं कम्पते तदा तदाधारभूत द्रव्यमपि कम्पते एव । परन्च तासां सूक्ष्म लहरीनां संवेदन मस्माकमिन्द्रियैर्न ग्रहीतुं शक्यते । आधुनिकैर्यन्त्रैर्विशिष्ट लहरीणां प्रकाशात्मकतया नुभूति: साधिता स्ति । यद्यस्माभि: श्रोत्र चक्षु रिन्द्रिययो: शक्ति सामर्थ्यं विशिष्ट योग प्रक्रियया परिवर्धित तर्हि एकस्या एव लहर्या: सघनत्वेन भासमाना वस्तु: ध्वनिरूपेण श्रोतुं वर्णरूपेण द्रष्टुमपि शक्येत । अथ च यदि पन्चानामपीन्द्रियाणां शक्तिवर्धनं तुल्यबलं कृतं स्यात्तर्हि एकस्यैवपदार्थस्य प्रतीति: शब्द स्पर्श रूप-रस-गन्धादि पन्चभिरपि प्रकारैर्ग्रहीतुं शक्यते । तदुद्देश्येनैव भगवता श्रीकृष्णेन अर्जुनाय 'दिव्यंददामि ते चक्षु:' इति यौगिकं यान्त्रिकन्च वाक्यं प्रोक्तम् । इत्थं सर्वविधावस्थासु यद्यत् व्यक्तं वस्तुजातं वर्तते तस्यतस्य मूलभूताशब्दात्मिका प्रतीतिरस्त्येव । अथच सो यं शब्द: (नादोवा) एव तस्य बीजम् । सशब्द: ओंकार-स्वरूपो वेद एव । एवं सर्वेषां वस्तुजातानां पदार्थाना मुक्तं स्वरूपं नित्यं, स्वयंभु, अपौरुषेयन्च वर्तते , न को पि तस्य बीजस्य कर्ता ।

प्रकृतिभूत चण्ड गतिमान शक्ति प्रवाह (इलेक्ट्रान) पदार्थस्य संशोधनं येनकृतं स एव तस्य पदार्थस्य कर्ता इति कथनं यथा हास्यास्पदं स्यात्तथैव वेदस्य कर्तृत्व विषयेज्ञातव्यम् । इदं शब्दमयं विश्वं यैर्ऋषिभिर्योगेन तपसा दिव्यदृष्टिं सम्पाद्य ज्ञातं, ध्वनि लहरीणां क्रमश्चावगत:, तैरेव वेदानिर्मित इति कथं भवेत्? अस्मिन्विषये सर जेम्स जीन्स शामण्य महोदयै: स्वीये मिस्टेरियस यूनिवर्स ग्रन्थे तथा च न्यायाधीशै: श्री वुड्राफ शार्मण्य महोदयै: शक्ति एवं ज्ञाक ग्रन्थे पी०पी० ४६६-४६८ पत्रे ष्वतीव सुष्ठुतया वैज्ञानिक पद्धत्या प्रपन्चितो यमपौरुषेय वाद: । तथा च विश्व विश्रुतै: भारतीयवैज्ञानिकै: श्री चन्द्रशेखर वि० रमण महोदयै: स्थापिते " रमण स्पेक्ट्रन " सिद्धान्ते वर्णानां ध्वनीनान्च परस्पर माश्रयाश्रयित्वं साधित मस्ति । १७-४-१९३१ दिनांके हापकिन्स विश्वविद्यालय प्राध्यापकै: श्री डा० डी० एच अंड्र्यूज महाभागै: कोलम्बिया नभोवाण्या श्री रमण सिद्धान्तानुसारेण उपहृतसुरासवात् अन्येभ्यो रासायनिक द्रव्येभ्यश्च पदार्थमूलभूत बीजद्रव्य सङ्गीतं श्रावितम् । ते रुक्तं यत् रमणसिद्धान्त: प्रतिपादयति यथा - जलम्, एकं वाद्यं वर्तते, तद्वीणावाद्यमिव विशिष्टं संगीतमाविष्करोति । वस्तुतस्तु तस्य संगीतप्रत्ययो न ध्वनि: अपितु प्रकाश: । डा० अंड्र्यूज महोदयै: जलस्य सूक्ष्मांश:, ग्रेन अल्कोव्हल (धान्यासव) वुड अल्कोव्हल (वनस्पत्यासव) क्लोरोफार्म (संज्ञानाशक रसायनम्) सलफ्यूरिक ऐसिड इत्यादि पदार्थानां क्रमशो नादा: श्राविता: । इत्थमाधुनिकं विज्ञानमेव शनै: शनैर्वेदपौरुषेयत्वं ज्ञापयति । परन्चास्य विज्ञानस्य चान्चल्य मुररीकृत्य मन्त्रद्रष्टॄनां त्रिकाला बाधितो यमपौरुषेय सिद्धान्तो न विस्मर्तव्य: । यै: पूर्वजै: स्वयम्भुवो नित्य वेदस्य तुर्यरूपावस्थायां ज्ञानं सम्पादितं ते ऋषय: सन्जाता: । (ब्रह्मस्वयंम्वभ्यानर्षत्तऋषयो भवन्) । ये दृश्यानुविद्ध समाध्यवस्थायां वेदो वर्णरूपेण प्रत्यक्षीकृत स्ते द्रष्टार: । यै: शब्दानुविद्धसमाध्यां श्रुतिगोचरीकृतस्तैरियं श्रुतिरित्युक्तम् । यैस्तावत् यथा श्रुतं शिष्येभ्य: प्रोक्तं ते मन्त्र कर्तार इति लोके प्रसिद्धि: । इत्थं वेदोनाम विश्वस्यादि द्रव्य कारणरूपध्वनि लहरीनां शब्दानां संघ: । ता एव लहर्यो वर्तमानानां सर्वेषां व्यक्त पदार्थानां मूलम् । उक्तन्च - चातुर्वर्ण्यं त्रयोलोकाश्चत्वारश्चाश्रमा: पृथक् । भूतं भव्यं भविष्यच्च सर्वं वेदात्प्रसिध्यति ।।(मनु:) अनेन सिद्धं यत् वेद: सनातन:, नित्य:, न केवलं श्रद्धा मात्रम्, अपितु वैज्ञानिक शास्त्रीय संकेता पि वर्तते । अतएव स आपौरुषेय एव ।

अन्यदप्येकं नवीनतमं वेदापौरुषेयत्वविषयक मनुमानं पद्मभूषण पण्डितराज श्री राजेश्वर शास्त्रि द्रविड महोदयैरुपनिबद्धं, तदास्तिक नास्तिकोभय सम्मत मिति विशेष: । तद्यथा :-

' स्वाध्यायो ध्येतव्य' इत्यध्ययन विधिवाक्य प्रयोज्य शाव्द भावना हेतुकेष्ट साधनत्वानुमिति रययावद्धर्मानुष्ठातृनिष्ठा, स्वसजातीयोच्चारण सापेक्षोच्चारणकानु पूर्विक - शव्द वृत्ति शाव्द भावना हेतुका, प्रभुशक्ति समृद्ध पुरुषसमवेत शाव्द भावना हेतु ज्ञाना जन्यत्वेसति शव्दाजन्य यथार्थ ज्ञानवत्पुरुष समवेत प्रकृतेष्ट साधनता विषयक ज्ञानजन्य- शव्दवृत्ति शाव्द भावना हेतु ज्ञाना जन्यत्वेसति, शाव्द भावना हेतु ज्ञान जन्यत्वात् । आयुर्वेदीय रसायनाद्यनुष्ठानगत प्रायश्चिताधीन पापनाशे इष्ट साधनत्वा नुमिति रेतावत्काल पर्यन्तं बौद्धादिष्वपि समवेता, शाव्द भावना ज्ञान मात्र जन्या, न स्व विषयक यथार्थ ज्ञानवत्पुरुष समवेत यथार्थ ज्ञानजन्य शाव्द भावनाज्ञानजन्या, अलौकिकार्थत्वेसति यथार्थ प्रवृत्ति जनकत्वात् । न प्रभुशक्ति समृद्ध निष्ठ शाव्द भावना ज्ञानजन्यास्वेच्छाधीन प्रवृत्ति जनकत्वात् । एतेन एतावत्काल पर्यन्तं पूर्व जायमानायामनुमितौ स्व सजातीयोच्चारण सापेक्षोच्चारणकानुपूर्विक शव्दवृत्ति शाव्द भावना जन्यत्वं सिद्धम् । इदानीं तनानामनुमित्यभावे पि न क्षति: । इदानीं तनो च्चारणस्य स्वसजातीयो च्चारण सापेक्षताया: प्रत्यक्ष सिद्धत्वादिति निष्कर्ष: ।

इत्थं बहुभिस्तर्क शुद्धोपायैर्वेदस्यापौरुषेयत्वं संसाध्य वेदस्य लक्षणं, विषय:, प्रयोजनम् , सम्बन्ध: , अधिकारिणश्च वक्ष्यन्ते ।

वेदस्य लक्षणम्

इष्ट प्राप्त्यनिष्ट परिहारयो रलौकिक मपायं यो वेदयति स वेद: । अत्रालौकिक पदेन प्रत्यक्षानुमाने व्यावर्त्यते । अनुभूयमान स्रक् चन्दन वनितादेरिष्ट प्राप्ति हेतुत्वमौषधादे रनिष्ट परिहार हेतुत्वन्च प्रत्यक्षात: सिद्धम् । स्वेनानु भविष्यमाणस्य पुरुषान्तरगतस्य च तथात्वमनुमान गम्यम् । एवं तर्हि भाविजन्मगत मप्यनुमान गम्य मिति चेन्न । तद्विशेषस्यानवगमात् । नह्लु ज्योतिष्टोमादिरिष्ट प्राप्ति हेतु: कलन्च भक्षण वर्जनादि रनिष्टपरिहारहेतु रित्यर्थं वेद व्यतिरेकेणानुमान सहस्रेणाप्यव गन्तुं शक्नोति । तस्मादलौकिकोपाय बोधकोवेद इति लक्षणस्य

नातिव्याप्तिः । अतएवोक्तं :-

प्रत्यक्षेणानुमित्यावायस्तूपायो न बुध्यते । एवं विदन्ति वेदेन तस्माद्वेदस्य वेदता ।। स एवालौकिक उपायो वेदस्य विषयः । तदुपायस्य बोध एव वेद पठनस्य प्रयोजनम्। तद्बोध जिज्ञासुरेव तस्याधिकारी । तेन सह वेदस्योपकार्योपकारक भावः सम्बन्धः । इति वेद लक्षणादिकं विचार्य देवता स्तुतौ कर्मणि च ऋष्यादि व देवता सम्बन्धिः स्थान-नाम-भक्तीना मनुसन्धानं विधीयते ।

देवतास्थानम- नामानि- भक्तिः

स्थानं नामानि भक्तीश्च देवतायाः स्तुतौ स्तुतौ ।सम्पादयन्नुपेक्षेतयांकाचिदिह- सम्पदम् ।। इति बृहद्देवतायाम् :- श्लोके स्तुतौ इति पदस्यावृत्या- सूक्त भाजो- हविर्भाज - ऋग्भाजश्च भूयिष्ठाः , काश्चिन्निपातभाज इति चतुर्विधं देवतात्वु मुपपद्यते । तत्र प्रातः सवनं वसन्तो गायत्री त्रिवृत्स्तोमो रथन्तरं साम येच देवगणाः समाम्नाताः प्रथमे स्थाने इत्यग्नि सम्पत्तु, माध्यन्दिनं सवनं ग्रीष्मस्त्रिष्टुप् पन्चदशस्तोमोबृहत्साम ये च देवगणाः समाम्नाता मध्यमे स्थाने इतीन्द्र सम्पत्तु, तृतीय सवनं वर्षाजाती सप्तदशस्तोमो वैराजसाम येच देवगणाः समाम्नाता उत्तमे स्थाने इत्यादित्य सम्पत्तु यां कांचित्सम्पदमुपेक्ष्यापि स्थान- भक्ति-रूप-सम्पत्ति सम्पादन बोधकं सम्पादयन्नित्यनेन च तत्तद्देवता स्थानादीनामनुसन्धानस्य स्तुत्यादि कर्ममात्रे आवश्यकत्वं बोध्यते । अत्र स्तुतिर्नाम गुणि निष्ठ गुणानुकीर्तनम् । बृहद्देवता- यान्तु :- स्तुतिस्तु नाम्ना रूपेण कर्मणा बान्धवेन च इत्युक्तम् । ननु स्तुतौ स्तुतौ इत्युक्त्या स्तुतिमात्रे स्थानाद्युत्कीर्तनस्यावश्यक त्वेपि कर्ममात्रे स्थानाद्युत्कीर्तनस्य नोपयोगइति चेन्न । तत्रैवाग्रे उक्तम् - विभागमिममेतेषां विभूति स्थान सम्भवम् । सम्धाविज्ञाय मन्त्रेषु तन्तुकर्मसु योजयेत् ।। अध्यायपन्नधीयानो मन्त्रं चैवान कीर्तयन् । स्थानं सालोक्य सायुज्य मेतेषामेव गच्छति ।।इत्युक्त्या कर्ममात्रे स्थानाद्युत्कीर्तनस्य फल कथनेन स्तुतिपदस्य कर्ममात्रोप लक्षणत्वेन कर्ममात्रे स्थानाद्युत्कीर्तनस्या वश्यकत्वात् इत्थं स्तुतावित्यस्योपलक्षणत्वं सिद्धम् । अथ च स्थानादीनामनुत्कीर्तने फलाभाव उच्यते:- नहिकश्चिदविज्ञाय याथातथ्येन देवतम् । लौक्यानां वैदिकानांच कर्मणां फलमश्नुते ।। अन्यच्च- तत्र तत्र यथावच्च मन्त्रान्कर्मसु योजयेत । देवतायाः परिज्ञाना- चद्धि कर्मसमृध्यते ।। अनेन प्रकारेण देवतोत्कीर्तनेनैव फलसिद्धिरित्यर्थः ।

तासां देवतानां गणत्रयत्वम्

एकएव महानात्मा मूलभूता देवता, तस्या अग्नि-वायु-सूर्य रूपास्तिस्रएवाङ्ग भूता देवता: क्रमेण पृथिव्यन्तरिक्ष द्यु स्थाना स्तासां त्रिगुणा मितरा: सर्वदेवता विभूतय: सन्ति । उक्तञ्च सर्वानुक्रम वृत्तिकार सङ्ग्रह श्लोकेषु:-
अग्न्यादि देव पत्न्यन्तं देवताकाण्डमुच्यते । अग्न्यादि देवीऊर्जाहुत्यन्त: क्षितितो-गण: ।। वाय्वादयो भगान्ता:स्यु रन्तरिक्षस्थ देवता:। सूर्यादि देव पत्न्यन्ताद्युस्थाना देवता इति ।। अत्र प्रथमो ग्निगण: पृथिवीस्थानो ग्निभक्ति: । वाय्वादि भगान्तो वायुगणो न्तरिक्षस्थानो वायुभक्ति: । सूर्यादि देव पत्न्यन्त: सूर्यगणो द्युस्थान: सूर्य भक्ति: । इत्थं बृहद्देवता निरुक्त सर्वानुक्रमणी, तस्या: षड्गुरु शिष्यभाष्योक्ताना मेकवाक्यत्वम न पक्षान्तर प्राप्ति: । यत्तु सर्वानुक्रमण्याम् `एकैव वा महानात्मा` इत्यत्र वाशब्दस्तस्य पक्षान्तर निरासार्थत्व भाष्य कारेणोक्तत्वात् । एतद्गणत्रय बहिर्भूतानामितर देवतानान्तु समासासमासोभय निर्दिष्ट देवताके मन्त्रे याभि: सह या देवता स्तूयते तस्या: प्राधान्यात् प्रथमोपात्तत्वाच्च तदनुरोधेन संस्तविक देवतानां स्थानादि निर्णयो भवति । उक्तञ्च निरुक्ते:- अथास्य संस्तविका देवा इन्द्र: सोमो वरुण: पर्जन्य ऋतव आग्नावैष्णवं हविर्न त्वृक्संस्तविकी दशतयीषु विद्यते थाप्याग्नापौष्णं हविर्नतु संस्तवस्तत्रैतां विभक्तिस्तुतिमृचमुदाहरन्ति । अस्याय मर्थ: -
` इन्द्र: सोम०` इत्यादि मन्त्रा: संस्तवोदाहरणम् । अग्ने: पूर्व निपाता द्वेवताद्वन्द्वे मुख्यता । `अग्नइन्द्रश्चदाशुषो दुरोणे०` इति मन्त्रे इन्द्रेण सहाग्नि स्तूयते । `अग्नीषोमाविमंसुमे०` इति मन्त्रे सोमेन सह संस्तव: । `त्वन्नो अग्ने वरुणस्य विद्वान्०` इति मन्त्रे वरुणेन सह संस्तव: । `अग्नीपर्जन्यावववतं धियं मे०` इति मन्त्रे पर्जन्येन सहसंस्तव: । ` अग्ने देवां इहावह० ` इति मन्त्रे ऋतुभि: सह संस्तव: । अथैतान्यादित्य भक्तीनीत्यादि यच्च किञ्चित् प्रवल्हित मादित्य कर्मैव त च्चन्द्रमसा वायुना संवत्सरेणेति संस्तव: ।
इति संस्तविक देवतानां स्थानादि निर्णयो विचारित: ।

अनुक्त देवतानां स्थानानि

निघण्टु- नैगम- दैवत काण्ड गणत्रय बहिर्भूता देवता: स्वातन्त्र्येण स्तूयन्ते

प्रसिद्धम्, नान्ये यागाः । ते तु तत्तदिष्टयन्तर्गता एव । तेषां फलादीन्यपि विस्तरेणोल्लिखितानि । अनन्तरं स्मार्तकर्मसु यत्र कुत्रापि विश्वेदेव सम्बन्ध आसीत्तमनुसन्धाय काम्य प्रयोगा पि ऋग्विधान मनुसृत्य शोधिताः । चतुर्ष्वपि वेदेषु पन्च सूनादोष निवृत्त्यर्थं प्रत्यहं द्विवारं क्रियमाणः पन्च महायाज्ञात्मको वैश्वदेव यागः पन्च चित्रैः सह प्रस्तुतः । इत्थमनुसन्धानं कृत्वा विश्वेषां देवानां मधि यज्ञात्मकम्, आध्यात्मिकन्च रूपं सचित्रं सप्रमाणं प्रदर्श्यान्तिमे प्रकरणे एतेषां भौतिकं रूपं जलविद्युदुत्पत्त्यात्मकं विविच्य प्रमाण चतुष्टयेन संसाध्य कथं तैर्विश्वेदेवैर्विश्वकल्याणं प्रतिदानं साध्यते इत्युपस्थापितम् । यतोहि प्रबन्धोक्त प्रकरणेषु तत्तत्प्रसाङ्गानुसारं विस्तरशो वर्णितमेव तथापि विश्वेदेवात्मकः किन्चिद्विचारः स्वतन्त्र रूपेण भूमिकायामुपस्थाप्यते ।

विश्वेदेवाः सम्बद्धो वैदिकः पक्षः

उपनिषदि यमेन नचिकेतो नामक ऋषि पुत्रायाग्नि विद्या प्रदत्ता इति कथानकमुक्तम् । पुराणेष्वप्यस्याः कथायाः साधुविस्तरो वलोक्यते । तस्या विद्याया अभ्यासे केवलाया अग्नि देवतायाः कृत्स्नः परिचय आवश्यक एव । तदर्थं यावत्पर्यन्तमग्निदेवतायाः सर्वे मन्त्रा न सङ्गृह्यन्ते तावदियं विद्या अपूर्णा एव स्यात् । अतः सर्ववेद गतान्यग्नि सूक्तानि स्वतन्त्र रूपेण सङ्गृह्यैवाग्निविद्यायाः (फायरालाजी) परिचयः प्राप्स्यते । सो ग्नि परिचय एव देवता शास्त्रस्य (मैथालाजी) प्राथमिकाधारः । सैव व्यवस्था देवतानामन्यासामपि । तथैव विश्वेषां देवानाम् । अस्य शास्त्रस्याद्यः प्रणेता यमः । पश्चादन्ये बहव ऋषयः, निरुक्तकारा, भाष्यकारा, बृहद्देवता कारः, सर्वानुक्रमणीकारः, मन्त्र संहिता-देवतसंहिताकाराश्चेति ।

वैश्वदेव शास्त्रस्याद्यः प्रणेता मैत्रावरुणिर्वसिष्ठः , ततो मधुच्छन्दः प्रभृतयः । एभिरेव विश्वेषां देवानां रूपचतुष्टयं प्रतिपाद्य सर्वत्र विश्वेषां देवानां वासो नु लक्षि सर्वमिदं जगद्विश्वे देवात्मक मिति प्रतिज्ञातम् । तां प्रतिज्ञामनुलक्ष्य कानिचित् श्रुति वाक्यानि प्रस्तूयन्ते ।

विविध रूपा विश्वेदेवाः

बृहस्पतिर्विश्वैर्देवै रुदक्रामत । (ऐ०ब्रा० १-२४) वैश्वदेवं तृतीय सवनम् । (ऐ० ब्रा० ६-१५) अथयदेनमेकंसन्तं बहुधा विहरन्ति तदस्य वैश्वदेवं रूपम् (ऐ०ब्रा० ३-४) एनमुदीच्यां दिशि विश्वेदेवा अभ्यषिन्चन्वैराज्याय । (ऐ० ब्रा० ८-१४) वैश्वदेवोहि वैश्यः (तै० ब्रा० २-७-२-२) वैश्वदेव्योवै प्रजाः । (तै० ब्रा० १-६-२-५) वैश्व देवो वा अश्वः । (तै० ब्रा० ३-६-२-४) वैश्वदेवमन्त्रम् । (तै०ब्रा० १-६-१-१०) विश्वेषां वा एतद्देवानां रूपं यत्करम्भाः।(तै० ब्रा० ३-८-१४-४) विश्वेदेवा देवानां यशस्तिमाः । तै० ब्रा० ३-८-७-२) रश्मयोह्यस्य विश्वेदेवाः । (श०ब्रा० ३-६-२-६) तल्व ऋतवो विश्वेदेवाः । (श० ब्रा० ७-१-१-४३) इन्द्राग्नी वैविश्वेदेवाः।२,४,४,१३। श्रोत्रं विश्वेदेवाः (श० ब्रा० ३-२-२-१३) स विश्वान्देवानसृजत तान दिद्गूपाद-धात् ।(श० ब्रा० ६-१-२-६)एतद्वै विश्वेदेवा वैश्वानराः । (श०ब्रा० ६-५-२-६) तस्य (प्रजापतेः) विश्वेदेवाः पुत्राः ।(श०ब्रा० ६-३-१-१७) विशो विश्वेदेवाः । (श०ब्रा० २-४-३-६) सर्वमिदं विश्वेदेवाः । (श०ब्रा० ३-६-१-१४) अनन्तावै विश्वे देवाः (श०ब्रा० १४-६-१-११) एतेवै सर्वे देवा यद्विश्वेदेवाः। कौ० ब्रा० ४-१४-५-२) पशवो वै वैश्वदेवम्। (कौ० ब्रा० १६-३) ता शिउ विश्वेदेवाः((जै० ब्रा० २-२-४) वैश्वदेवी वै गौः । (गौ० ब्रा० उ० ३-६) विश्वेदेवा एव सर्वम् । (गौ० ब्रा०पू० ~~५~~ ५-१५) एभिः श्रुतिवाक्यैर्विश्वेषांदेवानां विविधरूपाणि परिलक्ष्यन्ते । नेयमेकादेवता न मिथुनदेवता। अपितु समानार्थकानि विश्वेदेवाः, सर्वेदेवाः, नानादेवताः, वैश्वानराः, बहुदेवत्यं, लिंगोक्ता देवता इति पदानि । यस्यामृचिव्यधिका देवताः स्तूयन्ते साऋग वैश्वदेवी भवति । सेव सूक्तस्यापिव्यवस्था । यथा- इन्द्रं मित्रं वरुणमग्नि मूतये मारुतं शर्धो अदितिं हवामहे । अस्मिन्मन्त्राधें षड्देवताः सन्ति । अतो यं न नव देवतात्मकोमन्त्रः, अपितु वैश्वदेविकइत्युच्यते । यत्र "देवासः" इतिपदं तत्रापि विश्वेदेवा एव । यथा- "येदेवास इहस्थन:०" इति ऋङ्मन्त्रस्य विश्वेदेवा एव देवताः। एतासां मन्त्रोक्तानां लिङ्गोक्तानां नानादेवतानान्च मन्त्रेषु साम्यमपि नास्ति। केवलं व्यधिकत्वेनैवसाम्यम् । ब्राह्मण वाक्येषुयत "सर्वेदेवाः" इति पदं वर्तते तेन संघ रूपेण सर्वासां देवतानां ग्रहणं भवति । देवता अपि संघी भूया सुरान्पराजयन्ति

लोक कल्याणान्वसाधयन्ति तर्हि मनुष्या अपि संघ कार्यं कुर्वन्तीति किमाश्चर्यम् ? यावन्तो देवगणा एते सर्वे देवता संघा एव । यथा - मरुत:, ऋभव:, वसव:, रुद्रा:, आदित्या:, इत्यादय: । एते सर्वे लघुरूपा एकदेशिकाश्च। विश्वेदेवा: संघोयं सार्वदेशिक: त्रिलोकव्याप्त: केन्द्र रूपश्च । अस्मिन्संघे सर्वे लघुरूपा: संघा अन्तर्भूता: सन्ति । परन्च कार्यवशाद्यावन्तो देवा: (संघस्था:) आहूयन्ते सा संख्या तस्मिन्कार्ये विश्वेषां देवानां भवति । यथा -' पत्नीवतस्त्रिंशतंत्रींश्चदेवाननुष्वधमावह मादयस्व' (ऋ०३-६-६) अत्र ३३ संख्या दृश्यते । ते अष्टौवसव एकादशरुद्रा द्वादशादित्या प्रजापतिश्च वषट् - कारश्चेति । अस्या: संख्याया बहुवारमुल्लेखो वेद वाङ्मये समुपलभ्यते । तत्र प्रजापति वषट्कार विषये पि विकल्प: , वसुरुद्रादित्य विषये पि च । यथा-' येस्थ त्रयश्च त्रिंशच्च । मनोर्देवायज्ञियास: ।' (ऋ० ८-३०-२) अथ च-' येदेवासो दिव्येका दशस्थ पृथिव्यामध्येका दशस्थ । अप्सुक्षितो महिनैकादशस्थ तदेवासो यज्ञमिमं जुषध्वम्' (ऋ० १-१३६-११) एते प्रकृतिरूपा:, प्रकृति यागं सम्पाद्यान्न जलादिकं प्रयच्छन्ति । ऐतरेय ब्राह्मणे' योवा अग्निहोत्रं षोडशकलं पशुषु प्रतिष्ठितम्' इतिखण्डे १६ संख्या उक्ता । तस्यान्वेषणं सचित्रं प्रबन्धे प्रदर्शितमेव । १३ संख्याया उल्लेखस्तु केवलं हरिवंशोप पुराणे एव दृश्यते । यथा -' आत्मार्थे चासृजत पुत्रान् लोक कर्तॄन् पितामह:। विश्वे प्रजानां पतयो येभ्यो लोका विनि:सृता: ।। दक्षं मरीचि मन्त्रिन्च पुलस्त्यं पुलहं क्रतुम् । वसिष्ठं गोतमन्चैवभृगुमङ्गिरसं मनुम् ।। अथर्वभुताइत्येते ख्याताश्चैव महर्षय: त्रयोदश श्रुतायेषां वंशावे सम्प्रतिष्ठिता: ।। इति । अतो विश्वेदेवास्त्रयोदश इत्युच्यते। जटाधरस्मृतौ- दशसंख्याप्रोक्ता । ते आध्यात्मिक स्वरूपा: । ध्यान धारणायां कुण्डलिनी जागरणे न शरीरस्थ चक्रान् द्वादश च व्याप्यात्मरूपतां भजन्ते । अस्यापि सचित्रं वर्णनं प्रबन्धे कृतमस्ति । उक्तन्च जटाधरेण- वसवश्चाष्ट संख्याका रुद्रा एकादश स्मृता: । आदित्या द्वादशप्रोक्ता विश्वेदेवा दशस्मृता: ।। इति । वन्हि पुराणे गणभेद नामाध्याये तेषा नामानि प्राप्तानि । यथा - क्रतुर्दक्षो वसु: सत्य: काम: कालस्तथाध्वनि: । रोचकश्चाद्रयश्चैव तथाचान्ये पुरूरवा: ।। विश्वेदेवा भवन्त्येते दश सर्वत्र पूजिता: ।। इति । सामवेदस्य दैवत ब्राह्मणे - मित्र विन्देष्टयान्च दश संख्याएव प्रोक्ता। परन्चोभय श्रुत्यो रपि नामभेदो वर्तते एव ।

यथा मित्रविन्दायामिष्ट्यां दशसंख्याका विश्वेदेवा: । अग्नि:-सोमो-वरुणो मित्र-इन्द्रो- बृहस्पति:-सविता-पूषा - सरस्वती- त्वष्टा - इत्येक प्रदाना: । अन्यस्यामृचि विश्वेषां देवानां संख्या ३३३९ उक्ता वर्तते । ते देवा: संघीभूयाग्निं भजन्ते । यथा - " त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्चदेवा नवचा सपर्यन् । औक्षान्घृतै रस्तृणन् बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ।। (ऋ० ३-९-९) इत्थं मूलभूता ३३ संख्या ३३ कोटि परिमितां वृद्धिंयाति । पुराणेष्वपि ३३ कोटि देवतानां संख्या बादरायणेनान्विष्य प्रति पादिता वर्तते । मानव शरीरे पि ३३ कोटि संख्याका अणुरूपाजीवमात्रा: (केल्स) सन्ति । अयमेव चेतन जीवस्य सूक्ष्मतम: पिण्ड: । सूक्ष्मतमे प्रतिपिण्डे विश्वजातस्य लोक लोकान्तरांशा विराजन्ते, अथच ते वर्ण विभाजक यन्त्रेण (स्पेक्ट्रम्) यौगिक दिव्य दृष्टयावा द्रष्टुं शक्यन्ते । अनेन पिण्ड ब्रह्माण्डयोरैक्य विषयको वैदिक सिद्धान्त: विज्ञानाधारेणापि सिद्धा भवति । एते अणु रूपांशा एव विश्वेदेवा: । अतएव मानव शरीरं गो शरीरन्च वैश्वदेविकमित्युच्यते । यथा - एतद्वै विश्वेदेवा वैश्वानरा: । (श०ब्रा० ६-५-२-६) तथा वैश्वदेवीर्वै गौ: । (गो०ब्रा० उ० ३-१९) परन्च सर्वेषां ३३ कोटि देवानां नामत: परिचय: उपलब्ध वैदिक वाङ्मयेषु न प्राप्त: । नष्टेषु निश्चयेन स्यादेवेति मन्ये । काश्चन देवतानां विषये तु ऐतरेयोपनिषदि (२-५) उक्तम् । यथा - अग्निर्वाग्भूत्वा मुखं प्राविशत्, वायु: प्राणो भूत्वा नासिकेप्राविशत, आदित्यश्चक्षु-र्भूत्वा क्षिणी प्राविशत, दिश: श्रोत्रं भूत्वा कर्णौ प्राविशन्, ओषधि वनस्पतयो लोमानि भूत्वा त्वचं प्राविशन्, चन्द्रमा मनोभूत्वा हृदयं प्राविशत, मृत्युरपानो भूत्वा नाभिं प्राविशत, आपोरेतो भूत्वा शिश्नं प्राविशन् इत्यष्टौ देवता विश्वान्तर्गता: शरीरान्तर्गत देवताश्चेमानिव शरीरे तत्तत स्थानेषु निवसन्ति । अथर्ववेदे ११-८सूक्ते प्युक्तम् । यत् संसिचो नामा देवा: (देह निर्मातार:) शरीरा वयव निर्माण साहित्येन सह मानव देहेप्रविश्य स्वंस्वं स्थानं निर्मायाधि तिष्ठन्ति । अतो देवतावास योग्यं पुरुषशरीरं विद्वांस: ब्रह्मे त्याचक्षते । तत्रोदाहरणं- गावो यथा गोष्ठेषु निवसन्तीति । अन्यच्च- यस्यत्रयस्त्रिंशद्देवा अङ्गेसर्वे समाहिता: । (१०-१३) यस्य त्रयस्त्रिंशद्देवा अङ्गे गात्रा विभेजिरे । (१०-२७) आभ्यामृग्भ्यां विश्वेदेवा: अवयवेषु समाहिता:, गात्रेषुवा निवसन्तीत्यर्थ: स्फुट: । अन्यासामपि देवतानां शरीरे निवास: केश्चिदाथर्वण मन्त्रै: सिध्यति । यथा- यस्मिन् भूमि रन्तरिक्षं द्यौर्यस्मिन्नध्याहिता।

यत्राग्निश्चन्द्रमाः सूर्यो वातस्तिष्ठन्त्यार्पिताः।। (१०-१२)। यत्रामृतंच मृत्युश्च पुरुषेऽधि समाहिते । समुद्रो यस्य नाड्यः पुरुषे ऽधि समाहिताः ।। (१०-१५) यत्रादित्याश्च रुद्राश्च वसवश्च समाहिताः । (१०-२२) अत्राग्नि शब्देन वडवानलः, (क्रोधः) चन्द्रमाः, (शैत्यम्) सूर्यः (ज्योतिः) वातः (प्राणापानादि पन्चविधः) अथ च पूर्वोक्तानां दश संख्याकानां विश्वेषां देवानां दश संख्याकाः पुत्रा अजायन्त । तैःपूर्वोक्तै दैवैः स्वं स्वं स्थानं पुत्रेभ्योदत्वा ब्रह्मणि (वैश्वदेवसंघे) विलीनाः । उक्तन्चाथर्ववेदे - दश साकमजायन्त देवा देवेभ्यः पुरा ।। प्राणापानौ चक्षुः श्रोत्र मक्षितिश्च क्षितिश्चया । व्यानोदानौ वाङ्मनस्ते वा आकूति माहवहन्।। येत आसन् दशजाता देवा देवेभ्यः पुरा । पुत्रेभ्यो लोकंदत्वा कस्मिंस्ते लोक आसते ।। (११-८-३,४,१०) इत्थं वैश्वदेविकं शरीर विज्ञान शास्त्र मथर्ववेदे उपलब्धम्। तस्याण्वंशरूपेण ३३ कोटि विभागाना मनुसन्धानं परमावश्यकम् । तेन मृत्योर्मा अमृतं गमयेति वैदिक सिद्धान्तश्चरितार्थः स्यात् ।

नैघण्टुक परिगणनेन विश्वेषां देवानां संख्या

पृथिव्यन्तरिक्षं द्यौरिति लोकत्रयं प्रसिद्धमेव । तत्र पृथिविस्थानीया ५२ देवताः, अन्तरिक्ष स्थानीया ६८ देवताः, द्युस्थानीया ३१ देवताः परिगणिताः। एतासु काश्चन पुनरुक्ता लक्ष्यन्ते, परन्च तासां स्थान भेदेन व्यवस्था ज्ञेया । एतासा माहत्य संख्या १५१ भवति । सर्वासामर्थबोधाय निरुक्तस्य दैवतकाण्डं सुतरां ज्ञेयम् । प्रबन्धस्य प्रथमे प्रकरणे सर्वासां वैदिक देवतानां नामान्यनुसंहितानि । अतो ऽत्र पुनरुक्तिर्न क्रियते ।

नरमेधोक्ता देवताः

शुक्लयजुर्वेदस्य वाजसनेयी संहितायां त्रिंशत्तमे, काण्वसंहितायान्च चतुस्त्रिंशत्तमे अध्याये नरमेध प्रकरणे १७३ देवतानां नामान्यन्विष्टानि । यथाः- ब्रह्म, क्षत्र, मरुत्, तपस, तमस, नारक, पाप्मा इत्यादीनि। ताभ्यः १८३ अर्पणीयाः सन्ति । ते ऽपि तत्रैवोक्ताः । यथा- ब्रह्मणे ब्राह्मणं क्षत्रायराजन्यं मरुद्भ्योवैश्यं तपसे शूद्र मि मित्यादयः। कृत्स्नास्तत्रैवाव लोकनीयाः । विस्तरभिया ऽत्र कतिचिदेवोक्ताः । आसु पुनरुक्ता देवता विगणय्यापि १६० संख्याका नूनं नत्ता एव । एतासु काश्चनेवा-

न्तरिक्षस्था:, शेषा: पृथिविस्था एव । तत्रा पि काश्चन कालवाचका:, गुणवाचका:, स्थानवाचकाश्च सन्ति । अन्यच्च- यजुर्वेदे (६-२०) आपि:, स्वापि:, अपिज:,इत्यादि द्वादश संख्याका:, तथा च २२ तमे अध्याये हिङ्कार, हिङ्कृत, क्रन्दत् इत्यादयो ५२ देवता निरुक्ते अव्याख्याता: सन्ति । तासामर्थ बोधाय केवलं महीधरं उवटंचेति भाष्यद्वय मेवशरणम् । इत्थं यथामति देवता शास्त्र विषयिणी ततो पि विश्वेदेवात्मिका वैदिकी उपलब्धि: केवलं सूत्र रूपेणैवो पस्थापिता । अन्ते विश्वेदेव मन्त्र द्रष्टॄणामृषीणां तेभ्यो लोक कल्याण साधिका दृष्टि स्तद्दर्शनानुसारेण मन्त्र प्रार्थनया उपस्थाप्यते ।

विश्वेषां देवानां शाश्वत लोक कल्याण साधिका वैदिक प्रार्थना

(१) ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्य: । बाधमाना अपद्विष: ।।

(ऋ० १-९०-३) अर्थ:- ते अमृता: (विश्वेदेवा:) मानवानां द्वेष्टॄन्दूरत: प्रताड्यास्मभ्यं सुखं प्रयच्छन्तु ।

(२) इन्द्रं मित्रं वरुण मग्नि मूतये मारुतं शर्धो अदितिं हवामहे । रथं न दुर्गाद्वसव: सुदानवो विश्वस्मान्नो अंहसो निष्पि पर्तन ।।(ऋ० १-१०६-१)

अर्थ:- वयं, यथा दुर्गमस्थानादागतिकं रथं विकृष्य बहिर्नियते तथैव जघन्यानिष्कृत पाप कष्टादिभ्यो बहिर्निष्कास्य सन्मार्गप्रवर्तनाय, विश्वान्देवान् दिव्य संघ शक्ति सहिता नाह्वयाम: ।

(३) हये देवा यूयमिदापय:स्थ ते मृळत नाधमानाय मह्यम् । मावोरथो मध्यम वाळृते भून्मायुष्मावत्स्वापिषु श्रमिष्म ।। (ऋ० २-२९-४) ।

अर्थ:- विश्वेदेवा: । अस्माकं कल्याणं साधयन्तु । ते एवास्माकमाप्ता:। तेषामुपस्थितौ वयं श्रान्ता न स्याम । अस्मान्याचकांस्ते सुखयन्तु ।

(४) आरेपाशा आरे अघानि देवा: (ऋ० २-२९-५) ।

अर्थ: दुष्कर्मभ्य: पाशेभ्यश्चास्मान् दूरमेव स्थापयत्।

(५) देवानोयथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे (ऋ० १-८९-१)

अर्थ:- प्रत्यहं संरक्षण कार्यं सुचारु रूपेण चालयन्तो विश्वेदेवा: सर्वदास्मान् संवर्धयन्तु

(६) अग्निजिव्हा मनवः सूरचक्षसो विश्वेनो देवा अवसागमन्निह।। (ऋ० १-८९-७)

अर्थः- अग्निमुखा विश्वेदेवाः, मननशीलानां ज्ञान चक्षूरूपाश्चसन्तो स्माकं रक्षाणाया-
गच्छन्तु ।

(७) देवानां सख्य मुपसेदिमावयं देवान आयुः प्रतिरन्तु जीवसे ।।(ऋ० १-८९-२)

अर्थः- वयं विश्वेषांदेवानां सुहृदो भवेम । ते स्माकं सुखजीवनायायुर्वर्धयन्तु ।

(८) आरे देवा द्वेषो अस्मद्युयोतन ।। (ऋ० १०-६३-१२)

अर्थः- विश्वेदेवाः, अस्माकं द्वेषभावं दूरी कुर्वन्तु ।

(९) गोभिष्याम यशसो जनेष्वा सदा देवास इळया सचेमहि।।(ऋ०१०-६४-११)

अर्थः- हे विश्वेदेवाः। वयं गोधनैः, विश्वजनेषु यशोधनैः, गृहे अन्नधनैश्च पूर्णाः स्याम।

(१०) मा दुर्विदत्रा निर्ऋतिर्न ईशत तद्देवाना मवो अद्या वृणीमहे।।(ऋ०१०-३६-२)

अर्थः- दुर्ज्ञानवती पीड्यमाना शासन संस्था स्माकं प्रशासनं न कुर्यादितदर्थं वयमद्य
विश्वान्देवा नाव्हयामः ।

(११) सदा सुगः पितुमाँ अस्तु पन्था मध्वादेवा ओषधीः सम्पिपृक्त।।(ऋ०३-५४-२१)

अर्थः - हे विश्वेदेवाः। अस्माकं जीवन यात्राया विश्वयात्रायाश्च मार्गाः सुखकरा
अन्नजल युक्ता मधुरैरोषधीभिश्चव्याप्ताः स्युः ।

(१२) तेभिर्वयं सुषखायो भवेम तरन्तो विश्वा दुरिताः स्याम।।(ऋ०१०-३१-१)

अर्थः- वयं विश्वेदेवैः सह सुमित्राः सन्तो ऋणिणा निर्दोष शरीराश्चभूत्वा सर्वाणि
पापानि दुरितानि तरेम ।

लेख मर्यादावशात्केवलाद्वादश मन्त्राएवोपस्थापिताः। अन्येष्वपि बहुषु मन्त्रेषु
तेषामृषीणां हृद्गतं लोकोपकारकं स्फुटं दृश्यते ।

अनन्त श्रुतीना मनन्तानां विश्वेषां देवानां वर्णनमप्यनन्तमेव । साक्षादनन्तोऽपि
तत्पूर्णरूपेण कर्तुं न पारयिष्यते तर्हि कथं लघु लेखकोयं पारयिता स्यात् ?
प्रबन्धादौ ग्रन्थोक्त विषयाणां परिचयार्थं किंच्चिल्लेखनमावश्यकं वर्तते । अतएवायं
लघु प्रयासोमम ।

येषां देशिकानां वैदेशिकानां च ग्रन्थाधारे निगमागम सम्मतेयं प्रबन्ध प्रस्तावना प्रस्तुता ते पूजार्हा एव । अथ च लेखने यत् किमपि खण्डन मण्डनं कृतंचेत् स्वान्त: सुखाय एव । नतत्र तेषां पारदृश्वनां न्यूनतादर्शकमपितु ममैव लघुताबोधकं ज्ञेयम् । प्रस्तुत प्रबन्धे या: काश्चन त्रुटयो शुद्धय: स्खलनानि च स्यु स्ता: सर्वा लेख कस्यैव, नत्वस्माकं विपश्चिदपश्चिमां निर्देशकानां नच विद्यागुरूणामपि । तेस्तु गुरुपरम्परया यथा पूर्वं पाठितम् । मार्गदर्शकैरपि स्वकीयैर्ज्ञानदीपै:पूर्णरूपेण प्रकाशित: प्रबन्ध लेखन मार्ग: । ततो पि कुत्रचित्पतनं भवेचर्हि तन्ममाक्षिणी निर्मील्य गमनस्यैव फलमिति मत्वा तत्र भवद्भि: श्रीमदभिर्विद्वद्भि: दान्तव्यो यं चन्चलजन: ।

अन्ते च विश्वेषां देवानां स्वरूपं श्री काशी विश्वेश्वरं भूयोभूय: प्रार्थये यन्मम स्खलितां वाचं नियाम्यास्खलितान्चकृत्वा अविद्या सागरस्य विद्यावारिधि रेषणा रूपं शिव संकल्पं सफलं कुर्यात् ।

विश्वेश्वर विरूपाक्ष विश्वरूप सदाशिव ।
शरणंभव भूतेश करुणाकर शङ्कर ।।

तथा च जान्मातुरन्नपूर्णा यास्तृतीय स्वरूपिणीं विद्यादेवीं सरस्वतीं, प्रबन्धरूपाया विश्वेदेव संहितायाश्च प्रधान भूतान विश्वान्देवांश्च श्रुति मुखेन सम्प्रार्थ्य विरमामि ।

प्रणोदेवी सरस्वती वाजेभिर्वाजिनीवती। धीनामवित्र्यवतु ।।
विश्वे मे देवा: शर्म यच्छन्तु सर्वेमे देवा: शर्म यच्छन्तु ।।

।। ओं शान्ति: शान्ति: शान्ति: ।।

--oo--

तिथि:- आश्विन १५ कोजागरी
विक्रम संवत् २०२३
(२६।१०।१९६६)

विदुषां चरण सेवक:
श्रीकृष्ण देव:
अनुसन्धाता

।। प्रथमाध्याय: ।।

वैदिक देवतानां स्वरूप नामादि विमर्श:

(अत्रोक्ता विषया:)

वैदिक देवतानां स्वरूपमीमांसा, त्रैविध्यम्, अनादिष्ट देवता विचार:, प्रयोगाभावे देवता परिज्ञानम्, काम्यादेवता:, प्रायोदेवता, वेद - क्रमेण एक देवत्यम्, द्वि देवत्यम्, बहुदेवत्यम्, नैपातिकम्, दर्शपूर्ण - मासेष्टिदेवता:, नैमित्तिकेष्टि देवता:, काम्येष्टि देवता:, इष्ट्ययन: देवता:, चातुर्मास्ययाग देवता:, पाशुक देवता:, ज्योतिष्टोम देवता:, शस्त्र देवता:, अनुयाज देवता:, अवभृथादि देवता:, अत्यग्निष्टोमादि-षट् संस्थानां देवता: , तत्र विश्वेदेवानां स्थानञ्चेति ।

--०--

वैदिक देवतानां स्वरूप मीमांसा

तत्र प्रथमं देवताज्ञानस्य मुख्यावश्यकता प्रतिपादनम् ।

न हि कश्चिदविज्ञाय याथा तथ्येन दैवतम् । लौक्यानां वैदिकानां वा कर्मणां फलमश्नुते। ।
(बृहद्देवता - १-४)

तत्रतत्र यथावच्च मन्त्रान्कर्मसु योजयेत। देवताया: परिज्ञानात् तद्धिकर्मसमृध्यते। ।१-२१। ।
वेदितव्यं दैवतंहि मन्त्रे मन्त्रे प्रयत्नत: । दैवतज्ञोहि मन्त्राणां तदर्थमवगच्छति(१-२)
तथा च:- यथोपदेशं नह्येतज्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिर्मन्त्राणां ब्राह्मणार्षेयच्छन्दो दैवत विज्ञानाध्यापनाभ्यां श्रेयो धिगच्छत्येताभ्यामेवा नेवं विदो यातयामानिच्छन्दांसि भवन्ति । (ऋग्वेद सर्वानुक्रम परिभाषा खं० १) एभि: प्रमाणैरिदं सुस्पष्टं भवति यद्देवता ज्ञानं विना मन्त्रोपदेशा नुष्ठानादि सर्वं व्यर्थमेवस्यात् । वेदार्थज्ञानमपि देवता ज्ञानपरम् । फलसिद्धिरपि देवता ज्ञान सापेक्षा। श्रौतादि सकल कर्म प्रसिद्धि: , श्रेय साधनादिच सर्वमपि साध्यं देवता ज्ञान साध्य मेवेति सुस्थिरम् ।

अतो देवताज्ञानं कथं कर्तव्य मित्युच्यते:- तथानि नामानि प्राधान्य स्तुतीनां देवतानां तद्दैवत मित्याचक्षते सैषादेवतोप परीक्षा यत्काम ऋषिर्यस्यां देवताया मार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवत: समन्त्रो भवति । (निरु०क७-१)

अर्थमिच्छन्नृषिर्देवं यं यमाहायमस्त्विति ।
प्राधान्येन स्तुवन भक्त्या मन्त्र स्तद्देव एवस: ।। (बृ०दे०१-६)
प्रत्यक्षं देवतानाम यस्मिन्मन्त्रे भिधीयते ।
तामेव देवतां विज्ञान् मन्त्रे लक्षण सम्पदा ।। (१-११)
तस्मात् देवतां नाम्ना मन्त्रे मन्त्रे प्रयोगवित् ।
बहुत्वमभिधानां च प्रयत्नेनोप लक्षयेत् ।।

अथच - यस्य वाक्यं स ऋषिर्यातेनोच्यते सा देवता । ओंकार: सर्वदेवत्य: पारमेष्ठ्योवा। एकैववामहानात्मा देवता ससूर्यइत्याचक्षते, तद्विभूतयो न्या देवता: (ऋ०सर्वानु०) प्रमाण सङ्ग्रहोयमिदं ज्ञापयति यथेषु मन्त्रेषु यस्या देवताया: प्राधान्यम्, सा एव देवता तस्य मन्त्रस्येति । अथवा यत्कामनया ऋषिर्यदेवतां स्तौति सा देवता भवति । ऋषे-र्विनियोग बलाद्देवता भिन्नत्वमपि सम्भवति । यथा शन्नोदेवी इति यजुर्मन्त्रस्य अब् लिंगे पि शनैश्चरावाहने बला द्विनियोग: । ओंकारस्तु सर्वदेवतात्मक: । मन्त्रे कुत्रचित् देवतालिङ्गश्रवणाभावेतु ओंकार: परमेष्ठी ब्रह्मा वा तस्य मन्त्रस्य देवता स्यात् ।

" एक: सूर्यो विश्वमनु प्रभूत: ० (ऋ० सं० ६-४-२६) इति श्रुत्यनुसारं " इन्द्रं मित्रं ०
(ऋ०सं० २-३-२२) इति मन्त्रे सर्वासां विभूतिरूपाणां देवतानां महानात्मस्वरूप:
सूर्यो देवतात्वेन विभाव्यते । अस्यायमेव निष्कर्ष: यद्दैवताज्ञाने लिंग विनियोगावेव
प्रमाणभूताविति ।

देवतानां त्रैविध्यम्

मन्त्रेषु प्रकार त्रयेण देवतोल्लेखो जायते । सूक्तभाज:, ऋग्भाज:, नैपातिकाश्चेति। तत्र सम्पूर्णसूक्ते एकस्याएव देवताया: श्रवणं सा सूक्तभाक् । ऋच्येव श्रवणात् ऋग्भाक् । प्राधान्येनैकस्यादेवतायामन्त्रे अन्यासादेवतानां नामोच्चारणरूप निपातनात् सा निपातभागिति । उक्तं च (बृ० दे० १-१७)

देवता नामधेयानि मन्त्रेषु त्रिविधानितु ।।
सूक्तभान्ज्यथवाग्भांन्जि तथा नैपातिकानितु ।।

निरुक्ते पि (७-१३) देवता अनुक्रान्ता: सूक्तभाजो हविर्भाजि ऋग्भाजश्च भूयिष्ठा: काश्चिन्निपातभाज:। (१-२०) नैघण्टुकमिदं देवतानाम प्राधान्येनेदमिति तयदन्य देवतेमन्त्रे निपतति । अत्र निरुक्ते हविर्भाजि इत्यधिकंपदम। तस्यायमर्थ: । काश्चिद्देवता: सूक्तमेव भजन्ते नहवि: । काश्चिद् हविर्भजन्ते न सूक्तम् । काश्चितूभयं भजन्ते । अतो हविर्भाजि इत्यधिकंपदं निरुक्त कारै: प्रदत्तम् ।

अनादिष्ट देवता मन्त्रेषु देवता निश्चय:

ये मन्त्रा अनुक्त देवता लिङ्ग भूता स्तेषु देवता निश्चये कर्तव्ये यस्मिन् यज्ञे यज्ञाङ्गेवा येषामन्त्राणां मुच्चारणं भवति , तस्य यज्ञस्य यज्ञाङ्स्यवा या प्रधान भूता मुख्या देवता सा एव तेषांमन्त्राणामपि भवतीति निश्चय: पूर्वाचार्याणाम् ।

यथा अग्निष्टोम संज्ञके यज्ञे अनुक्तदेवतामन्त्राणां मग्निर्देवता । " आग्नेयो ग्निष्टोम इति श्रुते: " । यज्ञैक देशे (यज्ञाङ्गे) यथा: अग्निष्टोम यज्ञे प्रातर्माध्यन्दिन सं तृतीय सवनादि त्रीणि सवनानि । तत्र प्रथमस्याग्निर्देवता " आग्नेयं प्रात: सवनम् " इति श्रुते: । तथैव माध्यन्दिने स ऐन्द्र: । तृतीय सवने सएव आदित्य:। अत स्तत्तत्सवनगतानां सर्वेषामनादिष्टदेवतामन्त्राणां देवता: सवन देवता एव भवन्ति । उक्तन्च यास्केन :- सद्देवत: स यज्ञोवा यज्ञाङ्गवा तद्देवता भवन्ति । तेनेदं सिद्धं ययस्यकर्मणो यादेवता सा एव तत्कर्मणो प्रयुक्तानामनादिष्टदेवतामन्त्राणामपि देवतेति।

यज्ञादि-प्रयोगाणामभावे पि देवता परिज्ञान विधि:

" अनिरुक्तोवैप्रजापति: " (ऐ०ब्रा०) इति श्रुत्यनुसारमनादिष्टानां प्रजापतिर्देवता इति याज्ञिकानांमतम् । " अग्निर्यज्ञोवा नराशंस: " । अग्निर्हि भूयिष्ठभाग्देवतानाम्, स एव च नराशंस: । निघण्टौ (५-२) खण्डे तनूनपात् (नराशंस: इत्यादि त्रयोदशाप्रीसंज्ञकाग्निनामसु नराशंस: संगृहीत: । स एव नराशंसो नादिष्टानां मन्त्राणामिति नैरुक्तकाराणांमतम् ।

कामना परत्वेन देवता निश्चय:

अनादिष्टानां मन्त्राणां यथाकामं (यथेच्छं , सङ्कल्पानुसारंवा) देवताकल्पनीया। शान्त्यादिकर्मणामापोदेवता " आपोवैशान्ता " इतिश्रुते: (अभिचारादिकर्मणां निर्ऋतिर्देवता । निर्ऋतिकर्मणएवाभिचारिकं प्रारभ्यते । (आथर्वणाभिचारकल्पे) एतादृकस्थलेषु मन्त्रो गुणपदमयोभवति । तत्र देवता संविज्ञानपदमन्यतम द्वताविशेष प्रख्यापकं न भवति, न चान्याभ्यो व्यावृत्या कस्यांचिदेकस्यां देवतायां विशेणादवतिष्ठेत, सर्वेषां गुणपदानां सर्वदेवता श्रयत्वात्सर्वासां देवतानामपि गुण वाचकत्वं प्राप्यते । अतएवोक्तं निरुक्त कारै: । " अपि वा सा कामदेवतास्यात् " इति (७-१)

प्रायोदेवता

अत्र प्राय: इतिपदस्य कल्प्य- अधिकार-बाहुल्यादयो र्था: सन्ति । कल्प्यार्थस्तु पूर्वोक्त: कामदेवता प्रकरणे । अधिकारार्थोनाम यद्देवताधिकारे ~~पवमानसोमसा~~ सूक्ते, यथापवमानसोमसूक्ते समागता अनादिष्ट देवतामन्त्रा पि पवमान सोमीया एव भवन्ति, पवमान सोमाधिकारात् । तथैव वरुणाधिकारे वारुणा: , वाय्वधिकारे वायवा इत्यादि । बहुलार्थस्यतात्पर्यं यथा - दातृत्व प्रायो माणवक इत्युक्ते दातृत्व बहुलक एवार्थो निष्पद्यते । प्राय: सर्वदा ददात्येवेति स्पष्टार्थ: । तथैवात्रापि प्रायोदेवतेत्यस्य बहुल देवतेत्यर्थं बोध: स्यात् । लोके पि बुहल पदस्य प्रभूतार्थे प्रसिद्धि: । यथा पूर्वसङ्कल्पित कार्य साधनार्थं प्रतिपादितेभ्यो द्रव्येभ्यो वशिष्टभाग: साधारणो भवत्येव । केनचित्सङ्कल्पे:- इदंमे देव देवत्यम् । इदमतिथि देवत्यम् । इदं पितृदेवत्यमित्युक्त्वा धान्यादिकं स्थापितम् । तद्राशेर्यदन्यदवशिष्यते त दवशिष्टानां साधरणं भवेत् । अतएव चरु निर्वाप कर्मणि दर्शपौणमासेष्ट्यादौ निरुप्तानभिमृश्याध्वर्युर्जपति।

इदं देवानाम् । यदमुनः सह इति शेर्गमभिमृशति। तथैवात्रापि सूक्ते अनादिष्ट देवता लिङ्गरूपो मन्त्रराशिः सर्वे देवतासाधारण त्वात्प्रायोदेवता इत्यत्र प्राय इत्यस्य बहुलार्थग्रहणाच्च बहुदेवतो वैश्वदेवात्मको भवति । तेनानादिष्ट देवता मन्त्राणां विश्वेदेवा देवता भवन्तीति सुस्थिरम् ।

देवतानां स्वरूप विषये - आर्ष - वैयाकरण- याज्ञिक - नैरुक्त- वैज्ञानिकादि प्राच्यैः, कीथ प्रभृतिभिराधुनिकभाष्यकारैः प्रतीच्यैः, वैदिक देवता - शास्त्रकारैःश्री मैकडानल - श्री सूर्यकान्त- प्रभृतिभिर्वेदविज्ञानवादिभिश्च वैदिक देवतानां विग्रहवत्त्वं सर्वथा अस्वीकृतमेव । केश्चित्पन्चमहाभूतेष्वेव सर्वासां देवतानामन्तर्भाने वो पलक्षितः । केश्चिल्लोक त्रयेषु (भूम्यन्तरिक्षद्युषु) दृश्यमानानां प्राकृतिक दृश्यानामेव देवतात्वं स्वीकृतम् । अन्यैर्नाक्षत्रिक - ग्रहादिनां शरीरधारिणान्च पर स्परोद्भूत प्रभावैर्जायमानासु विभिन्न शक्तिष्वेव देवतात्वमारोपितम् । वैज्ञानिकै रण्वादि सूक्ष्मद्रव्येषु देवतात्वं कथ्यते । साहित्यिकैरसेषु, वैयाकरणैरक्षरमात्रासु, वेदान्तिभि रात्मसु, नास्तिकैर्भौतिक शरीरेषु, अग्निसाधकैरग्निषु, विष्णुभक्तै र्विष्णौ " अग्निः सर्वदेवता- विष्णुः सर्वा देवताः" (ऐ० ब्रा०) इत्यादि वचनैर्देवतात्व मरोप्यते, केवलमज्ञैरेव विग्रहत्वं स्वीक्रियते नान्यैः । अत्र वैदिकैर्मीमांसकैस्तु " मन्त्रमयीत्वं देवतात्वम्" इति कथ्यते । उक्तन्च :- अग्नौ क्रियावतांदेवा दिविदेवो मनीषिणाम् । प्रतिमास्वल्पबुद्धीनां योगिनां हृदयेमतः ।। यस्मिन्क्षणे याज्ञिक समाख्या बलाद्स्य मन्त्रस्योच्चारणं स्यात्, तस्मिन्नेवक्षणे तन्मन्त्राभिमानिनी अपूर्व फलदात्री अविग्रहवती वैदिकी देवता वाग्रूपेण प्रत्यक्षा भवति । यथा स्थिरे वीणादितन्तुवाद्ये करसन्चालन सामर्थ्याददृष्टरूपोध्वनिः प्रकटी भवति, प्रवर्षतिचाङ्गेष्वपि रस माधुर्यं तथैवेयं मन्त्रमयी देवता । सा देवता प्रतिमन्त्रे पूर्णरूपेणावतिष्ठते । तद्देवतावाचकं नामरूपं लिङ्ग तस्याः शिरोभूतम् । मन्त्रस्य पादाः प्रसिद्धाएव छन्दोरूपेण । अक्षराण्यवरूपाणि । अस्थिरूपामात्राः । विनियोगो हस्तरूपः । अनुस्वारानुनासिकादीनिश्चक्षूंषि । अर्थबोधः श्रोत्ररूपः । उच्चारण विधि घ्राणरूपः । शुद्धोच्चारणं मुखम् । पदानि ग्रन्थ्युय एवं भूतं मन्त्रमय्यादेवतायाः मन्त्रमयमेवस्वरूपम् ।

इति वैदिक देवतानां स्वरूप मीमांसा

--००--

संहितासु - एक- द्वि- बहु- नैपातिकञ्च देवत्य मकारादि क्रमेण प्रदर्श्यते ।

तत्रादौ ऋग्वेदे शाकल संहितायां स्तुत मेक देवत्यम् ।

१- अग्नि: । २- अपांनपात् । ३- अन्नम् । ४- अश्व: । ५- अत्रि: । ६- अहि: । ७- अहिर्बुध्न्य: । ८- अश्विकशु: । ९- असुनीति: । १०- असमाति: । ११- अदिति: । १२- अरण्यानी । १३- अलक्ष्मीनाशनम् ।

१- आत्मा। २- आसङ्ग: । ३- आसङ्ग आत्मा । ४- आपोदेवी: । ५- आंभृणिवाक् ।

१- इन्द्र:। २- इन्दु: । ३- इन्द्रो भिशाप: । ४- इन्द्रभू: । ५- इषुधि: । ६- इन्द्रो वैकुण्ठ: ।

१- उलूखलम् । २- उपाध्याय: । ३- उपमश्रवा: । ४- उर्वशी ।

१- ऐन्द्रोलब: ।

१- क: । २- कशु: । ३- कुरुङ्ग: । ४- कृषि: । ५- कालचक्रम् ।

१-गोधेन्द्र: । २- गौ: ।

१- चन्द्रमा: । २- चायमान: । ३- चित्र: ।

१- ज्या । २- जीव: ।

१- तरन्त: । २- तरन्त महिषी शशीयसी । ३- त्वष्टा । ४- त्रसदस्यु: । ५- त्रसदस्यु: पौरुकुत्स्य: । ६- तिरिन्दिर: ।

१- दधिक्रा । २- दम्पतीराजयक्ष्महा । ३- दक्षिणा । ४- द्यावाभूमि: । ५- दुन्दुभि: । ६- दु: स्वप्ननाशनम् । ७- द्रुघण: । ८- द्रविणोदा: । ९- देवपत्नी । १०- देवगन्धर्व: ।

१-धनु:। २- धनुष्कोटि: । ३- धनान्नदानम् । ४- धाता ।

१- पर्जन्य: । २- पवमान: । ३- पवमानसोम: । ४- पवमानाध्येता । ५- पथ्यास्वस्ति: । ६- प्रतोद: । ७- प्रस्तोक: । ८- प्रस्वापिनी इन्द्र: । ९- पाकस्थामा । १०- पृथिवी । ११- प्रजापतिर्हरिश्चन्द: । १२- पृश्नि: । १३- पृथुश्रवा: कानीत: । १४ पुरुमीळ्ह:। १५- पुरुष: । १६- पूषा । १७- पुरूरवा: ।

१-ब्रह्मणस्पतिः । २- बृहस्पतिः । ३- बृबुस्तक्षा ।

१- भगः । २- भाववृत्तम् । ३- भावयव्यः ।

१- मरुत्वानिन्द्रः । २- मनः । ३- मन्युः । ४- मृत्युः । ५- मायाभेदः ।

१- नराशंसः । २- नदी । ३- निर्ऋतिः ।

१- यज्ञः । २- यजमानः । ३- यमी । ४- यमः । ५- यक्ष्मनाशनम् ।
६- यजमानपत्नी । ७- यूपः ।

१- रतिः । २- रथः । ३- रथवीतिः । ४- राका । ५- राजा ।
६- रात्रिः । ७- रुद्रः । ८- रोमशा ।

१- वरुणः । २- वर्म । ३- वसिष्ठः । ४- वरुः सौषाम्णिः । ५- वज्रः ।
६- वसुक्रः । ७- वधूवासः संस्पर्शनिन्दा । ८- वायुः । ९- वामदेवः । १०-वास्तोष्पतिः ।
११- वाक् । १२- वृश्चनः । १३- विष्णुः । १४- विश्वामित्रः । १५- विभिन्दुः ।
१६- विश्वकर्मा । १७- विश्वा वसुः । १८- वेनः ।

१- शकुन्तः । २- शची । ३- शुनः । ४- श्येनः । ५- श्रुतर्वा आर्क्षः ।

१- सरस्वती । २- सदसस्पतिः । ३- सविता । ४- सरस्वान् । ५- सरमा ।
६- ससर्परीवाक् । ७- सरण्युः । ८- सपत्नीनाशनम् । ९- सपत्ननाशनम् । १०-संज्ञानम् ।
११- सारथिरश्मिः । १२- सावर्णिः । १३- सिनीवाली । १४- सीता । १५-सुपर्णः ।
१६- सुदाः पैजवनः । १७- सूर्यः । १८- सूर्याविवाहः । १९- सूर्यासावित्री आशीः ।
२०- सोमः । २१- सोमकः ।

१- हस्तघ्नाणः । २- हविर्धानः । ३- हस्तः । ४- होता ।

१- क्षेत्रपतिः ।

१- ज्ञानम् ।

॥ अथ द्विदेवत्यम् ॥

१- इन्द्रवायू । २- मित्रावरुणौ । ३- अश्विनौ । ४- इन्द्रावरुणौ ।
५- इन्द्राग्नी । ६- द्यावापृथिव्यौ । ७- अग्न्यापः । ८- उलूखलमुसले । ९- अग्नीषोमौ ।
१०- उषासानक्तौ । ११- शक्धूमसोमौ । १२- इन्द्राब्रह्मणस्पती । १३- इन्द्रासोमौ ।
१४- सरस्वतीन्द्रौ । १५- सोमापूषणौ । १६- अग्नीन्द्रौ । १७- इन्द्रापर्वतौ ।
१८- अग्निवरुणौ । १९- इन्द्रवामदेवौ । २०- इन्द्रात्मानौ । २१- इन्द्रेषासौ ।
२२- इन्द्राश्वौ । २३- शुनासीरौ । २४- ऋणंचयेन्द्रौ । २५- इन्द्राकुत्सौ । २६- गवेन्द्रौ

२७- इन्द्रापूषणौ । २८- इन्द्राविष्णू । २९- इन्द्रासोमौ । ३०- सोमारुद्रौ । ३१- द्यावा पृथिवी । ३२- दुन्दुभीन्द्रौ । ३३- इन्द्राब्रह्मणस्पती ।३४- दम्पती । ३५- रुद्राश्वमेधौ । ३६- इन्द्रामरुतौ । ३७- यमश्वानौ । ३८- निर्ऋतिसोमौ । ३९- सोमार्कौ । ४०- सूर्य वैश्वानरौ ।

।। गण देवत्यम् ।।

१- विश्वेदेवाः । २- मरुतः । ३- ऋभवः । ४- देव्यः । ५- आपः । ६- देवाः । ७- उषसः । ८- आदित्याः । ९- स्वनयः । १०- वाचः । ११- साध्याः । १२- यूपाः। १३- रथाङ्गानि । १४- गावः । १५- अश्वाः । १६- रथगोपाः । १७- इषवः । १८- वसिष्ठपुत्राः । १९- वाजिनाः । २०- दधिक्राः । २१- मण्डूकाः । २२- ग्रावाणः । २३- दम्पत्याशिषः । २४- पितरः । २५- पितृमेधाः । २६- अक्षाः । २७- अक्षाकितवः । २८- ओषधयः । २९- पणयः ।

।। अथ बहुदेवत्यम् ।।

१- इन्द्रमरुतः । २- इन्द्रब्रह्मणस्पतिसोमाः । ३- ब्रह्मणस्पतिसोमेन्द्रदक्षिणाः । ४- अग्नामरुतः । ५- इन्द्राणी वरुणान्यग्नाय्यः । ६- अग्नि मित्र वरुणरात्री - सवितारः । ७- वरुण मित्रार्यमणः । ८- रुद्र मित्र वरुणाः । ९- अग्न्यश्व्युषसः । १०- अग्नि मित्र वरुणादितिः सिन्धुः पृथिवी द्यावः । ११- द्यावापृथिव्यग्न्याश्विनः । १२- इन्द्रापर्वतेन्द्राः । १३- सूर्य रोदसी मित्र वरुणरुद्रेन्द्राग्न्यर्यम भग सोमाः । १४- देव मरुदग्नि मित्र वरुण मघवानः । १५- वाक्समुद्राक्षारापः । १६- अग्निवायु-सूर्याः । १७- गुङ्गु सिनीवाली- राका सरस्वती-न्द्राणी-वरुणानी । १८- सोमा-पूषणा दितयः । १९- मरुद्रुद्र विष्णवः । २०- देवभूमि बृहस्पतीन्द्राः । २१- ब्राह्मण-पितृ सोम द्यावापृथिवी पूषाणः । २२- युद्ध भूमि कवच ब्राह्मणस्पत्यादयः । २३- वर्मसोम-वरुणाः । २४- देव ब्रह्माणि । २५- अग्नीन्द्र मित्रावरुणाश्वि भगपूष ब्रह्मणस्पति-सोमरुद्राः । २६- दधिक्रा - अश्वि- उषो ग्नि भगेन्द्र विष्णु पूष ब्रह्मणस्पत्यादित्य द्यावा पृथिआपः । २७- सूर्यमित्रावरुणाः । २८- वसिष्ठाशीः पृथिव्यन्तरिक्षाणि । २९- अग्निसूर्यानिलाः । ३०- आदित्योषसः । ३१- विश्वेदव वरुणाः । ३२- मित्रा-वरुणादित्याः । ३३- अङ्गिरः पित्रथर्व भृगुसोमाः । ३४- कुरुश्रवणस्त्रासदस्यवः । ३५- पृथिवीद्यावन्तरिक्षा सोमपूषपथ्यास्वस्तयः । ३६- इन्द्र द्यावा पृथिव्यः ।

३७- आदित्योषस: । ३८- विश्वेदेव वरुणा: । ३९- इन्द्रर्भव: । ४०- मित्रावरुणादित्या: ४१- द्युभूम्यश्विन: । ४२- केश्यग्नि सूर्य वायव: । ४३- सोम वरुण - बृहस्पत्यनुमति धातृ विधातार: । ४४- विष्णुस्त्वष्टृ प्रजापतिधातार: । ४५- सिनीवालि सरस्वत्यश्विन: ।

।। निपात भाजो देवता समूहा: ।।

१- अथर्वा मनुर्दध्यङ्च । २- अदिति देव सवितृ मित्र वरुणादिति सिन्धु पृथिवी द्याव: ।। (सर्वे वसुभि: सहिता:) । ३- अग्नि वातेन्द्र पर्वतदेवा: । ४- अपांनपादहोरात्राणि । ५- अजेन्द्रा पूषण: । ६- अश्वदाम पाद बन्धन ग्लीन घासा: । ७- अश्वनिषदनादीनि । ८- अग्निवायु सूर्या: । ९- आदित्य मित्रा वरुणा: । १०- अहिर्बुध्न्या जैकपादिन्द्र: । ११- अग्न्युषोऽश्वि दधिक्रा देवा: । १२- अर्यमादिति देव वरुणा: । १३- अग्नि - पृथिवी द्यु अप्सुर्यान्तरिक्षाणि । १४- अर्यम वरुण मित्रेन्द्रा विष्णुमरुदश्विन: । १५- अग्नि अग्नीन्द्राङ्गिरस: । १६- अग्न्युषोऽश्विसूर्या: । १७- अग्न्युषोऽश्विन: । १८- अवत्सारेण सह सदापृण यजत बाहुवृक्त श्रुतवित् तर्या: । १९- अग्निदेव रोदस्य: । २०- अग्नीन्द्रसोमा: पर्जन्यवायू । २१- आदित्यवात प्रजापति मित्र वरुणा: । २२- अग्निद्यु पृथिविदेवा: । २३- अग्निमित्र वरुण सवितार: । २४- आदित्यवसुरुद्रेन्द्रा: २५- अग्निमित्र वरुणार्यमाण: । २६- अग्निबृहस्पत्यजैक पादहिर्बुध्न्या: । २७- अग्नि- इन्द्र वरुण मित्रार्यमवायुपूषसरस्वत्यादित्यविष्णु मरुत्स्व: सोमरुद्रादिति ब्राह्मणस्पतय: २८- अदितिद्यु पृथिव्यग्नीन्द्र विष्णु मरुदादित्य वसुरुद्र सवितार: । २९- अग्न्यादित्य- क्षेत्रपति देवा: । ३०- अग्नि वरुणेन्द्र मरुद्विश्वदेवा: । ३१- अर्यम भग देवा: । ३२- अग्नि सूर्य वैश्वानरा: । ३३- अब्मरुदिन्द्र पर्जन्या: । ३४- अहिर्बुध्न्य सूर्य चन्द्रमो द्यु पृथिव्या: । ३५- अग्निदेव पत्न्यदिति चन्द्र सूर्येन्द्रा: । ३६- अङ्गिरोग्रावेन्द्र वस्व- दितय: । ३७- अर्यम मित्र वरुण रुद्रमरुत्पूषभगा: । ३८- अश्विसूर्य चन्द्रमोऽहिर्बुध्न्या: ३९- अश्विमित्र वरुणा: । ४०- अश्विपूष ऋभु विश्वेदेव ऋभुगण: । ४१- आदित्य - वरुण वायुर्वग्नि सोमाप: । ४२- अग्न्यादित्य वायु: सूर्य रश्मय: । ४३- अग्नि वायु- सूर्या: । ४४- आदित्य वरुण मित्रार्यम मरुद्रुद्रेन्द्राग्नय: । ४५- अर्यम भग बृहस्पति - देव वाग्देव्या: । ४६- अर्यम बृहस्पतीन्द्र वात विष्णु सरस्वतीसवितार: । ४७- अग्न्या- दित्य रुद्र वसव: । ४८- अग्नि देवपत्नी त्वष्टार: । ४९- अग्नि देवपत्नी धिषणा:

५०- अग्नि सवित्रोषोऽश्विभगाः । ५१- अग्निमित्रार्यम प्रातर्याणाः ।
५२- अग्निवसु रुद्रादित्याः । ५३- अग्नि समयस्त्रिंशद्देवाश्च । ५४- अर्यम मित्रवरुण मरुतः । ५५- अहोरात्रे आदित्यग्नी । ५६- अग्निवायु सूर्यश्चन्द्र विद्युतोवा । ५७- अश्विनावपांनपाडहोरात्रे । ५८- अश्विनौ पूषा अग्निः । ५९- आदित्य वायवग्नयः । ६०- अग्निवायुवादित्य पदाधानवेत्तारः । ६१- अहिर्बुध्न्यः सिन्धुरपां नपात् । ६२- अश्विनौ पूषा विष्णु वायुरिन्द्र देवाः । ६३- अग्नि परिचारिका अङ्गुल्यः । ६४- अग्नीन्द्र सोमदेवाः । ६५- आदित्या वरुण मित्रदेवाः । ६६- आपोद्यावापृथिवी मित्रवायुदेवाः । ६७- आदित्यरुद्रवसुद्यु पृथिव्यन्तरिक्षायूपाः । ६८- अग्न्युषोऽश्विदधिक्राः । ६९- अग्निद्यावापृथिव्यः । ७०- अग्निरध्वर्यादि ऋत्विजश्च । ७१- अर्यमादितिदेव वरुणाः । ७२- अग्निपृथिवीध्वमु सूर्यान्तरिक्षाणि । ७३- अग्निवायुसूर्याः । ७४- अर्यम वरुण मित्रेन्द्र विष्णु मरुदश्विनः । ७५- अग्न्युषसोऽश्विनो - सूर्यः । ७६- अदिति मित्र वरुणाः । ७७- अदिति सिन्धु स्वस्त्युषासानक्ता । ७८- अर्यम वरुणाग्नीन्द्र विष्णवः । ७९- अग्निवरुणोन्द्रमरुद्देवाः । ८०- अग्नीन्द्र-वरुण मित्रदेव मरुद्विष्णु नासत्य रुद्रग्नापूषभग सरस्वत्यः । ८१- अग्निवरुण - सवितारः । ८२- आदित्य वस्विन्द्र वायुवग्नयः । ८३- अश्विभगादिति पूषद्यावापृथिव्यः ८४- अदिति मित्र वरुणाः। ८५- अग्निमरुन्मित्र वरुणाश्विद्यु पृथिव्यः । ८६- अश्विरथाश्विनः । ८७- अहिर्बुध्न्यपर्वत सवितृ देवभगाः । ८८- आदित्य वसु मरुद्रुद्राः । ८९- अहिर्बुध्न्या जैक पात्पृथिवी समुद्र विश्वदेवाः । ९०- अदितिमित्र वरुणार्यम भगाः। ९१- अग्नीन्द्र रुद्रादित्य बृहस्पतयः । ९२- अग्निसवितृ भगा दितयः । ९३- अग्नि - मित्रावरुणाश्वि सुकृत वाताः । ९४- अदितिमरुद्विष्णु सवित्र वायवः । ९५- अजैक-पादहिर्बुध्न्य समुद्रापांनपात्पृश्नयः । ९६- आदित्यरुद्रवसुदेवाः । ९७-अग्निरुणाः- पत्नी यजमानो होता । ९८- अङ्गिरसः पर्जन्यो नद्यः पत्नी यजमानौ । ९९- आदित्य-मरुद्देव र्भ्विन्द्राग्न्यश्विनः । १००- आदित्यमित्रावरुण द्यावापृथिव्यः । १०१-अश्वि-उषोरोस्यः । १०२- अश्व्युषः सवित्राग्नयः । १०३- अग्निमित्र वरुणोन्द्रार्यमादितयः १०४- अग्नीन्द्र विष्णु मरुतः । १०५- अदित्यश्वि मरुतः । १०६- अश्विवरुण - मित्रार्यमणः । १०७- अग्निमरुद् ब्रह्मणस्पति देवाः । १०८- अर्यम मित्र वरुणाः । १०९- अग्नीन्द्र वरुण विष्ण्वादित्यरुद्रवसवः । ११०- अङ्गिरो विष्णु मरुतः । १११- इन्द्रवायु बृहस्पति मित्राग्निपूषण भगादित्य मरुद्गणाः ।

११२- इन्द्रपूणा तार्क्ष्यं बृहस्पतय: । ११३- इन्द्र मरुत्पूण भगा: । ११४- इन्द्रमित्र-वरुणादिति सिन्धु पृथिवी द्याव: । ११५- इन्द्र वरुणाग्न्यर्यम सवितार: (पन्चउदाण: ११६- इन्द्र मित्र वरुणाग्नि मरुदादितयो वसवश्च । ११७- इन्द्र मरुदादितय: । ११८- इन्द्र वरुणाग्न्यर्यम सवितृमित्र वरुणादिति सिन्धु पृथिवीद्याव: । ११९-इन्द्राग्नी-मित्रवरुणादिति सिन्धु पृथिवी द्याव: । १२०- इन्द्राग्नि देवा:। १२१- इन्द्रपूणाश्वि-विश्वेदेवा: । १२२- इन्द्रवरुणार्यम विष्णव: । १२३- इन्द्रवरुण मित्राग्निरबोषधि-मरुत: । १२४- इन्द्रोषाभगा: । १२५- इन्द्र वायु वरुण मरुद्विष्णव: । १२६- इन्द्रवायु सूर्य रश्मय: । १२७- इन्द्र वरुण मरुत: । १२८- इन्द्रो द्यावा पृथिव्यौ देवा:। १२९- इन्द्र वरुणमित्र वायु बृहस्पतय: । १३०- इन्द्रमित्र वरुणा: । १३१-इन्द्रदेव-विष्णव: । १३२- इन्द्रमरुदर्यम भगमित्रवरुणा: । १३३- इन्द्रमित्र पूण भगा: । १३४ - इन्द्र आदित्यात्मा । १३५- इन्द्रो विद्युदप: । १३६- इन्द्रेष्ठा बृहस्पतिदेवा: । १३७- इन्द्र: कालात्मक: सुर्याचन्द्रमसौच । १३८- इन्द्राग्निमित्रवरुण भगद्यु पृथिवि-मरुत: । १३९- इन्द्राग्नि सोमा: । १४०- इन्द्रवस्वादित्यादिति रुद्र मरुत्वष्टट-देवपत्नय: । १४१- इन्द्रदेव सवित्र दितय: । १४२- इन्द्र बृहस्पति यज्ञ मनुप्रमतय: । १४३- इन्द्राग्नियज्ञा: । १४४- इन्द्र बृहस्पति दक्षिणा यज्ञ सोम मरुत: । १४५- इन्द्र वरुणादित्य मरुत: । १४६- इन्द्र द्यु पृथिविविश्वे देवा: । १४७- इन्द्रा-ग्नि देवा: । १४८- इन्द्राग्नि वरुण रुद्रादित्या: । १४९- इन्द्रवायु बृहस्पतय: । १५०- इन्द्रादित्य मरुत: । १५१- इन्द्राग्नि सवितृबृहस्पतय: । १५२- इन्द्रसोम - ब्रह्मणस्पतय: । १५३- इन्द्र मरुदादित्यादितय: । १५४- इन्द्र ऋभु मरुन्मित्र - वरुणाश्विन: । १५५- इन्द्रद्यु रुद्र मित्रवरुणा: । १५६- इन्द्रा पर्वतौ वज्र: इन्द्र: । १५७- इन्द्राग्नि सवितार: । १५८- इन्द्र द्यावा पृथिव्य: । १५९- इन्द्राग्नि देवा: । १६०- इन्द्र पूषाश्वि देवा: । १६१- इन्द्र वरुणमरुद्देवपत्नी भारत्य: । १६२- इन्द्रार्यम पूषभगा: । १६३- इन्द्राग्न्युषस: । १६४- ब्रह्मस्पति: पर्जन्याग्नी-पूषा इन्द्र: । १६५- इन्द्रोष आदित्या: । १६६- इन्द्राग्नी मित्रवरुणादिति: - स्व: पृथिवीद्युमरुत्पर्वताव्विष्णुपूण ब्रह्मणस्पतिभगसवितार: । १६७- इन्द्राण्यग्ना-य्यश्विनी रोदसी वरुणान्य: । १६८- इन्द्रमित्र वरुणपूष सवितार: । १६९- इन्द्र वरुणार्यम विष्णव: । १७०- इन्द्र पृथिवी पूष भगादिति पञ्चजना: । १७१- इन्द्र सरस्वती पर्जन्यौषध्यग्नय: । १७२- इन्द्रमरुत्वष्टृट मित्रार्यमाण: ।

१७३-इन्द्र वरुण मित्राग्न्य षोषधि वृषा मरुत: । १७४- इन्द्राग्नी इन्द्रा - वरुणौ इन्द्रासो मौ इन्द्रा पूषणौ । १७५- इन्द्र वस्वादित्य वरुण रुद्र - त्वष्ट्र देवपत्नय: । १७६- इन्द्रवरुण मित्राग्न्य षोषधि वृषा मरुत: । १७७- इन्द्र वरुण मित्रार्यमादिति सवितार: । १७८- इन्द्र रुद्र मरुत: १७९- इन्द्राश्वि मित्र वरुणा: । १८०- इन्द्र सरस्वती चित्रा: । १८१- इन्द्राग्नि - विश्व देववरुणाय: ।१८२- उषासो नक्ता द्यावा पृथिव्य: । १८३- उषा सूर्य - रश्मय: । १८४- उषोऽग्न्यश्विन: । १८५- उषानक्तौ द्यु पृथिविवरुणमित्रार्यमेन्द्र- मरुत्पर्जण्यादित्यान्तरिक्षास्वर्गः । १८६- उषासा नक्ता द्यावा पृथिव्यौ । १८७- उषा: सिन्धव: पर्वता: पितर: । १८८- ऋभ्विन्द्राश्विन: । १८९- ऋणञ्च- मेन्द्राग्नय: । १९०- ऋभ्विन्द्रपत्नीनदीसरस्वती राका: । १९१- एक विंशति नदी वनस्पति पर्वताग्नि कृशान्व स्तृतिष्यरुद्रा: । १९२- कृषि: कर्षका: पर्जन्य: । १९३- गङ्गा यमुना सरस्वती शुतुद्रि परुष्णि असिक्नी मरुद्वृधा वितस्ता - आर्जीकिया सुषोमा: । १९४- ग्रावेन्द्र मरुद्रोदस्य: । १९५- गुङ्गूसिनीवाली स्राका सरस्वती न्द्राणी वरुणान्य: । १९६- जागत रथन्तर गायत्र सामानि । १९७- त्वष्ट्रिध्ध्रा भग रोदह पूषाश्विन: । १९८- तिस्रो देव्योऽपांनपाच्च (। १९९- त्वष्टृपूषर्भव: । १००- त्र्यरुण त्रसदस्युवग्नय: । १०१- त्रयस्त्रिंवा देवा: । १०२- त्रयस्त्रिंशद्देवाभ्रमरुद् भृगव: । १०३- देव वरुणार्यमाण: । १०४- देवपूषाग्नय:। १०५- द्यु सूर्य रोदसी मित्र वरुण रुद्रेन्द्राग्न्यर्यम भग सोमा: । १०६- देवेन्द्र मरुदग्नि- मित्र वरुणा: । १०७- दध्यङ् अङ्गिर: प्रियमेघ कण्वात्रि मनव: । १०८-द्यु पृथिव्या- दित्य वृष्टय: । १०९- दधिक्राग्न्युषौ बृहस्पति सवित्रश्वि मित्रवरुणभगवसु रुद्रा- दित्या: । ११०- देवेन्द्रर्भव: । १११- देवमरुद्वायव: । ११२- द्यु पृथिव्यर्यमादिति- धातृभग विश्वेदेवा: । ११३- देवेद्यु पृथिव्य: । ११४- दिक्सूर्यात्विगादित्या: । ११५- द्यु पृथिविसिन्धु पर्वत सूर्योष: सोमा: । ११६- द्यु पृथिव्युषोऽग्नय: ।११७- द्यावा पृथिवी निर्ऋतिश्च । ११८- द्यु पृथिव्यश्विन्द्रमरुत्सूर्य: । ११९-द्यु घर्म देवादित्या:। १२०- देव प्रवाचनम् सूर्योऽग्निश्च । १२१- देवेन्द्र मित्र वरुण भगाग्नीत् । १२२- देवमातृ त्वष्ट्रिन्द्र वाजभगमरुत: । १२३- देववात पर्जन्या योषाश्वि भगार्यम वाजिन:। १२४- देवादित्य वसुरुद्रा: । १२५- द्यु पृथिवीनराशंस यमादिति त्वष्ट्र द्रविणोद- ऋभुरोदसी मरुद्विष्णव: । १२६-दधिक्राऽग्नि उषा इन्द्रात्विज: ।

१२७- देवसप्तर्षि बृहस्पति ब्रह्मजाया । १२८- देव मनुष्य राजानः । १२९- देवार्यम-
मित्र वरुणाः । १३०- देवेन्द्र विष्णु मरुदग्न्यन्तरिक्ष वायवः । १३१- देवमरुद्भु-
तानि । १३२- देवाग्नीन्द्र वायुमित्राः । १३३- द्युपृथिवी पृष्टयः । १३४- द्युपृथिवीन्द्र-
पृष्टयः । १३५- देवाग्नि वरुणाः । १३६- देवाहिर्बुध्न्या जलपादिन्द्रसवितृपनिपातः।
१३७- दधिक्राग्न्युषो बृहस्पति सवितृशिव मित्रवरुण भगवसु रुद्रादित्याः । १३८-
देवादित्यादित्यश्वेन्द्राग्नयः । १३९- दधिक्रामित्र वरुणाः । १४०- दधिक्रा उषसोऽ
बग्न्युषः सूर्यबृहस्पत्याङ्गिरस जिष्णवः । १४१- देव द्यु भूमि वरुण मित्राः ।
१४२- देवादितीन्द्र मित्रवरुणाग्नयः । १४३- देव मित्र वरुणाः । १४४- देवा-
ग्न्युषोऽग्नयः । १४५- देवाग्न्युरुद्राः । १४६- व्यदित्युषोमरुतः । १४७-देवा-
भूमिबृहस्पतिरिन्द्रः । १४८- देवादिति वरुणमित्राग्न्यर्यम सवितृभगाः । १४९- देव-
सूर्याग्नयः । १५०- दिग्धाइषुरघोमुखी इषुर्वाणिस्त्रम् । १५१- द्यु पृथिव्यग्नि वस्वा-
दित्यादितयः । १५२- देवपत्नी रोदसी वरुणानी त्वष्टारः । १५३- द्यु पृथिवि-
वरुण मरुतः । १५४- द्यावा पृथिव्या बन्तरिक्षामोषधि वृक्षा इन्द्रः । १५५- देव-
सरस्वती ध्यभिषाक्रातिषाट् दिव्य पार्थिवाष्यान । १५६- देवा होता यजमानः ।
१५७- देवद्यावापृथिव्यः । १५८- देवर्त्विगग्नयः । १५९- दधिक्राव्युषोऽग्नि भगेन्द्र -
विष्णुपूष ब्रह्मणस्प त्यादित्य द्युपृथिव्यप्सूर्याः । १६०- दधिक्राः यज्ञः इळा अश्विनौ।
१६१- दधिक्रावाग्न्युषः सूर्यगो वरुणाश्वदेवाः । १६२- दधिक्रावोषः सूर्यादित्य-
वस्वङ्गिरसः । १६३- दधिक्राग्नि विश्वेदेवाः । १६४- देवाग्नि वरुणमित्रार्यम मरुतः
१६५- द्यावाभूमी वरुण वायु मित्राः । १६६- देवमरुददितयः । १६७- धातृभर्तृ-
पृथिवी रोदस्याद्रि देवस्तुतयः । १६८- नक्तोषारजोद्यावः । १६९- नराशंसपूषाग्नि-
सूर्य चन्द्रमो यमेन्द्र वायूषो रात्र्यश्विनः । १७०- पितृद्यावापृथिव्यः । १७१-पर्वतादित्या
दितिमरुतः । १७२- पार्थिव मध्यमा वग्नी मरुतः । १७३- पूषा मित्रवरुण बृहस्पति-
मरुद्वाय्वश्वित्वष्टृसवितृसरस्वत्यः । १७४- पवमानाग्नि सवितारः । १७५- पितरोऽ
ङ्गिरसोऽथर्व भृगवः । १७६-पितृदेवेन्द्राग्नयः । १७७- प्रजापतिः सविताग्निश्च ।
१७८- पर्जन्यानिलसूर्याः । १७९- पृथिवि देवसूर्याः । १८०- पर्जन्य वातेन्द्र वायुवरुण-
मित्रार्यमा दित्यादिति पार्थिव दिव्यान्तरिक्षदेवाः । १८१- प्राच्यः प्रतीच्या -
दाक्षिणात्याश्च सप्त सप्त नद्यः । १८२- पूषापानपा द्वाय्वश्विनः । १८३- पणिगं
बृहस्पतिसोमग्रावर्षयः । १८४- प्रजापति देव पितृगाः । १८५- पूष विश्वेदेव त्वष्टार
१८६- पर्वतादित्या दितिमरुतः । १८७- पर्वतमरुद्भग वरुणमित्राः । १८८-पृथिव्यन
रिक्ष वनस्प

रिक्षा वनस्पत्योषधय: । १८६- पूषभगादिति सूर्येन्द्र विष्णु वरुण मित्राग्नय:। १६०- पर्वताद्देव पत्न्योषधि भुवनस्पत्यन्तरिक्षा द्यावापृथिव्य: । १६१- पूष - सरस्वती देवपत्नी वायव: । १६२- पर्वताद्यु पृथिव्य: । १६३-पर्जन्यमरुदश्वीन्द्र-विष्णव: । १६४- बृहस्पतिपूषाश्विभगाग्नय: । १६५- बृहस्पति सोमजाम्यथर्वे देव-भृगव: । १६६- ब्रह्मणस्पतिर्मरुदिन्द्रश्च । १६७- ब्रह्मणस्पतिर्वाग्देवा: । १६८-ब्रह्म-सूर्य: पृथिवी अग्नि: । १६६- बर्हिर्वायु पूषण: । २००- बृहस्पति विश्वेदेवेन्द्र-विष्णवश्विन: ।२०१- भगमित्रादिति दक्ष मरुदर्यम वरुण सोमाश्वि सरस्वत्य: । २०२- भगार्यम सवितृ पूषाण: । २०३- भगनराशंस: सवितार: । २०४- भग सवित्र-शेन्द्रा: । २०५- भग नराशंस पुरन्धिर्सत्यार्यमण: । २०६- मित्रवरुणार्यमेन्द्र बृहस्पति-विष्णव: । २०७- मरुदिन्द्र मित्र वरुणादिति सिन्धु पृथिवी द्याव: । २०८- मित्र-वरुण सिन्धव: । २०६- मित्र वरुणार्यम वायविन्द्र प्रजापति मरुत: । २१०- माँस्पचन-पात्र च्छेदन शस्त्रादीनि । २११- महदहंकार पन्च तन्मात्ररूपाणि सप्ततत्वानि । २१२-मित्रार्यम भगवरुण दक्षांशा: । २१३- मित्रार्यम वरुणादित्या: । २१४- मित्रावरुणाग्नय: । २१५- मित्रार्यमा वरुणा: । २१६- मित्रावरुणभगा: । २१७-मित्रार्यम-वरुणमरुत: । २१८- मित्रवरुणवायव: । २१६- मरुद्रुद्राग्नि देवा: । २२०-मरु-दश्वि चन्द्रा: । २२१- मरुद्रुद्राग्नि देवा: । २२२- मरुदिन्द्र वरुण मित्रा: । २२३- माध्यमिक वागजेकपात्सिन्ध्वब्विश्वदेव सरस्वत्य: । २२४- मरुद्वरुण मित्रार्य-मेन्द्रा: । २२५- मित्रवरुण रुद्रा विश्वेदेवा: । २२६- मरुद्वरुणा श्व्युषस: । २२७- मरुदिन्द्रविष्णव: । २२८- मित्रावरुणदेव यज्ञाग्नय: । २२६- मित्रावरुणा-र्यमा निपातभाक् । २३०- मित्रार्यम वरुण देवा: । २३१- मित्रार्यमभगतुविजात - वरुणांशा: । २३२- मित्र वरुणार्यम वायविन्द्र मरुद्रुद्रा: । २३३- मरुद्भगाबोषधि-भुवन गिरय: । २३४- मरुद्गीर्नैच: । २३५- मरुद्बृहस्पति पूषवरुण मित्रार्यमाण: । २३६- मित्रवरुणसोम विष्णवग्नय: । २३७- मित्रवरुण पथ्यास्वस्तीन्द्राग्न्यदितय: । २३८- मित्र वरुण सूर्य पर्जन्या: । २३६- मरुन्मित्र वरुणा: । २४०- मित्र वरुणदेवा: २४१- मित्र वरुणादित्य मरुद्रोदस्यग्नय: । २४२- मित्र वरुणाग्नि देवा: । २४३-मित्र वरुणाश्विन: । २४४- मित्रवरुण द्यु पृथिव्य: । २४५- मही पूषा भगोवाज: । २४६- मित्र वरुणेन्द्राग्न्यर्यमादितिविष्णु सरस्वतीमरुत: । २४७- मित्र वरुण - रोदसीन्द्रार्यमादिति वायुभगा: । २४८- मरुदग्नि सरस्वत्य: । २४६-मित्रवरुणादित्या:

२५०- मित्रार्यम वरुणा: । २५१- मित्रवरुण सूर्या: । २५२- मित्र वरुणार्यमाग्नय: । २५३- मित्रवरुणार्यमाण: । २५४- मित्र वरुणाहो रात्राणि । २५५- मित्रार्यमसवितृभया: । २५६- मित्रार्यम वरुण मरुत: । २५७-मरुम्मित्रेन्द्रवरुणादित्या: । २५८- मरुद्भिष्ण्वाश्च पूषाण इन्द्र: । २५९- मित्रवरुण घर्म-मरुत: । २६०- मरुदर्यम मित्रा: । २६१-यम वाश्विन्द्र गन्धर्व वसव: । २६२-यमादित्य सोमा: । २६३- यम पितृदेवा: । २६४- यज्ञदेवत्विगध्वर्युर्वादि द्यु पृथिवीन्द्रा: । २६५- यजमानहोत्रध्वर्यु ब्रह्मेन्द्रा: । २६७- यज्ञादित्य वरुण मरुत: । २६८-रोदसीश्यांसह्निताश्चन्द्र रश्मय: । २६९- रोदोऽग्निदीप्तय: । २७०- रोदोमित्रवरुणादित्या: । २७१- रोदस्यहिर्बुध्न्य: । २७२- रुद्र सरस्वतीविष्णुवाग्वृभु नाजविधातु पर्जन्यवाता: । २७३- रोदस्यादित्यवसु मरुत: । २७४- रोदसीवरुणमित्राग्निदेवा: । २७५-विश्वेदेवाग्नीन्द्र वायुमित्रधामानि । २७६- वात पृथिवी द्यु ग्रावाश्विन: । २७७-वरुण मित्रार्यमण: । २७८- वात सिन्ध्वोषधय: । २७९- वनस्पति सूर्य गाव: । २८०- वरुणमित्र देवा: । २८१- वासोऽधिवास पात्रबन्धनादीनि । २८२- विशास्तृ-नियन्तृ ऋतु द्यावा पृथिव्या: । २८३- देदियज्ञ सोम ब्रह्माण: । २८४- वसुमित्र वरुणादितीन्द्र मरुत: । २८५- विश्वेदेव मित्रावरुणा: । २८६- विश्ववार यजतमायी -अवत्सारा: । २८७- वरुणेन्द्र मरुत: । २८८- विश्वेदेवा: वायु बृहस्पति सूर्याग्नीन्द्रा: २८९- धाय्र्यन्द्राश्विन: । २९०- वरुणमित्रेन्द्र विष्णु मरुदेवा: । २९१- वायु-मित्रवरुण मरुदेव द्युपृथिव्य: । २९२- वायुमित्र वरुणाश्वीन्द्रा: । २९३- वाय्विन्द्र-पूषाण: । २९४- विश्वेदेवा०भातारश्व धातृ सरस्वत्य: । २९५- विष्णु देवेन्द्रा: । २९६- वरुणमित्रार्यमाण: । २९७- वरुणमित्रार्यमादित्या: । २९८- वसवो मित्र-वरुणादितीन्द्र मरुत: । २९९- विश्वामित्रायाध्याय रोदस्य: । ३००- विश्वेदेव-मित्रवरुणा: । ३०१- वरुण मित्राग्नीन्द्रा: । ३०२- वाताग्नि पूषभगा: । ३०३- वास्तोष्पति त्वष्टृधिषणा वनस्पत्योषधय: । ३०४- वरुणमित्रभगादितयो-वायु: । ३०५- विष्णुवात सोमशर्वाश्वित्वष्टार: । ३०६- वायुसोम बृहस्पत्यादित्या: । ३०७- वरुणमित्र धेनु सिन्ध्वग्निवाय्वादित्या: । ३०८- वरुणमित्रेन्द्र मरुत्पूष-विष्ण्वग्नि सवित्रोषधि पर्वता: । ३०९- विश्वेदेवा रोदस्यपानयात: । ३१०- विश्व-देव सरस्वतीमरुदाश्व्यग्नय: । ३११- वातधेनव: पर्जन्य: । ३१२- विश्वेदेवाग्नि भगा-श्वीन्द्रा: । ३१३- वरुणमित्रार्यमादितय: । ३१४- विष्णु: रुद्र: अश्विनौ । ३१५-वरुण मित्राग्नय: । ३१६- वरुण मित्रार्यमाग्निदेवयत्नय: । ३१७- विश्ववधी भुवन-द्यु पृ

द्यु पृथिव्यद्रय:। ३१८- वरुण मित्रादित्या:। ३१९- वायुसूर्यवल्य:। ३२०-षड्-देवी (द्युपृथिवि अहोरात्रि अपोषधि) देव सोमा:। ३२१- सूर्य द्यावा पृथिव्य:। ३२२- संवत्सरादित्या:। ३२३- सवितृ मित्रावरुणाद्रोदांसि। ३२४- सवितृ वरुण-मित्रा:। ३२५- सविताद्यावापृथिवी सूर्यान्तरिक्षा सूर्यरश्मय:। ३२६- सवित्रवरुण-मित्र देवा:। ३२७- सवितृभगार्यम देवा: । ३२८- सविताधिषणा अग्निश्च । ३२९- सिन्ध्वन्तरिक्षाजैकपान्मेघाहिर्बुध्न्य देवा:। ३३०- सरस्वद्वरुण पूष वायुवश्विन:। ३३१- सिन्धुतृष्टामया सुसर्तुरसाश्वत्यातिकुभामेहत्तु गोमत्य:। ३३२- सत्य सूर्यर्तुसोमा:। ३३३- सूर्यपत्युरयमास्त्वेग्नी। ३३४- सोमगन्धर्वाग्नय:। ३३५- सोमगन्धर्वाग्नय: । ३३६- सवित्रेन्द्रमरुत:। ३३७- सोमवरुणमित्रा:। ३३८- सवित्र अश्विबृहस्पतिदेवा:। ३३९- सोमाग्न्यदित्य विष्णु सूर्य ब्रह्म बृहस्पतय:। ३४०- सूर्यन्वाताग्नय:। ३४१-सवितृपर्वतधातार:। ३४२- सूर्यरथचक्राश्वा:। ३४३- संवत्सरादित्याय:। ३४४-सिन्धु-संवत्सर तिस्रोदेव्य: । ३४५- सवितृ मित्रावरुणाद्रोदांसि। ३४६-स्रुक् स्वरुस्वधितय:। ३४७- सवितावरुण मित्र देवा: । ३४८- सविता इन्द्र द्यु पृथिवि सिध्वादित्या-दितय:। ३४९- सवितृ भग वरुण मित्रार्यमेन्द्रा:। ३५०- सतेन्द्र पूषण:। ३५१- सोम-इन्द्रो देवा:। ३५२- सदा पृण यजत बाहुवृक: श्रुतवित्रयदेवा:। ३५३- सवितभगाश्विन:। ३५४- सवितृभगापांनपात त्वष्टृ द्यु पृथिव्य: । ३५५- सोम ब्रह्मग्राव यज्ञयूपामित्योषधि-वेदय:। ३५६- सूर्यश्चतस्रोदिश: पर्वता: सिन्ध्वाप: । ३५७- सविताउषस: पर्जन्य: क्षेत्रपति: । ३५८- सत्यपतय: अवेगाव: ऋभव: पितर:। ३५९- सविता पर्वत: इन्द्र-देवा: । ३६०- सवित्रहिर्बुध्न्य वरुत्र्येकधेनव:। ३६१- सूर्य मित्र वरुणा: । ३६२-सवितृ वरुण विश्वेदेवा: । ३६३- सवितृभग वरुण मित्रार्यमाण: । ३६४- होत्रध्वर्यु-प्रतिप्रस्था त्रग्नग्निन्द्र ग्रावस्तु त्प्रशास्तृ ब्रह्माण: । ३६५- क्षात्र मनस एवावद यजतसध्रि-अवत्सारा: ।

अथ यजुर्वेदे माध्यन्दिन संहितायां स्तुता देवा देवगणाश्च प्रदर्श्यन्ते

१- अग्नि:। २- अश्विनौ। ३- अन्तर्यामी जगदीश्वर: । ४- अश्व: ।
५- अपांपति:। ६- अदिति:। ७- अम्बा । ८- अग्न्यादि युक्तात्मा । ९- अग्न्यादि-
विद्याविदात्मा । १०- अध्यापक:। ११- अन्तरिक्षम्। १२- अन्नम् । १३-अनुमति: ।
१४- आत्मा । १५- आप: । १६- आदित्य: । १७- आदित्यो गृहपति: । १८- इन्द्र:।
१९- इषु: । २०- इन्दु: । २१- इडा । २२- ईशान: । २३- ईश्वर: । २४- ऋतु-
विद्याविद्विद्वान् । २५- उषासानक्ता । २६- उष: । २७- उषा । २८- एकरुद्र: ।
२९- ओषधि: । ३०- क: । ३१- कालविद्याविदात्मा । ३२- गृहपतिर्मघवा। ३३-
गणपति: । ३४- गरुत्मान् । ३५- ग्रीष्मर्तु: । ३६- गृहपति: । ३७- चन्द्रमा: ।
३८- चिकित्सु: । ३९- छन्दांसि । ४०- जातवेदा: । ४१- जगदीश्वर: । ४२-जिज्ञासु:।
४३- त्वष्टा । ४४- तनूनपात् । ४५- दिश: । ४६- दिक् । ४७- द्रविणोदा: ।
४८- धनादियुक्तात्मा । ४९- धान्यदात्मा । ५०- निर्ऋति: । ५१- न्यायाधीश: ।
५२- प्रजापति: । ५३- पितर: । ५४- परमात्मा । ५५- प्रजा । ५६- प्राण: ।
५७- प्रजासेनापति: । ५८- परमेश्वर: । ५९- पत्नी: । ६०- परमेष्ठी प्रजापति: ।
६१- पुरोधा । ६२- पदार्थविदात्मा । ६३- पशुविद्याविदात्मा । ६४- पशुपालन-
विद्या विदात्मा । ६५- पवित्रकर्ता। ६६- पवमान: । ६७- पुरुषोश्वर: ।६८- प्रजा ।
६९- पुरुष: । ७०- पूषा । ७१- पृथिवी । ७२- बृहस्पति: । ७३- बृहस्पतिसोम:।
७४- ब्रह्मणस्पति: । ७५- ब्रह्मा । ७६- ब्रह्म । ७७- भग: । ७८- भगवान । ७९-मरुत:।
७९- मन: । ८०- मेघ: । ८१- मघवा । ८२- मित्र: । ८३- मेधा । ८४- मनुष्य: ।
८५- मित्रैश्वर्यसहितात्मा । ८६- महावीर: सेनापति: । ८७- महेन्द्र: । ८८- यज्ञ: ।
८९- यजमान: । ९०- योगी । ९१- यज्ञपति: । ९२- योद्धा । ९३- यज्ञपुरुष: ।
९४- यज्ञानुष्ठात्मा । ९५- यज्ञाङ्गवानात्मा । ९६- यज्ञवानात्मा । ९७- यम: ।
९८- रुद्र: । ९९- रक्षोघ्न: । १००- रत्नवान धनवानात्मा । १०१- राजैश्वर्यादि-
युक्तात्मा । १०२- राज्यवानात्मा । १०३- रसविद्याविद्विद्वान् । १०४- राजा । १०५-
रात्रि । १०६- विष्णु: । १०७- वायु: । १०८- वास्तुरग्नि: । १०९- वास्तुपति-
रग्नि: । ११०- वास्तुपति: । १११- विद्वान । ११२- वाग्विद्युत् । ११३- वरुण: ।
११४- विष्णुर्यज्ञ: । ११५- विद्युत । ११६- वाक् । ११७- वात: । ११८- वैश्वानर: ।
११९- विश्वकर्मेन्द्र: । १२०- वीर: । १२१- वृषा । १२२- वाजी । १२३- वैद्य: ।

१२४- विदुषी । १२५- वसन्त ऋतु: । १२६- वर्षा ऋतु: । १२७- विश्वकर्मा । १२८- विषमाङ्क गणित विद्या विदात्मा । १२९- विश्वेदेवा: । १३०- विश्वकर्माऽग्निर्वा । १३१- वनस्पति: । १३२- वैश्वानरोऽग्नि: । १३३- वन्हि: । १३४-वाक् । १३५- वाज्य: । १३६- शरदृतु: । १३७- शिशिरर्तु: । १३८- श्री: । १३९- श्रीमदात्मा। १४०- सविता । १४१- सूर्य: । १४२- सोम: । १४३- सेनापति: । १४४- सम्राट । १४५- सवितागृहपति: । १४६- सिनीवाली । १४७- समाङ्क गणित विद्या विदात्मा। १४८- सङ्ग्रामादि विदात्मा । १४९- सम्राडराजा । १५०- सरस्वती । १५१- सभापति: । १५२- सभेश: । १५३- समिद् । १५४- स्वग्यानी: । १५५- स्त्रिय: । १५६- सभासद: । १५७- समाधाता । १५८- समिधा । १५९- संवत्सर: । १६०- सुवीर: । १६१- स्रष्टा । १६२- स्रष्टेश्वर: । १६३- होता । १६४- हिरण्य गर्भ: । १६५- हिरण्यगर्भ: परमात्मा । १६६- हिरण्यं तेज: । १६७- क्षात्रपति: । १६८-क्षेत्रपति: ।

अथ द्विदेवत्यम्

१- अप्सवितारौ । २- अग्निसवितारौ। ३- द्यो विद्युतौ । ४- द्यावा पृथिवी । ५- अग्नीषोमौ । ६- इन्द्राग्नी । ७- अग्निवायू । ८- अग्नि सरस्वत्यौ । ९- अग्नि सूर्यौ । १०- इन्द्रमारुतौ । ११- अबोषध्यौ । १२- सूर्यविद्वांसौ । १३- ईश्वरसभाध्यक्षौ । १४- सोमसवितारौ । १५- द्यावा पृथिव्यौ । १६- सभापतीराजानौ । १७- इन्द्रवायू । १८- मित्रावरुणौ । १९- अश्विनौ । २०- दम्पती । २१- सम्राट् माण्डलिकौ राजानौ । २२- ईश्वरसभेशौ राजानौ । २३- इन्द्रा बृहस्पती। २४- आसन्दी राजपत्नी । २५- जायापती । २६- अध्यापकोपदेशकौ । २७- पुरोहितयजमानौ । २८- सभापतिर्यजमानौ । २९- यजमानपुरोहितौ । ३०- जीवेश्वरौ । ३१- अश्विनौ । ३२- दैव्याध्यापकोपदेशकौ । ३३- अग्निवरुणौ । ३४- राजप्रजे । ३५- भूमिसूर्यौ । ३६- प्रष्टृसमाधातारौ । ३७- अहोरात्रे । ३८- राजेश्वरौ । ३९- परमेश्वरविद्वांसौ । ४०- विद्वद्राजानौ । ४१- इन्द्रवायू । ४२- अध्वर्यू । ४३- इन्द्रामरुतौ । ४४- वायुसवितारौ । ४५-

अथ बहुदेवत्यम्

१- विश्वेदेवा: । २- अग्निवायु सूर्या: । ३- द्यावापृथिवी मित्रवरुणाग्नि:

४- अग्न्यपुबृहस्पतय: । ५- विद्वांस: । ६- सविताश्विनौ पूषाण: । ७- अप-
यज्ञ सूर्या: । ८- सुजा सम्यराजान: । ९- गृहपतय: । १०- राजादयोगृहपतय: ।
११- राजादयोगृहस्था: । १२- प्रजापतय: । १३- प्रजापतयो गृहस्था: । १४-
इन्द्रादय: । १५- राजधर्मराजादय: । १६- सोमाग्न्यादित्य विष्णु सूर्यं बृहस्पतय: ।
१७- अर्यमादय: । १८- अग्न्यादय: । १९- पूषादय: । २०- मित्रादय: । २१-
वस्वादय: । २२- सूर्यादय: । २३- सवित्रादय: । २४- आदित्यादय: । २५- कृषी-
वला: कवयोवा । २६- कृषीवला: । २७- अघ्न्या: । २८- वैधा: । २९- भिषज: ।
३०- भिषग्वरा: । ३१- ओषधय: । ३२- ऋतव: । ३३-वस्वादय: । ३४- प्राजा-
पत्यादय: । ३५- छन्दांसि । ३६- पृथिव्यादय: । ३७- अग्न्यादय: । ३८- मेधा-
विन: । ३९- वसव: । ४०- रुद्रा: । ४१- आदित्या: ४२- मरुत: । ४३- बहु-
रुद्रा: । ४४- इन्द्र बृहस्पत्यादय: । ४५- सोमवरुण देवा: । ४६- चातुर्मास्या-
मरुत: । ४७- अतिथ्यादय: । ४८- अङ्गिरस: । ४९- उपदेशका: । ५०- स्वाहा-
कृतय: । ५१- अश्विसरस्वतीन्द्रा: । ५२- इन्द्र सवितृ वरुणा: । ५३- तिस्रोदेव्य: ।
५४- ऋत्विज: । ५५- अग्न्यश्वीन्द्रसरस्वत्याद्या: । ५६- अश्व्यादय: । ५७- सर-
स्वत्यादय: । ५८- होत्रादय: । ५९- यजमानर्त्विज: । ६०- प्राणादय: । ६१-
प्रयत्नवन्तो जीवादय: । ६२- दिश: । ६३- जलादय: । ६४- वातादय: । ६५-
नक्षत्रादय: । ६६- मासा: । ६७- वाजादय: । ६८- आयुरादय: । ६९- विद्युदादय: ।
७०- ब्रह्मादय: । ७१- प्राणादय: । ७२- सूर्यादय: । ७३- सोमादय: । ७४- मारुता-
दय: । ७५- इन्द्रादय: । ७६- इन्द्राग्न्यादय: । ७७- अन्तरिक्षादय: । ७८- वसन्ता-
दय: । ७९- विराजादय: । ८०- पितर: । ८१- कालावयवा: । ८२- भूम्यादय: ।
८३- ईशानादय: । ८४- प्रजापत्यादय: । ८५- मित्रादय: । ८६- चन्द्रादय: ।
८७- अश्विन्यादय: । ८८- अर्धमासादय: । ८९- वर्षादय: । ९०- पूषादय: ।
९१- द्यौरित्यादय: । ९२- सामिधेन्य: । ९३- देव्य: । ९४- इडादय: । ९५-
मनुष्या: । ९६- वीरा: । ९७- धनुर्वेदाध्यापका: । ९८- वादयितारो वीरा: ।
९९- अध्यात्मप्राणा: । १००- कृषीवला: । १०१- रुद्रादय: । १०२- दिगादय: ।
१०३- वागादय: । १०४- सवितादय: । १०५- उग्रादय: । ~~१०६~~- इति ।

अथ भाष्योक्ता: सामवेदोक्ता देवता:

१- अग्नि: । २- अग्निर्वैश्वानर: । ३- अङ्गिरस: । ४- अदिति: । ५--अस्निन्यत-
५- अरण्यानी । ६- अश्विनौ । ७- आदित्या: । ८- आप: । ९- इन्द्र: । १०-
उषा । ११- ऋभव: । १२- गौ: । १३- तार्क्ष्य: । १४- दधिक्रावा । १५- प्रजापति: ।
१६- पूषा । १७- बृहस्पति: । १८- ब्रह्मणस्पति: । १९- भग: । २०- मरुत: ।
२१- मित्र: । २२- रात्रि: । २३- रुद्र: । २४- वरुण: । २५- वात: ।
२६- वाजिन: । २७- वायु: । २८- विश्वकर्मा । २९- विश्वेदेवा: । ३०- विष्णु: ।
३१- वेन: । ३२- वैश्वानर: । ३३- सविता । ३४- सरस्वती । ३५- सरस्वान् ।
३६- सूर्य: । ३७- सोम: । ३८- अन्नम् । ३९- अर्यमा । ४०- आत्मा । ४१-ऋतव: ।
४२- पवमान: । ४३- पवमान सोम: । ४४- पवमानाध्येतृ स्तुति: । ४५- पुरुष: ।
४६- बहु: । ४७- यूप: । ४८- लिंगोक्ता: । ४९- सदसस्पति: । ५०- सुरा: ।
५१- सार्पराज्ञी । ५२- सर्वेदेवा: । ५३- प्रष्टा । ५४- शस्त्री । ५५- सामस्तत् ।
५६- संग्रामाशिष: । ५७- सर्वात्मा । ५८- अग्नामरुतौ । ५९- इन्द्राग्नी ।
६०- इन्द्रापर्वतौ । ६१- इन्द्रा बृहस्पती । ६२- इन्द्रवायू । ६३- द्यावा पृथिवी ।
६४- मित्रावरुणौ ।

--००--

अथर्व वेदों का देवता:

१- अपांनपात् । २- अदिति: । ३- अग्नि: । ४- असित: । ५-अग्नीन्द्रौ ।
६- अग्नीषोमौ । ७- असुर: । ८- अर्यमा । ९- अर्भावर्तमणि: । १०- अन्त-
रिक्षम् । ११- अपान: । १२- अश्विनौ । १३- अह: । १४- अश्व: । १५-अन्नम्।
१६- अशनि: । १७- अनड्वानिन्द्र: । १८-अपामार्ग्यो वनस्पति: । १९- अतिमृत्यु:।
२०- अजश्रृङ्गी । २१- अप्सरस: । २२- अंश: । २३- अनुमति: । २४- अग्नाविष्णू।
२५- अरुन्धती औषधि: । २६- अघ्न्या । २७- अनुमति: । २८- अद्रि । २९-
अरिनाशनम् । ३०- अपामार्गवीरुत् । ३१- अपचित्यादय: । ३२- अपचिद् -
भैषज्यम् । ३३- अमावास्या । ३४- अतिथि: । ३५- अध्यात्मम् । ३६-अर्बुदि: ।
३७- अभयम्। ३८- अथर्वणादय: । ३९- अस्तृतमणि: । ४०- अङ्गानि । ४१-
आदित्या:। ४२- आसुरी वनस्पति: ।४३- आशापाला: । ४४- आत्मा । ४५-
आयु: ।४६- आदित्या वसवो ऽङ्गिरस: । ४७- आयुष्यम् । ४८- आदित्य रश्मि:।
४९- आङ्गिरसादय: । ५०- आञ्जनम् । ५१- इन्द्र । ५२- इन्द्राणी । ५३-
इन्द्राग्नी । ५४- इन्द्रवायु । ५५- इन्द्रापूषणौ । ५६-इडा । ५७- इन्द्राबृहस्पती।
५८- इन्द्रावरुणौ । ५९- इन्द्रासोमौ । ६०- इन्द्राग्न्यादय: । ६१- ईश्वर: ।
६२- ईर्ष्याविनाशनम् । ६३- ईर्ष्यापनयनम् । ६४- उषा: । ६५- उच्छिष्ट: ।
६६-- उषासानक्ता । ६७- ऋतव: । ६८- ऋषभ: । ६९- ऋभु: । ७०- ऋक्सामनी।
७१- एकाष्टका । ७२- एकवृष: । ७३- ओषधय: । ७४- ओदन: । ७५-औषधि:।
७६- औदुम्बरमणि: । ७७- कश्यम: । ७८- काल: । ७९- कृत्यादूषण: । ८०-
कामेषु: । ८१- कल्माषग्रीवोवीरुध: । ८२- काम: ।८३- कृशन: । ८४- कुण्ठ:।
८५- कर्माणि । ८६- कृत्यापरिणम् । ८७- कामात्मा । ८८- कासा । ८९-कुहू: ।
९०- क: । ९१- गन्धर्वाप्सरस: । ९२- गर्भदृंहणम् । ९३- गर्भ संस्राव: ।९४- गाव: ।
९५- ग्रावा । ९६- गुग्गुलु: । ९७- गृहा: । ९८- गृध्रौ । ९९- गौ:। १००-गोष्ठ: ।
१०१- घर्म: । १०२- चन्द्र: । १०३- चन्द्रमा: । १०४- चक्षु: । १०५- जङ्गिड:।
१०७- जरिमा । १०८- जङ्गिडोमणि: । १०९- जातवेदा अग्नि: । ११०-जायान्य:।
१११- जातवेदा: । ११२- जातवेदसोऽग्नि: । ११३- जितादय: । ११४- तक्षक: ।

११५- तक्मनाशन: । ११६- तता: । ११७- ततामहा: ११८- तप: । ~~[illegible]~~ ।
११९- तार्क्ष्य:। १२०- तारके ।१२१- त्वष्टा । १२२- तृष्टिका । १२३- तिरश्चि-
राजी । १२४- त्रिवृदग्न्यादय: । १२५-त्विषि: । १२६- त्रिणामा । १२७-
त्रिषन्धि: । १२८- त्रिवृत् । १२९- त्रैककुदाञ्जनम् । १३०- दम्पती । १३१-दधि-
क्रावा । १३२- दत्ता: । १३३- दर्भ: । १३४- दर्भमणि: । १३५- द्रविणोदा: ।
१३६- दम्पत्यो: परिपन्थिवाशिनी । १३७- द्यावापृथिवी । १३८- द्यावादय: ।
१३९- दिश: । १४०- दिवादित्यौ । १४१- दिव- चन्द्रमस: । १४२- दिव्या आप: ।
१४३- दुन्दुभि: । १४४- दु:स्वप्ननाशनम् । १४५- दूर्वाशाला । १४६- देवा: ।
१४७- देवी: । १४८- देवजना: । १४९- दैव्याऋषय: । १५० द्यौ: । १५१- द्यौष्पिता।
१५२- धन्वन्तरि: । १५३- धनपति: । १५४- धाता । १५५- धाता विधातारौ ।
१५६- ध्रुव: । १५७- धेनु: । १५८- नक्षत्राणि । १५९- नृणांविवाह मन्त्राशिष: ।
१६०- निविद: । १६१- निर्ऋति: । १६२- नितत्नी वनस्पति: । १६३- पर्जन्य: ।
१६४- पशव: । १६५- पशुपति: । १६६- पञ्चप्रदिश: । १६७- पवमान: । १६८-
पराशर: । १६९- परसेनाहनन: । १७०- पञ्चौदनोऽज: । १७१- परमात्मा ।
१७२- प्रजापति: । १७३- प्रविध्यन्त: । १७४- प्रचेता अग्नि: । १७५- प्रतिसरादय:।
१७६- प्राण: । १७७- पाप्महा । १७८- पाप्मनाशकोऽग्नि: । १७९- पाष्णिसूक्तम् ।
१८०- पृथिवी । १८१- पृदाकु: । १८२- पृथिव्यग्नी । १८३- पितर: ।१८४- भिप्पली-
भैषज्यम् । १८५- पूषा । १८६- पौर्णमासी । १८७- पुरुष: । १८८- फालमणि:।
१८९- बृहस्पति: । १९०- ब्रह्मा । १९१- ब्रह्मणस्पति: । १९२- ब्रह्म । १९३- बृहस्पति-
सुता अवस्वन्त: । १९४- ब्राह्मण: । १९५- ब्रह्मौदनम् । १९६- ब्रह्मजाया । १९७-
ब्रह्मगवी । १९८- बलास: । १९९- ब्रध्न: । २००- ब्रध्नादय: । २०१- ब्रह्मचारी ।
२०२- भग: । २०३- भवाशर्वौ रुद्र: । २०४- भूमि: । २०५- भेषजम् । २०६-
भैषज्यम् । २०७- मरुत: । २०८- मधुवनस्पति: । २०९- मन: । २१०- मही ।
२११- मरुत्पर्जन्यौ । २१२- मण्डूका: । २१३- मन्यु: । २१४- मधुला वनस्पति: ।
२१५- मरुतां पिता । २१६- मनव: । २१७- मन्याविनाशनम् । २१८- मन्युशमनम् ।
२१९- मधु । २२०- मातृनामा । २२१- मित्र: । २२२- मित्रावरुणौ । २२३- मेखला।
२२४- मेधा । २२५- मृत्यु: । २२६- यक्ष्मनाशनम् । २२७- यम: । २२८-यक्ष्मनाशनोऽ
ग्नि: ।

२२९- यक्ष्मम् । २३०- यमसादनम् । २३१- यक्ष्म विबर्हणम् । २३२- यज्ञः ।
२३३- यामिनी । २३४- यक्ष्मनाशिनी । २३५- योषितः । २३६- योनिगर्भः ।
२३७- योनिः । २३८- यातुधानीः । २३९- रक्षाकः । २४०- रात्रिः। २४१- राजा ।
२४२- राज्यभिषेकः । २४३- रामायणी । २४४- राका । २४६- राष्ट्रम ।
२४७- राष्ट्रादयः । २४८- रुद्रः । २४९- रुद्रगणाः । २५०- रोहिणी वनस्पतिः।
२५१- रेतः । २५२- रोहिणी । २५३- रोहितादित्य देवतम् । २५४- वरुण - सोभाग्नि बृहस्पति वसवः । २५५- वज्रः । २५६- वयः । २५७- वरणमणिः ।
२५८- वशा । २५९- वधुवासः संस्पर्श मोचनम् । २६०- वरुणः । २६१-वसवः ।
२६२- वनस्पतिः । २६१- वर्चः । २६२- वनस्पतिः । २६३- वाक् । २६४- वातपर्जन्यौ।
२६५- वासः । २६६- वामः । २६७- वाचस्पतिः । २६८- वास्तोष्पतिः। २६९- वातः । २७०- वायुः । २७१- वातपत्नी । २७२- वानस्पत्योऽश्वत्थः । २७३- वाजी।
२७४- वायुस्त्वष्टा । २७५- व्याघ्रः । २७६- वायुवन्तरिक्षो । २७७- वृषः ।
२७८- वृषभः । २७९- विश्वजित् । २८०- विवस्वान् । २८१- विश्वप्राणः । २८२- विराट् । २८३- विधा । २८४- विष्णुक्रमः । २८५- विद्युत् । २८६- विश्वेदेवाः ।
२८७- विनायकः । २८८- विश्वकर्मा । २८९- विश्वा भुवनानि । २९०- विष्णुः ।
२९१- विषम् । २९२- विश्वरूपः । २९३- विश्वाभूतानि । २९४- वैश्वानरोऽग्निः।
२९५- वेदः । २९६- वेदी । २९७- वेधाः । २९८- वैराजः । २९९- वैश्वानरः ।
३००- वज्रः । ३०१- वेदमाता । ३०२- शक्रः । ३०३- शंखमणिः । ३०४- शमी ।
३०५- शमघुमः । ३०६- शाङ्कुरादयः । ३०७- शतौदनः । ३०८- शतवारः । ३०९- शाला । ३१०- शालाग्निदेवत्यम् । ३११- शितिपादविः । ३१२- श्विन्तं वर्षम् ।
३१३- श्रेयोऽर्कः । ३१४- श्येनः । ३१५- श्रोत्रम् । ३१६- सविता । ३१७- सपत्नहाऽग्निः। ३१८- सकामा भविष्यवं: । ३१९- सवाताः । ३२०- स्वजः । ३२१- सरस्वती।
३२२- सप्त सिन्धवः । ३२३- स्तनयित्नुः । ३२४- सर्वरूपा सर्वात्मिका सर्वदेवमनीवाक्।
३२५- स्कन्दः । ३२६- सत्योजा अग्निः । ३२७- संनतिः । ३२८- सर्वात्मा रुद्रः।
३२९- सप्तऋषयः । ३३०- संस्फानम् । ३३१- स्मरः । ३३२- सभा । ३३३- सर्वऋषयः । ३३४- स्कम्भः । ३३५- स्वर्गः । ३३६- स्व विवाहः । ३३७- संवत्सरादयः।
३३८- सर्वशीर्षामयाचपाकरणम् । ३३९- सांमनस्यम् । ३४०- संवत्सरः ।

[illegible]

३४१- साग्नयो हेतव: । ३४२- सान्तपनाऽग्नि: । ३४३- सावित्री । ३४४-सिन्धव:। ३४५- सिन्धु: । ३४६- सीता । ३४७- सुखम् । ३४८- सूर्य: । ३४९- सुपर्ण: । ३५०- सुधन्वा । ३५१- सोम: । ३५२- सोम्यास: पितर: । ३५३- सौगन्धिका - निलिम्पा । ३५४- सोमारुद्रौ । ३५५- सोमार्कौ । ३५६- सोमापूषणौ । ३५७- स्वापन: । ३५८- हस्त: । ३५९- हरि: । ३६०- हिरण्यम् । ३६१- हेति: । ३६२- क्षात्रियोराजा । ३६३- क्षेत्रपति: । ३६४- ज्ञानम् ।

सोम संस्थादि श्रौत यागार्थं माहूता देवता अनुसन्धीयन्ते ।
तदनुरोधेन विश्वेषांदेवानां स्थानमपि निश्चीयते ।

सर्वेषामेव श्रौत यागानां दर्शपूर्णमासयाग: प्रकृतिरूप: । तदवधानेनैव सर्वेषां श्रौतयागानामन्वेषणं सम्भवम् । अत: सोमयागात्पूर्वं दर्शपूर्णमासादि नित्यनैमित्तिक काम्येष्टीनां चातुर्मास्यादि यागानां तत: परं सोमादि संस्थानां देवतानां नामानि क्रमानुक्रमेण प्रदर्श्यन्ते । यथा मीमांसायामपूर्वोत्पत्तिविधाने महत्कर्मणामन्तरङ्गाणि बहूनि लघु कार्याणि भवन्ति तेषां कर्मणामपूर्वाणि संयोज्य एकं महदपूर्वमुत्पद्यते । तथैव सम्पूर्णस्य सोमयागस्याग्नीषोमौदेवते, परन्च तदन्तर्गतानामनेक विधीनामपि पृथक् पृथक् देवताभवन्ति ता अपि प्रदर्श्यन्ते ।

सर्वदो दर्शपूर्णमासयोराहूतानां देवतानां नामानि ।

सामिधेनीनांदेवता - अग्नि: । आवाहने प्रथमादेवता - अग्नि: । प्रथमदेवताया-मयं विशेष: । तुशब्देन यष्टव्य देवतावाहनशब्दयोर्मध्ये अग्ने शब्दं ब्रूयात् । उक्तन्च - "अग्नआवहेतितु प्रथम देवताम्" (आ०श्रौ०१-३) । आज्यभाग देवते - अग्नि:, सोमश्च। विशेषाभावात्सोमयाजिनो सोमयाजिश्च प्रधानदेवते एते - अग्निमग्नीषोमाविति पौर्णमास्याम् । असन्नयत: कर्तु: अमावास्यायाम् - अग्नीषोमयोस्थाने इन्द्राग्नी देवते । सन्नयत: इन्द्रं महेन्द्रं वा ग्नी षोमयो: स्थाने । उभयोरन्तरेण हविषी विष्णु: उपांशु देवता । तत्रापरपक्षोयथा - अग्नीषोमीयं पौर्णमास्यां वैष्णवममावा-स्यायामिति । अत: सिद्धपक्षो - अग्नि:, विष्णु: (प्रजापतिर्वा) अग्नीषोमौ, इन्द्रोवैमृध:, इति पौर्णमासीप्रधाना: । अमावास्यांतु - अग्नि:, इन्द्राग्नी प्रधानदेवते (इन्द्र- महेन्द्रयोरन्यतर:) । प्रयाजानुयाज देवता: - देवा (विश्वेदेवा:) आज्यपा:। स्विष्टकृति - स्विष्टकृदग्नि: । इळोपाव्हाने - विश्वेदेवा: । सूक्तवाके -द्यावापृथिवी, विश्वेदेवा:, अग्नि:। शंयुवाके - यज्ञ:, यज्ञपति: । पत्नीसंयाजे सोम:, त्वष्टा:, देवानां पत्नी:, अग्निर्गृहपति: । प्रजाकाम: कर्तायदिस्यात् तर्हि- राका-सिनीवाली - कुहू: प्राग्गृहयतेर्यजन्ते । पत्नी योक्त्रविमोके- वरुण: । प्रायश्चितदेवता: - अयसो ग्नि:। देवा:, विष्णु:, अग्नि:, वायु:, सूर्य:, प्रजापति: ।

।। इति दर्शपूर्णमासयागयोर्देवता नामानि ।।

अस्मिन्यागे - प्रयाज-अनुयाज, इडोपाह्वान्- सूक्तवाक- प्रायश्चित्तादि पन्च कर्मसु विश्वेदेवानां स्थानं मुख्यत्वेन वर्ततेइव । सामिधेनी- आज्यभाग-प्रधानयाग- स्विष्टकृत- शंयुवाक- पत्नीसंयाजादि षट् कर्मसु नास्ति । अतो स्मिन्यागे + प्रथम मग्नेस्थानं, द्वितीयं विश्वेदेवानां स्थानमिति निश्चितम् । (आ०श्रौ० १ अ०) ।

अथ नैमित्तिकास्विष्टिषु आहूता देवता: ।

पौर्णमास शब्देन इष्टि-पशु-सोमा उपदिष्टा: । सर्वासामिष्टीनां दर्शपूर्णमास प्रकृतित्वात् । वार्त्रघ्नावाज्यभागावेव सर्वत्र, नतु वधन्वन्तौ । दर्श शब्देन इष्ट्यादयो न व्याख्याता: , अपितु पौर्णमास शब्देनैवोक्ता: । अतएवाग्न्याधेय कर्मण्युक्तानां तिसृणामपीष्टीनां वार्त्रघ्नावाज्यभागौ । तत्रप्रथमायां पवमानेष्ट्याम् - अग्नि:- अग्नि:पवमान: - देवा आज्यपा: । द्वितीयायां पावकेष्ट्याम - अग्नि:पावक: - अग्नि: शुचि: - देवा आज्यपा: । तृतीयायामदितेष्ट्याम् - अग्नीषोमौ - इन्द्राग्नी- विष्णु:- अदिति: - देवाआज्यपा: । अस्यां तृतीयामामिष्ट्यां सप्तदश सामिधेन्य: । (द्वैधाय्ये) उपर्युक्तानां तिसृणां मध्ये एकादेवता वैकल्पिकी,अदितिर्नित्या। तेन आवाहने पदात्रयंसम्पद्यते । अग्निमग्न आ० सोममा० इन्द्राग्नी आ० अदितिमावह । अथवा अग्नीषोमावा० अदितिमावह । अथवा विष्णमावह- अदितिमावह इति । एकतन्त्रकास्तिस्र इष्टय: । केचित्तु आद्योत्तमे इष्टी वान्छन्ति । अथवा केवला आद्यैव । यदि आद्याचेत्केवला तर्हि सा षड्ढविका सर्वदेवता युक्त एवस्यात् । तथाचाद्यायामेव द्वे धाय्ये स्याताम् ।संयाज्ये विराजौ भवत: । शेषं समानम् । अथाग्न्याधानानन्तरमेव प्रथमायां पौर्णमास्यामिष्ट्यारम्भोजायते । तत्रया प्रथमा सा अन्वारम्भणियेष्टिर्निगद्यते । तस्यां देवता क्रम: । अग्नाविष्णू- सरस्वती - सरस्वान् - अग्निर्भगी । इति- चतस्र: प्रधान देवता: । देवा आज्यपा इत्यादि पौर्णमासवत् । आधानानन्तरं तदब्देएव महाव्याधि: पुत्रादि हानि:स्या यदा उत्सर्गेष्टिं कृत्वा अग्नीन्विसृज्य पुनराधानं कुर्यात्। अनुक्तायामस्यामिष्ट्यामपि देवताक्रम: - अग्नि:- अग्निर्वैश्वानर:- वरुण: - अग्नि- रंशुमान्- मित्र: , इतिपन्च । पुनराधेयेष्ट्याम् - बुद्धिमदिन्दुमन्तावाज्यभागौ । अग्नि- रग्नि: पवमानौ वा । प्रधानदेवता - अग्नि: । देवा आज्यपाइ० । अस्मिन्पुनराधेय कर्मणि द्वितीया वारुणी नामेष्टिरापस्तम्ब सम्मता । तस्या: प्रधान देवता :- अग्नीवरुणौ । शेषं पौर्णमासवत् ।

आग्रयणेष्टि: । आ व्रीहि- श्यामाक यवानां भवति । प्रत्येकं पृथक् पृथगाहुतय: समानं तन्त्रम् । द्वैधाय्ये । शेषं प्रकृतिवत् । आग्रयणेष्ट्याम् - अग्नि: । इन्द्राग्नी- विश्वेदेवा: - (सोम:) द्यावापृथिवी इति चतस्रोदेवता: । केवलं श्यामाकेष्ट्यां सौम्यश्च- रु: । तत्रैव सोमो विकल्पेन । आधा अग्नीन्द्रौ- इन्द्राग्नी वा इति विपर्यासेन विकल्प: व्रीहियवानां धाय्ये विराजौ । इध्माभिमर्शने देवता- प्रजापति: ।

यज्ञविभ्रेष्ट्याम् - अग्नि: - इन्द्र:- सोमो देवतास्तिस्र: । इयमिष्टिरप्याप- स्तम्बेनैवोक्ता । इति नैमित्तिका इष्टय: । आसु नव नैमित्तिकास्विष्टिषु आहूता: प्रधान देवतास्तत्रतत्र प्रतिपादिता: । अत्र केवलायामाग्रयणेष्टयामेव प्रधान देवतासु विश्वेदेवा: स्वतन्त्ररूपेण विद्यन्ते । अग्नेरेव प्रथमं स्थानम् । अन्तिमन्च विश्वेदेवानाम्। परन्च द्विदेवत्यमपहाय एकत्वेन समाम्नाता: प्रधानदेवता वैश्वदेवगण गता एव दृश्यन्ते । तेनांशिक रूपेण सर्वासां नैमित्तिकीनामिष्टीनां विश्वेदेवाएव देवता लक्ष्यन्ते ।

अथ काम्येष्टिष्वाहूतादेवता: प्रस्तूयन्ते ।

आयुष्कामेष्ट्याम्	-	अग्निरायुष्मान् ।इन्द्रस्त्राता इति द्वे प्रधान देवते ।
स्वस्त्ययनेष्ट्याम्	-	अग्नि: स्वस्तिमान् । इत्येका प्रधाना ।
पुत्रकामेष्ट्याम्	-	अग्नि: पुत्र: इत्येका ।
आग्नेयेष्ट्याम्	-	अग्निर्मूर्धन्वान् । अपरायामाग्नेयामग्नि: काम: ।
वैमृधेष्ट्याम्	-	इन्द्रोवैमृध: । अपरायां वैमृध्यामपि मन्त्रभेदेनेन्द्रो वैमृध: ।
ऐन्द्रेष्ट्याम्	-	इन्द्रोदाता - यन्द्र: पुनर्दातावा एकादेवता ।
आशेष्ट्याम	-	आशा - आशापालावा देवता एकैव ।
लोकेष्ट्याम्	-	पृथिवि अन्तरिक्षं द्यौ: इतितिस्रोदेवता: ।
मित्रविन्दयाम्	-	(महावैराज्याम्) देवता: अग्नि:- सोम:- वरुण:-मित्र:

इन्द्र: - बृहस्पति: - सविता- पूषा- सरस्वती- त्वष्टा । एता दश देवता एकप्रदाना अस्यां भवन्ति । यागस्तु प्रतिलोमप्रकारेण । यथा- त्वष्टारं सरस्वती पूषणमित्यादि। आसां दशदेवतानां विश्वेदेव गणान्तर्भावा दियंवैश्वदेवी कथितुं शक्यते । परन्च प्रत्यक्षतो विश्वेदेवानां नामाग्रहणात्सूत्रे वैश्वदेवी नामकरणं न कृतम् । परन्च प्रत्यक्षतो स्या- वैश्वदेवस्वरूपम् ।

स्नुणाश्वज्ञरीयेष्ट्याम - (आभिचारिण्याम्) इन्द्रः सुरो देवता ।

संज्ञानेष्ट्याम् - अग्निर्वसुमान्- सोमोरुद्रवान्-इन्द्रोमरुत्वान्- वरुण-आदित्यवान् । एताश्चतस्रो देवता पि एक प्रदानाः सन्ति। अस्या पि वैश्वदेव स्वरूपम् । अस्या याज्यायां विश्ववेदा इति लिङ्गात् देवा इत्यस्य वेदाइतिविपर्यासोलक्ष्यते ।

ऐन्द्रामारुत्यांभेदकामेष्ट्याम्- इन्द्रः- मरुतश्च । अत्रापि इन्द्रमरुतां प्राथम्यभेदः ।

ऐन्द्राबार्हस्पत्यांपृक्ष्यमाणेष्ट्याम्- इन्द्राबृहस्पती । अत्र बार्हस्पत्यं निरूप्य इन्द्राय - चोदनम् अथवा ऐन्द्राबार्हस्पत्यं निरूप्य इन्द्राय चोदनम् । उभयपक्षो पि ऐन्द्रा बार्हस्पत्ये याज्यानुवाक्ये । अतएव द्विदेवत्वम् ।

वैश्वानरीयेष्ट्याम् - अग्निर्वैश्वानरः। एकप्रधानेयमिष्टिः ।

व्रातपत्येष्ट्याम् - अग्निर्व्रतपतिः । अस्यामप्येक दैवत्यम् ।

पवित्रेष्ट्याम् - अग्निः पवमानः , सरस्वती-प्रिया, अग्निः पावकः , सविता- सत्यप्रसवः , अग्निः- सुचिः, वायुर्नियुत्वान्, अग्निर्व्रतपतिः (दधिक्रावा) अग्निर्वैश्वानरः, विष्णुः शिपिविष्टः इतिदशप्रधानदेवताः।

वर्षकामेष्ट्याम् - अग्निर्धामिच्छत्- (अग्निर्वा) मरुतः - सूर्यः। अत्रत्या मरुद्देवताकास्त्रयोयागाः त्रिपिण्डीद्रव्या भवन्ति । आ०श्रौ० २-१३)

आसु काम्येष्टिषु प्रधानदेवतासु विश्वेदेवाः प्रत्यक्षेन नाम्ना नोपदिष्टाः । परन्च मित्रविन्दायांसंज्ञानेष्ट्यान्च प्रोक्तानां देवतानां वैश्वदेव गणस्वरूपं स्पष्टम् ।

अथ सांवत्सरिकास्विष्ट्ययनेषु आहतादेवताः

एतेषामयनानां प्रयोग कालो द्वौ । फाल्गुन्यां चैत्र्यां वा पौर्णमास्याम् । तुरायणं नाम सांवत्सरिक मिष्ट्ययनम् । तत्र प्रत्यहं प्रतिसवनं तिस्र इष्टयः । प्रातः सवने आग्नेयी । माध्यन्दिनेसवने ऐन्द्री । अपराण्हे तृतीय सवने वैश्वदेवी । अथवा त्रिहविका एकैव प्रातः सवने कुर्यात् । द्वितीयं दाक्षायणमिष्ट्ययनम् । तस्मिन् द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत ।

तत्र पूर्वं पौर्णमास्याम् - अग्निः - अग्नीषोमौ इति द्वे प्रधानदेवते ।

उत्तरस्यांपौर्णमास्याम् - अग्निः - इन्द्रश्चेतिद्वे । याज्यानुवाक्याः प्राकृताएव ।

पूर्वमावास्यासाम् - अग्नि:- इन्द्राग्नी इति प्रधान देवते ।
उत्तरस्याममावास्यायाम् - अग्नि:- मित्रावरुणौ इति द्वे देवते ।
इडादधोनामेष्टययनम् - तत्र प्रजापतिर्देवता । इदमेक देवत्यम् ।
द्यावापृथिव्यारयनम् - अस्य दाक्षायणवद्देवताभिध्यानम् ।
अस्या विधानं यथा - फाल्गुन्यां पौर्णमास्यामारभ्य पौर्णमासतन्त्रेण, अमावास्या पर्यन्तं, तथा अमावास्यामुपक्रम्य पौर्णमासी पर्यन्त महरह - दर्शेष्टितन्त्रेण यजेत । अत्र पुनर्दर्शपूर्णमासयो: पुनरिष्टिविधानं नास्ति ।

अथ चातुर्मास्य यागेषु आहुता देवता:

आद्यां वैश्वानरपार्जन्यायाम्- अग्निर्वैश्वानर:- पर्जन्यश्चेति द्वे ।
प्रात: वैश्वदेव्याम् - अग्नि:- सोम: - सविता- सरस्वती- पूषा- मरुत: स्वतवस: - (केवलपदो- मरुत:) विश्वेदेवा:- द्यावापृथिवी इत्यष्टौ प्रधानदेवता: ।
प्रयाजयागे प्रागुत्माच्वत्वारो देवता आहतव्या: । तद्यथा:- द्वुरो ग्नि:- उषासानक्ता देव्याहोतारा- तिस्रोदेव्य: (इडासरस्वती मही) इति ।
वरुण प्रघासेष्ट्याम् - अग्नि:- सोम:- सविता- सरस्वती- पूषा- इन्द्राग्नी - मरुत:- वरुण:- क: (प्रजापति:) इति नव प्रधाना देवता: ।
अथ द्वयोर्मासियो: साकमेध पर्वणि पूर्वेद्युरनुसवनं तिस्र इष्टय: । तत्रपूर्वाण्हे - अनीकवतेष्ट्याम् अनीकवानग्नि रित्येकप्रधाना । मध्यान्हे- सान्तपनेष्ट्याम्- मरुत: सान्तपना: इति गणदेवता: । अपराण्हे- गृहमेधेष्ट्याम- गृहमेधासोमरुत: इति गुण विशिष्टागण देवता: ।
अपरेउष:काले- पौर्णादर्वम्- तत्र इन्द्र: शतक्रतु: । इत्येका देवता ।
क्रीडिनेष्ट्याम्- मरुत: क्रीडिनोदेवता: इतिक्रीडागुण विशिष्टादेवता: ।
माहेन्द्रेष्टयाम् - अग्नि:- सोम:- सविता- सरस्वती - पूषा- इन्द्राग्नी- इन्द्रो- वृत्रहेन्द्रो- महेन्द्रोवेति तिसृणां विकल्प: । विश्वकर्मा च ।
पित्रेष्ट्याम् - पितर: सोमवन्त: - (सोमो वा पितृमान्) पितरोबर्हिषद: - पितरोग्निष्वात्ताय: यम: (वैवस्वतो वा) देवा आज्यपा:, अग्नि: कव्यवाहन: ।
आदित्येष्ट्याम- अदितिर्देवता । इयमेक देवत्या इष्टि: ।
अथ पञ्चम्यां पौर्णमास्या वैश्वदेवकल्पा शुनासीरीयेष्टिर्भवति। अस्याम- इन्द्राग्नि

विश्वेदेवाः, इन्द्रः शुनासीरः, वायुः, सूर्यः, वायुर्नियुत्वान् वायुर्वा, शुनासीरो-इन्द्रोवा, शुनासीरः- इन्द्रोवाशुनः, एतेषामन्यतमः सूर्यः ।
सवनीयेष्ट्याम्- अग्निः, इन्द्रः, विश्वेदेवाः इति तिस्रोदेवताः ।
चातुर्मास्यांग पशुप्रकरणादशकस्य सवनीयेष्टिर्बौधायनसूत्रे उक्ता वर्तते ।

अथ पाशुकेष्वाहूता देवता वक्ष्यन्ते

तत्रादौ सौत्रामण्याम् - नानापशुदेवता - यथा - अश्विनौ, सरस्वान्, इन्द्रः, बृहस्पतिः।
पशुपुरोडाशयागे - इन्द्रः सविता - वरुणः - वनस्पतयः ।
सोम यागे - ग्रहदेवताः सर्वा एक प्रदानाः ।
प्रधानयागे - अश्विनौ - सरस्वती - इन्द्रः सुत्रामणिः इतिकेचित् ।

अथ ज्योतिष्टोमादि सोमयागेषु देवता नु सन्धिष्यन्ते ।

यत्र सोमः साग्नि चित्यो भवेत् तत्रादौ उखासम्भरणेष्टिः क्रियते ।
अस्याम्- अग्निर्ब्रह्मण्वान् - अग्निः क्षात्रवान् - अग्निः क्षात्राभृत् । इति तिस्रोदेवताः ।
साग्निचित्ये सोमक्रतौ - पशुदेवता - प्रजापतिः । पुरोडाशदेवता - वायुः।
आपस्तम्बानां नियुत्वान्वायुः । पुरोडाशदेवता- प्रजापतिः । कल्पः - ऐन्द्राग्नः ।
सर्वविधाग्निष्टोमादि सोमयागेषु दीक्षणीयाद्युदवसानीयान्ताइष्टयोभवन्ति । सर्वत्र प्रथमा दीक्षणीया । तस्याम् - अग्ना विष्णू प्रधान देवता । साग्निचित्येसोमे - दीक्षणीयायाम् - अग्ना विष्णू - वैश्वानरः - आदित्यो, भुवद्वान्, भुवन पतिरिति त्रयाणां विकल्पः । सरस्वती अदितिर्वा इति द्वयोर्विकल्पः । इत्थं चतस्रः, प्रधान देवताः।
आपस्तम्बमते - अग्ना विष्णू - अग्निवैश्वानरः - अदिति रिति तिस्रएव देवताः ।
द्वितीयायां प्रायणीयायाम् - पथ्यास्वस्तिरग्निः , अग्निः, सोमः , सविता , अदितिः इति पंन्च प्रधानाः । अतः परं सोम क्रयः । तस्य सोमो देवता । तदनन्तरं क्रियमाणायां आतिथ्येष्ट्याम् - विष्णुः प्रधान देवता । इयमेकदेवत्या इष्टिः ।
घर्मस्तवनस्य विश्वेदेवादि बहुदेवत्वा द्विश्वेदेवा देवताः । घर्मयाज्याया - अश्विनौ देवते।
उपसदेष्ट्याम् - अग्निः - सोमः विष्णुः इति तिस्रोदेवताः सन्ति । पूर्वाण्हे अपराण्हे च, विपर्यासोयाज्यानुवाक्यानां - प्रागाथीं पूर्वाण्हे - काण्वी मपराण्हे ।औपवसथ्येहनि उभे पूर्वाण्हे एव । अग्नि प्रणयने - प्रणीयमानो ग्निर्दैवता । हविर्धानिप्रणयने-हव्यवाहो ग्निः । साग्निचित्ये अग्निप्रणयनानन्तरं वैश्वानरीयेष्टयां वैश्वानरो ग्निर्दैवता।

अग्नीषोम प्रणयने - वरुणो देवता । यूपाञ्जने - वनस्पतयो देवता: ।
अग्नीषोमीयेष्ट्याम् - अग्नीषोमौ - वनस्पति: इति प्रधान देवता: । तदङ्ग-भूतासु प्रयाजाहुतीषु - सरस्वतीवाक् - वाक् - वाचस्पति: , सरस्वती - सरस्वान्-महः समहः इति षड् देवता: । प्रधान यागाङ्ग भूतानां देवसूनां हविषाम् - अग्नि-र्गृहपति: - सोमोवनस्पति:- सवितासत्यप्रसव: - बृहस्पतिर्वाचस्पति:, इन्द्रोज्येष्ठ:-मित्र: सत्य: - वरुणोधर्मपति: - रुद्र:पशुमान (पशुपतिर्वा) इत्यष्टौ देवताना -मुपांशुयागा: । यदि सर्वे पृष्ठसंज्ञक: सोमयागश्चेदस्मिं स्थाने उक्त देवतानामृचा यातयेयु: । तत्रोक्ताश्छन्दस्तोमाहर्तु सहिता देवता यथा: - अग्नि: = गायत्र:, त्रिवृत, राथन्तर:, वासन्तिकश्च । इन्द्र: = त्रैष्टुभ:, पंन्चदश:, बार्हत: , ग्रैष्म:श्च । विश्वेदेवा: = जगतीछन्दस्का: , (जागता:) सप्तदशस्तोमा: , वैरूपछन्दस्का: , (वैरूपा:) वार्षिका (वर्षाऋतु प्रिया:) । मित्रावरुणौ = आनुष्टुभौ, एकविंशौ, वैराजौ, शारदौ च । बृहस्पति: = पाङ्क्त:, त्रिणव:, शाक्वर:, हैमन्तिकश्च । सविता = अतिच्छन्दा: , त्रयस्त्रिंश:, रैवत:, शैशिरश्च । अदिति: = विष्णुपत्नी, अनुमति: । वैश्वनर:, क: (प्रजापति:) इति दशदेवता: ।
प्रातरनुवाकस्य - बहुदेवता योगाद्विश्वेदेव मन्त्रसहितत्वाच्च विश्वेदेवादेवता: । आपोनप्त्रीयाया अपां प्रधानत्वे पि विश्वदेव्यावत इत्यन्त मुक्तत्वात् प्रत्यक्षातो वैश्वदेव लिङ्गोच्चारणा द्विश्व देवत्वम् ।उपांशु ग्रहयागे - अन्तर्याम ग्रहयागे च - सूर्य: । सवनीययागे - अग्नि: , वनस्पति: , इन्द्रोवसुमान्, इन्द्रोरुद्रवान्, इन्द्र आदित्यवान्-ऋभुमान्- विभुमान - वाजवान् - बृहस्पतिवान् - विश्वदेव्यावान् इति सवनदेवतानां प्रस्थितं याज्यासु ध्यानं भवति । द्रप्ने पुरोडाशयागे - हरिवां इन्द्र: । स्विष्टकृद्यागे - जातवेदा अग्नि: । द्विदेवत्य ग्रहयागे - प्रथम इन्द्रवायू । मैत्रावरुणग्रहयागे - मित्रा-वरुणौ - अग्नि: । आश्विन ग्रहयागे - नासत्यावसिनौ । ऋतुयागे- होतृप्रेषे - इन्द्रोदेवता । पोतृप्रेषे - मरुत: । नेष्टृप्रेषे - मित्रावरुणौ - पुनर्होतृप्रेषे - देवोद्रविणोदा । पोतृप्रेषे - नेष्टृ - अच्छावाक प्रेषयोषु देवोद्रविणोदा । अध्वर्यु प्रेषे - अश्विनौ । सुन्वत्पदो - अग्निर्गृहपति: । इतिद्वादश ऋतुदेवता: ।

अथशस्त्र देवता:

आज्यशस्त्र - अग्निर्देवता । याज्याया अग्नीन्द्रौ देवते ।

प्रउगशस्त्रे - वायुः इन्द्रवायू - मित्रावरुणौ - अश्विनौ - इन्द्रः विश्वेदेवाः सरस्वती इतिसप्त देवताः । याज्याया - विश्वदेवाग्नीन्द्रवायुमित्रधामानि देवताः । प्रातः सवने मैत्रावरुणशस्त्रे- मित्रावरुणौदेवते । याज्यापि मैत्रावरुणी । ब्राह्मणाच्छंसिशस्त्र - इन्द्रोदेवता । ऐन्द्रीयाज्या । अच्छावाकशस्त्रे - इन्द्राग्नी। ऐन्द्राग्नी याज्या । ग्रावस्तवने - बहुदेवत्वा विश्वेदेवा देवताः । दधिघर्मे - इन्द्रः । सवनीयपुरोडाशे - इन्द्रः । सर्वासांप्रस्थितयाज्यानाम् - इन्द्रोदेवता । दाक्षिण-होम - अग्निर्वायुश्चन्द्रमादित्याश्चो दक्षिणा देवता (इति वैश्वदेवी) । मरुत्व-तीयग्रहयागे - मरुत्वानिन्द्रोदेवता । मरुत्वतीयशस्त्रे - प्रमुखत्वेनेन्द्रोदेवता । गौणत्वेन विश्वेदेवा देवताः । याज्याया - इन्द्रः । निष्केवल्यशस्त्रे - इन्द्रः । ऐन्द्री च याज्या । (शस्त्रेरुद्रादीनामपिसङ्ग्रहः) होत्रकाणां शस्त्रणां याज्यानां च इन्द्र एव प्रधान देवता (अन्येषामपि क्वचित्सङ्ग्रहः) (तृतीय सवने आदित्यग्रहे- आदित्या देवताः । अङ्ग अवियाँगे अग्निः । वनस्पति यागे वनस्पति सहिता विश्वे - देवाः । ऐन्द्रः पुरोडाशयागः । होतुः प्रस्थित याज्याया इन्द्रः । प्रशास्तुः- इन्द्रा-वरुणौ । ब्राह्मणाच्छंसिन इन्द्राबृहस्पती । पोतुः - मरुतः । नेष्टुः - त्वष्टा - शुक्रौ देवते । अच्छावाकस्य इन्द्राविष्णू । आग्नीध्रस्य - अग्निर्देवता । साविध ग्रहस्य-सवितादेवता । वैश्वदेव शस्त्रस्य याज्यायाश्च विश्वेदेवादेवताः । घृतयाज्याया- अग्निः प्रजापतिर्वा । सोमयाज्याया- विष्णु- प्रजापतिर्वा देवता । अन्यतर पक्षे - अग्नाविष्णू। पात्नीवतग्रहयागे - अग्निः (प्रजापतिर्वा) देवता ।

आग्निमारुत शस्त्रे - मुख्यत्वेनाग्नामरुतो देवताः । गौणपक्षे- वैश्वनरोग्निः , विश्वेदेवाः , देवानांपत्नी - पितरः , विष्णु रित्यादयः । अग्नामारुतीयाज्या ।

एकादशानुयाजदेवताः ।

१ देवोबर्हिः । २ देवानराशंसः । ३ देवीर्द्वारः । ४ देवी उषासानक्ता । ५ देवीजोष्ट्री। ६ देवी ऊर्जाहुती । ७ देवा दैव्याहोतारा । ८ देवी स्तिस्रः । ९ देवोवस्पतिः । १० देवोबर्हिर्वारितीः ११ देवा अग्निः स्विष्टकृत । इति । हारियोजनयागे - इन्द्रः । विनिःसृप्त होमे - सोमः । अग्निः । यूपशकल होमे - देवकृतः । पितृकृतः । मनुष्यकृतः। आत्मकृतः । एनसः । विश्वेदेवाः ।

अवभृथेष्ट्याम - अप्समन्तावाज्यभागौ । प्रधानदेवता वरुण: । अग्निवरुणौ स्विष्टकृद्देवते । उदयनीयेष्ट्याम - अग्नि: सोम:, सविता, पथ्यास्वस्ति: , अदिति: । इति पन्च प्रधाना: । आमिक्षायागे - मित्रावरुणौ देवते । त्वाष्ट्र पशुयागे - त्वष्टाग्नि: । पर्यग्नि करणान्ते पशोरुत्सर्ग: । एतावानेवास्य यागस्य विधि:। देविका हवियागे - धाता, अनुमति:, राका, सिनीवाली, कुहू: इति पन्चोपांशु देवता: । याज्यासु देवता देशो न भवति " देविका हवींष्यन्वा यतयेयु: " इति सूत्रवचनात् । (आश्वौ० सू०) यदि देवीनां हवियागो गृहीतश्चेत् - सूर्य:, द्यौ:, उषा: , गौ: पृथिवी इतिपन्चदेवता: । उदवसानीयेष्ट्याम - केवलो ग्निर्देवता । इत्थं सोम संस्थानामाद्ये अग्निष्टोम सोमयागे साङ्गोपांग सहितानां प्रधान यागानां हुतादानामहुतादानान्च प्रामुख्येन देवता नुसन्धानं कृतम् । तत्राधाररूपेण विशेषतो बौधायनाश्वलायनयो: सूत्राधारेण ऐतरेय ब्राह्मणानुसारेण च देवताज्ञानं सुशकम् । ज्ञायते एव सर्वैर्यत् श्रौत यागेषु अग्नेरिन्द्रस्य च विशेषत: प्राधान्यम् । परन्चानुसन्धाने कृते प्रकृतं विश्वेदेवानां स्थानमपि प्राधान्यं भजते । यतोहि सर्वास्विष्टिषु " देवा आज्यपा " इति नाम्ना विश्वेदेवा: सन्त्येव । तथा च एतेषामावाहनं - याग: प्रधानेन सह भवति नत्वप्रधानेन । सर्वेषां यागानामन्या: प्रधान देवता: परिवर्त्यन्ते, देवा आज्यपास्तु नित्या एव । यथा आज्य भागौ नित्यावग्नीषोमौ । तथा नित्यप्रधाना विश्वेदेवा: । यद्यपीन्द्राग्न्यो रनन्तरं तृतीयं विश्वेषां देवानां स्थानमापद्यते , तथापि उपर्युक्त विधानेन अग्ने: , सोमस्य, विश्वेदेवानान्च नित्यत्वात् श्रौतयागेषु प्रथम मेव स्थानं निश्चीयते । अत: परमन्य संस्थासु देवता ज्ञापनं विधीयते । तत्र केवलं प्रधान देवता विचार एवावश्यक: । सर्वं तन्त्रं समानमेव ।

तत्रादौ द्वितीये अत्यग्निष्टोमे - आग्निमारुतादूर्ध्वं षोडशिग्रहयाग एव विशेष: । तस्मिन् षोडशिग्रहयागे - इन्द्रोदेवता । नान्यो विस्तार: । तृतीय उक्थ्य संज्ञे ज्योतिष्टोमे सवनीय पशुयागे - अग्नि: , इन्द्राग्नी इति प्रधान देवता: । आग्नि मारुतान्ते होत्र काणामुक्थ्य प्रयुक्तानि त्रीणि शस्त्राण्यपि भवन्ति, तानि चतुराहावानि । स्तोत्रियानुरूपेभ्य: , अनुरूपानन्तरेभ्य: परिधानीयायाम्य इत्याहाव स्थानानि । तेषां त्रयाणामपिशस्त्राणाम् - इन्द्रो देवता ।

चतुर्थे षोडशी नामाख्ये सोमयागे - सवनीयादेवता स्त्रयः । अग्निः , इन्द्राग्नी, इन्द्रश्च । अत्रापि त्रीण्युक्थ्य शस्त्राणि । देवता इन्द्रः । षोडशी द्विविधः। विहृतः अविहृतश्च । सामगानां नानदसाम्नि अविहृतंशस्त्रं, गौरिवीत साम्नि विहृतं षोडशिं शस्त्रं शंसेत् ।

वाजपेय सोमयागे - सर्वं सप्तदश संख्याकं भवति । तथा - सप्तदश दीक्षाः, सप्तदशापवर्गाः, सप्तदश ~~प्राजापत्याः~~ प्राजापत्याः पशवः , सप्तदशसप्तदश दक्षिणा इत्यादयः । सवनीय यागे देवताः - आज्यभागावग्नीषोमौ। प्रधाने - अग्निः , इन्द्राग्नी, इन्द्रः, मरुतः, सरस्वती, सरस्वान्, प्रजापतिः, वनस्पतिः, इन्द्रोवसुमान, इन्द्रोरुद्रवान्, इन्द्र आदित्यवानित्यादि । देवा आज्यपाः , अग्निर्होता (स्विष्ट-कृदग्निः) इति प्रधानाप्रधान देवताः । एकमतिरिक्तोक्थं वाजपेय शस्त्रम् । तस्य प्रधानतया विष्णुर्देवता । बहुदेवत्वा द्वैश्वदेविकमपि । अन्येष्वपिशस्त्रेषु सूक्तभेदाः,प्रायं देवता भेदोनास्ति ।

अथ अतिरात्रे सोमयोगे - चत्वारः सवनीयाः । अग्निः, इन्द्राग्नी , इन्द्रः , सरस्वती च । अस्मिन् पर्यासि संज्ञानि बुह देवत्वा द्वैश्वदेव्यानि द्वादश शस्त्राणि भवन्ति। प्रतिपर्याये चत्वारि , तत्राद्यं होतुः त्रीणि होत्रकाणां चतुराह्वावानि च ।

अन्तिमायांमप्तोर्यामसंस्थायाम् - देवा अतिरात्रवद् भवन्ति । अत्र विशेष माश्विन शस्त्र मति दीर्घं मति कठिनं बहुमन्त्रात्मकं बहुदेवत्यम्न्च । प्रधान देवता अश्विनौ । ततो पि बहुदेवत्वा द्विश्वेदेवात्मकम् ।

इति सर्वास्विष्टिषु सोमादि संस्थासु याथार्थमाहूता देवतास्तासु
विश्वेदेवानां स्थानन्च प्रोक्तम् ।

--oo--

।। द्वितीयो ध्याय: ।।

विश्वे देवानां स्वरूप विमर्श: ।

(अत्रोक्ता विषया:)

विश्वेदेवानां स्वरूपम्, पन्चपदात्मकम्, अधियज्ञात्मकं स्वरूप चित्रम्, आधिदैविकं स्वरूप चित्रम्, आध्यात्मिकं स्वरूप चित्रम्, संज्ञा, व्युत्पत्ति:, समास:, बहुवचन विचार:, समूहविचार:, स्थानम्, पृथिव्यन्तरिक्षद्युस्थाना देवता:, संज्ञा विचार:, आवाहन विचार:, विश्वेदेवमन्त्रर्षय:, छन्दांसि, चेति ।

--०--

विश्वे देवानां स्वरूपम्

अस्मिन् स्वरूप विषये स्वरूप मीमांसा प्रकरणे पूर्वमेव विस्तरेण लिखितम् । विश्वेदेवा:, गण देवता इत्यपि निश्चितम् । संहितान्तर्गत बहुविधेषु मन्त्रेषुनैपातिकं बहु देवत्यं कथ मस्तीति प्रदर्शितमेव पूर्वम् । तासां देवतानां गणनिश्चयो नास्ति । त्रि संख्या दारभ्य विंशति संख्यान्तं यावत् बहु देवत्यं दृश्यते । विश्वेदेव गण विषये पि सर्वथा एकमत्यं नास्ति । विश्वेदेवा: नाम अग्न्यादि देव पत्न्यन्तानां सर्वासां देवतानां संघ:इत्येक: पक्ष: । तन्मते विश्वेदेवा: = सर्वे देवा इति ।

त्रयस्त्रिंशद्देवा विश्वेदेवा इति द्वितीय: । तन्मते - अष्टौवसव एकादश रुद्रा द्वादशादित्या: प्रजापतिश्च वषट् कारश्चेति । संख्येयं सर्वेषु ब्राह्मण ग्रन्थेषु नैकवारं प्रतिपादिता ।

त्रयोदश संख्याका इति तृतीय: पक्ष: । तन्मते हरिवंशे उक्तम् :-

आत्मार्थे चासृजत्पुत्रान् लोक कर्तॄन् पितामह: ।
विश्वे प्रजानां पतयो येभ्यो लोका विनि: सृता: ।।

तदुक्तं :-
दक्षं मरीचि मत्रिञ्च पुलस्तं पुलहं क्रतुम ।
वसिष्ठं गोतमञ्चैव भृगु मङ्गिरसं मनुम् ।।
अथर्व भूता इत्येते ख्याताश्चैव महर्षय: ।
त्रयोदश सुता येषां वंशा वै सम्प्रतिष्ठिता:।। इति ।।

दश संख्यात्मको वैश्वगण इति चतुर्थ: पक्ष: । अग्नि पुराणे गण संख्याध्याये :-

वसवश्चाष्ट संख्याका रुद्रा एकादश स्मृता: ।
आदित्या द्वादश प्रोक्ता विश्वेदेवा दशस्मृता: ।।

इति दश त्रयोदश संख्ययोर्विरोधे क: पक्षो ग्राह्य इति पृष्टे उच्यते :- यत् जटाधरेण " विश्वेदेवा दशस्मृता " इत्युक्तं तत् कल्प भेदादविरुद्धम् । यथा शतपथ ब्राह्मणे :- यावत् क्रतुरय मस्माल्लोकात् प्रेत्यैवं क्रतुरमुं ल्लोकं प्रेत्य सम्भवति । अतस्त्रयोदश संख्या कल्पान्तरीया विश्वेदेवानामिति सिध्यति ।

दश संख्यात्मक: पक्षो वेद संहितासु ब्राह्मण ग्रन्थेषु च नाम भेदेन परिगृहीतो दृश्यते । सामवेदस्य षड्विंश ब्राह्मणान्तर्गते दैवतब्राह्मणे प्रथमे सूत्रे एव विश्वेदेव गण देवतानां नामानि दृश्यन्ते ।

तद्यथा :- अग्नि:, यन्द्र:, प्रजापति:, सोम:, वरुण:, त्वष्टा, अङ्गिरस:,
पूषा, सरस्वती, इन्द्राग्नी इति दश साम देवता: ।

एतेषां देवतानां नामत: परिचय विषये वैदिक देवता शास्त्र ग्रन्थे पुराकथा शास्त्र ग्रन्थे च बहुभि रांग्ल लेखकै: विस्तारेणोपवर्णितम् । तथा च तदनुवाद कर्तृभि: श्री डा० सूर्यकान्त महोदयैर्हिन्दीभाषायामपि विस्तृतं कथितम् । परन्च गण देवता विषयेषु ते पि नूनं मौना: । किमधिकं । श्रीमद्भि: पण्डित प्रवरै: श्रीपाद दामोदर सातवलेकर महोदयै: प्रणीतायां दैवत संहितायामपि गण देवतानां मन्त्र सङ्ग्रहो न दृष्ट: । कदाचि दग्रे प्रकाशित: स्यादिति मे विश्वास: ।

अथ च अग्निहोत्रात्मक: षोडश कलात्मको गविप्रतिष्ठित: षोडश संख्यात्मकोवैश्वदेव गण इति पन्चम: पक्ष: । अत: प्रकृते वैश्वदेव संहिता प्रबन्धे गण देवतानामेवान्वेषणं कृतम् । तदनुरोधेन पूर्वोक्तानां दश संख्यात्मकानां विश्वेदेवानां स्वरूपंतु वैदिक देवता शास्त्रे ब्राह्मण ग्रन्थे च सुस्पष्टम् ।

इदानीं द्वितीय पक्षो न्विष्यते । तद्यथा - अष्टौवसव० इति । तदुच्यते:-
धरो ध्रुवश्च सोमश्च विष्णुश्चैवा निलो नल: ।
प्रत्यूषश्च प्रभासश्च वसवोष्टौ क्रमात् स्मृता: ।। इति भरत: ।।

अत्र धरस्थाने आपो - व्यापो वा, विष्णुस्थाने सावित्र इत्यपि पाठ: । अथ च - ध्रुवो ध्वरश्च सोमश्च आपश्चैवा निलो नल: । इति स्कन्द पुराणे माहेश्वर खण्डे - ५-८१ श्लोके पाठ: । तथा च- द्रोण: प्राणो ध्रुवो र्कोग्निर्दोषो वसुर्विभावसु: । (भागवते ६-६-१०) इति पक्षत्रये नामभेदे पि संख्यैकत्वम् । एते अष्टौ वसव इति ।

एकादशरुद्रा:

रुद्र शब्दार्थं उक्तम् । त्रिजटश्चीरवासश्च रुद्र: सेनापतिर्विभु: । इति तेयथा:- अजैकपादहिर्बुध्न: पिनाकी चापराजित: । महेश्वर स्त्र्यम्बकश्च हर: शम्भुर्वृषाकपि: ।। ईश्वरश्चैकादशो रुद्रा एकादश: स्मृता: । (गारुडे अ० ६ मात्स्ये अ० ५)

अथ जटाधरस्मृतौ - अजैकपा दहिर्बुध्नो विरूपाक्ष: सुरेश्वर: । जयन्तो बहुरूपश्च त्र्यम्बको प्यपराजित: । वैवस्वतश्च सावित्रो हरो रुद्रा इमे स्मृता: । इति ।

द्वादशादित्या :

मरीचात् कश्यपाज्जाता स्ते दित्या दक्ष कन्यया ।
तत्र शक्रश्च विष्णुश्च जज्ञाते पुनरेवह ।।
अर्यमा चैव धाता च त्वष्टा पूषाच भारत ।
विवस्वान् सविता चैव मित्रो वरुण एव च ।।
अंशो भगश्चातितेजा आदित्या द्वादशस्मृता: ।। (वन्हिपु० गणसंख्याध्याये)

अन्यत्र च :- धाता मित्रो र्यमा शक्रो वरुणस्त्वंश एवच ।
भगो विवस्वान् पूषा च सविता दशमस्तथा ।।
एकादशस्तथा त्वष्टा द्वादशो विष्णु रेवच ।
जघन्यजस्तु सर्वेषामादित्यानां गुणाधि: ।। (महाभारते)

प्रजापति:

पुल्लिङ्ग: । प्रजापति:स्वामीत्यर्थ: । ब्रह्मा इत्यमर: । यस्मात्पितामहो जज्ञे प्रभुरेक: प्रजापति: । ब्रह्मा सुरगुरु: स्थाणु र्मनु: क: परमेष्ट्येथ ।।(महाभा०१-१-३२) महीपाल: इति मेदिनी । अयमेव विधाताहि तथैवेन्द्र: प्रजापति: । म०भा०३-१८५-१६) जामाता- दिवाकर:- वन्हि:- त्वष्टा इति हेमचन्द्र: । उक्तन्च शुक्लयजुर्वेदे (वा०सं० १२-६१) तां विश्वैर्देवैर्ऋतुभि: संविदाना: प्रजापतिर्विश्वकर्मा विमुन्चतु। अथ दश प्रजापतय: । ते यथा:- मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् । प्रचेतसं वसिष्ठन्च भृगुं नारदमेवच । देवान्सर्वां नृषीन्सर्वां स्तर्पयेदक्षातोदकै: ।

अथ एकविंशति प्रजापतय: । ते यथा:-

ब्रह्मास्थाणुर्मनुर्दक्षो भृगुर्धर्मस्तथा यम: । मरीचिरङ्गिरा त्रिश्च पुलस्त्य: पुलह: क्रतु: । वसिष्ठ: परमेष्ठी च विवस्वान् सोम एव च । कर्दमश्चापि य: प्रोक्त: क्रोधो र्वाक् क्रीत एवच एक विंशतिरुत्पन्नास्ते प्रजापतय: स्मृता: ।।(महाभारते मोक्षधर्मे) पिता- इति(ब्रह्मवैवर्ते गणपति खण्डे अ० ४४) यथा:- जनको जन्मदानाच्च रक्षणाच्च पिता नृणाम् । ततो विस्तीर्णकिरणात्कलया च प्रजापति: । इति सृष्टिकर्ता एव प्रजापति: ।

अथ वषट्कार:

(पु०) वषट् इत्यस्य कार: करणं यत्र स देवोद्देश्यको याग: । तथा:- देवयज्ञ:, आहुति:, होम:, होत्रम् इति हेमचन्द्र: । अथच- अग्नौ हुतन्तु यद्द्रव्यं तत् स्यात् त्रिषु वषट्कृतम् (शब्दरत्ने) अयमाहुति प्रदाने उक्तो वषट्कार: (स्वाहारूप:) एव गण देवता । इत्थं द्वितीय पक्षामुक्त्वा तृतीय पक्षो केवला संख्या- एव लब्धा, नतु नाम स्वरूप परिचय: ।

अथ विश्वेदेवा:

इदानीं दश संख्यात्मका विश्वेदेवा: प्रस्तूयन्ते । सो यं चतुर्थ: पक्ष: । यथा:-

> क्रतु र्दक्षो वसु: सत्य: काम: काल स्तथा ध्वनि: ।
> रोचक श्चाद्रय श्चैव तथा चान्ये पुरूरवा: ।।
> विश्वे देवा भवन्त्येते दश सर्वत्र पूजिता: । (वन्हि०पु०गणभेद०अ०)

विश्वेदेवा:, (पुं०) अग्नि:, श्राद्धदेवा: । इत्यपर नामानि । इदानीं पूर्वोक्तानां विश्वेदेव गणे सङ्गृहीतानां दश देवानां स्वरूप परिचय: प्रस्तूयते । स यथा:-

क्रतु:

पुल्लिङ्ग: । क्रियते सो क्रतुरिति विग्रह: । कृ = कृन: क्रतुरितिसिद्धि: । यज्ञ:इत्यमर: । ब्रह्मण: करान्जात: । (म०भा० १-६५-१०) उक्तन्च :- ब्रह्मणो मानस: पुत्रा विदिता: षण् महर्षय: । मरीचिरत्र्यङ्गिरसो पुलस्त्य: पुलह:, क्रतु: । इति एतस्य भार्या- प्रजापते: कर्दमस्यकन्या क्रिया । पुत्रा: - षष्टि सहस्र वाल खिल्याख्याङ्गुष्ठमात्रा ऋषय: । उक्तन्च भागवते:- क्रतोरपि क्रिया भार्या वालखिल्यानसूयत । ऋषीन् षष्टि सहस्राणि ज्वलतो ब्रह्म तेजसा । (४-१-३८) । तथा च- यूप सहित: सोमसाध्यो यज्ञ: । विष्णुश्च । यज्ञ ईज्यो महेज्यश्च क्रतु: सत्र: सताङ्गति: । (विष्णु संहितायाम्) सङ्कल्प: , अयं कामनाधीनश्चित्तवृत्ति विशेष: । उक्तन्च :- काम: क्रतु: कर्म जन्मेत्येवमेषा क्रमो भवेत् । पुंसो या विषया- पेक्षा सकाम इति भण्यते । स एव वर्धमानश्चेत् क्रतुत्वं प्रति पद्यते । रुचेरतिशय: काम्ये विषये क्रतुरीर्यते । स्तुत्यादि कर्म यथा ऋग्वेदे (४-२१-१०) पुरुष्टुत क्रत्वान: स्वस्ति। क्रत्वा कर्मणा स्तुत्यादिहेतुना इति भाष्ये सायण: । अथ छान्दोग्योपनिषदि :-

अथ खलु क्रतुमय: पुरुषो यथाक्रतुरस्मिं ल्लोके पुरुषो भवति तथेत: प्रत्ये भवति स क्रतुं कुर्वीत । मासनामा पि क्रतु: । अयमाषाढ: । अस्मिन्नेवमासे चातुर्मास्यादि याग प्राचुर्यात् क्रतुराषाढ: । उक्तन्च :- शुक्लयजु: संहितायाम् रुद्राध्याये :- वाजायस्वाहा इत्यनुवाके `क्रतवेस्वाहा` । तस्य यागरूपाय इतिमहीधर: । --- इत्थं कर्मरूपंमपि क्रतुस्वरूप मिति ।

दक्ष:

दक्षङ्० = दाने, स्यदे, वृद्धौ च । स्यद इति शीघ्र करणम् । दक्षते धनमुद्योगी । शीघ्रमुत्पादयतीत्यर्थ: । (ऋग्वेदे -२-१-११ मन्त्रे) `तमिळा शतहिमासि दक्षसे०` दानाय समर्थो भवसीत्यर्थ: । दक्षते गति वधयो:, इति दुर्गादास: । दक्षते सृष्टि प्रवृद्धये समर्थो भवति । दक्ष: - प्रजापति विशेष: । स ब्राह्मणो दक्षिणा - ङ्गुष्ठा ज्जात: । तत: प्रभृति मैथुनेन प्रजाजाता: । उक्तन्च मात्स्ये (३-६) ।

शरीरानथ वक्ष्यामि मातृहीनान् प्रजापते: । अङ्गुष्ठाद्दक्षिणाद्दक्ष: प्रजापतिरजायत।। यथाससर्ज चैवादौ तथैव श्रृणुत द्विजा: । यदात्तु सृजतस्तस्य देवर्षिगण पन्नगान् ।। नवृद्धिमगमल्लोकस्तदा मैथुन योगत: । दक्ष: पुत्र सहस्राणि पान्चजन्यामजीजनत् ।।

दक्ष: - हरवृष:, द्रुम:, वन्हि:, महेश:, (इति शब्द रत्नावल्याम्) । विष्णु:, (महाभारते-१३-१४६-१११)। बलम् (इति निघण्टु: २-६) (उक्तन्च ऋग्वेदे - १-९५-६) स दक्षाणां दक्षपति र्बभूव० । बलाधिपतिर्बभूव इति सायण: । इत्थं गतिमन्तं, बलवन्तं सृजनवन्तन्च दक्ष स्वरूपम् ।

वसु:

वसत्यनेनेति वसु: । (नपुं०) रत्नम्, धनम्, इत्यमर: । वृद्धौषधम्, श्यामम्, इति मेदिनी । हाटकम् इति विश्व: । जलम् इति सि०कौ० उणादिवृत्ति: । (पु०) वकवृक्ष:, अनल:, रश्मि:, यत्यमर: । दक्षो द्वितीय जन्मनि षष्ठ मन्वन्तरे असिक्न्या असिक्न्यां पत्न्यां षष्टिकन्या जनयामास । ता: प्रजापतिभ्यो दत्तवान् । धर्मायदश। तासुमध्ये अष्टमीवसुर्नामाख्या । तस्या अष्टौपुत्रा एवाष्टा वसव इत्युच्यन्ते ।

वसु:- योक्त्रम्, राजा इति मेदिनी । सेव्व ६ । धनाधिप: इति विश्व: । साधु:- (शब्दरत्नावली । शिव:, सूर्य:, (अनेकार्थकोषे) विष्णु:- महाभारते । इति वसु:। इत्थं जलीयं, रश्मिमयम्, अग्निमयं,रत्न - धनोत्पादकं तन्मयं वा वसुस्वरूपम् ।

सत्य:

सत्य:- (पुं०) सतेहित: सत्य: । विष्णु: (. कूर्म पु० ४८ अ०) अश्वत्थ वृक्ष: इति राज निघण्टु: । देवगण विशेष: । मार्कण्डेये - ७१-१-२ मन्वन्तरे तृतीये सिन्धुत्तमस्य प्रजापते: । देवानिन्द्रानृषीन भूपान् निबोध गदतो मम। स्वधामानस्तथा देवा यथा नामानु कारिण: । सत्याख्यश्च द्वितीयो न्य स्त्रिदशानां तथा गण: । तपोलोका दूर्ध्वं लोक: इतिविश्व: । इत्थमूर्ध्वलोक वाचकं सत्य स्वरूपम् ।

काम:

काम: (पु०) काम्यते असौ कर्मणिघञ् । इच्छा इति हेमचन्द्र: । अयं ब्रह्मणो हृदया ज्जात: । यथा:- हृदि कामो भ्रुवो: क्रोध:० (भागवते) । महादेव: इति महाभारते - १३-१७-४१ दिग्वासा: काम एवच । विष्णु: अपि तत्रैव:- १३-१४९-४५ कामहा- कामकृत कान्त: काम: कामप्रद: प्रभु: । बलदेव: इति शब्दरत्नावली । काम एष क्रोध एष रजोगुण समुद् भव: । गीता ३-३७) ।

इत्थं कान्तिमयं रजोगुणजं दाहकन्च कामस्वरूपम् ।

काल:

काल: इयत्तया गणक: । एतावती वेलाचेति दुर्गादास: । लौहम् इत्यमर टीकायां वाचस्पति: । काल: (पुं०) कलयति आयुरिति विग्रह: । कल संख्याने प्रेरण पचाद्यच्। क्षण,दण्ड, मुहूर्त, प्रहर, दिन, रात्रि, पक्ष, मास, अयन, वत्सरादि: इति दुर्गादास:। तत्पर्याय:, दिष्ट:, अनेहा, समय: यत्यमर: (१-४-१) । जन्यानां जनक: कालो जगतामाश्रयोमत: । यथा विष्णु पुराणे (१-२-१४) परस्य ब्रह्मणो रूपं पुरुष: प्रथमं द्विज । व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथा परम् । भाषापरिच्छेदे अस्यगुणा:- संख्या, परिमिति:, पृथकत्वम्, संयाग:, विभाग इति । तिथ्यादितत्वे:- अनादि निधन: कालो रुद्र: सङ्कर्षण: स्मृत: । कलनात्सर्व भूतानां स काल: परिकीर्तित:।

महा भारते -१३-१७-४७ सर्वकलनात् काल: शिव: । गजहा दैत्यहा कालो लोकधाता गुणाकर: । काल नियन्तृत्वाद्विष्णुरपि । महाभारते - १३-४६-५८ ऋतु: सुदर्शन: काल: परमेष्ठी परिग्रह: । पर्वत विशेष: इति रामायणे ४-४४-२१।

कालस्तु त्रिविधो ज्ञेयो तीतो नागत एव च। वर्तमानस्तृतीयस्तु वक्ष्यामि श्रृणु लक्षणम्।।
काल: कलयते लोकं काल: कलयते जगत् । काल: कलयते विश्वं तेन काले मिधीयते ।।
कालोहि भगवान्देव: स साक्षात्परमेश्वर:। सर्ग पालन संहर्ता सकाल: सर्वत: सम: ।।
काल: सृजति भूतानि काल: संहरते प्रजा: । काल: स्वपिति जागर्ति कालो हि दुरतिक्रम:।।
(इति हारीतक स्मृतौ)

इत्थं सर्वं विद्यमानं सृष्टिस्थिति संहारकारकं, लोहात्मकं समयापरनामधेयं कालस्वरूपम्।

ध्वनि:

ध्वण ध्वाने शब्दे च । ध्वन, मि रवे इति कवि कल्पद्रुम: । ध्वनि: (पुं०) शब्दो ध्वनिश्च वर्णश्च मृदङ्गादि भवध्वनि:। कण्ठ संयोग जन्मानो वर्णास्ते कादयो-मता: । (भाषा परिच्छेदे) ध्वन्यते स्मिन्निति ध्वन + अधिकरणे इ: । इदमुत्तम मति शयिनि व्यङ्गये वाच्या ध्वनि र्बुधै: कथित: । (काव्य प्रकाशे) वाच्याति शयिनि व्यङ्गेय ध्वनिस्तत् काव्य मुत्तमम् । (साहित्यदर्पणे ४-२-३) इत्थं कण्ठजं सर्वं शब्द राशिरर्थं भाव प्रकाशकन्च ध्वनिस्वरूपम् ।

रोचक:

रोचक:(पुं) रोचयतीति विग्रह: । रुचधातोर्णिच, ण्वुल अक् कृते रूपसिद्धि:। क्षुधा- बुभुक्षा- अशना- जिघत्सा- रुचि: इति हेमचन्द्र: । कदली (इति शब्द रत्ना०) ग्रन्थिपर्णभेद: । लघुत्वम्, तीक्ष्णत्वम्, हृद्यत्वम्, हिमत्वम्, इतिगुणा: । एवं गुण विशिष्टं रोचकस्वरूपम् ।

अद्रय:

अद्रि: (पुं०) अदिशदिति क्रिन्। सूर्य:- पर्वत: - वृक्षा: (इत्यमर:) परिमाणविशेष: (इति शब्द रत्नावली) शाखी - मानभेद: - सप्ताङ्क: पर्वत मूषिकाचेति । इत्थं सूर्य - पर्वत- परिमाण वाचकन्वाद्रिस्वरूपम् ।

पुरूरवा:

पुरूरवा: (पु०) पुरु प्रचुरं रौतीति । पर्वतश्च पुरुनमि यत्र यश्पुरुरवा: । ३-६०-२२(महाभारते) पुरौ पर्वते रौतीति । बुधस्य पुत्र: , चन्द्रवंशीयो राजा, ऐल:, बौध:, उर्वशीरमण:, इतिहेमचन्द्र: । विश्वेदेव: इति जटाधर: । पार्वणश्राद्ध देव: इति बृहस्पति: । अथाग्नि पुराणे:- तस्यो बुधाश्रमं प्रायादिडा रूपाश्रिता सती। बुधे नान्तरमासाद्य मैथुनायोपमन्त्रिता । सोम पुत्राद् बुधाद्राजन तस्याजज्ञे पुरूरवा: । जनयित्वा तत: सातं पुन: सुद्युम्नतां गता । इति ।
इत्थं मन्थ दण्डात्मक वेग प्रचोदक यन्त्रात्मकं पुरूरवस: स्वरूपम् । इति चतुर्थ: पदा: ।

अथ पन्चमपदो विश्वेदेवानां स्वरूपम्

योवा अग्निहोत्रं वैश्वदेवं षोडशकलं पशुषु प्रतिष्ठितं वेद, वैश्वदेवेनाग्निहोत्रेण षोडश कलेन पशुषुप्रतिष्ठितेन राघ्नोति । (ऐ० ब्रा० अ० २५ खंड १) । अनेन ब्राह्मण वाक्येन अयं वैश्वदेव संघ: स्फुटत्वेन प्रदर्शित: । तेनेदं सुस्थिरं यत् विश्वेदेवा: अग्निहोत्र रूपा:, षोडश कला (अवस्था) त्मका:, गोरूप पशुषु प्रतिष्ठिता:, हविर्द्रव्य रूपा:, तच द्रव्याभिमानि देवतानां संघस्वरूपाश्चेति ।

कीदृशमग्निहोत्र द्रव्यम्? वैश्वदेवम् । अग्रिमे ब्राह्मण वाक्ये वक्ष्यमाणारुद्रादयो-विश्वेदेवा: तेषां सम्बन्धि । षोडश कलम्, षोडश संख्यात्मककलावस्थम् । गबि-स्थितत्वादेव पशुवत्प्रतिष्ठितम् इति । अथ कस्यामवस्थायां सतिद्रव्ये के के देवा स्तत्तद् भागस्य भवन्तीति विचार्यते :- १ रौद्रं गविसत्, २ वायव्यमुपावसृष्टम्, ३ आश्विनं दुह्यमानम्, ४ सौम्यं दुग्धम्, ५ वारुणमधिश्रितम्, ६ पौष्णं समुद यन्तम्, ७ मारुतं विष्यन्दमानं , ८ वैश्वदेवं बिन्दुमत्, ९ मैत्रं शरोगृहीतम्, १० द्यावापृथिवीयमुद्वासितम्, ११ सावित्रं प्रक्रान्तम्, १२ वैष्णवं ह्रियमाणम्, १३ बार्हस्पत्यमुपसन्नम्, १४ अग्ने: पूर्वा हुति: स्वरूपम्, १५ प्रजापतेरुत्तरा हुतीरूपम्, १६ ऐन्द्रं हुतम् । इति । एकस्यैव गव्यस्य गो: क्षीरस्य षोडशावस्थासु षोडश प्रधानादेवता: सन्ति । तत्रापि देवतानां सख्यातु पन्चदशैवास्ति। कथंतदुच्यते।अष्टम्या: कलाया: बिन्दुमत बुद्बुदवदवस्थायाम् उपर्युक्तो वैश्वदेवसंघ: समष्टिरूपं भजते । तेनेदं सुनिश्चितं यत् रुद्र: - वायु: -अश्विनौ - सोम: - वरुण:- पूषा- मरुत्- मित्र:- द्यावापृथिवी-सविता- विष्णु:- बृहस्पति:- अग्नि: - प्रजापति: - इन्द्र: इति पन्चदश संख्या-

कानां देवतानामेव संघः " विश्वेदेवाः " इति नाम्ना प्रसिद्धः । अस्य वैश्वदेव संघ ज्ञानस्यापि फलं श्रुति प्रसिद्धम् । उक्तन्च :- यः एतद्वा अग्निहोत्रं वैश्वदेवं षोडशकलं वेद, (जानाति) स ताभिरेव समृद्धिभी राघ्नोति ।

इति षोडश देवतात्मकं पन्चमं विश्वेदेवानां स्वरूपम् ।

इत्थम् अनन्त, त्रयस्त्रिंशत्, त्रयोदश, दश, षोडश देवतात्मकं पन्चविधं विश्वे देवानां स्वरूप मनुसन्धाय प्रदर्शितम् । तत्र दश संख्यात्मको विश्वेदेव गणः आधिभौतिक विज्ञानात्मकः । स यथा :- क्रतुः - विश्वकर्मं शिल्पम् । दक्षः - गतिः , बलम्, सृजनम् । वसुः- जलम्, रश्मियः , अग्निः, विद्युत् । सत्यः- ऊर्ध्वलोकः, उच्चस्थानम्। कामः- रजोगुणाद्दुत्पन्नादीप्तिः, दाहकः । कालः - लौहम्, समयः । ध्वनिः - व्यक्तः शब्दः, सर्गः । रोचकः - लघु, तीक्ष्ण - हिम गुण विशिष्टः , ग्रन्थि-पर्णं भेदः । अदिः- सूर्यः, पर्वतः, परिमाणम् । पुरूरवाः - मन्थदण्डः, वेग-निर्मापकं यन्त्रम् ।


आभिः सामग्रीभिर्यो वैज्ञानिकः प्रकल्पः प्रष्टुं शक्यते सो न्तिमेप्रकरणे विस्तृत रूपेणानुसन्धास्यते । अत्र केवलं संज्ञाप्रकरण मुक्त्वा विश्वेदेव स्वरूपाध्यायः समाप्यते ।

--००--

योवा अग्नि होत्रं वैश्वदेवं षोडशकलं पशुषु प्रतिष्ठितं वेद । ऐ०ब्रा० २५-१)

रुद्रो वायुश्चाश्विनौ तौ सोमश्च वरुणस्तथा ।
पूषा च मरुतश्चैव विश्वेदेवा स्तथा परे ।। १ ।।
मित्रश्च द्यावापृथिवी सविता विष्णु रेवहि ।
बृहस्पति र्गृहपति रिन्द्रश्चैव प्रजापतिः ।।२ ।।
एते षोडश संख्याका गविदेवाः प्रतिष्ठिताः ।
वैश्वदेवे च गोदुग्धे द्रव्येचैवाग्निहोत्रके ।।३।।
षोडशस्वेवावस्थासु दुग्धंतद्देवतात्मकम् ।
जायते देवयजने वैश्वदेवं तदुच्यते ।।४ ।।

(एताः १६ देवताः क्रमेण गोशरीरे प्रदत्ताङ्कानुसारं ज्ञेयाः)



। वैश्वदेवी वै गौः ।

विश्वेषां देवानामाध्यात्मिकं स्वरूपम्

इदंत एकं परऊत एकं तृतीयेन ज्योतिषा संविशस्व ।
संवेशने तन्वश्चारुरेधि प्रियो देवानां परमे जनित्रे ।।(ऋ०१०-५६, १-७)

अग्निरिन्द्रः प्रजापतिः सोमो वरुणस्त्वष्टा ङ्गिरसः पूषा सरस्वतीन्द्राग्नीति
(साम दैवत ब्राह्मण खु०१)

क्रतुर्दक्षो वसुः सत्यः कामः काल स्तथाध्वनिः।रोचकश्चाद्रयश्चैव तथा चान्ये -
पुरूरवाः।।(जटाधरस्मृति)



कथं विश्वेदेवा इति संज्ञा सम्पन्ना ?

अग्नीन्द्रादयो देवास्तु तद्देवतमन्त्रेषु गतार्था भवन्ति । मित्रावरुणाविन्द्र-वायुवादिकावपि च द्विदेवत्यात्मकेषु मन्त्रेषु चरितार्थौ भवतः । "इन्द्रं मित्रं०" इत्यादि बहुदेवतावाचकेषु मन्त्रेष्वपि तन्मन्त्रोक्ता एव बहुदेवाः स्तुता भवन्ति न तु सर्वे । तथैव गण देवतामन्त्रोपक्रमे पि ऋभवः, मरुतः, उषसः, इत्यादयो देवास्तत्तन्नाम्नाः प्रसिद्धाः सन्तो विराजन्ते ।

विश्वेदेवा अपि गणनायां गण देवता संज्ञया एव प्रसिद्धाः । परन्वात्र विश्व पदेन न को पि देवता विशेषो न च निश्चयात्मको गण विशेषश्च प्रसिध्यति । तर्हि कथं संज्ञा सम्पन्नतास्या दित्ययं प्रश्नो वरीवर्त्त्येव ।

अथ च न केवलमग्न्यादि विश्वेदेवान्ता देवा मन्त्राणामेव स्वामिनः, अपितु शिक्षादि वेदाङ्गानां, मन्वादि स्मृतीनां, ब्रह्मादि पुराणानां, न्यायादि षड्दर्शनानां, चतुःषष्टिकलानां, भौतिकविज्ञानादिशास्त्राणां, खड्गादि शस्त्राणां, गायनशास्त्रोक्त राग रागिणीनां, गवादि पशूनां, हंसादि पक्षाणां, वृक्षादि स्थविराणां, हिमालयादि पर्वतानां, किमुत लोकत्रयवर्ति जडचेतनादि सर्वपदार्थ जातानामपि स्वामिनः सन्ति ।

न्यायशास्त्रे यथा पृथिवी वायुस्तेजादीनां लक्षणेन तासां संज्ञानामर्थबोधः सरलतया जायते तथैव वेद संहितासु प्रोक्तानां देवानां यास्कादि निरुक्तकारैर्बहुसरलतया र्थ बोधः कारितः । तेन गवादि देवपत्न्यन्तानां शब्दानां परिज्ञानेन सर्वासां देवतानां संज्ञा ज्ञानं भवति । तदनु देव शब्दस्य व्याख्यानं यथाः- "देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानोभवतीतिवा यो देवः सा देवता" (या० नि० ७,१५) अत्र विवृतिकारः ददातिह्यसावैश्वर्याणि, दीपयतिह्यसौ तेजोमयत्वात्, द्योतनादित्यस्य धात्वन्यत्व-मर्थैकत्वम्, सामान्यंहि देवानां द्यौः स्थानम्, एवं गण विशिष्टो देव एव देवता शब्देन व्यपदिश्यते । ते देवा रश्मिरूपा भवन्ति । (नि० १२,३८,३६) अथ च - "विश्वेदेवाः सर्वेदेवाः" (नि० १२-३६) यत्यत्र सर्वदेवतात्मकञ्च सूचितम् । अस्य भाष्ये - तएव रश्मय उपहित विश्व विशेषणाः सन्तो विश्वेदेवा भवन्ति इत्यर्थः प्रतिपादितः । अग्रिमे "ओमासश्चर्षणिधृतो०" (ऋ० १-१-६) इति मन्त्रे एते विश्वेदेवाः, चर्षणयो मनुष्यास्तान्वृष्टिदानादिना धारयन्तीति चर्षणि धृतो विश्वेदेवाः इतिसायणेन व्याख्यातम् । अत्र शाकपूणि

नामक आचार्याणां मतं भिन्नं वर्तते । तन्मते सर्वदेवता वाचकत्वं विश्वेदेवानां नास्ति। अपितु " यत्किंचिद्बहु देवतं तद्वैश्वदेवानां स्थाने युज्यते यदेव विश्वलिङ्गमिति अत्रविवृति: - बहुदेवतं मन्त्रजातं गायत्रेणच्छन्दसायुक्तं यदेव विश्वलिङ्गम् विश्व शब्दोपेतं मन्त्रजातं सूक्तं वा तदेव वैश्वदेवानां स्थाने विनियुज्यते न बहुदेवता मात्रेणेति।

अत्रयास्क: - " अनत्यन्तगतस्त्वेष उद्देश: " (नि० १२-४०) अस्यायमर्थ: - वैश्वदेवं हि मन्त्रजातं समाम्नाये क्रियार्थमुत्पद्यमानं " आम्नायस्यक्रियार्थत्वात् " (जै०सू०-१-२-१) गायत्रे छन्दसि तावदेवोत्पन्नमर्हति, विश्वयुक्तमन्त्र जातवद्यावत्कर्मसु सर्वं वैश्व देवेषु तच्छन्दस्केष्वलमिति । न च तत्सर्वास्वपि दशतयीष्वस्ति छन्दस्यलं कर्मोत्पादे, प्रयोजनं च तच्छन्दो युक्तैरपि विविधैर्मन्त्रैर्भवति । न च ते तथा विधा: सन्तीति बहुदेवताश्च तस्मिन्छन्दसि सन्ति । तर्हि तस्य परिहार: किमिति विचारे क्रियमाणे तत्र बहुदेवतानि सूक्तानि नोपयुज्यानि । उपर्युक्त " यत्किंचिद्बहुदेवतं " वाक्ये प्रयुक्ता नुत्पत्ति गायत्रे छन्दसि वैश्वदेवमन्त्राणां यावदलं कर्मणि गमयति। बहु विश्वशब्दयो रितरेतरार्था भिधेय प्रत्यासत्त्या बहुदेवान्यपि वैश्वदेवानां स्थाने युज्यन्त एव । अत: सर्व शब्दस्य विश्ववाचकत्वात्सर्वेषां देवानां सङ्घरव " विश्वेदेवा " इति पदेन " विश्वसृज: " इति ऋषि वाचक पदेन च व्यवह्रियते । उक्तञ्च कोषे :-

आदित्या द्वादशप्रोक्ता विश्वेदेवा दशस्मृता: ।। अतएवेदं सिध्यति यद्विश्वेषां देवानां सङ्घ रूपत्वादेव " विश्वेदेवा " इति संज्ञा सम्पन्ना ।

--००--

--oo--

विश्वेदेवा: इतिपदस्य व्युत्पत्ति: समासादिकन्च

वेदेषु एकदेवत्या- द्विदेवत्या- त्रिदेवत्या गणदेवत्या बहुदेवत्याश्च मन्त्रा: सन्ति । तत्र अग्नि- वरुण- पुषादिनाम घटिका एकदेवत्या: । इन्द्राग्नी अग्नाविष्णु- मित्रावरुणौ इत्यादयो द्विदेवत्या: ।

इन्द्रब्रह्मणस्पतिसोमा: - सोमेन्द्र ददिाणा: - इन्द्राणी वरुणान्य- ग्नायुय: इति त्रिदेवत्या: ।

ऋभव: - मरुत: - आप: - उषस: - स्वाहाकृतय: - इतिगणदेवता: । अस्योपरि बहूनां - नानाविधानां- सर्वदेवानान्च समूहो विश्वेदेवा इति भवति ।

विश्वेषां = सर्वेषां देवानां = देवतानां समूहो विश्वेदेवा इत्यस्य व्युत्पत्ति:। ऋनयेषांमते - विश्वे = जगति निवसन्ति स्वमहिम्ना व्याप्नुवन्ति ते सर्वे एक - द्वि- त्रि- गण- बहुदेवतात्मका मन्त्राभिमानिन्योदेवा विश्वेदेवा: इति ।

समास:

विश्वेषां देवानां समाहारो वैश्वदेवम् इति समाहार द्वन्द्वसमास: । विश्वेषां देवानां समूहो विश्वेदेवा: इतिषष्ठी तत्पुरुष: ।

विश्वस्मिन् निवसन्तो मन्त्ररूपेणेति विश्वेदेवा इति सप्तमीतत्पुरुष: । विश्वस्मिन् निवासो येषां देवानां ते विश्वेदेवा इति बहुव्रीहि: ।

इत्थंमस्यपदस्यसमासश्चतुर्विधा: भवन्ति ।

विश्वेदेवा इति बहुवचनं देवतावाचकम् । नत्वादरार्थम् ।

अत्रशङ्क्यते, यदिदं बहुवचनं केवलमादरार्थं देवतावाचकं वा ? तत्रोच्यते - नेदं केवलमादरार्थम् । तत्रेयं युक्तिर्दृश्यते - यत्पुराणोप पुराणेषु - स्मृतिषु वेदेष्वपि च कुत्रापि देवतावाचकेषु पदेष्वादरार्थं बहुवचनं नावलोक्यते, तर्हि कथं विश्वेषांदेवानामेवस्यात् ? अथ च यत्र यत्र सर्वानुक्रमाधारेण विश्वेदेवा देवता इति मन्त्रेषु सूक्तेषु च दृश्यते तेषु सूक्तेषु मन्त्रेष्वपि च बहूनां देवतानां लिङ्गं तत्रोच्चारितंभवति । तेनेदं निश्चीयते यदिदं बहुवचनं देवतावाचकमेव सार्थम् । नतुकेवल मादरार्थे प्रयुज्यत इति ।

--००--

केषां देवानामयंसमूहः?

अस्य निश्चयार्थं किन्चिद्विचार्यते। उपलब्ध चातुर्वैदिक संहितासु बहूनां मन्त्राणां सूक्तानान्च विश्वेदेवा देवताः सन्तीतिध्रुवम्। परन्च कुत्रा पि समूह निर्णये ऐकमत्यं नास्ति। कुत्रचित्साम्यं स्यात्तदप्यपवादात्मकमेव। कथंतदुच्यते - वेदो द्विविधः। मन्त्ररूपो ब्राह्मण रूपश्चेति। तत्र प्रयोगकाले कर्मानुष्ठानस्मारको मन्त्रात्म मन्त्ररूपः, विधि वाक्यात्मको ब्राह्मणरूपश्च। तत्र संहितासु केवलमृग्वेदस्य शाकल संहितायामेव बहुदेवत्यो देवतासमूहः पन्च चत्वारिंशद्वारं भिन्न रूपेण स्तुतः। अथ च सप्तषष्ट्युत्तर चतुःशतवारं निपात भाजो बहुदेवत्यो देवतासमूहः प्रोक्तः। सर्वेसमूहाः " सर्वेदेवाः" इतिपदानुसारं विश्वेदेवात्मकाएवसन्ति। ततो पि सर्वानुक्रमानुसारं शतवारं विश्वेदेवा देवताः सुस्पष्ट रूपेण समाम्नाताः। अतएवैकमत्यमसंभवमेव।

अथेदानीमितरये ब्राह्मणानुसारी विश्वेदेवानां समूहः कथ्यते। " योवा अग्निहोत्रं वैश्वदेवं षोडशकलं पशुषु प्रतिष्ठितं वेद" (२५,१) अस्मिन्खण्डे विश्वेदेवा अग्निहोत्ररूपाः षोडशकला (अवस्था) त्मकाः, गोरूप पशुषु प्रतिष्ठिताः, हविर्द्रव्यरूपाः, तद, द्रव्या भिमानि देवतानां संघ स्वरूपाश्चेति। तेनेदमायाति, यत् अग्निहोत्रगतानां देवतानां समहूः प्रथमः। अग्नि होत्रे प्रयुज्यमानानां हविर्द्रव्याणा मुक्ता रुद्रा दीनां देवतानां समूह इति द्वितीयः। गोरूप यशोप्रतिष्ठितानां ब्रह्मादीनां समूह इति तृतीयः। एकस्यैव गोःचरिस्य षोडशावस्थासु जातासु तद्द्रव्यभोक्तारः षोडश प्रधानदेवतानांसमूह इति चतुर्थः। अथ च कोषे सङ्चारिणां गण देवतानां यत्परिगणनं दृश्यते तन्मतेतु दश संख्याकानां देवतानांसमूहो विश्वेदेवा इ[ति]

उक्तन्च कोषेः- आदित्या द्वादशप्रोक्ता विश्वेदेवा दशस्मृताः।
वसवश्चाष्ट संख्याताः षट्त्रिंशत्तुषितामताः॥
आभास्वराश्चतुःषष्टिर्वाताः पन्चाशदूनकाः॥
महाराजिक नामानो द्वेशते विंशतिस्तथा ॥
साध्या द्वादशविख्याता रुद्रा एकादशस्मृताः॥

इत्थं प्रमाणैः प्रमाणितः पन्चविधो विश्वेदेवानां सङ्घ इति सुसिद्धम्।

--००--

विश्वेदेवानां स्थानम्

एते पृथिवि स्थाना - मध्यस्थाना - उत्तुस्थाना इत्यस्य विमर्श: ।
अथ देवतानां वासस्थाना न्युच्यन्ते । निरुक्त ग्रन्थाधारेण त्रीणि देवतावासस्थानानि लक्ष्यन्ते । प्रथमं पृथिवीस्थानम् । द्वितीयम् अन्तरिक्षास्थानम् । तृतीयम् द्युस्थानम् । तत्र पृथिव्या: षट्त्रिंशद्भागानि कृत्वा तेषु षट् त्रिंशत्पदेषु - ~~१-अश्व:,२-~~ पृथिव्यायतनेषु षट्त्रिंशद्देवता विराजन्ते । तद्यथा - १ अश्व:, २ शकुनि: ३ मण्डूका:, ४ अक्षा: ५ ग्रावाण: ६ नराशंस: ७ रथ: ८ दुन्दुभि: ९ इषुधि: १० हस्तघ्न: ११ अभीशव: १२ धनु: १३ ज्या १४ इषु: १५ अश्वाजनि १६ उलूखलम् १७ वृषभ: । १८ द्रुघण: १९ पितु: २० नद्य: २१ आप: २२ ओषधय: २३ रात्रि: २४ अरण्यानी २५ श्रद्धा २६ पृथिवी २७ अप्वा २८ अग्नायी २९ उलूखलमुसले ३० हविर्धाने ।३१ द्यावा-पृथिवी ३२ विपाट्छुतुद्री ३३ आर्त्नी ३४ शुनासीरौ ३५ देवीजोष्ट्री ३६ देवीऊर्जाहुती इत्यादय: । एतासां नाम्नामवलोकनेन महदाश्चर्यं भवति यदिमानि प्राधान्येन जड वस्तूनां नामानि ? उत देवतानाम् ? तत्रोच्यते :- " यानि पृथिव्यायतनानि सत्वानि-स्तुतिंलभन्ते तान्यतोऽनुक्रमिष्याम:" (नि० ९-१) यानि पृथिव्याश्रयाणि द्रव्याणिवा, तेषामप्यत्र विवक्षितत्वात् समाम्नातानि । अथच पूर्वप्रतिपादिताङ्गणा द्विलक्षणो य मश्वादि गण: । तेन सर्पं लाङ्गलादीनामप्यत्रैवान्तर्भाव: । पृथिव्यायतनत्वा विशेषा तान्यपि स्तुतिं लभन्ते । नेयं जडादिपदार्थानां सरीसृपाणां वा स्तुति: । अपितु तत्तदभिमानि देवतानामेव स्तुति: । कथं सर्वेषां पृथिवी स्थान गतानां देवानां मध्ये अश्व एव प्राथम्येनोक्त: ? उच्यते " तेषामश्व: प्रथमागामी भवति " (नि० ९-१) पुरुष जन्मानन्तरमेवाश्वस्य जन्मेति ज्ञायते । उक्तञ्च - " तस्याआहुत्या: पुरुषो जायत । द्वितीयां यज्जुहोति ततो श्वो जायत । इत्यश्वमेधप्रकरणे विशिष्टो स्याङ्ग भाव: । सो यमश्वो ब्रह्मरूप: प्रजापति नाम्ना: प्रसिद्धो श्वमेधप्रकरणे । तस्माद् ब्रह्म-स्वरूपा देवास्य प्राथम्यं पृथिवीस्थान गतासु देवतास्विति मन्यन्ते ।

अथ मध्यस्थाना देवता वक्ष्यन्ते । मध्यमन्तरिक्षास्थानं यासां देवतानां ता मध्यस्थाना देवता उच्यन्ते । ता देवता अष्टषष्टि संख्याका: सन्ति । तासां नामानि यथा: - १ वायु: २ वरुण: ३ रुद्र: ४ इन्द्र: ५ पर्जन्य: ६ बृहस्पति: ७ ब्रह्मणस्पति: ८ क्षेत्रस्यपति: ९ वास्तोष्पति: १० वाचस्पति:

११ अपांनपात् १२ यम: १३ मित्र: १४ क: १५ सरस्वान १६ विश्वकर्मा १७ तार्क्ष्य: १८ मन्यु: १९ दधिक्रा: २० सविता २१ त्वष्टा २२ वात: २३ अग्नि: २४ वेन: २५ असुनीति: २६ ऋत: २७ इन्दु: २८ प्रजापति: २९ अहि: ३० अहिर्बुध्न्य: ३१ सुपर्ण: ३२ पुरूरवा: ३३ श्येन: ३४ सोम: ३५ चन्द्रमा: ३६ मृत्यु: ३७ विश्वानर: ३८ धाता ३९ विधाता ४० मरुत: ४१ रुद्रा: ४२ ऋभव: ४३ अङ्गिरस: ४४ पितर: ४५ अथर्वाण: ४६ भृगव: ४७ आप्त्या: ४८ अदिति: ४९ सरमा ५० सरस्वती ५१ वाक् ५२ अनुमति: ५३ राका ५४ सिनीवाली ५५ कुहू: ५६ यमी ५७ उर्वशी ५८ पृथिवी ५९ इन्द्राणी ६० गौरी ६१ गौ: ६२ धेनु: ६३ अघ्न्या ६४ पथ्या ६५ स्वस्ति ६६ उषा: ६७ इळा ६८ रोदसी इत्यादीनि ।

मध्यस्थानीयानां देवता नामानि तु मध्यस्थानीय प्रकृत्यनुकूलानि लक्ष्यन्ते ।

मध्यस्थाना देवता इत्यत्र बहुवचनं भेद पक्षे एव ग्राह्यम् । अन्यत्र तु - नैरुक्तानामेकैव देवता, त्रित्वाभ्युपगमात् । एकस्यैव मध्यमस्य पर्यायवाचका न्यष्टषष्टि नामानि गुण विशेषतो भवन्ति । पृथिव्यन्तरिक्ष द्युस्थानत्रयेषु तिस्रोदेवता: (अग्नि-वायु सूर्या:) प्राधान्येनोक्ता व्याहृतिभि: समाम्नाता: । तत्र मध्यमस्थाने वायुवात्म-नैव हि मध्यम ऊर्जान्मासात्परत: सार्वदिक्कमुदकमुपसंह न्नोषधि वनस्पति जलाशये-भ्यो न्तरिक्षलोकस्य गर्भभूतमुदकं संगृण्हाति । पश्चान्मासाष्टकेन विपक्को वर्षाकालं सम्प्राप्याभिस्रवति । उक्तञ्च -

> वान्ति पर्णशुषो वातास्तत: पर्णमुचो परे ।।
> तत: पर्णरुहोवान्ति ततो देव: प्रवर्षति ।।

स एव प्राधम्येन वायु: सन् मेघ जालेन नभो विवृण्वन् वरुण नाम्ना प्रसिद्धो भवति । ततो गर्जन तर्जन रुदन रुद्र:, इरान ददिन्द्र:, रसा प्राजयन् पर्जन्यश्च ~~निरूक्~~ विख्यातो भवति । मध्यस्थानगतासु देवतासु एवं भूतस्य महतो बलशालिनस्य वायो: प्रथमगामित्वमेवयुक्तमिति सिद्धम् ।

इदानीं द्युस्थाना देवता वदयन्ते ।

द्यौस्थानं यसां देवतानां ता द्युस्थाना: । ता एकत्रिंश संख्याका भवन्ति । तासां नामानि यथा -

१ अश्विनौ २ उषा: ३ सूर्या ४ वृषाकपायी ५ सरण्यु: ६ त्वष्टा ७ सविता ८ भग: ९ सूर्य: १० पूषा ११ विष्णु: १२ विश्वानर: १३ वरुण: १४ केशी १५ केशिन: १६ वृषाकपि: १७ यम: १८ अजएकपात १९ पृथिवी २० समुद्र: २१ अथर्वा २२ मनु: २३ दध्यङ् २४ आदित्या: २५ सप्तर्षय: २६ देवा: २७ विश्वेदेवा: २८ साध्या: २९ वसव: ३० वाजिन: ३१ देवपत्न्य: इत्यादीनि।

अत्राश्विनौ प्रथमागामिनौ प्रसिद्धौ । परन्त्वापरस्थले (नि० १२-३५) " अथातो द्युस्थाना देवगणास्तेषामादित्या: प्रथमागामिनोभवन्ति " इति विधानं कथमिति चे दुच्यते - नैते द्युस्थाना देवता अपितु देवानां मित्रप्रभृतीनां गणा:। तेष्वादित्या: प्रत्यक्षा भूता:, सप्तऋषय प्रभृतय: परोक्षा: । अतएव " आदित्या: " इति बहुवचनं निरुक्तकारेण प्रदत्तम् । अन्यथात्वादित्य: प्रथमा स्यात् । अतएवा विरोध: । एवमश्विनौ: प्रथमागामित्वं सिद्धम् । अत्र शङ्कते -

ननु पृथिवीस्थान गतासु देवतासु, पार्थिवाग्नेर्विशेषत: पृथिव्येवस्थानं, नान्तरिक्षं न द्यौश्च । नह्यसति कारण विशेषे प्रथमातिक्रमोन्याय्य:। अतोहेतो स्तं प्रथमं व्याख्या स्याम इति यास्क प्रतिपादितत्वात्कथमश्व: प्रथमागामी भवतीति द्वितीय वाक्येन प्रतिपाद्यते ? तथैव मध्यस्थानगतासु देवतास्वपि वायुर्वेन्द्रोवान्तरिक्षस्थान: इति विकल्पे प्रतिपादिते तासुवायु: प्रथमागामी भवतीत्यपर वाक्येण कथं प्रतिज्ञायते ?

द्युलोक गतास्वपि सूर्योद्युस्थानइत्युक्तो पुनस्तासामश्विनौ प्रथमा गामिनौ भवत इति वाक्येन परस्पर विरोधो लक्ष्यते इति चे दुच्यते । खण्डत्रयात्मिकाया: शङ्काया: प्रथम खण्डस्योत्तरंतु " पुरुषजन्मानन्तरमेवाश्वस्यजन्म " इत्यादिभि: पूर्वोक्तवाक्यै: प्रदत्तमेव । द्वितीयखण्डस्योत्तरं यथा :- यद्यपीन्द्रो मध्यमस्थानस्य मुख्यमभिधानमिति प्रथमं व्याख्येय आसीत । तथापि मध्यमस्य वर्षा कर्मोपि लक्षाणत्वात्तत्र च वायोरेवाधिकार: प्रथम इति दृष्ट्त्वा द्वायुरेव प्रथमागामी भवितुं शक्त: । तृतीये खण्डे पि द्युस्थान गतासु सूर्यं विहायाश्विनोर्व्याख्यानं मण्डयते । कालतो हि द्विस्थानानां देवतानां विशेषो विवक्षित: । आश्विने स्तुतशस्त्रके कर्मणि ऊर्ध्वमर्धरात्रात्सूर्योदयपर्यन्तं प्रथम मश्विनो: काल: पश्चात्सूर्योदय: । तस्मिन्नान्या देवता उपास्ते अश्विभ्याम् । नैरुक्तकाराणांमते प्रथमाश्वी मध्यस्थान:, अपरोद्युस्थान: । अतएवोभयस्थानत्वात्तयो रश्विनोरेकत्रोपन्यास: । नन्वेवमप्येकस्य मध्यस्थाने परस्य द्युस्थान उपन्यासो युक्त इत चे न्न । तयो रेकैकस्या श्वि शब्दस्य पृथग्भावेन स्तुत्यभावात् । अश्विद्वन्द्वात्मकस्य

शव्दस्यवात्यन्तम वियोगात् । सत्यप्यवियोगे प्रथमस्य प्राथम्यात् व्याख्यानं युक्त मिति चेन्न । तत्काले मध्यस्थानस्य हीयमान रूपत्वात् , द्युस्थानस्य वर्धमान रूपत्वाच्च । अतो नन्तरंच द्युस्थान देवता रूपान्तर संस्थाना दक्षिना वेव प्रथमागामिनौ भवतइति । आस्वेकत्रिंशद्देवतासु सप्तविंशतितमं (षड्विंशतितमं च) स्थानंविश्वेदेवानाम्। तदुपरि चतसृणामेव स्थानान्यवशिष्यन्ते । अत्र " देवानांभद्रा० " इति मन्त्र व्याख्याने देवानां गन्तृणाम् रश्मिनाम इति व्याख्यातम् । तत्रैव नित्यमृज्वेव मण्डलादनावरणत्वा-दन्तरिक्षस्य सर्वतो (दीव्यन्ति) यन्तीति देवा रश्मय इति दुर्गा चार्यः । तएव रश्मयः उपहित विश्व विशेषणाः सन्तो विश्वेदेवा भवन्ति (नि० १२-३६) ।

तासां रश्मिमण्डलानां स्थानं तु सूर्यमण्डलान्तर्वर्ति द्युलोकएव दरीदृश्यते । तेन विश्वेदेवानां द्युस्थानम् द्युलोक एव प्रसिद्धम् ।

--००--

कति संज्ञका विश्वेदेवा: ?

अस्मिन्विचारे क्रियमाणे इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्य: स सुपर्णो गरुत्मान् ।। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहु: ।। (ऋ० १-१६४-४६) इति श्रुत्यनुसारमेकएवानिर्वाच्य: परमेश्वरो मायाव्याप्त: स्वकीयै रनेकै: कार्य कलापै रनेकैरवतारैश्च व्यापृतो भवति । तस्य परब्रह्मणो यदंशस्य यदा वश्यकता स्यात्तदा वैदिका स्तदंशस्तुतिप्रोक्तौ वेद मन्त्रै: संस्तुवन्ति । उक्तन्च यास्केण एकैवात्मा बहुधा स्तूयत एकस्यात्मनो न्ये देवा: प्रत्यङ्गानि भवन्ति । (ऋग्वेदे पि ८-५८-२) एक एवाग्निर्बहुधा समिद्ध एक: सूर्यो विश्वमनु प्रभूत: ।। एकै वोषा: सर्वमिदं विभात्येकंवा इदं विबभूव सर्वम् ।। अस्यापीदमेवतात्पर्यंयदेकएवाग्ने: कार्य भेदान्नामभेदा: संज्ञाभेदाश्चजायन्ते । उक्तन्च प्रयोगरत्ने: - लौकिके पावकोह्यग्नि: प्रथम: परिकीर्तित: । अग्निस्तु मारुतोनाम गर्भाधाने प्रकीर्तित: ।। इत्यादि संस्कारभेदान्नामभेदा: । एकएव गणेश- लक्ष्मी - दुर्गा- गङ्गा- विष्णु- शिव- सूर्यादीनां देवतानां बहुभिरलौकिकैर्लौकिकैश्चावतार कार्य कलापै:स्तत्तविशेषणै: श्री मद्वेदव्यासमहर्षिभि: पुराणेषु सहस्र नामावल्यो रचिता: । तथैवात्रापि गण देवतानांमध्ये प्रमुखानां सर्व देवता संघ रूपाणां विश्वेदेवानामपि कार्यभेदात्संज्ञाभेदो दृश्यते । तासां संज्ञानांगणनायथा:

१ सत्यवसुसंज्ञका विश्वेदेवा: । २ क्रतुदक्ष संज्ञका विश्वेदेवा: ।

३ पुरूरवार्द्रवसंज्ञका विश्वेदेवा: । ४ धूरिलोचन संज्ञका विश्वेदेवा: ।

५ धनुर्धर संज्ञका विश्वेदेवा इति केचित। ६ कामकाल संज्ञका विश्वेदेवा: ।

७ साध्या: संज्ञका विश्वेदेवा: । इत्थं सप्तसंख्या सम्पन्ना ।

एतेषां कस्मिन्कर्मणि केषांमावाहनं कर्तव्यमितिविचारो ग्रिमेध्याये समाम्नात: ।

अत: सप्त संज्ञका विश्वेदेवा इति सुस्थिरम् ।

--००--

कस्मिन्प्रयोगेन किं सञ्ज्ञका विश्वेदेवा आहूयन्ते इति विश्वेदेवानां विवरणम्

सर्वेषु लौकिक - पौष्टिक कार्येषु तदारम्भे माङ्गलिकं स्वस्तिवाचनं नान्दी - श्राद्धन्च कुर्यादिति स्मृतिषु बहुशः प्रपन्चितम् । तत्र वृद्धिश्राद्ध विषयकः कार्याकार्य विचारो प्याकर ग्रन्थेषु विस्तृतो व्याख्यातः ।तदाभ्युदयिक श्राद्धं मातृकापूजन पूर्वकं सर्वं सव्येन भवति । तिलाप्यग्राह्याः । द्राक्षामलकयवमूलदक्षिणाः । केवलं पार्वणत्रयमेव तत्र गृह्यते । दूर्वापवित्रकम् । अन्ते भाण्वादनेन विसर्जनम् । अस्मिन्वृद्धि श्राद्धे सर्वत्र " सत्यवसु संज्ञका " विश्वेदेवा भवन्ति । परन्च गर्भाधान-पुंसवन- अनवलोभन- सीमन्तोन्नयन - स्मार्ताधान- श्रौताधान- सोमयागादि सप्तसंस्थात्मकेषुकर्मसु विशेष वचनात् " क्रतुदक्ष " संज्ञका विश्वेदेवा भवन्ति । केचन याज्ञिका स्तेषां परम्परया दक्षक्रतु संज्ञका " इति विपर्यासेनो च्चारणं कुर्वन्ति, तत्र बाधाभावात् । सो प्यपरः पक्षः । अथच मरणान्ते द्वादशाहे सपिण्डीकरण श्राद्धे तु " कामकाल संज्ञका " विश्वेदेवा आहूयन्ते । अन्येषु सांवत्सरिकादि नित्य-नैमित्तिक श्राद्धेषु देवस्थाने " पुरूरवार्द्रव संज्ञका विश्वेदेवाः सन्ति । महालय श्राद्धे तथा च तत्पक्षीय प्रोष्ठपदीद - अविधवानवमीश घात-पात- मृतानान्च श्राद्ध करणे धूरिलोचन संज्ञका विश्वेदेवा भवन्ति । परन्च " धनुर्धर संज्ञका विश्वेदेवाः " इति केचन वदन्ति, , तत्प्रमाणाभावाच्चिन्त्यमेव + सर्वत्र तीर्थश्राद्धे पि । सिद्धान्तपक्षेतु तीर्थश्राद्धे धूरिलोचनसंज्ञका एव विश्वेदेवाः सन्ति । तथैव स्वस्ति वाचने " आनोभद्राः०" इतिसूक्तपाठे साध्याः संज्ञका विश्वेदेवाः स्तूयन्ते । साध्यादेवाः साधनादितियास्कः । रसहरणादिकं स्व व्यापारं साध्नुवन्ति इति स्कन्दस्वामी । साध्यन्ते आराध्यन्ते इति हरिस्वामी । तेहि सर्वमिदं साधयन्ति यदन्येन सर्वकर्मभिरसाधितं तत्साधयन्ति । इति दुर्गः । उक्तं च पुरुष सूक्ते-

यत्र पूर्वे साध्याः सन्ति देवाः ।

इति प्रयोगेषु आवहनात्मकं विश्वेदेवानां विवरणम् ।

--००--

संहितासूक्तानां वैश्वदेवमन्त्राणाम् ऋषयः, छन्दांसि च

तत्रादौ ऋग्वेदे मण्डलानुसारं प्रदर्श्यते ।

स्थलनिर्देशः -सूक्त, मन्त्र	प्रतीकम्	मन्त्रसंख्या- ऋषेर्नाम	छन्दसोनाम- विशेषः ।
१।३।७	ओमास:०	३ मधुच्छन्दावैश्वामित्रः-	गायत्री
१।१४।१२	ऐभिरग्ने०	१२ मेधातिथिः काण्वः	गायत्री
१।२३।८	विश्वान्देवान०	३ ,, ,,	गायत्री
१।८९।१	आनोभद्राः ०	१० गोतमो राहूगणः	जगती ६ विराट ८-१० त्रिष्टुप्
१।९०।१	ऋजुनीती०	६ ,, ,,	गायत्री ६ अनुष्टुप
१।१०५।१	चन्द्रमा०	१९ त्रितआप्त्यः कुत्सः०	पंक्तिः, ८ यवमध्या १९त्रिष्टुप् ।
१।१०६।१	इन्द्रं मित्रं०	७ कुत्स आङ्गिरसः	जगती, ७ त्रिष्टुप्
१।१०७।१	यज्ञोदेवानां०	३ ,, ,,	त्रिष्टुप्
१।१२२।१	प्रवः पान्तं०	१५ कक्षीवान् दैर्घतमसः	,, ५।६ विराड
१।१३९।१	अस्तुश्रौषट्०	१,११ परुच्छेपो दैवो दासिः	अत्यष्टिः ११त्रिष्टुप्
१।१६४।१	अस्यवामस्य०	४१ दीर्घतमा औचथ्यः	त्रिष्टुप् १२,१५,२३, २९,३६,४१, जगती, ४२ प्र०पं०, ५१अनु०।
१।१८६।१	आनइळाभिः०	११ अगस्त्यो मैत्रावरुणिः	त्रिष्टुप्

(द्वितीये मण्डले)

२।२९।१	धृतव्रताः०	७ कूर्मोगार्त्समदः	त्रिष्टुप्
२।३१।१	अस्माकं०	७ भार्गवः शौनकः	जगती, ७ त्रिष्टुप्
२,४१।१३	विश्वेदेवासः	३ भार्गवः शौनकः	गायत्री

(तृतीये मण्डले)

३।२०।१	अग्निमुषस०	५ गाथीकौशिकः	त्रिष्टुप्
३।५४।१	इमंमहे ०	२२ प्रजापतिर्वैश्वामित्रः	,,

३।५५।१	उषसः पूर्वा०	२२	प्रजापतिर्विश्वामित्रः	त्रिष्टुप्
३।५६।१	नतामिनन्ति	८	,, ,,	,,
३।५७।१	प्रमेविविक्वां०	६	गाथिनो विश्वामित्रः	,,

(चतुर्थे मण्डले)

४।५५।१	कोवस्त्राता०	१०	वामदेवो गौतमः	,, ८-१० गायत्री

(पन्चमे मण्डले)

५।२६।६	एदंमरुतो०	१	वध्रुयव आत्रेयाः	गायत्री
५।४१।१	कोनुवां०	२०	भौमो त्रिः	त्रिष्टुप् १६, १७ अति-जगती २० एक० विराद
५।४२।१	प्रशंतमा०	१८	,,	त्रिष्टुप् १७ एक० ,,
५।४३।१	आधेनवः०	१७	,,	,, १६ ,,
५।४४।१	तंप्रत्नथा ०	१५	काश्यपो वत्सारः।	जगती, १४, १५ त्रिष्टुप्
५।४५।१	विदादिवो०	११	सदापृण आत्रेयः	त्रिष्टुप, ६ पुरस्ताज्ज्योतिः।
५।४६।१	हयोनविद्वां०	८	प्रतिक्षत्र आत्रेयः	जगती, २, ८ त्रिष्टुप्
५।४७।१	प्रयुञ्जती०	७	प्रतिरथ आत्रेयः	त्रिष्टुप
५।४८।१	कदुप्रियाय०	५	प्रतिभानुरात्रेयः	जगती
५।४९।१	देवंवो अद्य०	५	प्रतिप्रभ आत्रेयः	त्रिष्टुप्
५।५०।१	विश्वोदेवस्य०	५	स्वस्त्यात्रेयः	अनुष्टुप् ५ पंक्तिः
५।५१।१	अग्नेसुतस्य०	१५	स्वस्त्यात्रेयः	१-४ गा०, ५-१० उ० ११-१३ त्रि०, १४-१५ अनु०

(षष्ठे मण्डले)

६।२१।६	प्रपूषणं०	१	बार्हस्पत्यो भरद्वाजः	त्रिष्टुप्
६।२१।११	नूमआवाच०	१	,, ,,	,,
६।४९।१	स्तुषेजनं०	१५	ऋजिश्वा भारद्वाजः	,, १५ शक्वरी
६।५०।१	हुवेवोदेवीं०	१५	,, ,,	,,
६।५१।१	उदुत्यच्चक्षु०	१६	,, ,,	त्रिष्टुप १३-१५ उ० १६ अनुष्टुप
६।५२।१	नतद्दिवा०	१७	,, ,,	त्रि०७-१२ गा०, १४ ज०

(सप्तमे मण्डले)

७।३४।१	प्रशुक्रैतुदेवी०	२५	मैत्रावरुणिर्वसिष्ठः	द्विपदा विराट् २२-२५ त्रि०
७।३५।१	शन्नइन्द्राग्नी०	१५	,,	त्रिष्टुप्
७।३६।१	प्रब्रह्मैतु०	६	,,	,,
७।३७।१	आवोवाहिष्ठो०	८	,,	,,
७।३९।१	ऊर्ध्वो अग्निः०	७	,,	,,
७।४०।१	ओ श्रुष्टिः०	७	,,	,,
७।४१।१	प्रातरग्निं०	७	,,	,, १ जगती
७।४२।१	प्रब्रह्माणो०	६	,,	,,
७।४३।१	प्रवोयज्ञेषु०	५	,,	,,
७।४४।१	दधिक्रांवः	५	,,	,, १ जगती
७।४८।१	ऋभुक्षणो०	४	,,	,,
७।५०।३	यच्छल्मलौ०	१	,,	जगती
७।१०४।११	परः सो अस्तु०	१	,,	त्रिष्टुप

(अष्टमे मण्डले)

८।२५।१०	उतनोदेव्यदिति०	३	विश्वमनावैय्यश्वः	उष्णिक्
८।२७।१	अग्निरुक्थे०	२२	मनुर्वैवस्वतः	प्रगाथः =विषमाबृहती
८।२८।१	येत्रिंशति०	५	,,	गायत्री ४ पुरउष्णिक्
८।२९।१	बभ्रुरेको०	१०	,,	द्विपदा विराट
८।३०।१	नहिवो०	४	,,	१ गा० २ पुरउ० ३ बृहती ४ अनुष्टुप
८।५४।३	आनोविश्व०	२	मातरिश्वाकाण्वः	प्रगाथ = विषमाबृ०स०म०बृ०
८।५८।१	यमृत्विजो०	३	मेध्यः काण्वः	त्रिष्टुप्
८।६९।११	अपादिन्दो०	१	प्रियमेध आङ्गि०रसः	पंक्तिः
८।८०।१०	अवीवृधध्वो०	१	एकद्यूर्नौधशः	त्रिष्टुप्
८।८३।१	देवानामिदवो०	९	कुसीदीकाण्वः	गायत्री

(नवमें मण्डले)

९।५।११	विश्वेदेवाः स्वाहा०	१	काश्यपो सितो देवलोवा	अनुष्टुप
९।१४।३	आदस्यशुष्मिणो०	१	,, ,,	गायत्री

६।१८।३	तवविश्वे०	१	काश्यपो सितो देवलोवा	गायत्री
६।६७।२७	पुनन्तुमा०	१	पवित्र आङ्गिरसो वसिष्ठश्च	अनुष्टुप्
६।८०।४	तंत्वादेवेभ्यो०	१	वसुर्भारद्वाज:	जगती
६।८१।५	उभेद्यावापृथिवी	१	,, ,,	त्रिष्टुप्
६।६८।७	परित्यं हर्यतं०	१	अम्बरीषो वार्षागिर: ऋजिश्वाभारद्वाजः श्च	अनुष्टुप्
६।१०२।५	अस्यव्रते०	१	त्रितआप्त्य:	उष्णिक्
६।१०६।२	इन्द्रस्तेसोम	१	अग्नयो धिष्ण्या ऐश्वरय:	द्विपदा विराट्
६।१०६।१५	पिबन्त्यस्य	१	,,	,,

(दशमे मण्डले)

१०।३१।१	आनोदेवानां	११	कवषऐलूष:	त्रिष्टुप
१०।३३।१	प्रमायुयुजे०	१	,,	,,
१०।३५।१	अबुध्रमु त्य०	१४	लुशोधानाक:	जगती १३-१४ त्रिष्टुप्
१०।३६।१	उषासानक्ता०	१४	,,	,, ,,
१०।५१।२,४,६,८	सौचीको ग्नि: १	कोमाददर्श० इत्यादि ४		त्रिष्टुप्
१०।५२।१	विश्वेदेवा: शास्तन०	६	सौचीको ग्नि:	,,
१०।५३।१	यमैच्छाम०	११	देवा:,४-५ सौचीको ग्नि:	त्रिष्टुप १-५,८।६-७, ६-११ जगती
१०।५६।१	इदंतएकं०	७	बृहदुक्थो वामदेव्य:	त्रिष्टुप्,४-६ जगती
१०।५७।१	माप्रगाम०	६	बन्धु: श्रुतबन्धुर्विप्रबन्धुर्गोपायना:	गायत्री
१०।६१।१	इदमित्था०	२७	नाभानेदिष्ठो मानव:	त्रिष्टुप
१०।६२।१	ये यज्ञेन०	११	,,	जगती, ५, ८, ६, अनुष्टुप १०ज० ११ त्रिष्टुप्
१०।६३।१	परावतोये०	१७	गय: प्लात:	जगती, १६-१७ त्रिष्टुप्
१०।६४।१	कथादेवानां०	१७	,,	जगती १२,१६,१७ त्रिष्टुप्
१०।६५।१	अग्निरिन्द्रोवरुणो०	१५	वसुकर्णो वासुक्र:	जगती १५ त्रिष्टुप्
१०।६६।१	देवान्हुवे०	१५	,,	,, ,, ,,
१०।८५।१७	सूर्यायै देवेभ्यो०	१	सावित्री सूर्या ऋषिका	अनुष्टुप्
१०।८५।४७	समन्जन्तु०	१	,, ,,	,,

१०।६२।१	यज्ञस्यवो०	१५	शार्यातो मानव:	जगती
१०।६३।१	महिद्यावापृथिवी०	१५	तान्व: पार्थ्य:	प्रस्तारपंक्ति: ,२,३,१३,अ० ६ अबपक्ति ११ न्यंकु० १५पुर०
१०।६८।१	बृहस्पते प्रतिमे०	१२	आर्ष्टिषेणो देवापि:	त्रिष्टुप्
१०।१००।१	इन्द्रदृह्य०	१२	दुवस्युर्वन्दन:	जगती १२ त्रिष्टुप्
१०।१०१।१	उद्बुध्यध्वं०	१२	बुध: सौम्य:	त्रिष्टुप् ४,६ गा० ५बृ० ६,११ जगती
१०।१०६।१	ते वदन्०	७	जुहूर्ब्रमजाया ब्राह्मोवोर्ध्वं-नामा	त्रि० ६-७ अनुष्टुप्
१०।११३।१	तमस्यद्यावा	१	वैरूप: शत प्रभेदन:	जगती
१०।११३।८	विश्वेदेवासो अध०	१	,,	,,
१०।११४।१	घर्मासमन्ता०	१०	वैरूप: सध्रिस्तापसोवाघर्म:	त्रिष्टुप् ४ जगती
१०।१२६।१	नतमंहोन०	८	शैलूषि: कुल्मल बर्हिषो वामदेव्योवांहोमुग् ।	उपरिष्टाद् बृ० ८ त्रिष्टुप्
१०।१२८।१	ममाग्नेवर्चो०	६	विहव्य आङ्गिरस:	त्रिष्टुप, ६ जगती ।
१०।१३७।१	उतदेवा०	७	१ भरद्वाज: २ कश्यप: ३ गोतम: ४ अत्रि: ५ विश्वामित्र:, ६ जमदग्नि: ७ वसिष्ठ:	अनुष्टुप्
१०।१४१।१	अग्ने अच्छा०	६	अग्निस्तापस:	अनुष्टुप्
१०।१५५।५	परीमेगामनेषत०	१	शिरिम्बिठो भारद्वाज:	अनुष्टुप्
१०।१५७।१	इमानुकं०	५	भुवन आप्त्य: साधनोवा भौवन:	द्विपदा त्रिष्टुप्
१०।१६५।१	देवा: कपोत०	५	नैर्ऋत: कपोत:	त्रिष्टुप्
१०।१८१।१	प्रथश्च यस्य०	३	१ प्रथोवासिष्ठ: २ सप्रथा भारद्वाज:, ३ घर्म: सौर्य: ।	त्रिष्टुप्

इति ऋग्वेदे शाकल संहितायां ऋषय: छन्दांसि च

--००--

शुक्लयजुर्वेदीय माध्यन्दिन संहितायां वैश्वदेवमन्त्राणाम् ऋषयः छन्दांसि च

(तत्रादौ प्रथमाध्याये)

सम्पूर्णाध्याये परमेष्ठी प्रजापतिः । ८-१,२ अतिजगती।, १२-३ स्वराट् त्रिष्टुप् । १३-५ भुरिगुष्णिक् । १५-१,३ निचृज्जगती, याजुषीपंक्तिः । १७-३ ब्राह्मीपंक्तिः। २०-१ विराड्ब्राह्मी त्रिष्टुप् । २४-३ स्वराड् ब्राह्मी पंक्तिः । ३०-४ स्वराट् त्रिष्टुप । ३१-४ अनुष्टुप् ।

(द्वितीयाध्याये)

विंशतिमन्त्राणां परमेष्ठी प्रजापतिः । २१-२२ वामदेवः । २-३ स्वराड् जगती। ५-४ निचृद्ब्राह्मी बृहती । ७-२ बृहती । ८ विराट् पंक्तिः । ६ जगती । १३ विराट्-जगती । १८ स्वराट् त्रिष्टुप् । २१ भुरिग्ब्राह्मी बृहती । २२ विराट् त्रिष्टुप ।

(तृतीयाध्याये)

४६ आग्स्त्यः, भुरिक् पंक्तिः । ४७ आग्स्त्यः , विराडनुष्टुप् । ४८ औणर्वाभः , ब्राह्म्यनुष्टुप । ६२ नारायणः , उष्णिक् ।

(चतुर्थाध्याये)

१ प्रजापतिः, विराड्ब्राह्मीजगती । ५ प्रजापतिः निचृदार्ष्यनुष्टुप् । ११-२,३ आङ्गिरसः , स्वराड् ब्राह्म्यनुष्टुप , आर्ष्युष्णिक् । १५वत्सः, स्वराडार्षी बृहती ।

(पञ्चमाध्याये)

४-१ गोतमः , आर्षी त्रिष्टुप्। ५-२ गोतमः भुरिगार्षीपंक्तिः । १०-१-३ गोतमः, ब्राह्म्युष्णिक् । १२-५ गोतमः भुरिग्ब्राह्मीपंक्तिः , १७-१ वसिष्ठः, स्वराड्ब्राह्मी त्रिष्टुप् । ३०-४ मधुच्छन्दा, आर्च्युष्णिक् । ३५-१ मधुच्छन्दा , निचृद् ब्राह्मी पंक्तिः। ३६-२ आगस्त्यः , आर्षीपंक्तिः । ४२-१ आगस्त्यः , स्वराड् ब्राह्मी त्रिष्टुप् ।

(षष्ठाध्याये)

१-२ सम्पूर्णाध्याये मेधातिथिः । ७-१ आर्षीबृहती । १०-२ निचृदार्षी बृहती । ११-५ भुरिगार्ष्युष्णिक् । १३-१ निचृदार्ष्यनुष्टुप् । २४-४ आर्षी त्रिष्टुप् । २५-१ आर्षी विराडनुष्टुप । २७-१ निचृदार्षी त्रिष्टुप् ।

(सप्तमाध्याये)

१-२ गोतम:, भुरिगार्ष्यनुष्टुप् । ३-१-३ गोतम:, विराड् ब्राह्मीजगती । ५-१ गोतम:, आर्षीपंक्ति: , ६-१,२ गोतम: , भुरिक् त्रिष्टुप् । १०-१ त्रसदस्यु: , ब्राह्मीबृहती। अत: परं षाट प्रतीकानां वत्सार: काश्यप: । १२-५ पंक्ति: । १७-३ स्वराड् ब्राह्मी-त्रिष्टुप् । १६-१ भुरिगार्षी पंक्ति: । २१-२,३ स्वराड् ब्राह्मी त्रिष्टुप्, याजुषीजगती। २२-३ ब्राह्मी त्रिष्टुप् । २३-१-६ अनु० प्राजापत्याअनु०, स्वराट् साम्न्य०नु भुरिगार्ची-गायत्री , भुरिक् साम्न्युनु० । २४-१ भरद्वाज:, आर्षीत्रिष्टुप् । २६-२ देवश्रवा: , स्वराट् ब्राह्मी बृहती , ३३-१-३ मधुच्छन्दा आर्षी गायत्री - आर्ची बृहती, निचृदार्ष्युं-ष्णिक् । ३४-१-३ गृत्समद: , छन्दांसि पूर्ववत् । ४३-१ आङ्गिरस: , भुरिगार्षी - त्रिष्टुप् ४५-१ आङ्गिरस: , निचृज्जगती । ४६-१ आङ्गिरस: , भुरिगार्षी त्रिष्टुप् ।

(अष्टमाध्याये)

४-१ कुत्स:, निचृज्जगती । ८-१,२ भरद्वाज:, प्राजापत्यागायत्री- निचृदार्षीबृहती । ६-३ भरद्वाज: , स्वराडार्षीपंक्ति: । अत: परं पंच प्रतीकानां अत्रि: । १५-१ भुरिगार्षी त्रिष्टुप् । १८ आर्षी त्रिष्टुप् । १६ भुरिगार्षी त्रिष्टुप । २१ स्वराडा-र्ष्युष्णिक् । २७ -१,२ भुरिक् प्राजापत्यानुष्टुप- स्वराडार्षी बृहती । ४३-१ कुरुरु-बिन्दु:, आर्षीपंक्ति: । ४७-३ शास: , विराड् ब्राह्मी बृहती । ५०-३ देवा: स्वराडार्षी जगती । ५२ देवा: भुरिगार्षी बृहती । ५७ वसिष्ठ: भुरिक्साम्नी बृहती। ५८ वसिष्ठ: , भुरिक् गार्षी जगती । ६० वसिष्ठ: , स्वराट् साम्नी त्रिष्टुप् । ६१ वसिष्ठ: साम्न्युष्णिक् ।

(नवमाध्याये)

८-१ बृहस्पति: भुरिक् त्रिष्टुप् । १६-१ वसिष्ठ: , भुरिक् पंक्ति: । २१-८ वसिष्ठ: , अत्यष्टि: । ३३-४ तापस:, कृति: । ३५-२-६ वरुण: निचृदुत्कृति: । ३६-१-५ वरुण: विकृति: । ४०-१ देववात:, भुरिग्ब्राह्मी त्रिष्टुप् ।

(दशमाध्याये)

१-१ वरुण: , निचृदार्षी त्रिष्टुप् । ६-५ वरुण: , भुरिगष्टि: । १८-१,२ देववात:,स्वराड् ब्राह्मी त्रिष्टुप ।

(एकादशाध्याये)

३५-१ देवश्रवोदेववात: , निचृत्त्रिष्टुप् । ३६-२ सिन्धुद्वीप: , विराट्त्रिष्टुप् । अग्रे पि चतुनाम् सिन्धुद्वीप: । ५८-१ अनुष्टुप् । ५८-४ उत्कृति: । ६०-४ स्वराट् - संकृति: । ६१-१-६ भुरिक्कृति: । ६५-४ विश्वामित्र:, धृति: । ६७-१ आत्रेय:अनुष्टुप। ६६-१ आत्रेय: , त्रिष्टुप ।

(द्वादशाध्याये)

२ कुत्स: , भुरिगार्षी त्रिष्टुप् । ३१ तापस:, विराडनुष्टुप् । ४६ विश्वामित्र:, भुरिगार्षीपंक्ति: । ५५ प्रियमेधा:, विराडनुष्टुप् । ६१ मधुच्छन्दा , आर्षीत्रिष्टुप् । ६७ विश्वावसु:, गायत्री । ७० कुमारहारित:, आर्षीत्रिष्टुप् । ७३ कुमारहारित: भुरिगार्षीगायत्री । १०४ हरिण्यगर्भ: , भुरिगायत्री ।

(त्रयोदशाध्याये)

१ वत्सार:, आचर्पिंक्ति: । २३ इन्द्राग्नी, अनुष्टुप । २५ इन्द्राग्नी , भुरिक् ब्राह्मी बृहती । ३४ गोतम: भुरिक् त्रिष्टुप् । ५१ विरूप: , भुरिक् कृति: ।

(चतुर्दशाध्याये)

४-१ उशना: , स्वराड्ब्राह्मीबृहती । ६-१ उशना: , निचृदुत् कृति: । ७-५,१५,१६ विश्वेदेवा:, भुरिक् कृति: - स्वराट् पंक्ति:- निचृदाकृति: । २०-६ विश्वदेव: भुरिगब्राह्म त्रिष्टुप् । २६-२ विश्वदेव: , निचृदति जगती । २७-१ विश्वदेव, भुरिक् ब्राह्मी बृहती ।

(पन्चदशाध्याये)

सर्वेषां परमेष्ठी । ३-३ ब्राह्मीत्रिष्टुप् । १४-१,२ ब्राह्मी जगती- ब्राह्मीत्रिष्टुप् । ५० भुरिगार्षी त्रिष्टुप् । ५४ आर्षीत्रिष्टुप् । ५७ स्वराड् ब्राह्मी बृहती ।

(सप्तदशाध्याये)

१३ लोपामुद्रा, निचृदार्षी जगती । १४लोपामुद्रा आर्षी जगती । २७ भुवनपुत्रो - विश्वाकर्मा निचृदार्षी त्रिष्टुप् । २६, ३० भुवनपुत्रो विश्वकर्मा आर्षीत्रिष्टुप् । ४६ अप्रतिरथ: आर्षी त्रिष्टुप् । अग्रे त्रयाणामप्रतिरथ: । ५२ निचृदार्ष्यनुष्टुप । ५३ विराडार्ष्यनुष्टुप् । ५६ विराडार्षी पंक्ति: । ६२ ,६४,६५ विधृति:,

विराडार्ष्यनुष्टुप , आर्ष्यनुष्टुप, विराडार्ष्यनुष्टुप । ७० कुत्सः आर्षी त्रिष्टुप । ७३ तथैव । ७८ वसिष्ठः , विराडति जगती । ८६ वामदेवः निचृदार्षी त्रिष्टुप । ६२,६८ वामदेवः , आर्षी त्रिष्टुप् ।

(अष्टादशाध्याये)

पन्चानामदेवाः । २६ ब्राह्म्युष्णिक् । ३१निचृदार्षी त्रिष्टुप् । ३२ निचृदार्ष्यनुष्टुप्। ३३ त्रिष्टुप् । ३४ त्रिष्टुप् । ४७ शुनःशेपः, आर्ष्यनुष्टुप् । ५७ गालवः, निचृदार्षी-गायत्री। ६० विश्वकर्मा , निचृदार्षी त्रिष्टुप् । ६१ गालवः आर्षीत्रिष्टुप । ६२ देवश्रवदेववातौ , निचृदार्ष्यनुष्टुप । ६३ विश्वामित्रः, निचृदनुष्टुप् । ६४ विश्वकर्मा, निचृदनुष्टुप्। ६५ विश्वकर्मा, विराडनुष्टुप् । ७५ उत्कीलः, आर्षीत्रिष्टुप् । ७६ उत्कीलः, निचृदनुष्टुप् ।

(एकोनविंशाध्याये)

५,७ आभूतिः , निचृज्जगती- भुरिक् त्रिष्टुप् । १२, २६,३२ हैमवर्चिः, भुरिगनुष्टुप-अनुष्टुप- निचृदतिजगती । ३६ ,४४,४५,४७ वैखानसः, अनुष्टुप - विराट्-त्रिष्टुप-निचृदनुष्टुप् - स्वराट्पंक्तिः । ५२ शंखः, स्वराट्पंक्तिः । ६५ शंखः, अनुष्टुप् ।

(विंशाध्याये)

११, १४, १८ प्रजापतिः, पंक्तिः - निचृदनुष्टुप् - भुरिगत्यष्टिः । २५ आश्वतराश्विः अनुष्टुप् । ४६ आङ्गिरसः, त्रिष्टुप् ।

(एकविंशाध्याये)

६ गयस्फानः, भुरिक् त्रिष्टुप् । अतः परं सप्तानाम स्वस्त्यात्रेय : । १७ निचृदनुष्टुप्। ४० निचृदत्यष्ट्यौ । ४६ भुरिगभिकृतिः । ४७भुरिगाकृतिः । ५३ अतिजगती । ५८ अत्यष्टिः । ६१ भुरिग् विकृतिः ।

(द्वाविंशाध्याये)

४, ५, १४ प्रजापतिः , जगती - अतिधृतिः - पिपीलिकमध्या निचृद् गायत्री । १५ सुतम्भरः, निचृद् गायत्री । १७ विश्वरूपः, नि० गा० । १६,२८ प्रजापतिः , भुरिग् विकृतिः - भुरिगष्टिः ।

(त्रयोविंशाध्याये)

सर्वेषाम प्रजापतिः । २-३ निचृदाकृतिः । ४-३ विकृतिः । ८-४ अत्यष्टिः ।
१६-१ विराड् जाती । ३६-१ भुरिगुष्णिक् ।

(चतुर्विंशाध्याये)

सर्वेषाम प्रजापतिः । ५ निचृद् बृहती । १४ भुरिगति जाती । ३४ भुरिक् पंक्तिः ।
२७ निचृद् बृहती । ४० शक्वरी ।

(पंचविंशाध्याये)

पंचानाम् प्रजापतिः । ५ स्वराड् विकृतिः । ६ निचृदतिधृतिः । १३ निचृत्त्रिष्टुप्
१४ निचृज्जगती । १५ जाती । २०,२१,२२ गोतमः, जगती, निचृत् त्रिष्टुप - त्रिष्टुप् ।
२३ प्रजापतिः, त्रिष्टुप् । २६ गोतमः, निचृज्जगती । २७ प्रजापतिः, त्रिष्टुप् ।
अतः परमष्टानां गोतमः । ३० त्रिष्टुप । ३१ त्रिष्टुप । ३२ निचृत्त्रिष्टुप । ३४
भुरिक् त्रिष्टुप् । ३७ स्वराट् पंक्तिः । ३८ विराड्पंक्तिः । ३६ विराट् पंक्तिः ।
४६ भुरिक् शक्वरी ।

(षडविंशाध्याये)

२ लौगाक्षिः, स्वराडत्यष्टिः । १६ मुद्गलः, त्रिष्टुप् । २० मेधातिथिः, गायत्री
२४ गृत्समदः, जगती ।

(सप्तविंशाध्याये)

८,६ प्रजापतिः, त्रिष्टुप् । १२ अग्निः, उष्णिक् । २१ प्रजापतिः, विराडुष्णिक् ।
२२ प्रजापतिः, निचृदुष्णिक् । २५,२६ हिरण्यगर्भः, स्वराट् त्रिष्टुप् स्वराट्पंक्तिः ।

(अष्टाविंशाध्याये)

३ बृहदुक्थो वामदेवः, स्वराट् पंक्तिः । ११ प्रजापतिः, निचृच्छक्वरी ।
१२ अश्विनौ, निचृदति जाती । २० अश्विनौ, निचृदति शक्वरी ।

(एकोनत्रिंशदध्याये)

आदितः षण्णां बृहदुक्थोवामदेव्यः । १ त्रिष्टुप । २ विराट्त्रिष्टुप । ३ पंक्तिः ।
४ निचृत् पंक्तिः । १० निचृत् त्रिष्टुप् । [illegible] । [illegible],२०,२४ भार्गवोजमदग्निः,

विराट् त्रिष्टुप्- निचृत् त्रिष्टुप् । २५ जमदग्निः निचृत् त्रिष्टुप् । अतः परं षण्णां जमदग्निः । २७ त्रिष्टुप् । २८ स्वराड् बृहती । २९ भुरिक् पंक्तिः । ३०,३५,३६ निचृत् त्रिष्टुप् । सू अतः परं चतुर्णां भारद्वाजः । ५५ भुरिक् त्रिष्टुप् । ५८ भुरिगत्यष्टिः । ५९ भुरिगतिशक्वरी।६० विराट् प्रकृतिः ।

(त्रिंशाध्याये)

१-५ मेधातिथिः, विराट् संकृतिः ।

(एकत्रिंशाध्याये)

आदितश्चतुर्णां नारायणः,ततः कर्म्या द्वयोः उत्तरनारायणः । ६,१४ निचृदनुष्टुप्।१५ अनुष्टुप्।१६ विराट्त्रिष्टुप् । २० , २१ अनुष्टुप् ।

(द्वात्रिंशाध्याये)

१० स्वयम्भु ब्रह्म, निचृत् त्रिष्टुप् । १६ श्रीकामः, अनुष्टुप् ।

(त्रयस्त्रिंशाध्याये)

३ गोतमः , निचृद्गायत्री । १५ प्रस्कण्वः , बृहती । १६ गोतमः, स्वराट्पंक्तिः । १७ कुशोधानाकः भुरिक् त्रिष्टुप् । २९ कुत्सः, जगती । ४२ कुत्सः, निचृत् त्रिष्टुप् । ४८ प्रतिक्षत्रः , निचृत् त्रिष्टुप् । ५० प्रगाथः, त्रिष्टुप् । ५१ कूर्मः , त्रिष्टुप । ५२ कुशः निचृत् त्रिष्टुप् । ५३ सुहोत्रः , त्रिष्टुप् । ५४ वामदेवः, निचृत् त्रि० । ६० विश्वामित्रः, भुरिक् त्रिष्टुप् । ६२ देवलः निचृद् गायत्री । ८९ कण्वः , भुरिगनुष्टुप् । ९१ मनुः , विराड्बृहती । ९४ मनुः, पंक्तिः ।

(चतुस्त्रिंशाध्याये)

६ अगस्त्यः निचृदनुष्टुप् । १० गृत्समदः अनुष्टुप् । १२ हिरण्यस्तूपआंगिरसः विराड् जगती । ३७ वसिष्ठः , पंक्ति । ३८ वसिष्ठः निचृत् त्रिष्टुप् । ४७ हिरण्यस्तूपः , जगती । ५१ दक्षः भुरिक् शक्वरी । ५३ ऋजिश्वः, भुरिक् पंक्तिः । ५७ कण्वः, विराड् बृहती ।

(पंचत्रिंशाध्याये)

७ सङ्कुसुकः त्रिष्टुप् । १३ आदित्यादेवाः , स्वराडनुष्टुप् । १८ भारद्वाजः शिरिम्बिठः, विराडनुष्टुप् । १९ दमनः, त्रिष्टुप् ।

(षट्त्रिंशाध्याये)

१७ दध्यङ्ङथर्वण:, भुरिक् शक्वरी ।

(सप्तत्रिंशाध्याये)

७ कण्व: , निचृदष्टि: । १४ दध्यङ्ङथर्वण:, भुरिगनुष्टुप् । १६ दध्यङ् अथर्वण: भुरिक् बृहती । १८ दध्यङ् अथर्वण: , अत्यष्टि: । १६ अथर्वण: , विराडुष्णिक् ।

(अष्टत्रिंशाध्याये)

८, १०, १५ दीर्घतमा: । अष्टि: - अनुष्टुप् - स्वराड् जगती ।

(एकोन च त्वारिंशाध्याये)

५, ६ , १३ दर्घतमा: । कृति: - विराड्धृति:- निचृत् त्रिष्टुप् ।

(चत्वारिंशाध्याये)

४, १६ दीर्घतमा: । निचृत् त्रिष्टुप् ।

इति शुक्ल यजुर्वेद संहितायाम् ऋषय: छन्दांसि च

--00--

सामवेदीय कौथुम शाखान्तर्गतानां वैश्वदेव मन्त्राणाम् ऋषय: छन्दांसि च

(तत्र प्रथमाध्याये)

७।३ बृहदुक्थो वामदेव्य: , त्रिष्टुप् । ७।५,६ भरद्वाजो बार्हस्पत्य:, त्रिष्टुप् ।
१०।१ अग्निस्तापस:, अनुष्टुप । १६।६ ऋजिश्वा भारद्वाज:,उष्णिक् ।

(द्वितीयाध्याये)

३।४ कुसीदीकाण्व: , गायत्री । ११।५ गोतमोराहूगण: , गायत्री ।

(चतुर्थाध्याये)

२।६ त्रित आप्त्य: , अनुष्टुप । ७।६ त्रित आप्त्य: पंक्ति: ।
८-८ अंहोमुग्वामदेव्य: , बृहती । १०-६ त्रसदस्यु:। द्विपदा विराट् ।
११।६+६ भुवनआप्त्य: , ७ कवष ऐलूष: । ८ भरद्वाजोबार्हस्पत्य:,६ आत्रेय: ।
द्विपदा बिराट् ।
१५-५ परुच्छेपोदैवोदासि: , द्विपदा बिराट् ।

(षष्ठाध्याये)

१-६ वामदेव: गौतम:, एकपाज्जगती । २-५ प्रथो वासिष्ठ: । त्रिष्टुप् ।
३-६ ऋजिश्वा भारद्वाज: , जगती ।

(सप्तमाध्याये)

१-१० प्रजापति: , पन्चपुरीष पदानि ।

(उत्तरार्चिके सप्तमाध्योये)

७-४(२३) भुवन आप्त्य: साधनो वा भौवन: । द्विपदा त्रिष्टुप ।

(चतुर्दशाध्याये)

२-६ अग्निस्तापस: । अनुष्टुप

(षोडशाध्याये)

३-१३ ऋजिश्वा भारद्वाज: , गायत्री ।

(विंशाध्याये)

५-५,६ अवत्सार: काश्यप: , त्रिष्टुप् ।

(एकविंशाध्याये)

त्रिक ६ मं० २,३ गोतमो राहूगण: त्रिष्टुप् ।

इति सामवेदे ऋषय: छन्दांसि

--0--

अथर्ववेदे शौनक शाखायां ऋषयः छन्दांसि च

(प्रथम काण्डे)

९-१,२ अथर्वा, त्रिष्टुप्। ११-२ अथर्वा , अनुष्टुप् । १८-२ द्रविणोदाः निचृज्जगती। १९-४ ब्रह्मा, अनुष्टुप् । २६।१ ब्रह्मा,गायत्री । ३० सूक्त अथर्वा, त्रिष्टुप । ३ वि०ज०। ३१-२ ब्रह्मा, अनुष्टुप । ३३।३ शन्तातिः, त्रिष्टुप। ३५,२,५ अथर्वा, जगती, च० त्रि०।

(द्वितीय काण्डे)

१-३,५ वेनः, जगती, त्रिष्टुप् । ९-४ भृग्वङ्गिराः , अनुष्टुप् । १०-८ भृग्वङ्गिराः, सप्तपदाधृतिः , द्वौपादौ, उष्णिहौ । १२-२,५ भरद्वाजः, जगती ,त्रिष्टुप ।१३-४,५ अथर्वा अनुष्टुप्, विराट्जगती । १६-४ ब्रह्मा एकपदासुरीगायत्री । २९-१,५ अथर्वा १ अनुष्टुप् ५ त्रिष्टुप । ३४-२ अथर्वा , त्रिष्टुप् । ३५-५ अङ्गिराः , भूरिक् ।

(तृतीय काण्डे)

३-१,२,५ अथर्वा त्रिष्टुप् ५ अनुष्टुप् । ४-४,६ अथर्वा त्रिष्टुप् ६ भूरिक। ५-३ अथर्वा अनुष्टुप् । ८-३,४ अथर्वा त्रिष्टुप्, चतुष्पदा विराड । ९-१-८ वामदेवः ,अनुष्टुप ४ चतुष्पदा निचृद् बृहती ६ भूरिक् । १०-२,७,११,१२ अथर्वा अनुष्टुप् ७ अतिजगती १२ त्रि० १२-५ ब्रह्मा त्रिष्टुप । १५-१-८ अथर्वा , त्रिष्टुप् १ भूरिक् ४ विराडत्यष्टिः । १६-४ अथर्वा , भूरिक्पंक्तिः । १७-९ विश्वामित्रः , त्रिष्टुप् । १९-१-८ वसिष्ठः, अनुष्टुप् १ पथ्याबृहती , ३ भूरिक् बृहती ५ त्रिष्टुप् ६ अतिजगती ७ विराडास्तार पंक्तिः ८ पथ्यापंक्तिः । २२-१-६ वसिष्ठः , अनु० १ विराड् त्रि० ३ परानुष्टुप विराडतिजगती , ४ षटपदा जगती । ~~पञ्चपदा~~ २९-१-६ अथर्वा , पञ्चपदा विपरीत पाद लक्ष्मा । ३०-४,७ अथर्वा, अनुष्टुप्, त्रिष्टुप् । ३१-१,७ ब्रह्मा, अनुष्टुप् ।

(चतुर्थ काण्डे)

१-३ वेनः त्रिष्टुप । २-१ वेनः त्रिष्टुप् । ८-२ अथर्वाङ्गिराः अनुष्टुप् । ९-१ भृगुः , अनुष्टुप । १०-५,७ अथर्वा , अनुष्टुप्, परानुष्टुपशक्वरी । ११-२,६ भृगुवङ्गिराः , २ भूरिक् ६ त्रिष्टुप । १३-१-७ शन्तातिः अनुष्टुप । १४-१,२,५ भृगुः , त्रिष्टुप, २ अनुष्टुप । १६-१ ब्रह्मा, अनुष्टुप । १९-४ शुक्रः, अनुष्टुप । २१-१ ब्रह्मा, त्रिष्टुप । २३-२,६ मृगारः , त्रिष्टुप, प्रस्तार पंक्तिः । २७-६ मृगारः त्रिष्टुप। २८-५ मृगारो थर्वावा, त्रिष्टुप् । ३०-१,३ अथर्वा त्रिष्टुप । ३४-३ अथर्वा त्रिष्टुप । ३५-७ प्रजापतिः त्रिष्टुप् । ३६-५ चातनः , अनुष्टुप । ३९-९,१० अङ्गिराः त्रिष्टुप् ।

(पन्चमे काण्डे)

३-३,४,५,६,६ बृहद्दिवो थर्वा , त्रिष्टुप । ४-३,४,७ भृग्वङ्गिरा: , अनुष्टुप् ।
५-१ अथर्वा, अनुष्टुप । ७-३,४ अथर्वा, अनुष्टुप, ४ पथ्याबृहती । ८-१,३ अथर्वा,
अनुष्टुप, ३ भुरिक् पथ्यापंक्ति: । १२- १,३,४,५,१०,११ अङ्गिरा: ,त्रिष्टुप,
३ पंक्ति: । १४-३,७ शुक्र: । भुरिक्, अनुष्टुप । १७- ५,६,१०,११ मयोभु: ,अनुष्टुप,
६ त्रिष्टुप । १८-१,८,१३ मयोभू: , अनुष्टुप, ८,१३ त्रिष्टुप । १६-१२,१३,१४ मयोभू:,
अनुष्टुप । २०-४ ब्रह्मा , त्रिष्टुप । २१-७, १२ ब्रह्मा, अनुष्टुप, १२ यवमध्यागायत्री ।
२५-६ ब्रह्मा, अनुष्टुप । २७-२,१२ ब्रह्मा, साम्नी भुरिगनुष्टुप, १२ पुरउष्णिक् ।
२८-६,१०,११ अथर्वा, ककुम्मत्यनुष्टुप् । २६-२,३ चातन: । त्रिष्टुप्, ३ विराड् गायत्री।
३०-१७ उन्मोचन: । षट्पदा जगती ।

(षष्ठे काण्डे)

७-३ अथर्वा , गायत्री । १२-२ गरुत्मान् , अनुष्टुप । १६-१ शन्ताति: , अनुष्टुप ।
११-२ शन्ताति: अनुष्टुप । २७-१-३ भृगु: , जगती २ त्रिष्टुप । २८-२ भृगु: , अनु०।
३०-१ उपरिबभ्रव: , जगती । ४१-३ ब्रह्मा, त्रिष्टुप । ४६-१,२ अङ्गिरा: प्रचेता: ,
विष्टारपंक्ति: , पन्चपदाजगती । ४७-२ अङ्गिरा: प्रचेता: , त्रिष्टुप । ५१-३
शन्ताति: , जगती । ५५-१ ब्रह्मा , जगती । ५६-१,२ शन्ताति: , उष्णिग्गर्भापथ्या
पंक्ति: अनुष्टुप । ५८-२ अथर्वा, प्रस्तारपंक्ति: । ६१-१ २ अथर्वा, अनु त्रिष्टुप् ।
६४-१ अथर्वा, अनुष्टुप । ७१-३ ब्रह्मा, त्रिष्टुप । ८५-१, २ अथर्वा, अनुष्टुप ।
८६-३ अथर्वा , अनुष्टुप । ६३-१,३ शन्ताति:, त्रिष्टुप । ६५- १,२ भृग्वङ्गिरा: ,
अनुष्टुप। १००-१-३ गरुत्मान् , अनुष्टुप् । १०८-२ शौनक:, उरोबृहती । १०६-१,३
अथर्वा, अनुष्टुप । १११-४ अथर्वा, अनुष्टुप । ११२-१ अथर्वा, त्रिष्टुप । ११३-१
अथर्वा, त्रिष्टुप । ११४-१-३ ब्रह्मा , अनुष्टुप । ११५ -१-३ ब्रह्मा, अनुष्टुप ।
११७-३ कौशिक: , त्रिष्टुप । ११८-३ कौशिक: , त्रिष्टुप् । ११६-२ कौशिक:, त्रिष्टुप।
१२३-१-५ भृगु: , त्रिष्टुप, ३ द्विपदासाम्न्यनुष्टुप् ४ एकावसाना द्विपदा प्राजापत्या
भुरिगनुष्टुप । १२५-३ अथर्वा, त्रिष्टुप । १२६-१ अथर्वा , भुरिकत्रिष्टुप । १३१-१,२
अथर्वाङ्गिरा: , अनुष्टुप । १३२-१,२ अथर्वाङ्गिरा: , अनुष्टुप। १४१-३ विश्वामित्र:
अनुष्टुप ।

(सप्तमें काण्डे)

५-१-५ अथर्वा, त्रिष्टुप, ३ पंक्ति:, ४ अनुष्टुप । ६-१ अथर्वा, त्रिष्टुप ।
७-१ अथर्वा, आर्षी जगती । १७-१ भृगु: , त्रिष्टुप । १८-३ भृगु, त्रिष्टुप।
२०-१ अथर्वा, अनुष्टुप । २४-१ ब्रह्मा , त्रिष्टुप । २७-१ मेधातिथि:, त्रिष्टुप ।
२८-१ मेधातिथि:, त्रिष्टुप । ३५-१ अथर्वा, जगती । ३८-२,३, अथर्वा ,अनुष्टुप,
३ चतुष्पदा उष्णिक् । ४६-१ अथर्वा , अनुष्टुप । ४७-२ अथर्वा, त्रिष्टुप । ४६-१,२
अथर्वा आर्षीजगती - चतुष्पदा पंक्ति: । ५०-५,६ अङ्गिगरा:, अनुष्टुप,भुरिक्
त्रिष्टुप । ५३-१ ब्रह्मा, त्रिष्टुप। ५४-१ ब्रह्मा, ऋक्सामनी । ७०-२ अथर्वा,अतिजगती
गर्भा जगती । ७५-२ उपरिबभ्रव: , पन्चपदा भुरिक् पथ्यापंक्ति: । ७६-१,२,अथर्वा
१ जगती २ त्रिष्टुप । ८०-१ अथर्वा, त्रिष्टुप । ८१-२,६ अथर्वा, त्रिष्टुप । ८२-१
शौनक: , त्रिष्टुप । ८४-२ भृगु:, त्रिष्टुप । ८५-१ अथर्वा, त्रिष्टुप । ८६-२
सिन्धुद्वीप:, अनुष्टुप। ८७-२,३,४,७,८, अथर्वा, त्रिष्टुप, ७ साम्नी भुरिग्जगती ।
८ उपरिष्टाद् बृहती । ६८-१ अथर्वा, विराट् त्रिष्टुप । १०३-१ ब्रह्मा, त्रिष्टुप ।
१०५-१ अथर्वा, अनुष्टुप । १०६-२,७ बादरायणि: । त्रिष्टुप,७ अनुष्टुप ।
१११-१ ब्रह्मा, पराबृहती त्रिष्टुप । ११८-१ अथर्वाङ्गिगरा:, त्रिष्टुप ।

(अष्टमे काण्डे)

१-७,१८ ब्रह्मा, विराड् गायत्री, अनुष्टुप । २-६, २१,२७ ब्रह्मा, ६ पन्चपदापंक्ति:,
२१ सत: पंक्ति: , २७ अनुष्टुप । ३-२ , १३,१४ चातन: २, १३ त्रिष्टुप, १४ भुरिक्।
४-११,१४,२४ चातन:, त्रिष्टुप । ५-५,६,१०,१४,१६ शुक्र: , ५ भुरिक् संस्तारपंक्ति:,
६ उपरिष्टाद्बृहती , १० त्रिष्टुप, षटपदा जगती ,१४ त्र्यवसाना षट्पदाजगती
१६ जगतीगर्भात्रिष्टुप । ७-४ अथर्वा, पन्चपदापरानुष्टुबतिजगती । ८-१३,१५
भृग्वङ्गिगरा: , अनुष्टुप । ६-२४ अथर्वा, त्रिष्टुप । १०-५(क) अथर्वाचार्य: -आर्च्यनुष्टुप । १७-७(ख) साम्नीपंक्ति: । १०-५,६ चतुष्पदा प्राजापत्या पंक्ति: । ६
आर्ची बृहती । १०-२-४ आर्च्यनुष्टुप ।

(नवमें काण्डे)

१-५,१५ अथर्वा, त्रिष्टुप , अनुष्टुप । २-७, १३,१७,१८,१६ अथर्वा, ७ जगती-१३
द्विपदार्ची अनुष्टुप , १७,१८ जगती १६ त्रिष्टुप । ३-७ , २५-३१ भृग्वङ्गिगरा:,

७ परोष्णिक २५,३१ प्राजापत्याबृहती २९ साम्नीत्रिष्टुप २७-३० प्रतिष्ठागायत्री । ४-३,५,७,११,१५,१८,२० ब्रह्मा। ३,५,७ त्रिष्टुप । ११,१५,२० अनुष्टुप, १८ उपरिबृष्टाद् बृहती । ५-१३ भृगुः , त्रिष्टुप । ६(सू०) ५ मं० २ ब्रह्मा, पुरउष्णिक। सू० ६ मं० १० ब्रह्मा, आर्चीबृहती । ७-६,१६,२४ ब्रह्मा, ६ आसुरीगायत्री, १६ साम्नी बृहती, २४ साम्नीभुरिग्बृहती । ६-६, १६ ब्रह्मा त्रिष्टुप १६ जाती । १०-१८ ब्रह्मा, जाती ।

(दशमें काण्डे)

२-४,२२,२३ नारायणः, ४ त्रिष्टुप २२,२३ अनुष्टुप । ३-२,५,२५ अथर्वा, २ भूरिक् त्रिष्टुप , ५ अनु०, २५ षट्पदाजाती । ४-१ गरुत्मान्, पथ्यार्पंक्तिः । ५ भाग ७ मं० ४७ , ४६, ५० विहव्यः , ४७,४६ प्राजापत्या अनुष्टुप ५० त्रिष्टुप । ६-५,१६,२२-२६ , ३२ बृहस्पतिः, ५ षट्पदाजाती, १६ षट्पदाशक्वरी २३-२७ पथ्यार्पंक्तिः । २२,२८,३६,३२ अनु० । ७-१३,२३-२५,२७,३८,३६, अथर्वा, १३ परोष्णिक् , २३-२५,२७ अनुष्टुप , ३८ त्रिष्टुप, ३६ उपरिष्टा ज्ज्योतिर्जगती । ८- १८,३४,३५,४० कुत्सः । १८,३५,४० त्रिष्टुप ३४ अनुष्टुप । ६-६,११,१२ अथर्वा, ६,११ अनुष्टुप १२ पथ्यार्पंक्तिः । १०-५,६,२६,३४ कश्यपः । ५ स्कन्धोग्रीवीबृहती ६ विराट २६ अस्तारपंक्तिः ३४ अनुष्टुप ।

(एकादशे काण्डे)

१ ब्रह्मा, २,५ बृहतीगर्भाविराट् ४ भूरिक् , १० विराट्पुरोति जाती, २० अति- ी, जागतगर्भा पराशाक्वरा भूरिग्जाती , २२,२३ त्रिष्टुप, ३६ पुरोविराड् ३७ विराड्- जाती । २-२८, ३१ अथर्वा, त्रिष्टुप विपरीत पादलक्ष्मा जाती । ४-११ भार्गवो वैदर्भि, अनुष्टुप । ५- ब्रह्मा, १, ८ पुरो ति जागता विराड्गर्भा, २ बृहतीगर्भा विराट्शक्वरी ३ उरोबृहती ५,२४ त्रिष्टुप १६ अनुष्टुप २३ पुरोबार्हतातिजागतगर्भा। ६ शन्तातिः, १२,१३,१८,१६,२०,२२ अनुष्टुप । ७ अथर्वा , ४ तथा २३-२७ अनुष्टुप। ८ कौरुपथिः , २,१०,१३,१७,१८,१६,२६-३२ अनुष्टुप । ६ काङ्कायनः,२,५ अनु० २४ सप्तपदा शक्वरी २६ पथ्या पंक्तिः । १० भृग्वङ्गिराः, ५,११,१४,१५ अनु० ६ पुरोविराट् पुरस्ता ज्ज्योतिस्त्रिष्टुप , १२ पथ्यार्पंक्तिः ।

([illegible])

(द्वादशकाण्डे)

१- अथर्वा, ५ त्र्य०ष० जगती , ७ प्रस्तारपंक्तिः २२ त्र्य०ष० विराडतिजगती, ४३ विराडास्तारपंक्तिः , ५३ अनुष्टुप ५५ त्रिष्टुप । २ - भृगुः , ८ भुरिक् २१,२८ त्रिष्टुप १७,४१ अनुष्टुप ४४ विपदार्ची बृहती - ५५ बृहतीगर्भा । ३- यमः , १०,१५,१६,३२,३३,३७,३८,४६,५०,५३ त्रिष्टुप । ४- कश्यपः , २६,१०, ११,१२, १७,२१-२४,२८ , २६,३१,४१,४६,५०,५३ अनुष्टुप , २० विराट् ३२ उष्णिग्बृहती गर्भा ४२ बृहतीगर्भा । ५अथर्वाचार्यः, ५३ प्राजापत्या अनुष्टुप ।

(त्रयोदशकाण्डे)

१- ब्रह्मा, ७,२५ त्रिष्टुप , १३ अतिशाक्वर गर्भा ति जगती २७ प्रकृता ३५ उपरिष्टाद् बृहती ४० अनुष्टुप । २- ब्रह्मा, १३,१५ अनुष्टुप २० त्रिष्टुप । ३ ब्रह्मा , १२ भुरिग् गति धृतिः १४,१६,२१,२३२४ अष्टपदा कृतिः । ४ ब्रह्मा, १३ आसुरी उष्णिक् , ५- ब्रह्मा गायत्री ।

(चतुर्दश काण्डे)

१- सूर्यासावित्री , १५ आस्तारपंक्तिः २४,३२,३३,५० त्रिष्टुप् । २- सूर्यासावित्री, १० , ५३-५८ अनुष्टुप २५,३२ पुरोबृहती ३६ त्रिष्टुप ६६ अतिशक्वरी ।

(पन्चदश काण्डे)

१- अथर्वा, ५ साम्नी अनुष्टुप । २- अथर्वा , १ साम्न्यनुष्टुप ,२ साम्नी त्रिष्टुप, ३ द्विपदार्षीपंक्तिः , ४ द्विपदा ब्राह्मी गायत्री। ३ अथर्वा, १ पिपीलिकमध्यागायत्री, २ साम्नी उष्णिक् ३ याजुषी जगती ४ द्विपदा च्युष्णिक् ५ आर्ची बृहती ६ आसुर्यनुष्टुप , ७ साम्नीगायत्री ८ आसुरी पंक्तिः ६ आसुरी जगती १० प्राजापत्या त्रिष्टुप, ११ विराड्गायत्री । ६- अथर्वा , २२,२३ परोष्णिक् । ११- अथर्वा, ३ निचृदार्ची बृहती । १२- अथर्वा, ५,६,६,१० आसुरी गायत्री। १७ - अथर्वा , ८ त्रिपदा प्रतिष्ठा चीपंक्तिः ।

(षोडश काण्डे)

२- अथर्वा, ६ साम्नी अनुष्टुप। ५- यमः , ८ प्रथमा स्वराट् द्वितीय प्राजापत्या गायत्री, तृतीया द्विपदासाम्नी बृहती । ६ - यमः , ११ आर्ची अनुष्टुप वा यवमध्या गायत्री । ७- यमः , २ साम्नी अनुष्टुप । ८- यमः, ६ आसुरी पंक्तिः ।

(सप्तदश काण्डे)

१- ब्रह्मा, २ षट्पदा ति जाती ।

(अष्टादश काण्डे)

१- अथर्वा , ६,२५,२६,३०-३३, ३५,३६,४७ त्रिष्टुप । २- अथर्वा, ५ भुरिक् ५३,५४ त्रिष्टुप । ३- अथर्वा , ३ , ७,१०, २२,२४,३८,४८ ५३ त्रिष्टुप ,११,२३, सत: पंक्ति: २५-२६ जगती ३० अति जगती - ३१ विराट् शक्वरी ३२-३५,४७ भुरिक् ६८ अनु० । ४- अथर्वा २,५१ जाती , १०,४५ त्रिष्टुप १४ भुरिक् १६-२४ त्रिपदा भुरिङ्० महाबृहती २५ अनुष्टुप ।

(एकोनविंश काण्डे)

३- अथर्वाङ्गिरा: , ३,४ त्रिष्टुप । ४- अथर्वाङ्गिरा: , ४ त्रिष्टुप । ६- नारायण: , १०,११,१५, अनुष्टुप । ९- वसिष्ठ:, ११,१३ अनुष्टुप १२ सप्तपदाअष्टि: , १४ संकृति: । १०- वसिष्ठ: , ३ , त्रिष्टुप । ११ - वसिष्ठ: , २, ५ त्रिष्टुप । १३- अप्रतिरथ:, ६,१० त्रिष्टुप ११ भुरिक् । १७ - अथर्वा, १० अतिजाती । १८- अथर्वा , १० प्राजापत्या त्रिष्टुप । १६ - अथर्वा, १० स्वराट् । २०- अथर्वा, ३ पुरस्ताद्बृहती ४ अनुष्टुपगर्भा । २४ अथर्वा, १ अनुष्टुप । २७ भृग्वङ्गिरा: , ६ अनु० ९ त्रिष्टुप ११ आर्चीउष्णिक १२ आर्च्यनुष्टुप १३ साम्नीत्रिष्टुप्। ३०- ब्रह्मा , २ अनुष्टुप् । ३३ - भृगु:, ४ आस्तार पंक्ति: । ३४- अङ्गिरा:, ६ अनुष्टुप । ३५- अङ्गिरा: , १,२,५ अनुष्टुप । ३६ भृग्वङ्गिरा: , ५ सप्तपदा शक्वरी । ४०- ब्रह्मा, १ परानुष्टुप त्रिष्टुप । ४१- ब्रह्मा १ त्रिष्टुप । ४४- भृगु: ६ अनुष्टुप । ४६ - प्रजापति: ४ अतिजाती । ५४- भृगु:, ४ अनुष्टुप । ५६- यम:, ३,४ त्रिष्टुप।५७ यम:, ३ त्रिष्टुप । ५८- ब्रह्मा, १,६ त्रिष्टुप ५ भुरिक् । ५९- ब्रह्मा, २,३ त्रिष्टुप । ६३- ब्रह्मा, १ विराड्उपरिष्टाद् बहृती । ७०- ब्रह्मा, गायत्री त्रिपदा । ७२ भृग्वङ्गिरा: ब्रह्मा , १ त्रिष्टुप ।

(विंशकाण्डे)

९- विश्वामित्र:, ३ गायत्री, ११ - विश्वामित्र,७ त्रिष्टुप। १३- विश्वामित्र:, ४ त्रिष्टुप । १८ - मेधातिथि:, ३ गायत्री। २५- गोतम:, २ जाती ।

३४- गृत्समद:, १,१६ त्रिष्टुप । ३५- नोधा:, ८ त्रिष्टुप। ४७- प्रस्कण्व:, १७ गायत्री । ४६ - खिल्म् , १ गायत्री । ५८ - जमदग्नि:, ४ प्रगाथ: । ६२- नृमेध: , ६,७ उष्णिक् । ७७ वसिष्ठ:, ३ त्रिष्टुप् । ८८- बाल्मेदेव: , ६ त्रिष्टुप । ९२- प्रियमेध: , ८ पंक्ति: । १०१ - मेधातिथि: , ३ गायत्री । १०७- बृहद्दिव:,१३ त्रिष्टुप । १२४ भुवन: , ४,५,६ त्रिष्टुप । १३७ ययाति:, ४,५ अनुष्टुप् । १४२ - शशकर्ण: , ४ अनुष्टुप । १४३-पुरुमीढ़ाजमीढ़ौ, ५ त्रिष्टुप।

इत्यथर्व वेदे ऋषय: छन्दांसि च

--००--

--oo--

।। तृतीयो ध्यायः ।।

विश्वेदेवानां कर्मसु विनियोग विमर्शः

(अत्रोक्ता विषयाः)

दर्शपूर्णमासेष्टियागवर्णनम्, वेदिस्वरूप चित्रम्, आसादित यज्ञपात्राणां चित्रम्, श्रौतकर्मसु वैश्वदेवमन्त्र विनियोगाः, (चतुर्वेदोक्ताः)श्रौत कर्मसु-विश्वेदेव यागाः, फलानि, वैश्वदेव पर्वप्रयोगः, स्मार्तकर्मसु सम्बन्धः, पैतृक कर्मसु सम्बन्धः, काम्य प्रयोगाः, वैश्वदेवयागः, ५ वैश्वदेव चक्राणि, चक्रदेवतां नामानि, चतुर्वेदीय ब्राह्मणोक्तानि विधि वाक्यानि, चेति।

--0--

आधानादि राजसूयान्तानां सर्वेषां श्रौतयागानां प्रकृतिरूपो बौधायन सूत्रानुसारी दर्शपूर्णमासेष्टि यागः, सम्बन्धि देवतानामनुसन्धानञ्चेति ।

अस्मिन्वैश्वदेविके प्रबन्धे प्रायः सर्वेष्वध्यायेषु येनकेन प्रकारेण श्रौतयाग सम्बन्धो पलक्ष्यते । परञ्च न को पि श्रौतयागः साङ्गोपाङ्गोप वर्णितः । तेन तथाग जिज्ञासा पूर्त्यै यावत् श्रौतयाग स्वरूपं न प्रस्तूयते तावत् को यं श्रौतयागः, कथं वा विधीयते, केतत्रपदार्थाः, का देवताः, किञ्चतस्यफलमित्यादि प्रश्नमालिके-वोद् भूयते । तस्य समाधानार्थं कस्याप्येकस्य श्रौतयागस्य स्वरूप ज्ञानमावश्यकम् । अथच सर्वेषां वैतानिकानां यागानामिष्टीनाञ्च दर्शपूर्णमास यागः प्रकृतिरूपः । यद्यपि सर्वादौ आधानं विधीयते, तदर्थं माधानेष्टि रेवाद्याभवति । परञ्च तस्यापि विधानं दर्शपूर्ण मासेष्टावेव गतार्थम्, नतुस्वतन्त्रम् । उक्तञ्चाश्वलायनेन :श्व अग्न्याधेय प्रभृतीन्याह वैतानिकानि दर्शपूर्णमासौतुपूर्वंव्याख्यास्यामस्तन्त्रस्य तत्राम्नातत्त्वात् (श्रौ०सू० १-१) । तन्त्रस्येतिसूत्रं सौमिक- सत्रादावपि योज्यम् । यथा - सर्वासामिष्टीनां पूर्वोक्त यागः प्रकृतिः , तथैव सौमिकसंस्थाना मग्निष्टोमयागः प्रकृतिः , सत्रयागानाञ्च द्वादशाह प्रकृतिः, तन्त्रस्य तत्राम्नातत्वादिति । एतेषु सौमिक सत्रादि यागेष्वपीष्टि तन्त्रं दर्शपौर्णमासिकमेव । अतः श्रौत पदार्थ- विधिः- हविः- देवतादि सम्बन्ध ज्ञानार्थं बहुस्थलीय श्रौत संकेत जिज्ञासा परिपूर्त्यै च दर्शपूर्णमासेष्टि-यागो विधिवाक्यैर्मन्त्र प्रतीकैश्च प्रस्तयते ।

दर्शपूर्णमासेष्टेः कर्म ब्रह्मस्वरूपम्


चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ।।

सर्वास्विवेष्टिषु प्रधान भूतो यं श्लोकोक्तो विधिर्वर्तते । प्रथमस्य चतुर्भिरितिपदस्य ' ओ (आ) श्रावय ' इत्यर्थः । द्वितीयस्य ' चतुर्भिः ' पदस्य ' अस्तु श्रौषट् ' इति सम्प्रैषः । तृतीयस्य ' द्वाभ्याम् ' पदस्य ' यज ' इति प्रैषो र्थः । चतुर्थस्य ' पञ्चभिः ' पदस्य ' ये यजामहे ' इति होतु सम्प्रैषः । पञ्चमस्य पुनः ' द्वाभ्याम् ' इति पदस्य ' वौषट् ' इति यागरूपो र्थः । एवं पञ्चभिः प्रैष सम्प्रैषात्मकैः पदैर्यज्ञस्वरूप परब्रह्मणो यजनं यस्मिन्कर्मणि विधीयते सा ' इष्टिः ' पदवाच्यो यज्ञः ।

बौधायन शुल्व सूत्रानुसारी दर्श- पूर्णमास यागवेदि: ।

(वेदिस्वरूपम्)

।। इयं वेदि: परो अन्त: पृथिव्या अयं यज्ञो भुवनस्य नाभि: ।।



पञ्चाग्नियाजी

श्रौतयागे मुख्या स्त्रयो ग्नयः द्वावुपाग्नी च । मध्ये पृथिवी रूपा महावेदिः। इत्थं श्रौतयागविहारे वैश्व देवात्मकस्य जातः आधार भूतं देवयजन स्थान मिति । प्रथमो गार्हपत्यः । द्वितीयो दक्षिणाग्निः। तृतीय आहवनीयः । चतुर्थः सभ्यः । पञ्चम आवसथ्यः । इत्थं पञ्चाग्नि साधनम् । अनेन पञ्चाग्नि धारणेन पञ्चाग्नियाजी भवतीत्युच्यते । द्विविधमग्निहोत्रम्। कर्म रूपम्, ब्रह्म रूपञ्च । कर्मरूपे मन्त्रमयीनां देवताना मावाहनम्, अन्वाधानम्, हविर्निर्वापः , यागः, पूर्वोत्तराङ्ग, कर्म, प्रायश्चित्तादि, पञ्चाग्न्यायतन वेदि निर्माणादिकं कार्यजातं प्रत्यक्ष दृग्गोचरं भवति। तस्यापूर्व फलं स्वर्ग प्राप्तिरिति ।

ब्रह्माग्निहोत्रेतु श्रद्धापत्नी, सत्यं यजमानः श्रद्धासत्यं तदित्युत्तमं मिथुनं श्रद्धयासत्येन मिथुनेन स्वर्गाल्लोकान्जयतीति । इत्यैतरेय ब्राह्मण वाक्यवत् यजमान-पत्न्योः स्वरूपम् । तदनु नारायणोपनिषदि तस्यैवं विदुषो यज्ञस्यात्मा० इत्यनुवाके सविस्तरं ब्रह्मात्मकमग्निहोत्रं प्रपञ्चितम् । प्रथमस्य कर्मरूपाग्निहोत्रस्य फलं स्वर्गप्राप्तिः । ब्रह्मात्मकस्य मोक्षापवर्ग फलप्राप्तिः । उक्तञ्च :-


काण्ड द्वयोप पाद्याय कर्म-ब्रह्म स्वरूपिणे ।
स्वर्गापवर्ग दात्रेच यज्ञेशाय नमो नमः ।।

इति दर्शपूर्णमासेष्टेः कर्म ब्रह्म स्वरूपम् ।

इष्टेः प्रागाचरणीयं याजमान्यम् ।

यागदिने (पूर्वेद्युर्वा) कर्ता स्वकीयं नित्यकर्म विधाय, अग्निहोत्रात्मकं प्रातरग्नि कार्यञ्च कृत्वा वपनं करोति । वपन विषये तैत्तिरीयवेद वाक्यं यथा:- केशश्मश्रु वपते । नखानि निकृन्तते । ततोधावते । स्नाति । अहतंवासः परिधत्ते । इत्युदाह्रियते । परंञ्च प्रथमं केशवपनेकृते श्मश्रुवपनान्तंयावत् कर्तुः यवन भासः स्यात् । तत्परिहारार्थं भाष्यकारेण तद्वाक्यमित्थं व्याकृतम् यत प्रथमं श्मश्रु पश्चात्केशवपनमिति तेन यवन भास परिहारः , उभयतो वपनञ्च सिध्यति ।

ततः सपत्नीकः स्नात्वा नवनीतेन (स्नेहमयेन) अभ्यन्जनं विधाय कृतान्जल-श्च एकविंशतिदर्भ पिन्जूलैः पवनं कुर्यात् । पत्न्यपि वपनाभ्यन्जनवर्जं सर्वं कुर्यात् । ऋत्विजश्च पत्नीवत्कुर्युः । पवनपावनोपयुक्तानामेकविंशति दर्भपिन्जूलानामासादनं चित्र रूपेण प्रस्तूयते ।



प्रागग्रौ द्वौ दर्भौ

उदगग्राणि सप्त सप्तदर्भाणां त्रीणि पिन्जूलानि ।

प्रथमं मूलस्थैः सप्तभिर्मुखं ऊर्ध्वाग्रं संमृजीत । मध्यस्थैः सप्तभिस्तथैव नाभिम् । अग्रस्थैः सप्तभिर्गुल्फौ । ततः पिन्जूलानिप्रोद्य । उदङ्०रस्य । पाणिंप्रक्षाल्य । समन्त्रक-माचमेत । मन्त्राः आपोहिष्ठा० त्रिः । ततो व्याहृतिभिः पृथक् पृथक् मुखं समार्जयेत। तद्यथा - भूः दक्षिणतः, भुवः, उत्तरतः, स्वः, अलोमिकावोष्ठौ । अग्रेतूष्णीमालभनं यथा - शिरः, चक्षुषी, नासिके, श्रोत्रे, हृदयम्, अपउपस्पृश्य पुनर्मार्जनं विधीयते । अत्राध्वर्यु पत्नीमपि मार्जयेत् । तन्मन्त्र प्रतीकाः । दधिक्राव्णो० आपोहिष्ठा ० ३ यच्चिद्धिते ० यत्किंचेदं० कितवासो० हिरण्यवर्णाः०४ ततः पवमानः स्वर्जनः इत्यारभ्य जातवेदामोर्ज्यन्त्यापुनातु । इत्यन्ताः पवमानपादाः । कयान० एतेयजुर्मन्त्राः ,तरत्स-मंदी० ४ ऋचात्मकं बव्हर्चं सूक्तम् । ततो भूर्भुवः स्वः । शन्नोदेवी० । इति मार्जनम् अग्निहोत्र शालायां पश्चिमेभागे बहिर्वा उपर्युक्तं सम्पाद्य अध्वर्युः वेद्युत्करयोर्मध्येन प्रपद्य गार्हपत्यस्योत्तरत उपविश्य इडादेवहूः० इतियजुं जपेत् । यजमानो पि सपत्नीकः तथैव प्रविश्य गार्हपत्यस्य पश्चात् दर्भासनेउपविश्य पवित्रपाणिः प्राणानायम्य, पत्न्यासहविष्णुंस्मरेत् । पुरुषएवेदंसर्वं० इतिस्मरणमन्त्रो विश्वेदेवात्मकः । ततोजपः । श्रद्धादेवता । याः पुरस्तात् ० विश्वेदेवाः । देवागातुविदो० इत्यनेन श्रद्धाव्हानम् । श्रद्ध३ हिं । सत्येनत्वा व्हयामि । आकूत्यौत्वा० इति जपेत् ।

सङ्कल्पः

पौर्णमासेन हविषा यक्ष्ये । दर्शेष्ट्यांतु अमावास्येनेत्यूहः । इष्टिसङ्कल्पः त्रिरुपांशु त्रिरुच्चैरिति षड्वारमुच्चार्यो भवति । ततोयाजी तन्मऋध्यताम्० पठेत्। ऋत्विजश्च तदृध्यतां० इति प्रतिवचनं ब्रूयुः ।

अन्वाधानम्

हवनक्रमेण देवतानां ध्यानपूर्वको हवन सङ्कल्पः अन्वाधानम् । तद्यथाः- पौर्णमासेष्टयां पौर्णमासं हविः । व्रीहिमयः पुरोडाशो द्रव्यम् । आज्यंच । पञ्चप्रयाजाः । अग्नीषोमावाज्यभागौ । अग्निर्विष्णुरग्नीषोमा विन्द्रोवैमृधश्च प्रधान देवताः । देवा आज्यपाः । अग्निस्विष्टकृत । त्रयोनुयाजाः । सूक्तवाक शंयुवाकौ।अष्टौपत्नी संयाजाः । एवमात्मकेन साङ्गोपाङ्गेन कर्मणा सद्यो यक्ष्ये । दर्शेष्टयांतुः - अमावास्यं हविः । श्रितंदधि च । अग्निर्विष्णुरिन्द्राग्नी इति प्रधान देवताः । इतिभेदः , अन्यत्सर्वं पूर्ववत् ।

अध्वर्युवरणम्

अस्यां पौर्णमासेष्टयाम् (दर्शेष्ट्यां वा) अध्वर्युत्वेन त्वामहं वृणे । वृतोस्मि । पवनादिभिः संस्कृतो यथाज्ञानेन कर्मकरिष्यामि । इत्यध्वर्युं प्रति वचनम्। अध्वर्युः आचम्य, वेद्युत्करयोर्मध्येन प्रपद्य गार्हपत्यस्योत्तरत उपविश्य, पूर्ववत इडादेवहूः० देवागातुविदो० इति मन्त्रद्वयं पठेत् । पूर्वोक्तोद्धरण पक्षे अग्निद्वयं विहरणीयम् । अजस्रपक्षे न तथा ।

अग्नित्रयेषु प्रत्यग्निं त्रिस्थूलसमिधाधानम्

अध्वर्युर्यजमानोवा गार्हपत्यस्य पश्चात्पद्मासनेनोपविश्य यजेत् । देवता- अग्निः । देवाः । इन्द्रवन्तः , मरुतः, विष्णुः , अन्तरिक्षम् , वातः , दैव्योहोतारौ । मन्त्राः - ममाग्नेवर्चो० ३ ऋचः । तथैव दक्षिणाग्नावूर्ध्वजानु- रुपविश्य पूर्ववत्समिधो भ्यादध्यात । देवताः- विश्वेदेवाः , देवीः सोमोराजा, अग्निः , मन्युः । मन्त्राः - महयंयजन्तु० ३ ऋचः । अपरेण गार्हपत्यमाहवनीय मागत्य प्रत्युदक्-प्रह्वस्तिष्ठन् पूर्ववद्यजेत् । देवताः धाता। सविता । अश्विनौ ।

बृहस्पतिः । देवाः । इन्द्रः इन्द्राग्नी । वसवः । रुद्राः । आदित्याः ।
मन्त्राः - धाताधातॄणां० ३ मन्त्राः । आहवनीयस्योत्तरतस्तिष्ठन्नुपतिष्ठते ।
देवता- इन्द्रः । अर्वाञ्चमिन्द्र० १ ऋक् । ततोऽध्वर्युर्यजमानः पत्नी च गार्हपत्यादीन त्रिः परिसमुह्य त्रिः पर्युक्ष्याग्नीनलं कुर्वन्ति ।

व्रतग्रहणम्

यजमानः तीर्थेन निर्गत्याग्रेणाहवनीयं परीत्य स्वायतन उपविश्य आचामेत् । देवता आपओषधीः । पयस्वती० १ ऋक् । द्विस्तष्णीमाचामेत् । आहवनीये व्रतग्रहणीय चतस्रः समिधाधानम्, आद्यन्तयोः परिषेचनन्च ।

देवताः - व्रतपतिरग्निः । अग्नेव्रतपते० १ ऋक् । व्रतपतिर्वायुः । वायोव्रतपते० १ ऋक् । व्रतपतिरादित्यः । आदित्यव्रतपते० १ ऋक् । व्रतपतिर्व्रतानाम् । व्रतानांव्रतपते० १ ऋक् । आहवनीयं पुनः परिषिन्चेत् ।

शाखाच्छेदनाद्याग्नीध्र प्रैषान्तानां कर्मणां परिभाषासहिता विधि प्रकाराः ।

तत्रादौ शाखाच्छेदन प्रकारः

अध्वर्युः - तूष्णीमसिदमादत्ते, वेद्युत्करयोर्मध्येन निर्गत्य प्राची मुदीचीं प्रागुदीचीमन्यांवा दिशं गत्वा पलाशस्य शम्यावा प्राचीमुदीचीं वा शाखां छिनेत् । आहरणंतु साधारणम् ।

वत्सापाकरणम्

तया शाखया षड्वराधन्वित्सानपाकुर्यात् । ततो वत्सं मात्रे प्रेरयित्वा यजमानभीदोत् । ततो यथागतमागत्य शाखामग्न्य गार्हपत्यस्योत्तरतऊर्ध्वमुपगूहेत् ।

असिदमादानम्

ततोऽध्वर्युर्जघनेन गार्हपत्यं तिष्ठन्नसिदमादद्यात् । पश्चादभिमन्त्रणं, गार्हपत्ये प्रतपनम् । आहवनीयदेशमनं , वेद्यवेदाणं च कुर्यात् ।

दर्भमुष्टिग्रहणम्

दर्भदेशं गत्वा प्रस्तर पर्याप्तं दर्भमुष्टिं परिगृण्हीयात् । असिदेनोर्ध्वं मुन्मृज्यात् । तच्छेदनदेशेनिदध्यात् । तत आच्छेदनं, छेदनाभिमर्शनम्, आत्मनः प्रत्याभिमर्शनं

पाणि प्रक्षालनंच कुर्यात् ।

अनधो निदधानम्

सर्वं छित्वा प्रस्तरं विन्हितं कृत्वा नधो निदध्यात् । अतऊर्ध्वं तूष्णीं त्रीन्पञ्च सप्तनवैकादश वा समाना यावतापर्याप्तंस्याचावल्लुनीयात् ।

शुल्बकरणम्

ततः सन्धित्रय युक्तं प्रदक्षिणमावेष्टितं त्रिगुणं कृत्वा प्रदक्षिणं वेष्टितं शुल्वं कृत्वा तदुदगग्रं निदध्यात् । तस्मिन् शुल्बे दर्भमुष्टीं निधायोपरि प्रस्तरं सम्भरेत् । ततः सामान्यरीत्या सन्नहनं, ग्रन्थिकरणं, पश्चात्प्रागग्रमुपगूहनं, बर्हिरुद्यमनं, शीर्ष्णितृणं निधाय बर्हिर्निदधानं, गार्हपत्य मागमनंतद्दुरेम्प तदुत्तरेण गार्हपत्य मनधः सादनं च विदध्यात् ।

परिभोजनीया

तूष्णीं सकृदाच्छिन्नानां दर्भानां परिभोजनीया मुष्टिं साग्रां कुर्यात् ।

इध्म बन्धनम्

पूर्ववत् शुल्बं कृत्वा तूष्णीमुदीचीनाग्रं वितत्यैकविंशति दारुकमिध्मं बध्नीयात्।

वेदकरणम् वेदिप्रकल्पनं सम्मार्जनञ्च

दर्भमुष्टि मावेष्ट्य त्रिगुणं कृत्वा ग्रभागे प्रादेशानन्तरंबध्वा ग्राणि च्छिन्द्यात्। वेदंकृत्वा वेदिं करोति प्रागुत्तरात्परिग्राहात् । ततो वेदेन वेदिमुदगपवर्गं प्रागवसानं त्रिः संमार्जनम् ।

त्रिर्मृदाहरणम्

वेदं निधाय वेद्याः पश्चाच्छिष्ठं दर्भाभ्यां सह स्फ्यमादाय सव्यन्धृत्वा दक्षिणेनाभिमन्त्र्य दर्भेण स्फ्यं संमृजेत् । पाणिप्रक्षालन पूर्वकं शिष्टं दर्भं वेदिपूर्वं तृतीय भागे उदगग्रं निधाय दर्भमूले स्फ्येन संहत्य मृदासह स्फ्य मादाय मृदं हरेत् । ततो वेदिं प्रत्यवेक्षेत् । आग्नीध्र उत्करदेशे उपविश्य पाणिभ्यां मृदं गृहीत्वा पुनः स्फ्येन प्रहरेदिति त्रिः । तूष्णीं चतुर्थम् । स्फ्य प्रहरणादि मृन्निधानान्तं सह बर्हिषा कुर्यात् ।

वेद्यां स्फ्येन रेखा लेखनम्

पूर्वं परिग्राहं परिगृह्य दक्षिणांसमारभ्य दक्षिण श्रोणि पर्यन्तं स्फ्येन प्रथमां रेखाम् , दक्षिणश्रोणिमारभ्योत्तर श्रोणि पर्यन्तं द्वितीयाम्, उत्तरश्रोणि मारभ्योत्तरांस पर्यन्तं तृतीयां कुर्यात् । करणं जपेत् । वेदिं प्राचीं त्रिरुद्धन्यात् । ' अग्नीदितस्त्रिर्हर' प्रैषमिदमध्वर्यो: श्रुत्वा ग्नीध्र उद्धत् देशात्त्रिर्मृद मुधृत्योत्करे निदध्यात् । ' पिण्डपितृ यज्ञश्चात्रैव कार्य: ।।

उपवेष- शाखापवित्रयो: करणम्

दिवैव पूर्वच्छिन्नाया: पलाश शाखाया: पर्णानि छित्वा ग्रेण गार्हपत्यं निधाय तस्यामूलप्रदेशं छित्वोपवेषार्थं धृष्ट्याकारं कृत्वा गार्हपत्यस्य पश्चान्निदध्यात्। दर्भशाखामूलमारभ्याग्रपर्यन्तं त्रिभिर्दर्भैर्वेण्याकारं शाखापवित्रं कुर्यात् ।

गोदोहनम्

सायं होमानन्तरं गार्हपत्यस्योत्तरतस्तृणानि संस्तीर्य तेषु दोहनं शाखा-पवित्रं सान्नाय्य स्थाल्यौ द्वन्द्वंन्यञ्चि सादयित्वा तदुत्तानीकृत्य कमण्डलु जलेन प्रोक्षयेत् प्रथमं समन्त्रकम् , द्विस्तूष्णीम् । ततो जघनेन गार्हपत्यमुपविश्योपवेषेणोदी चोऽङ्गारान्निरूह्य तेषु सान्नाय्यतपनीमधिश्रयेत् । तस्यां प्रागग्रं शाखापवित्रं निधाय तदन्वारभ्य वाचंयम् आयतीर्गा प्रतीक्षेत् । ' उपसृष्टां मे प्रब्रूतात् ' इति परिकर्मिणं सम्प्रेष्य, सवत्सां गामुपसृज्य ' उपसृष्टा ' इति सवदेत् । ततो दुग्धद्रप्सानुमन्त्रणम् । वेद्युत्करयोर्मध्ये प्रपाय स्थाल्यादुग्धं प्रत्यङ्मुखं सिञ्चन्तं तमिन्द्राय महेन्द्रायवा हविरिति पृच्छेत् । सं गङ्गामिति वदेत् । पुनर्गामनुमन्त्रयेत्। इति त्रिर्वारं कुर्यात् । द्वितीये यमुनां, तृतीये सरस्वतीमित्तिवदेत् । ततो वाग्विसर्ग: । तत: पवित्रंत्यक्त्वा तूष्णीमुत्तराद्दोहयित्वा दोहनेजलमानीय संक्षालनं कुम्भ्यामानयेत्। दुग्धं तप्त्वोद गुद्वास्य शीतीकृत्य पवित्रेनिधाय स्रुवेण दध्ना तन्वनं कुर्यात् । कुम्भ्यामुपरि पवित्रं निधाय प्रोक्षणीशेषोदक पूर्णेन कंसेन चमसेन वा पिदध्यात् । तदुपरि शिक्यादौ गुप्त्यै विन्यसेत् । ततस्तूष्णीं दर्भैर्वत्सानपाकुर्यात् ।

अध्वर्युकर्म

प्रतिपदि प्रातर्हुते ग्निहोत्रे आहवनीयस्याचरतस्तिष्ठन्हस्तौ संमृशेत् ।

परिस्तरणम्

परिभोजनीयदर्भै राहवनीयं , पुरस्तादुदगग्रैर्दक्षिणत: पूर्वापरदर्भोपरि प्रागग्रै: पश्चादुदगग्रैरुत्तरत: पूर्वापर दर्भाध: प्रागग्रै: परिस्तृणीयात् । एवं दक्षिणाग्निं गार्हपत्यन्च ।

पात्रासादनम्

प्रथमं पत्नी, होतृ- ब्रह्म- यजमान- प्रणीता ग्नीध्राणांस्थानेषु दर्भैरासनं कल्पयित्वा ग्रेण गार्हपत्यं दर्भान्संस्तीर्य तेषु द्वन्द्वंन्यन्चि प्रक्षालितानि यज्ञपात्राण्यासादयेत् । तदित्थम् :- स्फ्यंच कपालानि च । अग्निहोत्रहवणीं च शूर्पं च । कृष्णाजिनं च शम्यां च । उलूखलं च मुसलं च । दृषदं चोपलांच । जुहूंचोपभृतं च । स्रुवंच ध्रुवां च । प्राशित्रहरणं चेडापात्रं च । मेक्षणं च पिष्टो द्वपनीं च । जुह्वने प्रणीताप्रणयनं चाज्यस्थालीं च । वेदं च दारुपात्रीं च । योक्त्रं च वेदपरिवासनं च । धृष्टिं चेध्म प्रव्रश्चनं च । अन्वाहार्यं स्थालीं च मदन्तीं च । फलीकरणपात्रं चान्तर्धानकटं च । यान्यन्यान्युपयुक्तानि तान्येवमेवा सादयेत् ।

ब्रह्मवरणम्


" भूपते०" इति मन्त्रेण ब्रह्माणं वृत्वोप विष्टे ब्रह्मण्यध्वर्यु: पृष्टयां स्तृणुयात्। तत्सन्ततां गार्हपत्यादाहवनीयात् ।

अपां प्रणयनम्

परिभोजनीयेभ्यो द्वौ दर्भौ प्रादेशमात्रौ साग्रावनखच्छिन्नौ भूमौ निधायादद्यात् । पवित्रे अद्भिरनुमार्ज्योत्तरेण गार्हपत्यमुपविश्य चमसं याचेत् । तस्मिंश्चर: पवित्रमपआनय ब्रह्मन्नप:०" इति संप्रैष्य चमसं सम्पूर्य नासिकायांसममस्कन्दयन् हृत्वोत्तरेणाहवनीयं दर्भेष्वासादयेत् । ततो दर्भै चमसं प्रच्छाद्य पवित्रमादाय प्रदक्षिणं प्रत्यङ्ङाहृत्य दक्षिणेनाग्निहोत्र हवणीं सव्येन शूर्पन्वादाय गार्हपत्येत्रि: प्रतितप्य (प्रथमं समन्त्रं द्विस्तूष्णीम्) जघनेन गार्हपत्यमुदगग्रं स्फ्यं निधाय स्फ्योपरिपात्रीं पात्र्यां पुरोडाशीयमानोप्य शूर्पे ग्निहोत्र हवणीं तस्यांपवित्रां निधाय स्रुग्घस्तएव पात्र्या: पूर्वार्धमभि-

बौधायन सूत्रोक्त दर्श-पौर्णमासेष्टि यागे उदक्संस्थानि वेद्यामासादितानि यज्ञपात्राणि ।

(पात्राणां नामानि इष्टि प्रकरणे उक्तानि)



मृशेत् । पूर्वं सम्प्रेक्ष्य तृणं शूकं वा निरस्याप उपस्पृशेत् ।

दशहोतृस्मरणपूर्वको हविर्निर्वापः

ते दशहोतारो यथा:- १ चित्तिः स्रुक् । २- चित्तमाज्यम् । ३- वाग्वेदिः । ४- आधीतं बर्हिः । ५- केतोअग्निः । ६- विज्ञातमग्निः । ७- वाक्पतिर्होता । ८- मनउपवक्ता । ९- प्राणोहविः । १०- सामाध्वर्युः ।

ततः प्रैषः:- " यजमान हविर्निर्वप्स्यामि " । यजमानस्यानुप्रैषः - ओं निर्वप । ततः पवित्रवत्यामग्निहोत्र हवण्यां मुष्टिमात्रंनिधाय तया शूर्पे त्रिः समन्त्रकं तूष्णीं चतुर्थमिति निर्वपेत् । यजमानो निरूप्यमाण मनुमन्त्रयेत् ।

पौर्णमास्यां तु - अग्नीषोमाभ्याम्, इन्द्रायवैमृधाय । दर्शे- इन्द्राग्निभ्याम् । ततो निरुप्तानभिमर्शनम्, अतिशिष्टानेकीकरणम्, आहवनीयेक्षणम्, गृहानन्वीक्षणम्, इति कर्माणिकृत्वा शूर्पमादायोत्तिष्ठेत् । अमुत्तरेण गार्हपत्यमनधः सादयेत् ।

उत्पवन- प्रोक्षणे

सशूकायामेव स्रुचि तिरः पवित्र मप आनीयोदीचीनाग्राभ्यां पवित्राभ्यां त्रिः पच्छ उत्पुनीयात् । प्रोक्षणिरादायोत्तिष्ठेत् । ताभिरेवाद्भिस्तास्वाय: त्रिः संम्प्रोक्ष्य पुरोडाशीयान्, (प्रथमं समन्त्रकं द्विस्तूष्णीम्) प्रोक्ष्य, पात्राण्युत्तानानिकृत्वा पूर्ववत् त्रिः सम्प्रोक्ष्य गार्हपत्यस्य पुरस्तात्प्रोक्षणीर्निदध्यात् ।

तण्डुल इव संस्कारा:

गार्हपत्यस्य पुरस्तात्प्रोक्षणीर्निधाय कृष्णाजिनमुर्ध्वग्रीवमादायापसव्यामावृत्या त्रिरवधूयात् । (प्रथमं समन्त्रकं द्विस्तूष्णीम्) तत्प्रत्यग्रीवमूर्ध्वं लोमोपस्तृणीयात् । - तस्मिन्नुलूखलं संस्थाप्य पुरोडाशीयान्द्रव्या नावयेत् । ततो मुसलमवधाय त्रिरुच्चैर्हविष्कृतमाह्वयेत् ।

अथाग्नीध्र कर्म

याजी पूर्वोक्त प्रकारेणाग्नीध्रं वृणुयात् । सो पि पवनपावनादिभिः संस्कृतस्तीर्थेन प्रविश्योत्तरेण गार्हपत्यमुपविश्य शान्त्यर्थमिडादेवहूरिति जपित्वा शम्यामादाय द्विदृषदं सकृदुपलन्च समाहत्य तूष्णीमन्यानि पात्राणि समाहरेत् ।

अवहनन- पेषण- प्रोक्षणादि

अध्वर्यु: पुरोडाशीयान्वितुषान्कृत्वोत्तरत: शूर्पमुपयच्छेत् । तस्मिन्पुरोडाशीयानुद्वापयेत्। उदगावृत्य परापूय सव्य हस्तेन तुषान् नैर्ऋत्यां दिशि निरस्येत् । ततो ध्वर्यु यजमानौ पाणिं प्रक्षाल्येताम् । पुनर्व्रीहितण्डुलान्विविच्य पात्र्यां तण्डुलान्प्रस्कन्दयेत् । पृथक्कृतान्व्रीहीनवहन्त्र्यै प्रयच्छन् ' त्रिष्फलीकर्तवै त्रिष्फलीकृतान्मे प्रब्रूतात् ' इति ब्रूयात् । पत्नी त्रिर्वितुषान्कृत्वा ' त्रिष्फलीकृता ' इति प्रतिवदेत् । अध्वर्युस्तण्डुल प्रक्षालनमन्तर्वेदि प्राशित्रेण निनयेत् । ततो वाग्विसर्ग: । यत्रयोग मन्त्रजप: ।


अत्राध्वर्युर्जघनेन गार्हपत्यमुपविश्योपवेषेणोदीचोऽङ्गारान्निरूह्य पूर्वोक्त प्रकारेण सायंदोहन वदातञ्चनवर्जं सर्वंकृत्वा तथैव कृष्णाजिनमवधुनुयात् । तदुपर्युत्तरत: स्थूल प्रदेशां शम्यां निधाय तस्यां प्रागायतंदृषदं, दृषदुपलां तिरश्चीमासाद्य पुरोडाशीयानधिवपेत् । (पौर्णमासे- अग्नीषोमाभ्यामिन्द्रायवैमृधाय, अमायांतु इन्द्राग्निभ्यामिति) अभिमृश्यजप: । पेषणे प्रथमं प्राचीं, तत: प्रतीचीम् । तिर्यक्कर्षणम् । उभौबाहू सकृदन्वीक्ष्य पेषणंकृत्वा कृष्णाजिने पिष्टानि प्रस्कन्दयेत् । पत्न्यै हवि: प्रयच्छन् ' असंवपंती पिंषाणूनि कुरुतात् ' इतिब्रूयात् ।

कपालोपधानम्


गार्हपत्यस्य पश्चात्प्रक्षालितान्यष्टौ कपालानि दक्षिणत: एकादशोत्तरत: सादयित्वा धृष्टिमादाय गार्हपत्यमभिमन्त्रयेत् । दक्षिणतो ङ्गारंनिरस्यान्य मङ्गारं कपालोपधानस्थाने निधाय तदुपरि मध्यमं कपालं स्थापयेत् । पुनस्तदुपर्यं ङ्गारं निदध्यात्। तत्पुरस्ताद्द्वितीयं कपालम् । तृतीयं पश्चात् । दक्षिणतश्चतुर्थम् । ततो दक्षिणस्य पुरस्तात्पञ्चमम् । पश्चात्पषष्ठम् । मध्यमस्योत्तरतो द्वे संस्पृष्टे पश्चात्सप्तमम् । तत्पुरस्तादष्टमम् । इत्यष्टाकपाल न्यास: । सर्वेषां कपालानां समन्त्रको न्यास: । ततो ङ्गारै: कपालान्याच्छाद्याभिमन्त्रयेत् ।

एकादश कपालेषु तदुत्तरत: पूर्ववदष्टावासाद्य नवमादि त्रीणि वायव्यत: आरभ्योत्तरत:प्राक्संस्थानि पृथगासादयेत् । अन्यश्चेत्तर्हि तदुत्तरत: पूर्ववदेव ।

एकादश कपालचित्रम्



अष्टाकपाल चित्रम्



पुरोडाशकरणम्

अध्वर्यु:- गार्हपत्ये पात्रीं मर्दतींचाधीश्रित्य पात्र्यां सव्यन तिर: पवित्रंधृत्वा वाचंयम: कृष्णाजिनात्पिष्टानि संवपेत् । अधिवपनवन्मन्त्रोह: । सुशृतं आहरापआनय इति प्रैषेत् । आग्नीध्र: स्रुवेण जलं गृहत्वा पात्रान्तरे निधाय वेदं पाणिंचाध: कृत्वा एवं मदन्तीभ्यस्तस्मिन्प्रक्षिप्यानीयमाना ध्वर्युरनु मन्त्रयेत् । ता आपस्तष्णीं पिष्टेष्वानीय पात्रीमध: कृत्वा मर्दती जलेन पिष्टान्याप्लाव्य मेक्षणेन मिश्रयेत् । देवता संख्यानुसारं तन्नाम्ना पृथग्भागान्कृत्वा भिमृशेत् ।

आकृति: - अश्वशफमात्रं पुरोडाशं कूर्माकारं कुर्यात् । पुरोडाशस्थापनम् :- दक्षिण कपालेभ्यो ङ्गारान्प्रत्यूह्य तेषु प्रथमं पुरोडाशं स्थापयेत् । सर्वाणि कपालानिस्पर्शयेच्च।

आज्यनिर्वाप: ?- तदुत्तरत आज्यस्थाल्यां तिर: पवित्रं धृत्वाज्यं निर्वपेत् । गार्हपत्यस्योत्तरतो भस्म मिश्रानङ्गारान्निरूह्य गार्हपत्यायतने एव तेष्वाज्यमधिश्रयेत् । पूर्ववदुत्तरकपालेषु पुरोडाशं स्थापयेत् । पुनरुत्तरे । पर्यग्निकरणम् :- पात्र्यां जलं प्रक्षिप्य तेन स्न-जलेन पुरोडाशस्य त्वचं त्रि: ग्राह्येत् । एवमन्येषाम् । तत: प्रथमं समन्त्रं द्विस्तूष्णीं च सर्वान्पर्यग्निकृत्य दक्षिणपुरोडाशं श्रपयेत् । एवमुत्तरौपुरोडाशौ । तूष्णीं भस्मनाभिवास्य साङ्गारं भस्म वेदेन त्रि: पुरोडाशोपरि प्रक्षिपेत् । तत:- अविदहन्त श्रपयत इतिप्रैष्य वाचं विसृजेत ।

लेखन-मृदाहरणे

पात्री संक्षालनोदकं गार्हपत्या दुल्मुकेनाभितप्यान्तर्वेद्यां स्फ्येन प्राची स्तिस्रोरेखा: कृत्वा प्रत्यक्षु त्रिर्निणयेत् । अथवेद: पृथिवीं इत्यत: अग्नीदितस्त्रिर्हर इत्यन्तं वेदिकर्मे- दानीं पुन: अध्वर्युर्वेदमादाय पूर्ववत् कुर्यात् । आगनीध्रेण पूर्ववत् त्रिर्मृदाहृतायां सम्प्रेषेत्:- ब्रह्मन्नुत्तरं परिग्राहं परिग्रहीष्यामि इति । ततो दक्षिणां समारम्य दक्षिणश्रोणि पर्यन्तं प्रथमां दक्षिण श्रोणि मारम्योत्तरश्रोणि पर्यन्तं द्वितीयाम्, उत्तर श्रोणि मारम्योत्तरां स पर्यन्तं तृतीयां लेखां च स्फ्येन लिखेत् । वेद्यां मृदमानीय प्राचीमारम्य प्रत्यगपवर्गं स्फ्येन समानं कुर्यात् ।

सर्वेषां सामूहिक: प्रैष:

अध्वर्यु: :- वेदे: पश्चिम स्तृतीय पूर्वार्धे तिरश्चीं रेखामालिख्य तिर्यञ्चं स्फ्यं धारयन् सम्प्रेषेत् । " प्रोक्षणीरासादये ध्माबर्हिरूपसादय स्रुवञ्च स्रुचश्च संमृड्ढि पत्नीं सनह्याज्येनो देहि " ।

प्रोक्षणीरासादनम्

आग्नीध्र: - प्रोक्षणीरभिपूर्याध्वर्यवे प्रयच्छेत् । अध्वर्यु:- स्फ्योपरि किंचिन्निनीय लेखायां प्रोक्षणीरासाद्यैकेकरेणस्फ्यमुदस्येत् । (अस्तयो: स्फ्यस्यच प्रक्षालनं कुर्यात्)।

इध्माबर्हिरूपसादनम्

अग्नीध्र: प्रणीतोत्तरत: प्रागग्रमिध्ममुत्तरं बर्हींषि निधाय प्रदक्षिणं प्रत्यङ् आवृत्य दक्षिण हस्तेन स्रुवं जुहूपभृतौ चादाय सव्येन ध्रुवां प्राशित्र हरणं वेद परिवासनानि चादाय युगपद्गार्हपत्ये त्रि: प्रतितपेत् । (प्रथमं समन्त्रं द्विस्तूष्णीम्) ।

स्रुवादि सम्मार्जनम्

अध्वर्यु:- वेदतृणैर्दक्षिण हस्तेन वेष्टितै: स्रुवं, साग्रैस्त्रिर्बिलं मध्यत: प्रागपवर्गं, त्रिरभ्यात्मं बाह्यत:, पात्रं प्रत्यञ्चं गृहीत्वा प्रत्यगपवर्गंस्त्रिर्मूलैर्दण्डञ्च सम्मृज्याद्भि: संस्पृश्य परिकर्मिणे आग्नीध्रायवा प्रयच्छेत् । एवमेव क्रमेण जुहूम्, उपभृतम्, ध्रुवाम्, प्राशित्र हरणञ्च सम्मृज्य सम्मार्गतृणान्यद्भि: संमृश्य गार्हपत्ये प्रक्षिपेत् । ततो ग्रेणोत्करं तृणानि संस्तीर्य तेषु स्रुवादीन्या सादयेत् ।

पत्नी सन्नहनम्

पत्नीं वेद्युत्करयोर्मध्येन प्रपाद्य गार्हपत्यस्य प्रत्यग्दक्षिणत उदीची मूर्ध्वजानुमुपवेश्य योक्त्रेण सन्नह्य युक्तं क्रियाता० इति मन्त्रं वाचयेत् ।

पत्नीकर्माज्यावेक्षणे

पत्नी त्रिः पवित्रमपआचम्य,गार्हपत्येवतस्त्रः समिधो भ्यादध्यात् । पुनर्गार्हपत्य-परिषेचन तृणनिरासादिकृत्वा प्राङ्मुख्युपविश्य मन्त्रचतुष्टयं जपेत् । तां गार्हपत्यमीक्षयेत्। तत आज्यमवेक्षयेत् । आज्यस्थालीं गार्हपत्ये धिश्रित्य तस्या घस्तात्समिधंधृत्वा प्राङुद्धृत्य स्थालीं माहवनीये धिश्रयेत् । समिधंचाहवनीये भ्यादध्यात् । एतदाज्यमग्रेण प्रोक्षणीः पर्याहृत्य प्रोक्षणीः समं रेखायां वेद्यां दक्षिणतो निदध्यात् । यजमानो क्षिणी पूर्वं निमील्यावेक्षयेत् । (अयमेवाज्याभिधारः) अध्वर्युरप्याज्यं यथाहृतं पर्याहृत्य वेद्युत्तरार्धे स्फ्यस्य वर्त्मनि निधायावेक्षते ।

आज्योत्पवनम्

आज्यमुदीचीनाग्राभ्यां पवित्राभ्यामात्मनः सकाशादारभ्य पुरस्तान्नीत्वा पुनरात्मा-भिमुखं नयंस्त्रिरुत्पुनाति समन्त्रम् । तथैव पुनः प्रोक्षणीन्च ।

स्रुवेण ग्रह ग्रहणम्

प्रोक्षणीषु पवित्रे निधाय दक्षिणेन स्रुवं सव्येन जुहूमादाय तां वेदे निधाय तस्यां स्रुवेणाज्यं गृण्हीयात् । गृहीतं गृहीतं यजमानो नुमन्त्रयेत् । अध्वर्युश्चतुर्वारमाज्यं गृहीत्वा जुहूं संमृज्य यजमानाय प्रयच्छेत् । सइध्मा बर्हिषोः प्रत्यङ् निदध्यात् । पुनरध्वर्यु रुपभृतमादाय तां वेदे निधाय मन्त्रावृत्त्या पूर्ववच्चतुर्गृहीतादल्पशो ष्ट कृत्वा गृण्हीयात् । यजमानो पि प्रतिग्रहणमनुमन्त्रयेत्समन्त्रकम् । जुहूवत्संमृज्य जुहूमुत्तरेसादयेत् । ध्रुवायां पूर्ववत् गृहीत्वा तां तदुत्तरे सादयेत् ।

इध्मा- बर्हिषोः प्रोक्षणम्

अध्वर्युः सध्रुवामाज्यस्थालीं वेदेः पश्चान्निधाय प्रोक्षणीभिरुपोतिष्ठेत् । ताभिरेवाद्भिस्ताख्वत्रिः प्रोक्षेत् । इध्मं विप्रस्य त्रिः प्रोक्षेत । ततो वेदिप्रक्षणं बर्हिः प्रोक्षणन्च कुर्यात् । बर्हिरिध्म प्रणीतयोर्मध्येन प्राङ्नीत्वा प्रणीता

हवनीययोर्मध्येन पुनराहृत्य वेदांपुरोग्रन्थि मुध्वाग्रं निधाय तिष्ठन्नग्राणि, प्रध्वन्मध्यानि, मूलान्यासीन: प्रोक्षेत् । प्रोक्षाणी पुष्करस्याधस्तात्पाणिं समाग्रं कृत्वा प्रत्यङ्मुखाभ्यां स्रुक्पाणिभ्यां पुराग्रन्थिमासिच्य शिष्टं जलं दक्षिण श्रोणिमारभ्योत्तर श्रोणि पर्यन्तं निनयेत् । याजी त्यागमुच्चरयेत् । ॰ पितृभ्योबर्हिषदूभ्य इदं नमम॰ अवउपवृषृश्यइति ।

प्रस्तर ग्रहणम् , परिधि परिधानन्च

अध्वर्यु: - अग्निहोत्र हवणिमात्मन: पश्चादुदगग्रं निरस्य पाणिंप्रक्षाल्य बर्हिर्विस्रस्याय उपस्पृश्य, प्रथमं प्रस्तरं गृण्हीयात् । तत: प्रस्तरे पवित्रे निधाय प्रस्तरमग्रेणाह्वनीयं पर्याहृत्य यजमानाय दत्वा बर्हि: सन्नहनं विस्रस्याप उपस्पृश्य दक्षिणां श्रोणिमारभ्यो-त्तरांस पर्यन्तं निधाय बर्हिर्मुष्टिं प्रागग्र मुदक्संस्थं स्तृणोत् । (प्रथमं द्वितीयं तृतीयमिति) क्र प्रत्यग्वेदिं प्रागास्तृत दर्भमूलानि प्रच्छादयन्पुन: प्रस्तरंगृहीत्वा प्राङ्भिसृष्य प्रस्तर पाणि रुदग्रं मध्यमं परिधिं परिदध्यात् । यजमानोप्यनुमन्त्रयेत् । तन्मूलोपरिदक्षिणं प्रागग्रं , मध्यमाग्रस्याधस्तात्प्रागग्रमुत्तरं पुरस्ताच्च मनसा परिधिं कल्पयेत् । ततोर्ध्वेसमिधा वग्नावादध्यात् । (प्रथमं दक्षिणां समन्त्रां तूष्णीमुत्तराम्) यजमानोनुमन्त्रयेत् ।

स्रुक्स्रुवाज्यस्थालीनां स्थापनम्

परिभोजनीयेभ्यो दर्भद्वयमादाय विधृतिसंज्ञमुदग्रं निदध्यात् । तदुपरि प्रागग्रं शाखापवित्रेण सहप्रस्तरं, प्रस्तरे जुहूं, तदुत्तरतो विधृत्योरधस्ता दुपभृतं , तदुत्तरतो ध्रुवान्च-समन्त्रम् । तदुत्तरत आज्य स्थालीं, स्रुवं च तूष्णीमासादयेत् । पूर्वं पूर्वमनुत्सृजन्नुत्तर मुत्तरमासाद्य प्रभु: सकृदेवाभिमर्शयेत् । सकृन्मन्त्रेणैव सर्वाण्याज्यान्यभिमन्त्रयेत् ।

पुरोडाशादि हविरासादनम्

दक्षिणेनाज्यस्थालीं सस्रुवां सव्येन दारुपात्रीं वेदंचादाय, प्रदक्षिणं प्रत्यङ्ङा-हृत्य जघनेन गार्हपत्यमुपविश्य पात्र्यां पुरोडाश संख्याया मन्त्रावृत्योपस्तृणीयात् । ततो धृष्टिमादाय प्रथम पुरोडाशस्याङ्गारा नपोहेत् । तत: पुरोडाशंप्रकाश्य धृष्टिं निधाय वेदेन विरजसं कृत्वा भिघारयेत् । तमुद्वास्याज्येन सन्तर्प्योज्याक्त हस्तेनापर्यावर्तयन्पुरोडाश मधस्तादभ्यज्य पात्र्यां तूष्णीं निधाय पूर्ववदुत्तरपुरोडाशस्याङ्गारापोहनादिकं कुर्यात् ।

ततः श्रृतं चरुं स्रुच्गमिभिघार्योदगुद्वास्यप्रत्यभिघार्य पुरोडाशोत्तरतः संस्थाप्यालं कुर्यात् । एवमेव (दधिद्रव्यंमाहेन्द्रायचेच्चदपि) कपालानि प्रत्येकं सकृदभ्यज्येत् । ततो ष्टौ कपालानि प्रथममुद्वासयामि इति क्रमेण संख्ययोद्वासयेत् । तथैववोत्तराण्येकादश कपालानि, तदुत्तराणि च । ध्रुवमभिपूर्य पुरोडाशयोर्मध्ये संस्थाप्य सर्वाणि हवींष्यादायान्तर्वेदि स्रुचां पश्चात्साद-येत् । (अध्वर्युरन्वारब्धः) श्रृतं चरुं वेद्यां दक्षिण पश्चिमदेशेनिधाय (दधिचे दुत्तरपश्चिम-देशे) ध्रुवमाज्यपूर्णमग्रेण स्रुचः पर्याहृत्य दक्षिणेनजुहूं प्रस्तरे सादयेत् । यथाहृतमानीय ध्रुवायामाज्यमवनयेत् । यजमानः सर्वाणि हवींष्यनुमन्त्रयेत् ।

सवरणं होतृ कर्म

कर्ता होतारं वृणीयात् । अध्वर्युः- होतरेइहि ` इति तमाह्वयेत् । होता: - प्रागुत्तरा हवनीया दवस्थाय प्राङ्मुखो यज्ञोपवीत्याचम्य दक्षिणावृद्विहारं प्रपद्यते पूर्वेणोत्करमपरेण प्रणीता इध्ममपरेणाप्रणीते चात्वालं तीर्थं प्रपद्याभिहृततरेण पादेन वेदि श्रोण्योत्तरया पार्ष्णी समांनिधाय प्रपदेन बर्हिराक्रम्य संहितौ पाणी धारय-न्नाकाशवत्यङ्गुली हृदय सम्मितौ द्यावापृथिव्योः सन्धिमीक्षमाणः प्रेषितो नमः - प्रवत्रे० ` इति निगदं जपेत् ।

सामिधेनी यागः ।।

अध्वर्युः - इध्ममभ्यज्येध्मात्समिध माददानः ` अग्नये समिध्यमानाया नुब्रूऽहि ` इति होतारं प्रेषेत् ।होता - हिंकृत्य प्रवोवाजेति पन्चदश सामिधेनी रनुब्रूयात् । अध्वर्युः- प्रवोवाजा० इत्युपक्रम काले प्रथमां समिधमाधाय प्रणवे प्रणवे द्वितीयाद्येकादश समिधो म्याधाय , समिद्धो अग्न० इत्यस्याः प्रणवान्ते तिस्रः सहाधायैकां परिशिष्य, आजुहोता० इति वचन काले वेदेन त्रिराहवनीयोपरि वाजयेत् । कर्ता अग्नयेत्यागो ब्रूयात् । अध्वर्युः - होतु ब्राह्मण भारते इत्यवासन काले ध्रुवाज्या त्स्रुवेणोपहत्याघस्ता-द्वेदं कृत्वा दक्षिणं परिधिमारभ्योत्तरात्परिधे रासीनस्थिर्यन्चमाघारमाघारयेत् । कर्ता-आर्षेयान्प्रवृणानं होतर माघारमाघार्यन्वानुमन्त्रयेत् ।

अग्नीध्र प्रेषः

अध्वर्युः - ` अग्नीदग्निं स्त्रिस्त्रिः संमृढ्ढि ` इत्याग्नीध्रं प्रेषेत् ।

आग्नीध्रः- इध्म सन्नहनेन स्फ्यमावेष्ट्य तेन त्रिस्त्रिर्मूलमारभ्य मध्यम दक्षिणोत्तरान् परिधीन्संमृज्याहवनीयं सम्मार्जयेत् । अध्वर्युः- जुहूपभृतोरग्रतः प्रान्चमन्जलिं कृत्वा दक्षिण हस्तेन जुहूं सव्येनोपभृतन्वादाय देवताह्वान काले सव्य पादेन प्राङ्मुखो ग्रेण स्रुचो वेदिमत्याक्रम्य अग्नाविष्णू० मन्त्रं जपेत् । तत आहवनीयस्य दक्षिणत स्थानं कल्पयित्वा यजमानेन स्रुच्यन्वारब्धो मध्यम परिधेर्मध्यं जुह्वाग्रेण संस्पृश्याविच्छिन्नं प्रान्चमाघारमाघारयेत् । कर्ता - इन्द्राय त्यागं ब्रूयात् ।

अध्वर्युः - स्रुचावसंस्पर्शयन्दक्षिणेन पदा उदङ्ङत्याक्रम्य पाहिमाग्ने० मन्त्रं जपेत् । जुह्वा ध्रुवां सकृन्मन्त्रेण द्विस्तूष्णीं समभ्यज्य यथा यतनं स्रुचौ सादयित्वा स्फ्यमुत्करदेश ऊर्ध्वाग्रं निहत्य पृष्ठत आग्नीध्रं कृत्वा प्रव्ह ओंकार माकारन्च प्लावयन्नाश्रावयेत् । यथा:- ओ ३ श्रा ३ वय । आग्नीध्रः - अस्तु श्रौ ३ षट् । अध्वर्युः - अग्निर्देवो होता देवान्यक्षद्विद्वां श्चिकित्वन्मनुष्वम्दरत वन्निध्रुवव दवत्सारवत्कश्यपवद् ब्रह्मण्वदेहवक्षाद्ब्राह्मणा अस्य यज्ञस्य प्रावितारः इति यजमानं प्रवरं ब्रूयात । ततो अमुकशर्मा होतामा ३ नुषः इति होतुर्नाम गृहीत्वा उभौ तिष्ठतः ।

होताः - मानुष इति श्रुत्वा उदायुषा० मन्त्रमुच्चारयन्नुत्तिष्ठेत् । अभिक्रम्याऽध्वर्युमन्वारभेत पार्श्वस्थेन पाणिनाग्निमङ्कदेशेन सव्येन वा।सम्मार्गं० इति सकृन्मन्त्रेण द्विस्तूष्णीं मुखं सम्मृज्याप उपस्पृश्य होतृषदनमभिमन्त्रणाद्युपवेशनान्तंकृत्वा जानुशिरसा बर्हिं रूपस्पृश्य भुपते० निगदं जपेत् । प्रदीप्त इध्मे स्रुचावादापयेत् अग्निर्होता० निगदेन।

अध्वर्युः- आसीन प्रसव माकांक्षन्होतुरनुज्ञामाकांक्षन्नुपविश्य होतु र्घृतवती शब्दं श्रुत्वा जुहूपभृतावादायात्याक्रम्य ओश्रावय इति ब्रूयात् । (अतऊर्ध्वं दक्षिणेनात्याक्रमणं सव्येन प्रत्याक्रमणम्) आग्नीध्रः- उत्करे स्फ्यमिध्मसन्नहनान्यादाय दक्षिणामुखस्तिष्ठन् अस्तु श्रौषट् इति सर्वत्राश्राविते प्रतिवदेत् । अध्वर्युः- समिधोयज इति होतारं प्रेषेत् ।

।।प्रयाज यागः ।।

होताः- ये ३ यजामहे इति प्रतिप्रयाजादावुच्चार्यान्ते च वौ ३ षट् इतिजुहुयात् । तन्मध्येक्रमेण १ समिधः समिधो अग्न आज्यस्यव्यन्तु, २ तनूनपादग्न आज्यस्य वेतु,३ इडो अग्नआज्यस्य व्यन्तु , ४ बर्हिरग्निरग्न आज्यस्यवेतु ,५ उत्तमेप्रयाजे-स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं स्वाहाविष्णुं (उपांशु) स्वाहाग्नीषोमौ स्वाहेन्द्रवैमृधं स्वाहादेवा आज्यपाजुषाणा अग्न आज्यस्यव्यन्तु इति वदेत् ।

अध्वर्यु:- वषट् कृते पूर्वार्धे जुहुयात् । द्वितीये दक्षिणत: । तृतीये पश्चार्धे । चतुर्थे- यद्यन्यधर्मोपभृतं जुव्हामानीयोत्तरत: । पन्चमे - मध्ये हुत्वोदङ्० उ० त्याक्रम्य संस्रावेणानुपूर्व्येण हवींष्यभि धारयेत् । प्रथमं ध्रुवां, ततो दक्षिणं पुरोडाशं, पुनर्ध्रुवां, तत उत्तराणि हवींष्युपभृतमन्तत: । यजमान: - प्रतिवषट्कृतेहोतरि क्रमेण १ वसन्ताय० २ ग्रीष्माय० ३ वर्षाभ्य० ४ शरद० ५ हेमन्त शिशिराभ्यामिदं नमम् इति त्यागमुक्त्वा समन्त्रकं तान्तामृतु देवतां प्रार्थयेत् ।

आज्यभागयाग:

अध्वर्यु: - (पौर्णमास्या वार्त्रघ्नावामावास्यां च वृधन्वतांवाज्यभागौ भवत:) ध्रौवाज्यात्स्रवेण चतुर्गृण्हान:, ' अग्नये नुब्रू३हि ' इति होतारं । प्रेष्याज्यंगृहीत्वा - त्याक्रम्याश्राव्य ' अग्निंयज ' इति पुन: प्रेषेत् ।

होता अग्नयेनुब्रूहीति प्रेषं श्रुत्वा ग्नेयी पुरोनुवाक्या मुच्चार्य , यजेति श्रुत्वा ' ये ३ यजाहे ग्निं जुषाणे अग्निराज्यस्यवेतु वौ३ षट् ' इति हुनेत् । यजमान: - अग्नये त्यागमुच्चारयेत् ।

अध्वर्यु: - उत्तरपूर्वार्धे दक्षिणामुख्यास्रुचाहुत्वा उदगागत्य पुनश्चतुर्गृण्हान: ' सोमायानुब्रू३हि ' प्रेष्य गृहीत्वात्याक्रम्याश्राव्य, ' सोमं यज ' इति पुन: प्रेष्य दक्षिण पूर्वार्द्धे उत्तराभिमुख्या स्रुचाजुहुयात् । याजी: -सोमायेदं नमम इतित्यागं कुर्यात् प्रार्थयेच्च । होता:- पूर्ववत् सोमायानुब्रू३हि इति श्रुत्वा सौमिकीं पुरोनुवाक्यामुचार्य यजेत्याश्राव्य ' ये ३ यजामहे सोमं जुषाण: सोम आज्यस्य हविषोवेतु वौ ३ षट् ' इति हुनेत् । (सर्वत्राध्वर्यौ रो श्रवार्थ इतिश्रवणानंन्तरमाग्नीध्र: ' अस्तुश्रौ३षट् ' इति वदेत् । ' वज्रोवैवषट्कार: ' इतिश्रुत्यनुसारं षट्कारोवज्रपातवद्ब्रूयात्) ।

व्रतलोपादिप्रायश्चित्तानि

अध्वर्यु:- व्रतलोप प्रायश्चित्तार्थं ध्रौवाज्यात्सकृद्गृहीतेन जुव्हा जुहुयात् । याजी - अग्नये व्रतपतये त्यागं ब्रूयात् । अध्वर्यु:- साङ्गता सिद्ध्यर्थं सर्वप्रायश्चित्तं महाव्याहृत्या- जुहुयात् । प्रजापतय इदं नममेति कर्तुस्त्यागोच्चार: ।

अध्वर्यु:- पिण्डपितृयज्ञ लोप प्रायश्चित्तार्थं सप्त होतृभ्य: सङ्ग्रहेण सकृज्जुहुयात् । याजी:- वाचस्पतये ब्रह्मण इदंनमम ' इति त्यजेत् ।

प्रधानयाग:

अध्वर्यु: - उदङ्०ठ० त्याक्रम्य ध्रौवाज्या ज्जुव्हामुपस्तीर्य दक्षिण पुराडाशस्य पूर्वार्धा दवद्यन्मध्यमस्वरेण "अग्नयेनुब्रू३हि" इति प्रेष्य पुराडाशमेकहस्तेन नमस्कारेणोपस्याभिमृश्याङ्गुष्ठमूल प्रदेशिन्यग्राभ्यामसंस्पृष्ट नखाभ्यां पूर्वार्धादङ्गुष्ठपर्वमात्र मपरार्धदपि तावन्मात्र मवद्यात् । (पञ्चावत्तीनांतु मध्य- पूर्वार्धा - परार्ध क्रमेणावदानम् / ध्रौवाज्यावत्तमभिघार्याज्यस्थाल्याज्येन प्रत्यन्जन कुर्यात् । (सर्वत्रोपस्तरणाभिघारणे पुरस्तादुपरिष्टाच्चा ज्योहुतीच ध्रौवाज्यादेव प्रत्यन्जनमाज्यस्थाल्या एवेति नियम:) पुरस्ता दाज्याहुतीं हवि: प्रक्षोपस्थाने हुत्वा त्याक्रम्य "अग्निं यज" इति होतारं प्रेषेत् । याजी सत्यागमग्निं प्रार्थयेत् ।

होता- अग्नयेनुब्रू३हि इति श्रुत्वा ग्नेयी पुरोनुवाक्यां, यज इति श्रुत्वाआग्नेयी याज्यांचोक्त्वा वषट्कारेण हुनेत् ।

अध्वर्यु:- उदङ्० ङ० त्याक्रम्य प्रदिप्त हविष उपरिष्टादाज्याहुतिं चरेत् । (आज्य व्यतिरिक्त चरुपुरोडाशादि हवनेषु पुरस्तादुपरिष्टाच्च तूष्णीं ध्रौवाज्यात्स्रवाहुतिं सर्वत्र जुहुयात्) । अथोपांशुयाग: । ध्रौवाज्याच्चतुर्गृहीष्यन् "विष्णवे नुब्रू३हि" प्रेष्यात्याक्रम्या श्राव्य "विष्णुंयज" पुन: प्रेष्य वषट्कृते जुहुयात् । विष्णवे त्याग: कुर्यु: , प्रार्थना च । होता - पुरोनुवाक्यां , याज्यां च पठित्वा वषट् कुर्यात्

अध्वर्यु: - उदङ्० ङ० त्याक्रम्योपस्तीर्योत्तर पुरोडाशस्यापरार्धादवद्यन्नुच्चै: - "अग्नीषोमाभ्यामनुब्रू३हि" प्रेषेत् । उपस्थानादि सर्वं पूर्ववत्कुर्यात् । "अग्नीषोमौ यज" इति प्रेष्य वषट् कृते जुहुयात् । याजी सत्यागं देवतांप्रार्थयेत् ।

अध्वर्यु:- उदङ्० ङ० त्याक्रम्योपस्तीर्य तृतीय पुरोडाशस्यापरार्धादवद्यन "इन्द्राय वैमृधायानुब्रूहि" प्रेषेत् । प्रार्थनान्तं पूर्ववदेव ।

(दर्शेतु- विष्णोरनन्तरं पुरोडाशापरार्धादवद्यन्नाह "इन्द्रायानुब्रूहि" इति । पुनस्तथैवासंनयत: "इन्द्राग्निभ्यामनुब्रूहि" इत्यत: प्रार्थनान्तंयथोक्तम्)

स्विष्टकृद्याग:

अध्वर्यु:- उदङ्० ङ० त्याक्रम्योपस्तीर्य दक्षिणपुरोडाशस्योत्तरार्धादवद्यन् "अग्नये स्विष्टकृते नुब्रू ३ हि" इतिप्रेष्य सकृदङ्गुष्ठ पर्वाधिक मवदाय ध्रुवाज्यात्सकृत्सकृदुत्तरयो: पुरोडाशयो: पौर्णमास्याम् (अमायान्तु सकृत्पुरोडाशात्सकृध्रुवाज्यात्सकृदुत्तर-

पुरोडाशाद्विरभिधार्य न प्रत्यनक्ति) अवद्येत्स्विष्टकृति ध्रुवाज्यात्स्रुवेण पार्वणौजुहुयात् ।
पौर्णमास्याम् :- " ऋषभं०" इतिमन्त्रेण । त्यागः । पूर्णमासायेदंनमम । दर्शेतु -
अमावास्यासुभगा०" इत्यनेन । त्यागः - अमावास्याया इदंनमम् । अत्याक्रम्याश्राव्य
" अग्निं स्विष्टकृतं यज" इतिप्रेष्य होतुर्याज्यान्ते उत्तरपूर्वार्धे आहुतीरतिहाय जुहुयात् ।
संस्रावं च कुर्यात् । याजी अग्नये स्विष्टकृते त्यागमुच्चार्य प्रार्थयेत् ।
होता - " पिप्रीहि देवां०" इत्यनुवाक्यां पठित्वा यजेति श्रुत्वा स्विष्टकृतं पठेत् ।
तद्यथा :- " ये३ यजामहे ग्निं स्विष्टकृत मयाळग्निरग्नेः प्रियाधामान्ययाट्सोमस्य
प्रियाधामान्ययाळग्नेः प्रियाधामान्ययाट् विष्णोः" (उपांशु) प्रियाधामान्ययाळग्नी
षोमयोः प्रियाधामान्ययाळिन्द्रस्य वैमृधस्य प्रियाधामान्ययाड् देवानामाज्यपानां
प्रियाधामानि यक्षदग्नेर्होतुः प्रियाधामानि यक्षत्स्वं महिमान मायजतामेज्याइषः
कृणोतु सो अध्वरा जातवेदा जुषतां हवि" रग्नेयदद्य०" इति याज्यामुक्त्वा वषट्
कुर्यात् ।

संक्षालन निनयनादि

अध्वर्युः- उदङ्०ङ० त्याक्रम्य जुह्वामप आनीय संक्षालन मन्तः परिधि निनयेत्।
याजीः- अग्नये वैश्वानराय त्यागं ब्रूयात् । ततो ध्वर्युः - जुहूं प्रक्षाल्य निष्टप्याद्भिः
प्रपूर्य बहिः परिधि निनयेत् । कर्ता - अग्नये त्यागं कुर्यात् । अध्वर्युः- सर्वमौपभृतमाज्यं
जुह्वामानीय यथा यतनं स्रुचौसादयित्वा प्राशित्र पात्र मादाय तस्मिन्दक्षिण पुरोडाशस्यो-
त्तराधाद्यवमात्रमवद्यात् । अवदीयमाने कर्तुर्जपः । प्राशित्रे निधाय स्रुवदण्डेनाभिघार्य प्रणीता
पश्चिमतः सादयित्वा द्भिः स्रुव दण्डं संस्पृशेत् ।

इडोपाह्वानम्

अध्वर्युः- इडापात्र मन्तर्वेदि निधाय तस्मिन्नाज्यस्थाल्या उपस्तीर्य दक्षिण
पुरोडाशस्य दक्षिणार्धात्प्ररुज्यावदध्यात् । सम्भेदा द्वितीयं तूष्णीम् ।ततो दक्षिणस्यैव
पुरोडाशस्य पूर्वार्धात् त्र्यङ्गुलमाज्येन सन्तप्याग्रेण ध्रुवां यजमान भागं निदध्यात् ।
सो पि तमनुमन्त्रयेत् । ब्रह्मभागमपि तत्समीपे द्विर्ध्रुवाज्यादव दाय पूर्ववद्विरुत्तरपुरोडाशमभि-
घार्य होतुरङ्गुलि पर्वणी अन्ज्यात् ।

होता- " वाचस्पतिनाते०" इतिमन्त्रेणोर्ध्वमोष्ठं, " मनसस्पतिनाते०" इत्यनेनाधरं निमृज्य पाणिं प्रक्षाल्यान्जलिंकृत्वा मध्वर्युदत्तां प्रतिगृह्य सव्यपाणिं कृत्वा पश्चादस्या उङ्गुलिं पाणिमुपधायावान्तरेडामवदापयीतान्तरेणाङ्गुष्ठमङ्गुलीश्च स्वयं द्वितीय माददीत प्रत्यालब्धामङ्गुष्ठेनाभि संगृह्य प्रत्याहृत्याङ्गुलीरमुष्टिंकृत्वा दक्षिणत एकां परिगृह्यास्य सम्मितामुपव्हयेत् । अध्वर्युर्यजमानो ग्नीध्रा अन्वारभेयु: । याजी- होतुराह्रीयमाण मिडां " सुरूपवर्ष०" मन्त्रेणानुमन्त्रयेत् । अध्वर्यु :- देव्या अध्वर्यवं इति होतृवाक्यंश्रुत्वा वशिष्टं दक्षिणं पुरोडाशं चतुर्धा कृत्वा बर्हिषि निदध्यात् । याजी- " उपहूतो यं यजमान" इति श्रुत्वा होतरमीक्षमाणो गोरूपाया इडाया वायुं वत्सत्वेन ध्यायेत् । उभौ" उपहूत: पशुमानसानि" इति वदेताम् । अध्वर्यु: - इडाया: पञ्चमं भागं द्वेधाकृत्वा ग्नीध्रे षडवत्तं प्रदायोपस्तीर्य चतुर्भ्यो विभजेत् ।

आग्नीध्र: - वेदेन ब्रह्मणे भागद्वयं प्रयच्छेत् । सतंगृहीत्वा प्राशित्रे निधाय पात्रान्तर द्वयेन होत्रे ध्वर्यवेच स्वंस्वंभागं प्रयच्छेत् उभौ सप्तदशक्षाणं नासिकायां वायोरन्त: प्राणं कृत्वा प्रतिगृ ण्हीयाताम् । (सर्वेषां यथार्त्विज्यमन्त्रा:) इडा प्राशनम् । आचमनम् ।

अन्वाहार्यो दक्षिणा

अध्वर्यु:- अन्वाहार्य चरुं दक्षिणाग्नौश्रपयित्वा भिघार्य वेदि दक्षिण T श्रोण्यां निधाय ब्रह्मणा भिमन्त्रिते वैद्यामास्तदयेत् । यजमानोप्यभिमृशन्ननुमन्त्रयित्वा, ऋत्विज: । " अयं व ओदनो यथाभागं प्रतिगृण्हीध्वम्" वदेत् ते पि यथाभागं समन्त्रं प्रतिगृण्हीयु: । ततो हवि: शेषानुचरत उद्वासयेत् ।

अध्वर्यु प्रेष:

अध्वर्यु: - " ब्रह्मन्प्रस्थास्याम: समिधमाधायाग्नीदग्नीन्त्सकृत्सकृत्सम्मृड्ढि" इतिप्रेष्य ब्रह्मणो मुखादों प्रतिष्ठेति श्रुत्वा परिशेषितां समिधमाहवनीये म्या दध्यात् ।

आग्नीध्र:- स्फ्यरहिते रिध्मसन्नहने: पूर्ववत्सकृत्परिधीन्संमृज्याग्निं सम्मृज्यात् । तत इध्म सन्नहनानि विस्रस्याद्भि: प्रोक्ष्याहवनीये नुप्रहरेत् । याजी-" भूतानामधिपतये रुद्राय तन्तिचरायेदंनमम" इत्युक्त्वोभावपउपस्पृशत: ।

अनुयाजयाग:

अध्वर्युः - जुहूपभृतावादायात्याक्रम्याश्राव्य ' देवान्यज ' इति । होता- देवंबर्हि० मन्त्रान्ते वषट्कृते ध्वर्युर्जुहुयात् । याजीत्यागं कुर्यात् । (समित्पूर्वार्धे जुहुयात् , देवाय बर्हिष इदं नमम इति)
पुनरध्वर्युः- ओश्रावय, आग्नीध्रः- अस्तुश्रौषट्, अध्वर्युः- यज, समिन्मध्ये जुहुयात् । होता - देवोनराशंसो० मन्त्रान्ते वषट्कुर्यात् । कर्तुः सत्यागं प्रार्थना ।
पुनरध्वर्युः- आश्राव्य समिधो मूलमारम्य सन्तत धारया ग्रान्तंजुहुयात् । होता - देवो अग्निः स्विष्टकृत्सु० मन्त्रान्ते वषट्कुर्यात् । याजी- देवायाग्नये स्विष्टकृत इदं नमम इत्युक्त्वा प्रार्थयेत् ।

स्रुग्व्यूहन परिध्यन्जने

अध्वर्युः- उद्‌द्रु० उ० त्याक्रम्य यथायतनं स्रुचौ सादयित्वा ध्वर्युयजमानौ स्रुचौ व्यूहेताम्। दक्षिणहस्तेन जुहूं स्वयेनोपभृतं निगृह्य दक्षिणेन जुहूं प्राचीं प्रेरयत आदक्षिणांसात् । उपभृतं प्रत्यग्रामुत्तर श्रोणिं प्रापयतो जुह्वापरिधीनन्ज्यात् । वसुभ्यो मध्यमं, रुद्रेभ्यो दक्षिणम्, आदित्येभ्य उत्तरम् । कर्ता तेभ्यस्त्यागमुच्चारयेत् ।
अध्वर्युः- उपभृतमद्भिः संस्पृश्य यथायतनं स्रुचौ सादयित्वा सविधृति पवित्रं प्रस्तरमादाय जुह्वायामग्राण्यनक्ति । उपभृतिमध्यानि, ध्रुवायां मूलानि ।

सूक्तवाक:

अध्वर्युः- प्रस्तरात्तृणमादाय प्रज्ञातं निधाय जुह्वां प्रस्तरं दक्षिणोत्तराभ्यां हस्ताभ्यां धृत्वा पूर्ववदाश्राव्य सूक्तवाकार्थं प्रेषेत् । ' इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ताब्रू३हि ' । होता - इतिश्रुत्वा ' इदं द्यावापृथिवी० इति निगदमुक्त्वा न्वाधानबद्देवतानां नामोच्चारण पूर्वकमिदंहविरजुषता- वीवृधतमहो ज्यायोत्कृत इति पठेत् ।
अध्वर्युः - अग्निरिदमित्यादि श्रुत्वा यजमान मुज्जितीर्वाचयेत् । याजी - उज्जितीः श्रुत्वा तेभ्योदेवताभ्यस्त्याग मुच्चारयेत् । अध्वर्युः - नमोदेवेभ्य इति होतृवचनं श्रुत्वा तिर्यन्चं हस्तेधारयन् कर्षन्निव प्रस्तरमाहवनीये नुप्रहरेत् । तं यजमानो नुमन्त्रयेत् । (ज्वालयोपरिमूलं प्रागायतं ज्वालानतिक्रान्तागंदीपयेत्) ।

शंयुवाकः

अध्वर्युः- अग्नीध्रम, ' अग्नी३त् ' इतीदोत् । आग्नीध्रः - ' संवदस्व ' इति ब्रूयात् । अध्वर्युः - अगानग्नी ३त् । आग्नीध्रः - अग३न् । अध्वर्युः- श्रावय । आग्नीध्रः- श्रौ३षट् । अध्वर्युः- प्रस्तरा दपनीतं तृणं दर्शयन् ' इदंब्रू३हि ' । आग्नीध्रः- अनुप्रहर। (इदं वाक्यजातमत्युच्चैः कथनीयमस्ति) । अध्वर्युः- तृणमनुप्रहृत्य ' स्वगादैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रू३हि इति होतारं प्रेषेत् ।

होता - उच्चैः - ' तच्छंयोरावृणीमहे० ' इति शंयुवाकं पठेत् ।

संस्रावहोमः

अध्वर्युः- उत्थायाहवनीयमुपतिष्ठेत् । ततो भूमिमभिमृश्य मध्यमं परिधि मनुप्रहृत्य दक्षिणोत्तरौसह प्रहरेत् । याजी- परिधीन्विमुच्यमानाननुमन्त्र्योक्तं शंयुवाकं चानुमन्त्रयेत्। अध्वर्युः- जुह्वां प्राविततोपभृदाज्येन सहजो हवनेनाभि जुहुयात् । याजी- वसुभ्यो रुद्रेभ्य आदित्येभ्यः संस्रावभागेभ्यस्त्यागं ब्रूयात् । अध्वर्युः- प्रदक्षिणमावृत्य प्रत्यङ्०ङ०ाहृत्य धुरि स्रुचौ विमुञ्चेत् ।

पत्नीसंयाजयागः

(अप्सुपांशुर्भवति) अध्वर्युः- होत्रे वेदं प्रदाय दक्षिणेनाज्यस्थालीं स्रुवां सव्येन् जुहू मादाय दक्षिणेन पदा गार्हपत्य दक्षिणाग्न्योर्मध्येन पत्नीगार्हपत्यमध्येन च गत्वा पश्चाद्गार्हपत्यस्य होतुदक्षिणत ऊर्ध्वंज्ञुरुपविश्य होतुर्वेदमादायोपभृत्स्थाने धृत्वा चतुराज्यस्य गृण्हानो होतारं सोमायानुब्रू३हि इति प्रेषेत् । चतुर्गृहित्वाश्राव्योर्ध्वं जानूपविष्टेन प्रत्याश्रावितं सोमंयज इति प्रेषेत् ।

होता- सौमीं पुरोनुवाक्यां याज्यान्वोक्त्वा वषट्कुर्यात् । याजी- सोमायत्यागमुक्त्वा प्रार्थयेत् । अध्वर्युः- पुनः पुनश्चतुर्गृहीष्यन्- त्वष्ट्रे, देवानांपत्नीभ्यो ग्नये गृहपतये चोपर्युक्त प्रक्रियया यागं कुर्यात् । याजी पुत्रकामश्चेत्तर्हि राकां, सिनीवालीं, कुहूम,अनुमतिम्, प्राग्गृहपतेर्यजेत् । सर्वेषां वषट् कारान्ते पुनः पूर्वोक्त देवताभ्यो, नाममन्त्रेणाज्याहुतीर्हुत्वा, समन्त्रं दिविज्योतिषेपरमात्मने, नारिष्ठाभ्यान्च द्विवरिमाज्यं हुनेत्।

आज्येडोपाव्हानम्

अध्वर्यु:- अग्रेणहोतारमुत्तरतोगत्वा होतुरङ्गुलि पर्वणी अभ्यज्य होतुर्हस्ते चतुराज्य-मवदायान्वारभेयु रध्वर्यु: पत्नी चेति । होता - पूर्ववदिडोपाव्हानं कृत्वा स्वस्व मन्त्रै: सर्वे प्राश्नीयु: । आग्नीध्रे षडवत्तमाज्यं देयम् । सतं प्राश्य मार्जयेत् ।

दक्षिणाग्नौ प्रायश्चित्तयाग:

अध्वर्यु:- स्रुचि चतुर्गृहीत्वा प्रसव्यं दक्षिणतोपरेण गार्हपत्यमाज्यस्थालीं स्रुचन्च स्रुवन्च पत्नीगार्हपत्यायोर्मध्येन नीत्वा स्वयं पत्नीपश्चाम्दागेनगत्वा दक्षिणाग्नौ प्रायश्चित्तं जुहुयात् । प्रथमामाहुतिं विश्वेभ्योदेवेभ्योजुहुयात् । याजी- तेभ्यस्त्यागं ब्रूयात् । अपरं चतुर्गृहीतं गृहीत्वा इध्मप्रव्रश्चनान्यभ्याधाय जुव्हांफलीकरणानोप्य जुहुयात् । याजी- अग्नये दब्धायवे शीततनव इदंनमम इति त्यागं कुर्यात् ।

पत्नीयोक्त्रविमोक:

अध्वर्यु:- अपरेण पत्नीमुत्तरतोगत्वा वेदं यजमानाय प्रदाय वाचयेत । यजमानाद्वेद मादाय होत्रेप्रयच्छेत् । होता- वेदं पत्न्यै प्रदाय "वेदोसि०" मन्त्रं वाचयेत् । ततो स्या योक्त्रं विमुच्य, तत्प्रत्यग्गार्हपत्या द्विगुर्णं प्राक्पाशं निधायोपरिष्टादस्योदग्राणि वेद तृणानि कृत्वा पुरस्तात्पूर्णं पात्रं संश्लिष्टं वेद तृणै रभिमृश्य वाचयेत् । "पूर्णमसि०" ततो स्या उत्तानमन्जलि मधस्ताद्योक्त्रस्य निधायात्मनश्च सव्यं पूर्णपात्रं निनयत् "माहं - प्रजां०" वाचयेत् । पत्नी तेन जलेन मुखं विमृजेत् ।

होतुर्निष्क्रमणम्

होता- वेद तृणान्यग्रे गृहीत्वा विधून्वन्संततंस्तृणन्सव्येन गार्हपत्या दाहवनीयमेत्य, होतृकर्मनिमित्तं प्रायश्चित्तं हुत्वा संस्थाजपेनोपस्थाय तीर्थेन यथेच्छं निष्क्रमेत् । ह

पत्न्या निष्क्रमणम्

पत्नी- तिर: पवित्रमप आचम्य गार्हपत्ये समिच्चतुष्टयम् (अग्नये व्रतपतये, वायवेव्रतपतये, आदित्यव्रतपतये, व्रतानांव्रतपतये० च जुहुयात् । याजी- सर्वत्र तेभ्यस्त्यागं ब्रूयात् । तत: पत्नीविद्युत्करयोर्मध्येन निष्क्रमेत् ।

अध्वर्यु:- गार्हपत्य दक्षिणाग्न्योर्मध्येन प्राङ्० त्याज्यस्थाल्याज्येन ध्रुवामाप्याययेत् । याजी- ध्रुवामाप्यायमानाम् आप्यायतां० मन्त्रेणानुमन्त्र्य ध्रुवापुरस्तात् स्थितं स्वंभागं प्राश्याचमेत् ।

सर्वप्रायश्चित्तहोम:

अध्वर्यु:- यजमाने उपविष्टे आज्यस्थाल्या: स्रुवेणोपहत्य सर्वप्रायश्चित्तानि जुहुयात् । सर्वतो यज्ञशेष प्रायश्चित्तहोमान्ते वेद्यास्तृतबर्हिभ्य: प्रत्येकं किञ्चिद् २ गृहीत्वा ध्रुवायां सकृदभ्यज्य सकृदाहवनीये नुप्रहरेत् । तत उत्थाय दक्षिणपदा मन्त्रवेदिं निधाय ध्रुवा-मादाय देवेभ्योगातुविद्भ्यो यज्ञाय सर्वंजुहुयात् ।

प्रणीताविमोक:

अध्वर्यु:- प्रणीता पात्रं वेद्यां निधाय यजमानं वाचयेत् । ततो मार्जनान्तरं सर्वं जल मन्तर्वेद्यां निनयेत् । ततो ब्रह्मा प्रायश्चित्तानि जुहुयात् ।

उपस्थानम्

याजी- विष्णु क्रमान्प्रक्रम्य, आहवनीयमादित्यन्चोपस्थाय दर्भेणात्मानं मार्जयन्बहिर्नि-रस्यापउपस्पृश्य हृदयमभिमृशेत् । तत: सव्यापसव्यं प्रदक्षिणंकृत्वा आहवनीयेसमिधमाधायो-पतिष्ठेत् । ततोगार्हपत्यमुपस्थाय ज्योतिष्मतीमाशास्य संप्रार्थ्य यज्ञविमोकं जपेत् ।

व्रतविसर्जनीय समिध्होम:

याजी- उत्करे उपवेषस्य स्थूलप्रदेशमुद्गृह्य स्वायतने उपविश्य पूर्ववदपआचम्य चत्वार: समिधो भ्या दध्यात् । (मन्त्रा: पूर्वोक्ता:) अत्रतु- व्रतमचारिषं, तदशकं, तन्मेराधि इति उक्त मन्त्रेषूह: कार्य: ।

यज्ञस्य पुनरालभनमात्मप्रेषश्च

याजी- यज्ञोबभूव० इत्यनेन यज्ञं पुनरालभ्य जपित्वा तत आत्मानं संप्रेषेत् ब्राह्मणां-स्तर्पयितवै इति । ततोग्नीन्परिसमुह्यालंकृत्योपस्थाय कर्मेश्वरार्पणं कुर्यात् ।

इति प्रकृतिरूप दर्शपूर्णमासेष्टि यागवर्णनम् ।

--००--

तत्र प्रथममृग्वेदे - प्रथमे मण्डले सूक्त मन्त्र क्रमाङ्कं पूर्वकमनुसन्धीयन्ते ।

सू० ३ मं० ७-९ अग्निष्टोमे सुत्याहे प्रातः सवनान्तर्गत प्रउगशस्त्रे शंसनीयं षष्ठं तृचम्।

१४, १-१२ व्यूढद्वादशाहस्य प्रथमे छन्दोमे तृतीय सवने वैश्वदेव शस्त्रे शंसनीयं सूक्तम्।

२३,१०-१२ अभिप्लवषडहस्य द्वितीयेहनि प्रउगशस्त्रे पञ्चमं तृचम् ।

८९, १-१० अग्निष्टोमे वैश्वदेवशस्त्रे उक्थावर्जंशंसनीयम् । उक्था- प्रकृतौ विकृतौ च शस्त्रस्यास्य परिधानी या भवति । महाव्रते निष्केवल्य शस्त्रेप्येतत्सूक्तम्।

९०, १-९ चातुर्विंशिके हनि प्रातः सवने मैत्रावरुणस्येय मारम्भणीया । अहर्गणेषु द्वितीयादिष्वहः स्वप्येषा शंसनीया । तथा च अप्तोर्यामे चतुर्थे च्छावाति रिक्तोक्थे स्यपञ्चमी तदनुरूप तृचस्य वैकाल्पकी तृतीया । षष्ठीतो ष्टमी आहूत मधुपर्का वेदाणे, नवमी शान्त्यर्थे च विनियुक्ता ।

१०५, १-१९ कूपेपतितस्य त्रित नामक ऋषेस्तस्माद्धुद्धारार्थं शंसनम् ।

१०६, १-७ तथा १०७-१-३ पापक्षालनार्थं शंसनम् तथा अन्नधनप्राप्त्यर्थं शंसनम् ।

१३९,१-११ विनियोगोलैङ्गिकः । तथा च दशरात्रस्य षष्ठे हनि प्रउगशस्त्रे आद्या वैश्वदेव तृचे प्रथमा ।

१६४,१-४१ महाव्रते वैश्वदेवशस्त्रे वैश्वदेवं निविद्धानं द्विप्रतीकम् ।

१८६, १-११ वि० लै० । तथाचास्यद्वितीया वैश्वदेवपशौ हविषः पुरोनुवाक्या ।

(द्वितीये मण्डले)

४१, १३-१५ आग्रयणे वैश्वदेवस्यहविषः प्रथमा नुवाक्या । अन्यो लै०वि० ।

(तृतीये मण्डले)

२०,१-५ वि०लै० । तथा च- मरुत्वतीयशस्त्रे - अस्यप्रथमाधाय्या ।

५४, १-२२ वि०लै० । राजन्यस्याग्निप्रणयने आद्या प्रतिपत् ।

५६, १-८ सूक्ते स्मिन् प्रायेणादित्यैः सह संवत्सर शंसनम् ।

(पञ्चमे मण्डले)

२६,१-९ प्रातरनुवाके आग्नेयक्रतौ आश्विनशस्त्रे शस्यते ।

४३, १-१७ वि०लै० । अपोनप्त्रीये एक धनासु हविर्धानं प्रति नीयमाना स्वाधानुवचनीया।

४४,१-१५ वाजपेये अतिरिक्तोक्थे अदितस्त्रयोदशर्चः शंसनीयाः ।

४८, १-५ आभिप्लविके पन्चमे हनि वैश्वदेवशस्त्रे इदंसूक्तं निविद्धानम् ।

५०, १-३ पृष्ठ्याभिप्लवषडहयो: प्रथमे हनि वैश्वदेवशस्त्रे स्यप्रथमा प्रतिपत्तृचस्याद्य: । आभिप्लविकेषु द्वि० च० षष्ठे स्वह: स्वेषैव वैश्वदेवशस्त्रस्य प्रतिपत् ।

५१, १-१५ गृह्ये प्रत्यवरोहण संस्थायां सूक्तमिदं जप्यम् । श्रौते - अस्यपंचमी - पृष्ठ्यस्य तृतीये हनि प्रउग शस्त्रे वायव्य तृचस्याद्या । षष्ठी- तथैव ऐन्द्रवायव तृचे शंसेत् । अष्टमी तथैव प्रउगशस्त्रे । ११-१३ पृष्ठस्य षष्ठे हनि वैश्वदेव शस्त्रे अयं तृच: । तथा च बृहस्पति सवे वैश्व देव निविद्धानार्थो यं तृच: । सत्रमध्ये दीक्षितव्याधिते सति तस्मिन्नहनि वैश्वदेव शस्त्रे यं तृचो निविद्धानार्थ: ।

(षष्ठेमण्डले)

२१, ६-११ उपहव्यनाम्न्येकाहे सूक्तमिदं निविद्धानम् ।

४६, १-१५ व्यूळ्हे दशरात्रे पन्चमे हनीदं निविद्धानम् । अस्याद्या महानाम्नी व्रते जप्या । अस्यपन्चमी नियुत्वद्वायु देवताके पशौ हविषोयाज्या । अस्य सप्तमी अन्वारम्भणीयायां सारस्वतस्य हविषो याज्या । तथा च एकादशिने सारस्वते पशौ पुरोडाषस्य याज्या । आग्निमारुते शस्त्रेप्येषा । अष्टमी एकादशिने पौष्णेपशौ हविषो याज्या । नवमी - त्वाष्ट्रेपशौ हविषोयाज्या

५०, १-१५ सू०वि० लै० । तथा अग्निमारुते चतुर्दशी गृहीता ।

५१, १-१६ वि०लै० । दशरात्रस्य चतुर्थे हनि प्रउग शस्त्रे १३-१६ वैश्वदेवस्तृच: । तथा च प्रवासादागमने षोडशी जप्या ।

५२, १-१७ वि०लै० । आग्रयणे वैश्वदेवस्य चरो: सप्तमी अनुवाक्या । वैश्वदेवशस्त्रस्य त्रयोदशीयाज्या । वैश्वदेव पशावप्येषायाज्या ।

(सप्तमे मण्डले)

३४, १-२५ व्यूळ्हे दशरात्रे चतुर्थे हनि वैश्वदेव शस्त्रे इदं सूक्तं वैश्वदेवनिविद्धानम् । महाव्रतेप्येषा द्विपदा । षोडशिनि अघूर्ष्वेस्मा इति द्विपदा ।

३५, १-१५ महानाम्नी व्रते एतत् सूक्तं जप्यम् ।

३६, १-९ वि०लै० । यज्ञपुच्छे नवम्या चमसिन: स्वंस्वंचमसमभिमृशेयु: ।

३८, ७-८ वैश्वदेवे पर्वणि वाजिनस्य हविष: एते द्वे याज्यानुवाक्ये ।

३९, १-७ वि०लै० । द्वितीये छन्दोमे प्रउगशस्त्रे अयंतृच: ।

४२, १-६ वि०लै० । तृतीये छन्दोमे प्रउगशस्त्रे अयं तृच: ।

४३, १-५ वि०लै० । प्रथमे छन्दोमे प्रउगशस्त्रे अयं तृच: ।

४८, १-४ वि०लै० । दशमे हनि वैश्वदेव शस्त्रे आर्भव निविद्धानम् ।

५०, ३ वानस्पत्य- जलीय च विशनाशे वि०लै० । १०४, ११ रक्षोनिबर्हणे वि०लै० ।

(अष्टमे मण्डले)

२७, १-२२ वि०लै० । पन्चमे हनि प्रउगशस्त्रे १३-१६ वैश्वदेव स्तृच: ।

२८, १-५ तृतीये छन्दोमे वैश्वदेव शस्त्रे इदं सूक्तं वैश्वदेव निविद्धानम् ।

२६, १-१० तृतीये छन्दोमे वैश्वदेव शस्त्रे इदं-स वैश्वदेवसूक्तात्पूर्वं द्वैपदं शंसनीयम् ।

५४, १-८ , ५८, १-३ वि०लै० । वालखिल्य शस्त्रे शंसनीयम् ।

६६, ११ वि०लै० । सोमपानेन तृप्तानां विश्वेदेवानां स्तुति: ।

८०, १०, वि०लै० । धनप्राप्त्यर्थं प्रार्थना ।

८३, १-६ दशरात्रे ष्टमे हनि वैश्वदेव शस्त्रे इदं सूक्तं वैश्वदेव निविद्धानम् ।

(नवमे मण्डले)

५, ११ आप्रीसूक्ते अन्त्या वैश्वदेवी । स्वाहा कृती: ।

१४, ३ सोमरसे विश्वेदेवा माद्यन्ति । वि०लै० ।

१८, ३ विश्वेदेवा: सोमपानं प्राप्नुवन्ति । ६७, २७ यजमानं पुनन्ति ।

८१, ५ विश्वेदेवा: पवमानं सोमं सेवन्ते । वि०लै० ।

१०२, ५ तथा १०६, २, १५ वि०लै० । सोमपानेन स्पृहणीया भवन्ति । विश्वेदेवा: सोमं पिबन्ति ।

(दशमे मण्डले)

३१, १-११ लै० वि० । एकादशिनस्य वैश्वदेवस्य पशो: पुरोडाषस्य आन: इत्यनुवाक्या ।

३३, १ शोकनाशकं सूक्तम् । वि०लै० । तत्राद्यावैश्वदेवी ।

३५, १-१४ वि०लै० । एकादशिनस्य वैश्वदेवस्य पशोर्वपायागस्यानु वाक्या -त्रयोदशी ।

३६, १-१४ आभिप्लविकेष्ष्ठे हनि वैश्वदेवशस्त्रे इदं नवि वैश्वदेव निविद्धानम् ।

५२, १-६ वि०लै० स्रुगादापनात्पूर्वं भाविनि जपे विनियुक्ता ।

५३, १-११ वि०लै० । दर्शपूर्णमासयो: पुरा द्वितीयाजप्या । तृतीया सुरभिमतेष्ट्येयाज्या ।

५६, १-७ दर्शपूर्णमासयो: सामिधेन्यर्थं - होत्र जप्या चतुर्थी । स्रुगादापनात्पूर्वमपि जप्या ।

गार्हपत्यादारभ्याहवनीयाद्वेदिं वेदतृणै रास्तृणाति । अग्निहोत्र होमे व्यमयो दकधारा प्रावणीया । अन्यन्तराले श्वातिक्रमणे तथा गार्हपत्याहवनीय योर्मध्यमुदकेन भस्मनावानया पूरयेत् । आग्निमारुतेप्यैषा धाय्या। आहवनीय मवदीप्यमान मर्वाक् शम्या परासा दिदंत एकमिति प्रथमा संवपेत्।

५७, १-६ अग्निसमीपाद्देशान्तर गमनसमये इदंसूक्तं जप्यम् । महापितृयज्ञे पि ऋत्विग्भिर्जप्यम् । निविद: स्थानाति पद्याविदं सूक्तंशस्त्वा सूक्तान्तरे निवित्प्रदोप्तव्या । पिण्डपितृयज्ञे ३-६ तृचेन पितर उपस्थेया: ।

६१, १-२७ पृष्ठस्य षाष्ठे हनि वैश्वदेव शस्त्रे आभिप्लविकाति देश प्राप्तस्य उणासानक्ता स्थाने इदं सूक्तम् । नाभानेदिष्ठा स्थानपरम् ।

६२, १-११ षाष्ठ हनि वैश्वदेवशस्त्रे एतत्सूक्तम् ।

६३, १-१७ षाष्ठ्याभिप्लव षाडहयो स्तृतीये हनि वैश्वदेव शस्त्रे एतत्सूक्तं वैश्वदेव निविद्धानम् । अग्निष्टोमे वैश्वदेवशस्त्रे तृतीया धाय्या । अदिति देवता कस्य पशो: दशमी वपायागस्य दशमी याज्या । प्रायणीयेष्टावादित्यस्य हविष एणैवानुवाक्या सैवोदानीयायायाज्या । प्रायणीयेष्टौ पथ्यास्वस्ते र्यागस्य पन्चदशी अनुवाक्या - उदयनी यायां विपर्यास: ।

६५, १-१५ वि०लै० । अन्नसमृध्यर्थं प्रार्थना ।

६६, १-१५ पृष्ठ्या भिप्लव षाडहयो: पन्चमे हनीदं वैश्वदेव निविद्धानम् ।

८५, ३७ वि०लै० । वरस्य दधिप्राशने हृदयस्पर्शने विनियुक्ता ।

९२, १-१५ चातुर्विंशिके आरम्भणीये हनि वैश्वदेवशस्त्रे इदंवैश्वदेव निविद्धानम् ।

९३, १-१५ संरक्षण प्रार्थना । ९८, १-१२ वर्णकामसूक्तम् । १००, १-१२ शत्रुनाशकं।

१०१, १-१२ वि०लै० । ऋत्विग् स्तुति: । कूपरूपक व्याजेन सङ्ग्रामवर्णनम् । षाष्ठे हनि ब्राह्मणाच्छंसि शस्त्रे द्वादशी उक्ता ।

१०६, १-७ वि०लै० । स्त्री किल्बिषापहारणे विनियुक्ता ।

११३, १, ८ दशरात्रस्याष्टमे हनिमरुत्वतीये सूक्तम् । तस्येयमाद्या। अष्टमी च वैश्वदेवी।

११४, १-१० वि०लै० । देवानां परमात्म साक्षात्कार: । १२६, संरक्षकं सूक्तम् ।

१२८, १-६ ~~संस्त्वे~~ संसवे निमित्त भूते वैश्वदेव सूक्तस्य पुरस्ता देतत् शस्यम् । समावर्तने सिष्णासुना प्रत्यर्चं समिधो भ्या दध्यात् । १३७ भेषजं सूक्तम् ।

१४१, १-६ वि०लि० । धनप्रापकं सूक्तम् ।

१५४, १-५ म्रियमाणानां यजमानादीनां वर्तनम् । प्रेतोपस्थानञ्च क्रियते ।

१५५,५ वि०लि० जलदमग्निने सिन्धुसूक्ते पञ्चमी वैश्वदेवी । ते अपहृतां गोरूपां लक्ष्मी-
मानयन्ति ।

१५७, १-५ दशरात्रस्य द्वितीये छन्दोमे वैश्वदेवशस्त्रे वैश्वदेवान्निविद्धानात् पूर्वमिदं
शंसनीयम् । तथा च षष्ठे हनि तृतीय सवने ब्राह्मणाच्छंसिन उक्थशस्त्र
आद्यस्तृच: स्तोत्रिय: । ततोऽन्ये अनुरूपार्थे ।

१६५, १-५ कपोतश्चेदागमुपहन्यादनुपतेद्वा नेन प्रत्यर्चं जुहुयात् ।

१८१, १-३ प्रवर्ग्ये भिष्टव एतत्सूक्तम् ।

--००--

शुक्लयजुर्वेदीय माध्यन्दिनसंहिताया वैश्वदेवमन्त्राणां विनियोगा:

तत्र प्रथमाध्याये :-

८- अनसो वयवं धुर मभिमृशति । १२- पवित्रे छिनत्ति । १३- पात्राणि प्रोक्षति ।
१५- हविरावपति । १७- हङ्गारमाहरति । २०- दृषदि तण्डुला नावपति ।
२४- स्फ्य मादत्ते । ३०- पत्न्याज्यमवेक्षते । ३१- आज्यं गृण्हाति ।

(द्वितीये अध्याये)

२- वेदिं स्तृणाति । ५- बर्हिषस्तृणयो: प्रस्तरं स्तृणाति । ७- निन्हवार्थं -
मञ्जलिं करोति । ८- देवेभ्योर्थाय आज्यंगृण्हाति । ९- देवेभ्य: स्विष्टकृयागं जुहोति ।
१७- विश्वेषां देवानां प्रार्थना । १८- जुहूप भृद्भ्यां संस्रवान् जुहोति ।
२१- पत्नीवेदं प्रमुञ्चति । २२- बर्हिर्जुहोति ।

(तृतीये अध्याये)

४६- यजमानो जपति । ४७- पत्नींवाचयति साब्रूते । ४८- वरुण प्रधासान्ते दम्पती -
अवभृथ स्नानं कुरुत: मज्जयत: । ६२- याजी मुण्डयमानो जपति ।

(चतुर्थे अध्याये)

१- अग्निष्टोम यज्ञ शालस्तम्भमन्वारम्भ्य जपति । ५- अध्वर्युर्यजमानं वाचयति ।
११- याजी वाचंबिसृज्य व्रतंयाजयति। १८- जुह्वां बध्वास्थापितंहिरण्मुद्धरेत् ।

४- स्थाल्याः स्रुवेण जुहोति । ५- तानूनप्त्रमाज्यं गृह्णाति । १०- उत्तरवेदिं व्यूहति।
११- उत्तरवेदिं प्रोक्षति । १२- नाभिव्याघारयति । १७- पत्नी अदाभ्यावनक्ति ।
३०- आग्नीध्रं स्पृशति । ३५- पृषदाज्यं गृह्णाति । ३६- सोमं निदधाति ।

(षाष्ठे अध्याये)

७- तृणमादत्ते । १०- पशोरास्ये उपगृह्याधस्तात्प्रोक्षति । ११- असिस्वरुभ्यां पशोर्ललाटं घृतेनोपस्पृशति । १३- अप: स्तूयते । २४- शालाद्वार्यमपरेण निदधाति ।
२५- सोममुपावहरति । २७- अप्सु जुहोति ।

(सप्तमे अध्याये)

१- उपांशु ग्रहं गृह्णाति । ३- उपांशु ग्रहं हुत्वा पात्रं मार्जयेत् । ५- अन्तर्यामिग्रहं गृह्णाति।
६- अन्तर्यामं जुहोति । १०- सोमरसं पयसा श्रीणाति । १२- शुक्रग्रहं गृह्णाति ।
१७- मन्थिग्रहगतं सोमं सक्तुभि: श्रीणाति । १६- धाराद्वयेदारतिसत्याग्रयणं ग्रहं गृह्णीयात् । २१- आग्रयण ग्रह मासादयति । (हिङ्कारत्रय पूर्वकं यजुर्जपेत्)
२२- उक्थ्यं ग्रहं गृह्णाति । २३- मैत्रावरुणायोक्थ्य विग्रहे मन्त्र विकल्प: । २४- ध्रुवसंज्ञं ग्रहं गृह्णाति । २६- भूमौस्कन्नानांसोमविन्दूनां ग्रहणासम्भवे प्रायश्चित्तरूपो विप्रुड्ढोम: । ३३- द्रोण कलशाच्छुक्रपात्रेण वैश्वदेवग्रहं गृह्णाति । ३४- अयं पूर्वं क्रियाया-मन्त्र विकल्प: । ४३- आग्नीध्रीये सकृद्गृहीत माज्यं जुहोति । ४५- सहिरण्यो याजी पूर्वेण तिष्ठन् शाला मभि मन्त्रयते । ४६- आग्नीध्रे सुवर्णं दक्षिणां ददाति ।

(अष्टमे अध्याये)

४- दध्ना श्रीणाति । आदित्यग्रहं दध्नाभिश्री कुर्यात् । ८- वैश्वदेव ग्रह ग्रहणम् ।
६- पात्नीवत ग्रहं गृह्णाति , प्रतिप्रस्थाता । १५- नव समिष्ट यजूंषि जुहोति ।
१८- धनदानार्थं शंसति । १६- देवविसर्जनं शंसति । २१- देवानां यज्ञान्तास्तुति: ।
२७- अवभृथ स्नानार्थं मज्जयति । ४३- रोहिणी गोर्दक्षिणेकर्णे यजमानो जपति ।
४७- अंशुर्गृहीतोदुम्बरे पात्रे होतृचमसस्था निग्राभ्या संज्ञा अप आनीय तस्मिंस्तत्र: सोमलता: प्रक्षिप्य क्रमेण अदाभ्यं ग्रहंगृह्णाति । ५०- अंशूनुलूखल स्थान्सोमे क्षिपेत् ।
५२- सर्वे दीक्षिता: सत्रर्द्धि संज्ञकं साम गायन्ति । ५७- अंशुषु न्युप्त: सोमो विश्वेभ्यो-देवेभ्योहूयते । ५८- चमसेषून्नीत: सोमो विश्वेभ्योदेवेभ्य: समर्प्यते ।

६०- स्कन्नस्य सोमस्या भिमर्शनम् । ६१- महावीरपात्र भेदे प्रायाश्चितरूपोघृतहोम: ।

(नवमे अध्याये)

८- वाजपेये अश्वयोजनमन्त्र: । १६- अनेन ऋक्त्रयेणाज्यहोमो श्वाभिमन्त्रणम् ।
२१- यज्ञपरिसमाप्तावमरत्व प्रार्थना । ३३- उज्जितीर्वाचयति । ३५- राजसूये शम्याया: पश्चाद्वविष्यमन्नं पूर्वेकृत्वा दक्षिणाग्न्युल्मुकमादाय दक्षिणांगत्वा स्वयमप्रदीर्णे (इरिणेवाग्नौ) जुहोति । ३६- पन्चधा विभक्तमाहवनीयमेकीकृत्य येदेवा० इति पन्चमन्त्रै: प्रत्येकं जुहुयात् । ४०- यजमानस्य सपत्न राहित्ये प्रार्थयति ।

(दशमे अध्याये)

१- राजसूये इडान्ते अपोगृण्हाति । ६- इष्यु समर्पणानन्तरं राजानमाविदोवाचयति ।
१८- राजा भिषेकमन्त्र: ।

(एकादशे अध्याये)

३५- अग्निं स्थापयति देवयजनार्थम् । ३६- वायुनासंदधाति, मृत्खननस्थानम् । ५४- सूक्ष्म-सिकता लोहकिट्टपाषाण चूर्णै: पिण्डं मिश्रयति । ५८- उखां प्रथयति । यजमान आचां-मृदमुखातलाय प्रादेशमात्र विपुलां करोति । ६०- सप्तभिरश्व शकृद्भि रुखां धूपयति ।
६१- अभ्राश्वभ्रं चतुरस्रं खनति । ६५- अजादुग्धमुखायामवनयति । ६७- सर्वेजना देवान् प्रार्थयन्ते । ६६- उखास्थापन कार्ये कारणोपचारो यं वर्णनार्थ: ।

(द्वादशे अध्याये)

२- द्वाभ्यां हस्ताभ्यामुखां परिगृण्हाति । ३१- आसन्दीसहितमुख्याग्निमूर्ध्वं कृत्वा शकटे स्थापयति । ४६- देवानां प्राणरूपाधिष्ण्या:, तद्रूपस्याग्ने स्तुति: । ५५- सूद-दोहसाधि वदनम् । ६१- उखां शिक्याद्विमुन्चति । ६७- चितेर्दक्षिण श्रोणे: पश्चिमे-वृषेर्युज्यमानं सीरं हलमभिमन्त्रयते । ७०- लाङ्गलपद्धति: मधुरेण घृतेनोदकेन सिक्तां करोति । ७३- अनडुहो विमुन्चति । १०४- लोगेष्टका: स्फ्येनाहृत्य बहिर्वेदे: पश्चाच्चि-ष्ठन्नुपदधाति ।

(त्रयोदशे अध्याये)

१- यजमानो जपति । २३- पद्येष्टकामुपदधाति । २५- ऋतव्येष्टके च।रम्भ ३४- उखामुप।
५१- पन्चपशूनां शिरोपस्थाने नेनाजस्य शुचोत्सर्ग: ।

(चतुर्दशे अध्याये)

३,४ - द्वितीयायां चितौ सादनार्थमिष्टकामुपदधाति । ६- ऋतव्ये उपदधाति । - पन्च-वैश्वदेवी इष्टिका: पूर्वां दिशूपदधाति । १५- पूर्वेतव्योपरि द्वे ऋतव्ये उ० । १६-अपरे ऋतव्ये पूर्वयोरुपरि० । २०- छन्दोरूपा इष्टका उप० । २६- षट्पदा इष्टका उप० । २७- अनुक्रमभितो द्वेपथे उपदधाति ।

(पन्चदशे अध्याये)

३- पन्चम चितौ दक्षिणत उप० । १४- मध्ये ० । ५०- विश्वेदेवा अग्निमनुगच्छन्ति। ५४- विश्वेदेवै: सालाक्यं यजमानस्य प्रार्थ्यते । ५७- पन्चम चिति शेषभूते ऋतव्येष्टके उ०

(सप्तदशे अध्याये)

१३,१४- दध्निमधुघृते नाग्निं प्रोक्षति । २७- विश्वेदेवानां महत्ववर्णनम् । २९,३०- ब्रह्मविषयक प्रश्नोत्तररूपौ मन्त्रौ विश्वेषां देवानां गर्भसम्बन्धिनौ । ४९- यजमानाय कवचं धारयति । ५२,५३- विश्वेदेवानां प्रार्थना यजमान वर्धनार्थम् । ५६- देवा यज्ञाग्निं परिगृह्य प्राप्नुवन्ति । ६२- यज्ञो देवानाव्हयति । ६४- त्रयी लक्षणं यज्ञं देवा वर्धयन्ति ६५,६६ चित्य मारोहन्ति । ७०- स्वयमातृण्णमध्यग्निं धारयच्छुकवत्सा पयसाभि-जुहोति । ७३- विश्वेदेवा:, यजमानश्च योव्यस्थाने सीदन्ति । ७८- विश्वेषांदेवाना-मागमनार्थमग्नितत्व परिज्ञानार्थं चितिं जुहोति । ८९- अन्नाध्यासेन घृतं, प्राणाध्यासेन च देवानां जिव्हारूपो ग्नि: स्तूयते । ९२- विश्वेदेवा गविस्थितं गुह्यममृतं जानन्ति । ९८- अस्माकं यज्ञं देवलोके प्रापणार्थं विश्वेदेवा: प्रार्थ्यन्ते ।

(अष्टादशे अध्याये)

२९- क्लृप्तान्जुहोति । आयुरादीनि मम यज्ञक्लृप्तानि भवन्ति । ३१-३४ वाजप्रसवीयो-मन्त्र: । सर्वौषधमौदुम्बरे संभृत्य तस्मादेव सर्वौषधात्स्रुवेण जुहोति। तत्र सप्त वाजप्रसवीयेषु ३१ तो ३४ मन्त्रा वैश्वदेविका: । ४७- रुक्मवतीर्जुहोति। पूर्वसंस्कृता-दाज्यात्सकृत्सकृदादायनवाहुतीर्जुहोति । तत्रेयं द्वितीया । ५७- समिष्टयजुर्होम: । ६०-६५ हृदय शूलान्ते होष्यमाणस्वष्टासु स्रुवाहुतिषु तृतीयाचष्टमी । ७५-७६ न्यूना-तिरिक्त दोष नाशका यज्ञ संरक्षण प्रार्थना ।

(एकोनविंशे अध्याये)

५- सौत्रामण्या मजाविलोम पवित्रेण पयः पुनाति । ७- सुराग्रहान् गृण्हाति । १२- सौत्रामण्यां सोम सम्पद्दर्शनार्था । २६- सवनत्रयमाप्यते । ३२- पयोग्रहान्जुहोति। ३६,४४,४५ - कुम्भीमासज्य कुम्भवत् शत वितृण्णं वालपवित्र हिरण्यानन्तर्धाय नवर्चं यजमानं वाचयति ।तासुऋक्षु तृतीयाऽष्टमी,नवमी,वैश्वदेवी । ४७- ऋत्विग्यजमानेषु- कृतान्वारम्भेषु अध्वर्युः पयोजुहोति । ५२- यजमानं वाचयति । ६५- देवपितृभ्यो हव्य कव्य वहनं प्रार्थयति ।

(विंशे अध्याये)

१०- यजमानोराजा अभिषेकार्थमासन्दीतः कृष्णाजिने वरोहति । ११- शस्त्र समाप्तौ वषट्कृते नेनमन्त्रेण त्रयस्त्रिंशं वसाग्रहं जुहोति । १४ अवभृथेष्टि मुत्तरं मासरकुम्भं प्लावयति, जलेतारयति च । १८- सुराकुम्भं जलेमज्जयति । २५- स्वर्लोक गमनं प्रार्थयति। ३८,४१,४४,४६- सौत्राणिक हौत्रकर्मणि एताश्चतस्र आप्रियः ।

(एकविंशे अध्याये)

६- ऐष्टिके हौत्रे आदित्यं श्चरोः पुरोनुवाक्या । ३७- वायोधसे पशौ इयं षष्ठी आप्रीया । ४०- पशुयागे मैत्रावरुणव्यापारे एकादशाप्रियाणां प्रयाज प्रैषेषु इय- मेकादशी । ४६- वनस्पति प्रैषः । ४७- स्विष्टकृत् प्रैषः । ५३- अनुयाज प्रैषः । ५८- अन्तिमो नुयाजप्रैषः । ६१- सक्तवाक प्रैषः ।

(द्वाविंशे अध्याये)

४- अश्वमेधे श्वं बध्नाति यूपे । ५- अश्वं प्रोक्षाति । १४- सावित्रीणामिष्टीनां षट्सु याज्यानुवाक्यासु षष्ठीयम् । १५,१७- तिसृषु स्विष्टकृत्पुरो नुवाक्यास्वाद्यन्त्य एते । १९- अध्वर्युर्यजमानो दक्षिणे श्वकर्णे जपतः । २८- आज्य-सक्तु- धाना- लाजा- नां प्रतिप्रहर मेकैकक्रमेण सर्वरात्र मुत्तरवेदिस्थाग्नौ जुहोति । प्राणायस्वाहेत्यादिक मेकशताय स्वाहेत्यन्तं मन्त्रगणमावर्त्यावर्त्यं, तत्रेयं नक्षत्रनाम्नी कल्म कालाधिष्ठात्री ।

(त्रयोविंशे अध्याये)

२- प्रातर्द्वितीये हनि उक्थ्य संस्थमहर्भवति । तत्र महिम संज्ञं प्रथम ग्रहं गृण्हाति । ४- वपायागान्ते द्वितीयेन महिम्ना पूर्ववदिति सर्वहुतं महिमानं जुहोति । ८- अवगाहन स्थला दागतमश्वं महिषी वावाता परिवृक्ता ज्येना भ्यन्जन्ति । रात्रिहुतशेषमश्वाय

मदयाय ददाति । १६- अश्वमुपदिशति । ३६- राजपत्न्य: अश्वस्य रोमाणि विचिन्वंति।

(चतुर्विंशे अध्याये)

५- आश्वमेधिकानां पशूनां देवतासम्बन्धेन विनियुक्ता । १४- चातुर्मास्य यागदेवा: पशव:, तत्रादौ वैश्वदेवपर्वे पशवो प्रोक्ता: । २४- अपान्तरेषु त्रयोदश, त्रयोदशारण्य पशुषु एतेष्वालभन्ते । २७- पृषतान् विश्वेभ्यो देवेभ्य आलभन्ते । ४०- अङ्गो मृगविशेषो वैश्वदेव: पशु:, सोत्सर्ग्य: ।

(पन्चविंशे अध्याये)

५- देवताश्वाङ्गेभ्यो जुहोति । तत्र पन्चमे यजुषि वामपार्श्वस्था देवा: प्रोक्ता: । ६- अङ्गान्तराणां देवता उक्ता: । तासु विश्वेदेवानां प्रथमाकीक्सा । १३- प्राजापत्यपशूनां चतसृषु याज्यानुवाक्यास्वियं चतुर्थी । १४-२३ अश्वमेधे वैश्वदेव पशुवपा पुरोडाशपशूनां दशसु याज्यानुवाक्या विनियुक्ता: । २६,२७,३०,३१,३२,३४,३७,३८,३६- मानइत्यादिषोडश कण्डिकात्मकेना नुवाकेना श्वस्तोमीयं जुहोति । तत्रैतानव वैश्वदेव्य: । ४६- अयस्मय पात्रेणाश्वलोहित होमानन्तरं षड्द्विपदा: जुहोति । तत्राद्यास्त्रयो वैश्वदेव्य: ।

(षड्विंशे अध्याये)

२- खिलिहोमन्त्र: । तेषां क्वचिद्विनियोगानुक्ते रिति महीधर: । १६- प्रतियज्ञकाले विश्वेदेवानामागमनाय प्रार्थयति । २०,२४ नेष्टुर्याज्ये- अनयोर्देवपत्न्य: प्रार्थ्यन्ते ।

(सप्तविंशे अध्याये)

८,६ पन्चचितिकस्याग्ने: सम्बन्धीषु नवसामिधेनी ष्विमौवैश्वदेव्यौ यजमानोत्साहवर्धनार्थं मृत्युभयापनोदनार्थं । सहाग्निनाप्रयुक्तौ: । १२- द्वादश आप्रीसंज्ञकासु प्रयाजदेवता स्वियं द्वितीया घृतवर्धका । २१,२२- पूर्वोक्तास्वाप्रीष्विय मेकादशी हविदानवती, द्वादशीच विश्वेषां देवानां हविग्राहिका । २५,२६ - अथैनं वायवे नियुत्वते शुक्लं तूपर मालभत इत्यस्य पशो:" पीवो अन्नां ० इत्यत: षड् याज्यानुवाक्यासु तृतीया चतुर्थी च विश्वेदेवसहिता वायव्ये ।

(अष्टाविंशे अध्याये)

३,११ - सौत्रामण्या मैन्द्रस्य पशो रेकादश प्रयाजेषु वैश्वदेव विभूतिषु तृतीयेयमिडाख्या, एकादशीयाज्यपाख्या ।

एकादशीचाज्यपाख्या । १२, २०- अन्नैवकादशानुयाज प्रणे ष्विय बर्हिराख्याप्रथमा, यूपाख्या नवमीच विश्वेदेव सहिता ।

(एकोनत्रिंशे अध्याये)

१-४ आश्वमेधिके प्रकरणे (अध्याये) आधारकादश आप्रीसंज्ञा एव स्तुतय:। तन्त्रिताश्चतस्रो विश्वेदेव सम्बन्धिन्यस्ता: सहाप्रीदेवानाव्हयन्ति । १०,११- एते पि तथैव वनस्पतिरग्निभ्यां सह स्तुते । १०,२०,२४- अश्वस्तुतिरूपासु यदक्रन्द० इत्यादि त्रयोदशसु तिसृभिरेताभि र्विश्वेदेवै: सहाश्वस्तुत: । २५,२७-३०, ३५,३६- अपराप्री संज्ञकासु सप्तैता विश्वेदेव सहिता: । ५५- दुन्दुभि वादनाय प्रयुक्ता । ५८,५९- अश्वमेधे एकादशिन्यो: कृष्णग्रीव रोहितादि पशुसंघातद्वयेषु " शिल्पो विचित्र वर्णो वैश्वदेव:, पिशङ्गो तूपरो नि:शृङ्गो वैश्वदेवौ" इति मन्त्र द्वयाभ्यां, वाक्यद्वयाभ्यां च वैश्वदेवा: पशव आम्नाता: । ६०- अग्नीषोमीयस्य पशुपुरोडाशयागे उक्तासु हविष्षु विश्वेभ्यो देवेभ्यो द्वादश कपाल: पुरोडाश उक्त: ।

(त्रिंशे अध्याये)

१२- पुरुषमेध यागे ब्राह्मणादीनष्टचत्वारिंशत्पुरुषानग्निष्ठेयूपेवियुनक्ति । इतरेषु-यूपेषु प्रतियूपमेकादश पशवो यज्यन्ते । ब्रह्मणे ब्राह्मणमित्यादयो यावतीर्देवतास्तावन्त्य: पशव: । अत: कृत्स्नोय मध्यायो बहुदेवतासम्बन्धा द्वैश्वदेविकएव । ततो पि द्वादश्यां " देव लोकाय पेशितारम्" इति विधानेन प्रतिमाद्यवयव कर्तारं पुरुषं पशुरूपेण विश्वेदेव लोक प्रीतये यूपे नियुज्यते ।

(एकत्रिंशे अध्याये)

६,१४,१५,१६- पुरुषमेधे नियुक्तान्पशू नुत्सर्जनात्पूर्वं होतृव देवश्रुत्वा सामिधेनी प्रक्रियया त्रि: प्रथमां त्रिरुत्तमा इतिशस्त्र विधानवत् ब्रह्मा भिष्टौति । विश्वेदेवात्मकस्य विराट् पुरुष ब्रह्मण: संस्तवा दध्यायो वैश्वदेविक: । ततो पि चतसृषुऋक्षु देवा पदोपस्थित्या विश्वेदेवा: स्तूयन्ते । पूर्वोक्ता: परमात्मनो वयवा:। तेषामवयवी-पुरुषो स्मिन्नध्याये स्तूयते । २०,२१- उत्तर नारायणे नादित्य मुपतिष्ठते । तस्य विश्वेदेवगणपठितत्वादस्य चतुर्थी पञ्चमी च प्रत्यक्षावैश्वदेविका। अत्र विश्वेदेवानां महात्म्यं शक्तिरूप मुपवर्णितम् ।

(द्वात्रिंशे अध्याये)

१०, १६- सर्वमेधमन्त्रसमूहे सप्तमे हनि अप्तोर्यामि संज्ञिके सर्वे होमे विनियुक्तसुक्तषु दशमि-णोऽशी विश्वेदेवानां ब्रह्मज्ञान धारिणी श्री प्रदायिनी च ।(महीधर भाष्ये)

(त्रयस्त्रिंशे अध्याये)

३- इयं सर्वमेधे ग्निष्टुत्संज्ञे ग्निष्टोमे प्रथमे हनि ग्रहग्रहणे पुरोरुक् । पुरोरुक्शब्देन ऋग्रूपा ग्रहण मन्त्रा उच्यन्ते:, न यजूरूपा: । " ऋग्घि पुरोरुक् " इति श्रुते: ।
१५, १६, १७, २६ - चतस्रो पि पुरोरुचो वैश्वदेविक: । ४२- दध्नादित्य ग्रहग्रहणे विनियुक्ता । ४३-५४ चतुर्थमह: वैश्वदेवस्तुत् । तथाच श्रुति: -" वैश्वदेवचत्तुर्थमहर्भवति वैश्वदेव ग्रहा भवन्ति वैश्वदेव्य: पुरोरुच: " । १३-७-२-६ इति । वैश्वदेवस्तु चतुर्थे न्ति ११ पुरोरुच: ६ प्रतीकोक्ता: । ६०- यथा देवा वैश्वानरमवृधन् । तथैव याजिनं वर्धयन्ति । ब्रह्मयज्ञाहाऋक् । ६२- दशापवित्राद्द्रोणकलशं गच्छति पवमान: सोमस्तस्मै यष्टव्यान्देवानभिसम्मुख मियदाते । ८६, ६१, ६२- वैश्वदेव ग्रह ग्रहण मन्त्रास्त्रय: । ६४- वरिवो विदर्थं यागान्ते प्रार्थयन्ते ।

(चतुस्त्रिंशे अ

(चतुस्त्रिंशे अध्याये)

६- यज्ञान्ते अनुमत्यर्थं देवा: स्तूयन्ते । १०- देवानां स्वस्वा पि प्रार्थते । १२- देवाना-माथमित्ररूपो ग्निश्च प्राथ्र्यते । ३७, ३८- पुनर्यागिसम्पत्त्ये देवा धनार्थं स्तूयन्ते । ४७- देवै: सह भैषज्यर्थं नासत्यौ प्रार्थ्यते । ५१- आयुरति क्रम्यजीवनार्थं देवानामोज: प्राथ्र्यते । ५३- वचन श्रवणार्थं यज्ञान्ते प्राथ्र्यते । ५७- निवास निर्माणार्थं देवा: प्राथ्र्यन्ते । ५८- सर्वतो भद्रार्थं देवा गायन्ते ।

(पन्चत्रिंशे अध्याये)

७- देवताया पोदके राजप्रेतं स्थापयित्वा प्रत्यागते जपेत् । १३- अनडुत्पुच्छमन्वारभ्या पुरोहिता मात्यादय: आगच्छन्ति । १८- अध्वर्युयजमानामात्यादीनां परितं (रक्षण-संज्ञमंत्रं) जपति । १६- अद्वारेणैपासनं निरस्यति ।

(षटत्रिंशे अध्याये)

१७- सर्वं देवता रूपा शान्ति प्रार्थना ।

(सप्तत्रिंशे अध्याये)

७- कृष्णाजिनमादायोत्तरतः परिवृतं गच्छन्ति । मृत्पिण्डमादाय महावीरं करोति ।
१४- महावीरमुपतिष्ठते । १६- घर्मः स्तूयते । १८,१९- घर्मं सम्प्रार्थयति ।

(अष्टत्रिंशे अध्याये)

८- विश्वदेव्यावते घर्माय जुहोति । द्वादशनामस्वियमेकादशी । १०- घर्मस्य यजत्युक्ते दशम्या इति वषट्कृते जुहोति । १५- घर्मं नितरामङ्क्त्वा विकङ्कत शकले घर्माज्यं जुहोति । तत्रषष्ठेन शकलेन विश्वान्देवान्ह्वयते ।

(एकोनचत्वारिंशे अध्याये)

५- संध्रियमाणावस्थायां महावीरभेदे नेन यजुषा ज्येनाहवनीये प्रायश्चित्ताहुतिर्होतव्या। तत्र संसन्नवस्था विश्वेदेवानाम् । (आसादनादारभ्य मुन्जप्रलवेष्वप्रक्षियणात् प्राक् संसन्नः। तत्र भेदे विश्वेदेव दैवतः । एषा सकृद् गृहीताज्येन जुहोति । ६- अहर्भेदेन घर्मं भेद प्रायश्चित्ते द्वादशेन्हि घर्मभेदे विश्वेदेवा देवताः । उपसत्प्रवृद्धावेताएवाहुतयो द्वादश पुनरादित आरभ्या वर्त्यन्ते । १३- आश्वमेधिक -४२- प्रायश्चित्ताहुतीष्वेकचत्वारिंशी वैश्वदेवी ।

(चत्वारिंशे अध्याये)

४- चत्वारिंशाध्याये ईशावास्यमित्यादिमन्त्राणां कर्मसु विनियोगो नास्ति । तेषां शुद्धत्वैकत्वापापविद्धत्वा शरीरत्व सर्वगतत्वाधात्मयाथात्म्य प्रतिपादनात् । तच्चकर्मणा विरुध्यते । चतुर्थ्यामृचि देवानामुल्लेखः, अतः सा प्रपन्च्यते । मनविषये उक्तम् :- यत्ब्रह अनेजत = अचलत्, एकम् = अद्वितीयम् , मनसः = सङ्कल्पादिलक्षणात्, जवीयः= वेगवत्तरम्, देवाः = द्योतनात्मकाः, एनत् = प्रकृतमात्मतत्वम्, नाप्नुवन् = नाप्राप्तवन्तः। चक्षुरादिभ्योमनोजवीयः। अतोमनो॰ व्यापारे व्यवहितत्वादात्मनआभास मात्रमपि देवानां गोचरो न भवति । इति मनोविज्ञानं वैश्वदेविकम् ।

इति शुक्लयजुर्वेदीय माध्यन्दिनसंहिताया -
वैश्वदेवमन्त्राणां विनियोगः।

अथ सामवेदीय वैश्वदेव गानमन्त्राणां श्रौतकर्मसु विनियोगा:

१-७-५ मूर्धानं०, सप्तमे हनि प्रथमाज्य स्तोत्रे पूर्णाहुतौ च विनियोग: ।
१-१०-१ सोमं राजानं०, प्रायश्चित्ते, मणिबन्धे, कर्मारम्भे च विनियोग: ।
७-१-१० एवाह्येव०, महानाम्न्यार्चिकस्य अप्तोर्यामे पृष्ठस्तोत्रे वि० ।
७-७-४ इमानुकं० (उहगान १-२-२०) महासाम्न: षष्ठे द्वितीयोक्थे वि० ।
१४-२-६ अग्नेविश्वेभि:०, प्रथमे व्रात्यस्तोत्रे प्रथमाज्यस्तोत्रे च वि० ।
१६-३-१३ उपन: सूनवो०, प्रथमोपहव्ये बहिष्पवमानस्तोत्रे वि० ।
२०-५-५,६- इन्द्रातारं० क्रतावनं०, (उहगाने द्वि०प्र० द्वि०उ०) महाव्रते स्तोत्रे वि०।
२१-१-६ (२,३) भद्रंकर्णेभि:०, स्वस्तिन इन्द्रो०, साग्निचित्ये अप्रतिरथे वि० ।

इति सामवेदीय वैश्वदेव मन्त्राणां श्रौतकर्मसु विनियोगा: ।

--००--

अथर्ववेदीय वैश्वदिविक मन्त्राणां श्रौतकर्मसु विनियोगा:

(प्रथम काण्डे)

३१-२ अश्वमेधे उत्सृष्टमश्वं " आशानामाशा०" इति सूक्तेन ब्रह्मानुमन्त्रयते । वै० ७-१।

(द्वितीये काण्डे)

१-३,५ अग्निचयने षोडशगृहीतोत्तरार्धाज्येन वैश्वकर्महोमे वि० (वै०सू० ५,२)
१६-४ आग्रयणेष्टौ ब्रह्मा हविरनुमन्त्रयेत् । (वै० २-४)
३४-२ पशुयागे संज्ञपनार्थं यूपात् प्रमुच्यमानं पशुमनुमन्त्रयेत् । (वै० २-६)
३५-५ दर्शपूर्णमासयो: पुरस्ताद्धोमे विनियुक्ता (कौ०सू० २,३५,५)

(तृतीये काण्डे)

३-१,२,५ साकमेधाख्य कर्मणि पूर्वेद्यु: क्रियमाणायामाग्नेय्यामिष्ट्यां प्रधानयागानुमन्त्रणे विनियोग: । (वै०सू० २,५)
१०-६,७,११,१२ अष्टका कर्मणि आज्य-मांस- स्थाली पाकान् प्रत्येकं त्रिर्जुहोति। (कौ० ३,२)

१७-६ अग्निचयने अग्निहोत्र कर्षणाय मुज्यमानंसीरं ब्रह्मानुमन्त्रयते ।(वै०५,१)

१६-१-८ अग्नि चयने उन्नीयमान मुख्याग्निं ब्रह्मानुमन्त्रयते । अष्टम्या महाव्रते आजिधावने अवसृष्टबाणानुमन्त्रणम् (वै० ६-४)

३१- १,७ पितृमेधे दहनानन्तरम् मुदकसमीपे ब्रह्मा जपेत् ।

(चतुर्थे काण्डे)

१- प्रवर्ग्ये कर्मणि विधीयमानं महावीर मनुमन्त्रयेत् । (कौ० ५,६)

२- वशाशमने वि० । संज्ञप्ताया वशाया यदि गर्भो दृश्येत तांमभिमन्त्र्य अञ्जलौ गृहीत्वा जुहुयात् । (का० ५-८) तथा च चातुर्मास्ये वरुणप्रघासकर्मणि एक कपालं हवि रनुमन्त्रयेत् । (वै० २-४) एवं अग्नि चयने प्राजापत्य पशौ स्वदानानुमन्त्रणे तथा च हिरण्मय पुरुषोपधाने विनियोग: । (वै० ५-१)

८- राजाभिषेके, संपातितस्थालीपाक प्राशने वि० (कौ० २-८) तथा राजसूये आसन्द्या रोहणे राजाभिषेके च विनियोग: । (वै० ७-१)

११-२,६ अनडुत्सवे निरुप्तहवि रभिमर्शनम् सम्पातम्, दातृवचनं च कुर्यात् । (कौ०८-७)

१४- अजौदनसवे हविरभिमर्शने, सर्वेषु सवयज्ञेषु वाचने (कौ० ८,६) तथा अग्नि चयने अजशिरोपधीयमानानुमन्त्रणे (वै० ५-२) एवं पन्चम्या सवयज्ञेषु आज्यहोमे (कौ० ८,४) वाजपेये तृतीयया यूपारुहेजपे, (वै० ४,३) वरुण प्रघासे सोमेचाग्नि प्रणयने जपे विनियोग:। (वै० सू०२।४)३,५)

२१-३ सोमयागे माध्यन्दिन सवने आगतागा हिरण्हस्तो याजी प्रत्युत्तिष्ठेत्(वै० ३-११)

२३-२,६ सामिधेन्यनुमन्त्रणे विनियोग: (वै०सू० १-२)

२७-६,७ सप्तम्या साकमेध पर्वणि गृहमेधयागमनुमन्त्रयेत् । (वै० २-५)

३४-१,३ ब्रह्मास्योदनसवे निरुप्तहविरभिमृशति, दान प्रतिदिशं करोति(कौ०८-७)

३५-७ अतिमृत्युसवे निरुप्तहविरभिमर्शने सूक्तं विनियुक्तम् । (का०८,७)

३६-६,१० चातुर्मास्ये वैश्वदेवपर्वणि मन्थ्या भिहोममनुमन्त्रयते । वै० २-४)

(पन्चमे काण्डे)

३- दर्शपूर्णमासयो: समिदाधाने वि० (कौ० १-१)

१०- वशाशमन कर्मणि वपायाश्चत्वारि खण्डानिकृत्वा नेन सूक्तेन प्रथम खण्डं जुहोति। (कौ०५-६)

२०- महाव्रते नेन भूमि दुन्दुभिं ताडयेत् । (वै० ६,४)
२४- चातुर्मास्ये वैश्वदेव पर्वणि सावित्र यागं ब्रह्मानुमन्त्रयेत् । (वै० २-४)
२७- वशाशमन कर्मणि वि० (५-१२) । ३०- पिष्टरात्रीकल्पे जपे विनियोग: ।

(षष्ठे काण्डे)

७- अयाज्य याजनदोष निवृत्तये यागानन्तरं चरुणा होमं यजेत् ।
१९- सव यज्ञेषु तृचेनानेन यजमान पत्नी पुत्रान् प्रोक्षेत् । (का० ८,२) तथा च पवित्र सेवे नेन निरुप्तहविरभिमर्शन सम्पातादीनि कुर्यात् । (कौ० ८,७) तथा च दीक्षाया दर्भपिन्जूलै: पूयमानो याजी एतं तृचं जपेत् । (वै० ३,१) तथा च सौत्रामण्यां तृचेनानेन आसिच्यमान शतातृण्णनुमन्त्रणे वि० (वै० ६,६) ।
४६-३-६ यथाक्रमं प्रातरादिषु सवनत्रयेषु सवनसमाप्ति होमान् जुहुयात् । (वै० ३-११)
५५-४-६ तृचेन देशान्तरं गच्छत: पुरुषस्य स्वस्त्ययन काम:, समिदाज्य पुरोडाशादि १३ द्रव्याणि जुहुयात , मन्थौदनौ दद्यात् । ~~५८-~~
५८-२ यशस्काम इन्द्रं यजते उपतिष्ठतेवा ।
११४- सवान आधास्यमान: सवाग्नौ आज्यं जुहुयात् । सवयज्ञेषु ब्राह्मौदनिकाग्नौ पूर्णाहुतिं जुहुयात् । तथा च अग्निष्टोमे तृतीय सवने आदित्य ग्रहहोमं ब्रह्मानुमन्त्रयेत् (वै० ३,१२) तथा च अ०तृ० सवनान्ते सर्वं प्रायश्चित होमा (वै० ३,१३) तथा आग्रयणेष्टौ वैश्वदेवं चरुं ब्रह्मानुमन्त्रयेत् (वै० २,४) ।
१२५- आद्येन तृचेन नवंरथमभिमन्त्र्य राजसूये जयकामं राजान मारोहयेत् । (कौ० २-६) तथा महाव्रते माध्यन्दिने सवने नेनाभि मन्त्रिते रथे राजान मारोहयेत् (वै० ६-४) ।

(सप्तमे काण्डे)

५-१-५ चयन यागे आतिथ्याग्ने रनुमन्त्रणम् ।
६-१-४ आधाने पवमानेष्टौ हविरनुमन्त्रणे (वै० २,२) आवसथ्याधाने क्रव्यविसर्जना नन्तरं गृहसमीपे नदीरूपाणि कृत्वा उदकेनापूर्य ऋक् द्वयाभ्यां नावमारोहयेत् । (कौ०६,३) सोमयागे दीक्षायामेनां कृष्णाजिनस्थो याजीजपेत् । (वै० ६,३) अग्निचयने अनेन वाजप्रसवीय होमन् ब्रह्मानुमन्त्रयेत (वै०५,२)
१७- सूर्योदय पर्यन्तं सुप्तं ब्रह्मचारिणमुत्थापयेत् । तथा आधाने सम्भार स्पर्शन दिवसे सुप्तान्यजमानादीनुत्थापयेत् । (वै० २,१)

२०- पूर्णमासयागे अन्वयन: हलिषड्ऋचेन देवता: परिगृण्हाति । (वै० १-१)
पितृमेध कर्मणि इष्टकाभिश्चितंश्मशानं सर्वेबान्धवा: परिशिन्चेयु: । (७-२२)

२८- दर्शपूर्णमासयो: वेदं विमुन्चति । (वै० १-४) प्रायणीयेष्टौ स्वस्तियागमनु-
मन्त्रयते (वै० ३३३)

३५- अग्निचयने पन्चम्यां चितौ असपत्नेष्टकामुपधीयमानाम् आभ्यां द्वाभ्यामृग्भ्यां
ब्रह्मानुमन्त्रयते । (वै० ५-२)

४६- दर्शयागे देवतां परिगृण्हीयात् (वै० १-१)

४८- पत्नीसंयाजेषु देवपत्नीयागमनुमन्त्रयते । (वै० १,४)

७६- दर्शयागे पर्वणहोमं जुहोति । (कौ० १-५) श्रौतदर्शयाग पि परिगृण्हीयात् (वै०१,१

८०- पूर्णमासयागे पूर्णमासीं देवतां परिगृण्हीयात् । (वै० १-१) तत्रैवकर्मणि
पार्वणहोमं जुहुयात् । (कौ० १-५)

८२- अग्निचये समिदाधानानन्तरं ब्रह्माजपेत् । (वै० ५-२)

८७- २,३,४,७ दर्शपूर्णमासयो: संस्थितहोमान् जुहोति । (वै० १-४)

८८- दर्शपूर्णमासयो: प्रह्रियमाणा प्रस्तरानुमन्त्रणं ब्रह्मा नया कुर्यात् । कौ०१-६)

१११-१ अग्निष्टोमे प्रात: सवने सोमसहितं पूतभृत्पात्रम् ब्रह्मानुमन्त्रयते (वै० ३-७)

११८-१ महाव्रते दुन्दुभ्याहनना नन्तरमनया राजानं सन्नह्येत् । (कौ०६-४)

(अष्टमे काण्डे)

३-२,१३,१४ वशाशमन कर्मणि पशुं संज्ञप्यमानानन्तरं रक्षोघ्नमनुवाकं जपेत् (कौ०५,८)
तत्रेमा वैश्वदेव्य: ।

४-११,१४,२४ इमा अपितथा वैश्वदेव्यस्तथैव विनियोगाश्च ।

७-४ सौत्रामण्यामनेन सूक्तेनौषधीभि: सन्धीयमानां सुरा मनुमन्त्रयते । तत्रेयं चतुर्थी
वैश्वदेवी(वै० ५-३)

(नवमे काण्डे)

१-५,१५ इति प्रथमं सूक्तं सोमयागे सोमसवने विनियुज्यते (वै० ३,६) तत्र मौ
पन्चदश्यौ वैश्वदेव्यौ ।

२-७,१३,१७-१६ सोमयागे अनुबन्ध्यायामपराजितायां तिष्ठन्त्यामनेन कामं नमस्करोति
(वै० १३,१४) तत्रेमा वैश्वदेव्य: ।

५-१३ सोमयागे पशौ अपराजितादानीय मानं पशु मनुमन्त्रयते । (वै० २,६)तथा च अग्निचयने पुनश्चितौ गार्हपत्ये चीयमानामिष्टकां ब्रह्मानुमन्त्रयते । (वै०५,२) तथैव वैश्वकर्मणहोमानुमन्त्रणे विनियोग: (वै० ५,२) ।

६-५,२ सामसमाप्तौ निधनं गायेत् । तदनुमन्त्रणं वैश्वदेव्यथा ।

६-१० उपाव्हानानुमन्त्रणम् ।

७-६,१६,२४ अनुउत्सवे निरुप्तहविरभिमर्शनम् (कौ० ८,७) मेघ्यस्य वृषम पशोरङ्गानि भिन्न देवता रूपाणि भवन्ति । तथथा - देवपत्न्य: पृष्ट्य: । गुदारूपा देवजा: । विश्वरूपज प्रशंसा । एते त्रयोर्मन्त्रा: वैश्वदेवाङ्ग प्रशंसार्था।

(दशमे काण्डे)

२- पुरुषमेधे स्नातालङ्कृतमुत्सृज्यमानं पुरुषपशुमनुमन्त्रयते । (वै० ७,२) तत्र ४,२२,२३ मन्त्रा विश्वेदेव लिङ्गात्मका: प्रत्यक्षा: । यतो हि कृत्स्नं सूक्तमेव वर्णनाद्वैश्वदेवम् ।

६-५,१६,२२-२६ ,३२ सौमिकेपशौ वृश्च्यमानयूपानुमन्त्रणे विनियुक्तम् तत्रेमा७ वैश्वदेव्य:। (वै०२,६)

७- स्कम्भ सूक्तं सर्वेषां देवानामाधाररूपे विनियुक्तम् । तत्र १३,२३,२४,२५,२७,३८,३६ ऋचो वैश्वदेव्यस्तदाधारभूताश्च ।

८- वैश्वदेविकेज्येष्ठ ब्रह्म वर्णने विनियुक्तम् । तत्र १८,३४,३५,४० ऋचस्तु वैश्वदेवात्मक ज्येष्ठ ब्रह्म वर्णन परा ब्रह्मज्ञान धारकाश्च ।

(एकादशे काण्डे)

१- ब्रह्मौदन सवे निरुप्त हविरभिमर्शने वि० । तत्र द्वितीयया धूमानुमन्त्रणम्, चतुर्थ्या अग्निमनुमन्त्रणम्, पन्चम्या ब्रीहिराश्यनुमन्त्रणम्, दशम्या ग्रवाणो ग्रहणम्, (कौ० ८-१२) विंशत्या चरु: श्रपणम्, २२, कुम्भीं प्रदक्षिणम्, ३६ आज्यहोम: इत्यादयो विनियोगा: ।

२- २८,३१, अग्निचयने रौद्रीरिष्टका नुमन्त्रयत् । (वै० ५,२) तत्राष्टाविंश्येकत्रिंश्यौ वैश्वदेव्यौ ।

(द्वादशे काण्डे)

१- सोमयज्ञे दीक्षित नियमेषु मूत्रपुरीष शुध्यर्थं लोष्ठादाने वि० (वै० ३,२)

२- पितृमेध कर्मणि विनि० । ३- सवयज्ञविधौ सूक्त वि० । ४- वशाशमने वि०। (कौ० ८,१-४) (कौ०५,८,६)

(त्रयोदशे काण्डे)

अस्य काण्डस्याध्यात्म रूप ज्ञान काण्डाग्नि होत्रे विनियोग: । तेन यथा सुक्तमनुमन्त्रणादि विषया न लक्ष्यन्ते । सर्वेषां मन्त्राणां ज्ञान विषयत्वात् । कर्मकाण्ड स्थाने ज्ञानाग्नि होत्र काण्डमेव विनियुक्तम् ।

(चतुर्दशे काण्डे)

अस्मिंन्काण्डे केवलं विवाह प्रकरणमुपवर्णितम् । श्रौतकर्मणामारम्भस्तु विवाहान्ते अग्न्याधेयकर्मण एव । अतो त्रापि श्रौतविनियोगानामभाव: ।

(पञ्चदश - षोडश- सप्तदश काण्डेषु)

एषु त्रिषुअध्यात्मम् , शान्तिक-पौष्टिकाभिचारकाणि कर्माणि। केवलं सप्तदशे विश्वेदेवात्मकस्य माहेन्द्रस्य दर्शेष्टौ हविरनुमन्त्रणम् । (वै० १-३)

(अष्टादशे काण्डे)

इदं काण्डम् पितृमेधे शवदाहे ग्नि प्रदानानन्तरं सप्त-नव-एकादशादि विषम संख्याकैर्ब्राह्मणैर्जपार्थं विनियुक्तम् । तत्रैव कर्मणि सारस्वत होमानन्तरं सर्वे बान्धवा: सम्पूर्णेन काण्डेन प्रेतमुपतिष्ठेयु: । (कौ०११-२) सर्वे मन्त्रा वैश्वदेविका एव ।

(ऊनविंशे काण्डे)

३-३,४ राजानं संश्रयति । (वै० ३,६) तत्रेमौतृतीया चतुर्थ्यौ ।

६-१०,११;१५ पुरुषमेधे क्रतौ पुरुषपश्वनुमन्त्रणे वि० । तत्रैतावैश्वदेविका: । (वै०७-२

६- ११-१४।१०-३।११-२,५ घर्म-सोमादि शान्ति वचनैं ब्रह्मानुमन्त्रयते । त्रिभि: सूक्तै: ।

४०-१ पवित्रनाश निमित्त प्रायश्चित्ते वि० । (अ० परि० ३७-४)

४१- सोमादियागेषु ब्रह्मा दीक्षितमनुमन्त्रयते ।

५७-३ दु: स्वप्न दर्शिनं राजानं ब्रह्मा राजसूये भिमन्त्रयते । (अ०प०)

५८- १,५,६ दर्शपूर्णमासयो राज्यभागहोमात् पूर्वं घृताहुतयोहूयन्ते ।तत्राद्य पञ्चमी ।

५९-२,३ दर्शपूर्णमासयोर्व्यतिक्रमे आज्यहोमं - समिद्धोमंवा करोति । (कौ० १-६)

(विंशश (विंशकाण्डे)

६-३ अस्य सूक्तस्य प्रात: सवनशस्त्रे वि० । तत्रेयं तृतीया ।

११-७ माध्यन्दिने सवने ब्राह्मणाच्छंसिन: शस्त्रे वि० । तथाचेदं सूक्त मुक्थमुखम् । (वै०३,२) ।

१३-४ अनया आग्नीध्रः पात्नीवतम्ङ यजेत (उपांशु) (वै०३-१३)
१८-३ अतिरात्रे प्रथम पर्याये ब्राह्मणाच्छंसिनः शस्त्रे ऋगियं पठ्यते । (वै०४-२२)।
२५-२ अतिरात्रे क्रतौ मध्यमे रात्रि पर्याये ब्राह्मणाच्छंसिशस्त्रेऋक्पठ्यते ।
३४-१-१६ इदं साम सूक्तं द्वादशाहादौ वैराजपृष्ठे विश्वजिति ब्राह्मणाच्छंसिनः शस्त्रे
पठ्यते । तत्रेते ऋचौ वैश्वदेव्यौ। (वै० ६,३) तथा अप्तोर्यामिक्रतावपि
माध्यन्दिने सवने ब्राह्मणाच्छंसि शस्त्रे वि० (वै० ४-३) ।
३५-८ इत्यहीन सूक्त मप्युपरिष्टे क्रतुद्वये तत्सहैवविनियुज्यते ।
४६-१ विषुवति सौर्यपृष्ठे अयं षष्ठः स्तोत्रियः ।
६३-१-३ पृष्ठस्यषष्ठे हनि द्वैपदौ पच्छः शंसति । (वै० ६,२)
६७-१५ पृष्ठ्य षडहस्य षष्ठे हनि प्रातर्माध्यन्दिनसवनयोः प्रकृतीनां प्रस्थित याज्यानां
पुरस्तात् " वनोतिहि०" इत्याद्याः पारुच्छेपा ऋच: । (वै० ६-१)
८७-३ ऐकाह्निके सूक्ते तृतीयेयम् । (वै० ६,३)
८८-६ अस्याऋचो प्युपरिष्ठाद्विनियोगः ।
९२-८ अतिरात्रे मध्यमे पर्याये उक्थ शंसनधर्मकाः स्तोत्रिया नुरूपा भवन्ति । (वै० ४,२)
तथा पृष्ठ्य षडहस्य षष्ठाहे प्रातः सवने पि । (वै० ६,२)
१२४-४-६ तत्पृष्ठे षडहे इमाः स्तोत्रियाः पठ्यन्ते । (वै० ८,४)
१२८-१,४,५,१६ पृष्ठयस्य षष्ठे हनि कुन्तापम्, अर्धर्चशः, चतुर्दशपदावग्राह्मं, शंसति।
१३५-१० अतीवादम्, अर्धर्चशः शंसति । (वै० ६,२) तत्र दशमी वैश्वदेवी ।
१३६-४ आहनस्याख्या वृषाकपि शस्त्रवच्छंसेत् (वै० ६,२ तत्रेयं चतुर्थी वैश्वदेवी ।
१३७-४-५ पावमान्यौ वैश्वदेव्यौ अर्धर्चशः शंसति । (वै० ६,२)
१४२-४ अतिरात्रे अतिरिक्तोक्थेषु स्तोत्रियानुरूपयो रनन्तरम् सूक्तं शंसति । (वै० ४,३)
१४३-५ अस्या पि पूर्वोक्त एव विनियोगः ।

इत्यथर्व वेदीय वैश्वदेवमन्त्राणां विनियोगाः ।

इत्थं श्रौतकर्मसु वैश्वदेवमन्त्राणां विनियोगाः प्रदर्शिताः ।

--००--

श्रौतकर्मसु विश्वेदेव यागाः, तत्फलादीनि च ।

यद्यप्येते यागा आधानादारम्य वक्ष्यमाणाः सन्ति, परंच ब्राह्मण क्रमेण याग परिगणने अग्निष्टोमः प्रथमः प्रति पद्यते । तस्यारम्भः दीक्षाणीयेष्टे र्भवति। अतः दीक्षाणीयेष्टेः प्राथम्यं स्वीकृतम् ।

१ दीक्षाणीयेष्ट्याम् - विश्वेदेवात्मकः आग्नावैष्णव पुरोडाशयागः । अनेन यागेन सर्वदेवतास्तृप्यन्ति । उक्तञ्चः- एतेवै यज्ञस्यान्त्येतन्वौ यदग्निश्च विष्णुश्च तद् दाग्नावैष्णवं पुरोडाशं निर्वपन्त्यत एव तद्देवा नृध्नुवन्ति ।(ऐ०ब्रा०१-१)

२ प्रायणीयायाः स्विष्टकृद्यागः । अत्राग्निः सर्वाभिर्देवताभिः सहहूयते । विराड्भ्यां (संयाज्याभ्यां) यष्ट्वा स्वर्गलोकं जयति । (ऐ०ब्रा० २-४)

३ आप्रीयागे :- चतुर्थो बर्हियागो विश्वेदेवात्मकः । बर्हिर्यजति, पशून्यजमानेने दधाति। (६-४)

४ अग्नीषोमीय पशोर्वपायागः । जगतः अग्नीषोमात्मकत्वात्स वैश्वदेविकः । वपायैयजति सर्वाभ्य एवतद्देवताभ्यो यजमानं प्रमुञ्चति ।

५ तथैवास्य पशोः पुरोडाश यागो पि वैश्वदेविकः । पशुपुरोडाश स्विष्टकृद्यागो पिच तथा । यः पशु पुरोडाश स्विष्टकृतोयजति, हविरेवास्मा एतत्स्वदयतीष मूर्जमात्मन्धत्ते । (६-६)

६ पशोरङ्गहवियागः । सो पि पूर्ववत्सर्वदेविकः । हविषायजति, सर्वाभिर्हास्य समृद्धिभिः समृद्धं हव्यं देवानप्येति । (६-१०)

७ वनस्पतियागः । वनस्पतिंयजति - प्राणोवैवनस्पतिः । जीवंहास्य हव्यं देवानप्येति यत्रैवं विद्वान्वनस्पतिं यजति । (६-१०) वनस्पतिर्वृक्षः । तथाविध शरीर युक्तां देवतां यजते । अस्य वृक्ष शरीरस्य जीवाविष्टत्वात्प्राणरूपत्वम् । अनेन यागेन यष्टुर्हविर्द्रव्यं प्राणवच्चेतनं भूत्वा तद्धविर्देवानाप्नोति ।

८ स्तोकप्रेष पुरस्सरं स्वाहा कृति यागः । सर्वदेवत्यावै स्तोकाः । (७-२) वपायां श्रप्यमाणायां स्तोकाः = नीरबिन्दवः निर्गत्याधः पतन्ति तदानीं सर्वं देवानां (विश्वेदेवानां) प्रियत्वादिने स्तोकाः स्वयमनभि प्रीताः सन्तो देवानगच्छन्ति । तत्रै जुषस्वसप्रथस्तमम्० (१-७५-१) इत्युक्तम् ।

६ स्वाहाकृतियागो वैश्वदेविक: । अयमन्तिम: प्रयाज: । वपा पूर्ववर्तित्वात्पूर्वोक्तं स्तोक सूक्तं पुरोनुवाक्या रूपम् । उक्तञ्च :- का देवता: स्वाहाकृतयस्ति इति विश्वेदेवा इति ब्रूयात्तस्मात्स्वाहाकृतं हविरदन्तुदेवा इति यजन्तीति ।(७-३)

स्तोक फलम् :- यस्मात्कारणात् स्तोकाश्चोतन्ति, ते च स्तोका: सर्वेषां देवतानां प्रियाएव तस्माद्देवानुग्रहादियं वृष्टिर्लोके स्तोकश: प्रतिविन्दुभिर्विभक्तासती भूमिसमीपमागच्छति ।

स्वाहाकृति फलम् :- स्वाहाकृतीर्यजति प्रतिष्ठायामेव तद्यज्ञमन्तत: प्रतिष्ठापयति । सङ्कल्पितं याग मनेनाप्रीयागेन प्रतिष्ठांनयति , तस्मात्कारणात् कर्तापि राष्ट्रे प्रतिष्ठां गच्छति । (६-४)

१० सवनीय पशुयाग: । अस्य यागस्यारम्भ: प्रातरनुवाकाद् भवति । अस्य साकल्येन ग्रहणे आस्य देवा: प्रातर्यावाणो ह्वंगच्छन्ति (७-५) इति प्रमाणवाक्येन विश्वेदेवा एव देवता: । अस्मिन प्रातरनुवाके आहुति भागा:, स्तोमभागा:, छन्दोमम भागा: , त्रयस्त्रिंशत्सोमपा: , त्रयस्त्रिंशदसोमपा: , पशुभाजिनश्च संहता वर्तन्ते । तेषां सोमेन सोमपा: पशुना असोमपाश्च प्रीणन्ति । तेभिन्न रुचिका अपि - प्रातरनुवाकेन अभीष्टा भवन्ति । तस्मात्सर्वाभिर्देवताभि: प्रातरनुवाक: प्रतिपन्नो भवति । स त्रिविध: । शत क्लृप्ति: , सहस्र क्लृप्ति:, अपरिमितश्चेति । तत्र शतक्लृप्ते: फलम् - शतायुर्वै पुरुष: शतवीर्य: शतेन्द्रिय आयुष्येवैनंतद्वीर्यं इन्द्रिये दधाति । (७-७) ।

द्वितीयस्य फलं यथा :- सहस्रमनूच्यं स्वर्गकामस्य सहस्राश्वीने वा इत: स्वर्गोलोक: स्वर्गस्य लोकस्य समष्ट्यै सम्पत्त्यै सङ्गत्यै इति ।

अपरिमित फलं यथा:- यदपरिमितमन्वाह सर्वेषां कामानामवरुध्यै इति ।

११ पूर्व पक्षिणां मते पुरोडाश यागे वैश्वदेविक: , उत्तर पक्षिणां मते सर्वे नुसवनीया ऐन्द्राएव । तत्र पूर्वमतं प्रशस्यते - पुरोवा एतान्देवा अक्रत यत्पुरोडाशास्तत्पुरोडाशानां पुरोडाशत्वम् । तदाहु रवसवनं पुरोडाशा न्निर्वपे दष्टाकपालं प्रात: सवने एकादशकपालं माध्यन्दिने , द्वादश कपालं तृतीय सवने तथाहि सवनानां रूपं तथा - छन्दसामिति । अर्थ: स्पष्टएव । यद्यप्युत्तर पक्षिणां सर्वे एन्द्रा स्तयाप्यस्य यागस्य फलमेकरूपतां भजते , देवता भेदेन फलभेदो नास्ति । तद्यथा :- कर्ता एतासामेव

तद्देवतानां सायुज्यं सरूपतां सलोकतामाप्नोति । तत्रैरकोहोता पि श्रेयस: सायुज्यं गच्छति । (८-८) ।

१२ प्रउगशस्त्र याज्या याग: । प्रउग याज्यादौ शंसनीये प्रउग शस्त्रे षष्ठस्थानीया विश्वेदेवा : । यद्वैश्वदेवं शंसत्यङ्गान्येवास्य त त्सं स्करोति । अनेन कर्तुरङ्ग संस्कारोजायते पुष्ट्यर्थम् । शस्त्रयाज्या वैश्वदेवी, तया सर्वदेवता स्तृप्यन्ति, कर्तारमपि मध्वन्नरसादिभिस्तर्पयन्ति । अस्या याज्यानन्तरमेव क्रियमाणेनानुवषट्कार यागेन पुन: पुनर्देवता अभिमुखीकृत्य तर्पयति कर्ता । तेन कर्तुरपि भूयोभूय:सुवृष्ट्यादिना देवा: प्रीणयन्ति । कर्ता यादृगिववै देवेभ्य: करोति तादृगिवास्मै देवा: कुर्वन्ति। (११-६)

१३ तृतीय सवने वैश्वदेव याग: । तत्रादौ वैश्वदेवं शस्त्रं शंसेत् । उक्तन्च :- यथावै प्रजा एवं वैश्वदेवं तद्यथान्तारं जनता एवं सूक्तानि यथारण्यान्येवं धाय्यास्तदुभयतो धाय्यां पर्याह्वयते । तथा च यथावै पुरुष एवं वैश्वदेव शस्त्रम्, तस्य यथा वान्तर-मङ्गान्येवं सूक्तानि यथा पर्वाण्येवं धाय्या: ।(१३-७) । शस्त्रमिदं प्रजाया निवास स्थानं राज्य सदृशम् । धाय्या अरण्य सदृशा: । पर्याहाव: शों सावोमिति । तेन उभयत: पर्याहावेन उभयतो राज्यरक्षणंभवति । अथच - शस्त्रमिदं साङ्गं पुरुषस्वरूपम् । सूक्तानि अङ्गानि । धाय्या:, अवयव सन्धिरूपा: । आहावो ब्रह्मरूप: । इदमुक्थं पान्चजन्यम् । तद्यथा - १ अग्नीन्द्रादिदेवगण: , २ ब्रह्मक्षत्रादिमनुष्यगण:, ३ गन्धर्वाप्सरसां गण:, ४ सर्पाणांगण:, ५ पितृणांगण: इति । अनेन शस्त्रेण इमे पन्चगणास्तुष्यन्ति । ते नेदं ज्ञायते - यदेतेषां पन्चगणानां समूहो वैश्वदेवगण इति । अस्य शस्त्रस्य शंसिता होता पि वैश्वदेवरूप: । उक्तन्च :- " सर्वं देवत्यो वा एषहोता यो वैश्व देवं संसति ।" (१३-७) । अस्मिन्च्छस्त्रे अदितिनाम्ना व्यवहृता देवा: यथा:- द्यौ:, अन्तरिक्षम्, माता, पिता, पुत्र:, विश्वेदेवा:, (उपर्युक्ता: पन्चजना:) उत्पन्नम्, उत्पत्स्य मानं च प्राणिजात मिति । सूक्तस्यास्य चरमे मन्त्रे विश्वेदेवा अपि अतिति स्वरूपा इत्युक्तमृषिणा । तेनेदं सिध्यति, यत्सर्वरूपा अदिति श्चेदिमे द्यौरादयो पि अदिति रूपा: , विश्वेदेवा पि तत्स्वरूपा: । अत: स्वरूप साम्यात् इमे वैश्वदेवगण विशिष्टा एवेति । एतच्छस्त्र शंसनेन ते विश्वेदेवा: कर्तारं द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयन्ति। गवादि पशुभि: सम्भरन्तीत्यर्थ: ।

वैश्वदेव शस्त्रयाज्यान्तर्गता विश्वेदेवा अन्तरिक्षस्था:, द्युस्था: , अथ च- अग्नि जिव्ह्या हविर्भागं गृण्हान:, प्रकृतियागं च कुर्वाण:, यज्ञ त्रातारो पि सन्ति । तेषां प्रकृतियागोनाम कर्तुरभीप्सित फल प्रदान रूप एव ।

अत्यग्निष्टोमा द्यवशिष्टासु संस्थासु पूर्वं मुक्ता वैश्वदेव यागा: प्रकृति रूपेण भवन्त्येव, परन्च प्रधान यागेषु, तदङ्ग भूत प्रधान रूप विशिष्टकर्मस्वपि वैश्वदेव यागो नास्ति । सत्रेषु व्यूढद्वादशाहो वैश्व देविक: ।

१३ द्वादशाह याग: । अस्मिन् द्वादशाहे प्रथम द्वादशौ अतिरात्रौ । मर्यादा-रूपो दशमह: । अवशिष्टेषु नवदिनेषु त्रय स्त्र्यहा इति द्वादशाहा भवन्ति । दीक्षा द्वादशसंख्याका: । काल: शैशिर: । उपसदोद्वादश । द्वादशसु दिनेषु सोमाभिषव: । अस्य मुख्या देवता नाम्ना प्रजापति: । ऋत्विज: - याजका- ऋतुदेवा - मासदेवाश्च । स प्रजापतिरेव ऋत्विग्रूपो यजक: । ऋतुदेवानां मासदेवानान्च परस्परमार्त्विज्यम् । अत: सर्वाभिर्देवताभि: सह विराजमानत्वादयं संवत्सर: प्रजापति: = वैश्वदेव: प्रजा-पति ऋत्विक रित्युच्यते । अस्य प्रथमे हनि वैश्वदेव शस्त्रे " तत्सवितुर्वृणिमहे यानोदेव सवितरिति प्रतिपदनुचरौ " उभयो स्तृचयो रथन्तर सम्बद्धत्वादिमौ राथन्तरोस्त: " । देवान्हुवे० इति वैश्वदेव सूक्तम् , अस्य प्रथम पादेएव देवता निरूप्यते । प्रथम पादस्य - स्य " स्वस्तये " इतिपदस्य तात्पर्यमैतरेय ब्राह्मणे उक्तम् । तद्यथा :- " महान्तंवा एतेध्वानमेष्यन्तो भवन्ति ये संवत्सरंवा द्वादशाहं वासते तद्देवान्हुवे बृहच्छ्रवस: स्वस्तय इति वैश्वदेवं प्रथमे हनि शंसति स्वस्तिताये स्वस्त्ययन मेव तत्कुरुते स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद येषां चैव विद्वानेतद्धोता देवान्हुवे बृहच्छ्रवस: स्वस्तय इति वैश्वदेवं प्रथमे हनि शंसति । " अस्य तात्पर्यं यथा :- शस्त्रे उक्तं वैश्वदेवशंसनं तत्सम्यक् ज्ञानन्च कर्तु: कल्याणाय भवति । उदाहरणं यथा :- प्रदीर्घयात्रा कर्तु मुद्युक्त: कश्चन पथिक: यात्रां परिपूर्णां चिकीर्षु: मार्गगते स्थाने स्थाने देवतां प्रार्थयति, तथैव द्वादशाह क्रतो: कर्तापि वेदितुर्होतृमुखा दस्यसूक्तस्य शंसनेन स्वकीयं सोम साधयति । स्य क्रतो: फलं यथा :- कर्तुरिह लोके परलोके पि च शरीर पूतत्वम्, पूतत्वात्सर्वे देवा: विश्वेदेवास्तंकर्तारं स्वस्वरूपं कुर्वन्ति । अनेन कर्तुर्ज्येष्ठत्व विश्वेदेवत्वप्राप्ति: । तथैव सर्वेष्वह: सु वैश्वदेव शस्त्र वैश्वदेवी याज्यायाश्च यागो भवति । अस्मिन्यागे नवरात्रगत तृतीयस्यान्हो विश्वेदेवात्मकं रूपं यथा:- अस्य देवता " विश्वेदेवा: " । सप्तदशस्तोम:

वैरूपसाम, जगतीछन्द: , समानोदर्कलिङ्गम्, अश्ववत्, अन्तवत्, पुनरावृत्तं, पुनर्निनृत्तम्, रतवत्, पर्यस्तवत्, त्रिवत्, अन्तरूपम् । उत्तमेपदे देवता निरूपणम् । असौ इति पदेन स्वर्गोलोक: , वैरूपसाम सम्बन्ध: , जगतीछन्द सम्बन्धश्च, कृतम् इति कृधातोर्भूत कालिकं रूपम् । इत्यन्हो वैश्वदेविकं रूपम् ।

अस्याहर्यागस्य कर्ता ऋषि: विश्वेषांदेवानां प्रियंधामोपागच्छत्, तत्कृपया परमं श्रेष्ठं लोक माजयत् । अतो स्य कर्ता वेदिता च विश्वेदेवानां प्रियं धाम मनो वेगेन गच्छति ।

१४ ऐष्टिक कर्मसु प्रायश्चित्तयाग:

अत्रैका देव्याहुति:, व्याहृति होमश्च । उक्तन्च :- अतोदेवा अवन्तुन इतिद्वाभ्यां व्याहृतिभिश्च (आ० श्रौ०सू० १-११)। अस्य फलं कृतकर्मणि ज्ञाताज्ञात दोषनिवृत्ति: ।

१५ संस्राव याग: ।

दीयमानायामाहुत्यां यदाज्यं समीपस्थपात्रेपतति तदेकीकृत्य चतुर्गृहीत माज्येनसह जुहुयात् । तस्य फलम् - न्यूनाहुतीनांपूर्ति:, कर्तु: शरीरात् तज्जनित दोषाद् भाव्य रक्त स्रावादिरोगावरोधनन्च ।

१६ आग्रयणेष्ट्यां प्रधानयाग: ।

यागोयं वैश्वदेविक: । नवानां व्रीहीणां यवानांवा हरणे आग्रयणेष्टिर्भवति । नूत्नमुत्पन्नमन्नमनयेष्टया देवेभ्य: प्रदाय भक्षयेत् । नोचेत् महान् दोषापत्ति: । उक्तन्च ऋग्वेदे :-

मोघमन्नं विन्दते अप्रचेता: सत्यं ब्रवीमि वध इत्सतस्य ।
नार्यमणं पुष्यति नोसखायं केवलाघो भवति केवलादी ।।

गीतायामपि - भुन्जते ते त्वघंपापा ये पचन्त्यात्मकारणात् । अत: आग्रयणेन विश्वेभ्योदेवेभ्यो हुत्वा सर्वे यज्ञशिष्टाशिनो भवन्ति ।

१७ मित्रविन्देष्टयां प्रधानयाग: ।

यद्यप्यस्यां वैश्वदेव गणस्था दशदेवता: स्वतन्त्र रूपेणोक्ता:, तथापि तासामेकप्रदानत्वं विश्वेदेव गणत्वं स्पष्टी करोति ।
उक्तन्च :- वसवश्चाष्ट संख्याका विश्वेदेवा दशस्मृता: ।

१८ तुरायणे इष्ट्यायने तृतीया वैश्वदेवीष्टि: ।

इष्टिभिरयनं गमनं येषु कर्मसु तानीष्ट्ययनानि । तानि सांवत्सरिकाणि भवन्ति । तत्रेदमाद्यं पूर्वोक्तम् । तेनसर्वे देवा: प्रीता: सन्त: सवत्सरान्तं यावदृतु प्रोक्तानि फलानि प्रयच्छन्ति ।

१९ चातुर्मास्ये वैश्वदेव पर्वणि वैश्वदेवयाग: ।

तत्राष्ट प्रधानेषु सप्तमो विश्वेदेवा: । चतुर्वर्ग फलप्राप्ति रस्य यागस्य फलम् ।

इत्थं श्रौतकर्मसु दीक्षणीया धारम्य ब्राह्मण- सूत्रानुसारेण च विश्वेदेव यागा:, तेषां फलादीनि च प्रतिपादितानि ।

--00--

चातुर्मास्य यागान्तर्गतो वैश्वदेव पर्व प्रयोगः ·
===================================

अत्रोक्तश्चातुर्मास्य नामा कश्चन यागोनास्ति । अपितु कर्म समुदाय नामेदम् । व्यवहारे चातुर्मास्यानीत्यनुक्त्वा चातुर्मास्य प्रयोग इति कथ्यते । तेषां कर्मणां प्रयोग - ~~एतुर्विधः~~ श्चतुर्विधः । यावज्जीव - सांवत्सरिक- द्वादशाह- यथाप्रयोग इति । एतेषु पूर्व पूर्वपक्षः श्रेयान् भवति । यावज्जीव सांवत्सरिकयोर्वैश्वदेव - वरुणप्रघास -साकमेध- शुनासीरीयाणां पर्वणां यथाक्रमं फाल्गुनी - आषढी- कार्तिकी - फाल्गुनी पौर्णमासीषु अथवा - चैत्री - श्रावणी- मार्गशीर्षी- चैत्रीषु प्रयोगः । द्वादशाह- यथा प्रयोग पक्षयोस्तु उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे आरम्भः, समाप्तिरपि शुक्ल पक्षे एव । (अपरपक्षे इतिकेचित् , तच्चिन्त्यम्) अत्र द्वादशाहपक्षे प्रथमे हनि वैश्वदेवपर्व, चतुर्थे वरुण प्रघासाः , अष्टम नवमयोः साकमेधाः, द्वादशे शुनासीरीया । यथा प्रयोग पक्षेतु प्रथमे वैश्वदेवं द्वितीये वरुणप्रघासाः तृतीय चतुर्थयोः साकमेधाः पन्चमे शुनासीरीया । आद्ये अन्तराल दिवसेषुव्रतचर्या,अन्तिमे प्रचलितेष्वेव दिवसेषु व्रतचर्या कार्या। व्रतचर्या = नियम पालनम् । आदितस्त्रिषु सांवत्सरिकादिषु इष्टया - पशुना- सोमेन वा चातुर्मास्यानि कर्तव्यानि । संवत्सर पक्षेत्वेषां फाल्गुन्यां चैत्र्यां वा यथा समाप्ति स्तथा शुनासीरीयस्यापकृष्यानुष्ठानम् । अपरा फाल्गुनीनव्यवेयादितिवचनात् । ऐकाह्कि चातुर्मास्य प्रयोगो पि मध्ययुगे बहु प्रचलितः । तत्र सत्रेषु यथा प्रत्यहं सुत्याहर्भवति परन्चान्हो रूपं,देवता - ~~स्तोत्र~~ - शस्त्राणि भिन्नानि भवन्ति , तथैवैकाह्कि चातुर्मास्ये चतुर्णापर्वणां प्रहर भेदेनानुष्ठानं क्रियते । तत्रेदमवधेयं यदपराण्हकाले पित्र्येष्टिर्यथास्यात्तथा प्रयोग तारतम्यमनुष्ठेयम् । चातुर्मास्यानि प्रयोक्ष्यमाणः पूर्वेद्युर्वैश्वानरपार्जन्येष्टिं कुर्यात् , तदहनिवा । इष्टयन्ते तदानीमेव कर्ता वैश्वदेव हविर्भिर्यक्ष्ये इति वैश्वदेव पर्व प्रयोग सङ्कल्पं कुर्यात् । अथ देवता सङ्कल्पः । वैश्वदेव सम्बन्धि हविः । व्रीह्मियः पुरोडासो द्रव्यम् । व्रीह्मियश्चरुः । आमिक्षाच । नवप्रयाजाः । अग्नीषोमा वाज्यभागौ । आग्नेयोष्टाकपालः पुरोडाशः । साम्यश्चरः । सावित्रोद्वादश कपालपुरोडाशः । सारस्वतश्चरुः । पौष्णश्चरुः । मारुतः सप्तकपालः पुरोडाशः । वैश्वदेव्यामिक्षा। द्यावापृथिव्य एक कपालः पुरोडाशः । देवा आज्यपा इत्यादि नव प्रयाजा नवानुयाजा अग्न्यादयः सर्वा उच्चैः । सविता- द्यावापृथिवी इत्युपांशु । एवमात्मकेन साङ्गोपाङ्गेन कर्मणा श्वः सद्योवा यक्ष्ये । इति सङ्कल्प्य, अग्नीन्विहृत्य, अन्वाधाय, शाखाहरणादि

परिधि बन्धान्तं कुर्यात् । ततस्त्वांत्रयो विंशतिधा स्तूहः कार्यः । सायंदोहः- छवो विश्वेदेवा रमयन्तुगावः । प्रणोब्रूहि विश्वेभ्योदेवेभ्यो हविरिन्द्रियम् । बहुदुग्धि विश्वेभ्यो देवेभ्यो हव्यमिन्द्रियम् । सोमेन त्वा तनच्मि विश्वेभ्योदेवेभ्योदधि। इति मन्त्रऊहो विशेषः । आज्यसंस्कारादि स्रुक्संमार्जनान्तं कृत्वा उपभृति चतुर्गृहीतं गृहीत्वा पृषदाज्य ग्रहण्यामुपस्तृणाति । महीनां पयोसीत्येकम् । विश्वेषां देवानां तनूरिति द्वितीयम् । दध्यानयनादि हविरुद्वासनान्तं प्रकृतिवत्कृत्वा आमिक्षामग्ना- वधिश्रित्याभिघार्योद्वास्योपस्तृतेचमसे आमिक्षां व्युधृत्य तदुपरि किञ्चिद्वाजिनमानीया- भिघार्यालं कुर्यात् । मन्त्रः - यस्त आत्मा० (प्रकृतावुक्तः) ततः सर्वेषां हविषा- मासादनम् । ध्रुवंध्रुवायामानीय गार्हपत्यस्य पुरस्तात्तूष्णीं वाजिनमासादयेत् । अथाहवनीय समीपे अधिमन्थन शकलमेकं लौकिकं प्रागायतं निदध्यात् । वृषण संज्ञितौ द्वौ लौकिकौ शकलावधिमन्थनस्य पार्श्वयोः प्रागायतौ हस्ताभ्यां युगपन्निदधाति । दक्षिणेनोत्तरा- रणिं सव्येनाधरारणिमादत्ते । उर्वश्यस्यायुरसि पुरूरवाः इति मन्त्रेण । अपूर्वाज्य- स्थालीं समन्ज्य अधिमन्थन कलशे अरणी निधाय कर्तारं वाचयति । गायत्र- (त्रैष्टुभं - जागतं) छन्दोनुप्रजायस्व । मथ्नन्नाह । पूर्वोक्त रूपेणाग्निमन्थनम् । प्रहरति यजमाने- नान्वारब्धः , भवतं० इति मन्त्रं पठित्वा अपूर्वाज्यं स्रुवेण जुहोति । अग्नावग्नि० इति मन्त्रेण । तत इध्मात्समिध मित्यादि प्रकृतिवच्चतुरः प्रयाजानिष्ट्वा पञ्चमादीन्- मध्ये जुहुयात् । अष्टमे कृत्स्नमौपभृतं जुह्वामानयेत् । पञ्चमादीनां पञ्चमस्यैव याजमान- मावर्तनीयम् ।

होत्र कर्मण्यपि पृथुपाजाअमर्त्य० इति द्वे धाय्ये संहिताः सप्तदश सामिधेन्यः । आज्य भागावावाह्य अष्टौ प्रधान देवता आवाहयेत् । १ अग्निमावह । २ सोमम् । ३ सवितारम् । ४ सरस्वतीम् । ५ पूषणम् । ६ मरुतः स्वतवसः । (केवलपक्षे- मरुत आवह) ७ विश्वान्देवान् । ८ द्यावापृथिवीमावह । ९ देवां आज्यपा इत्यादि नव प्रयाजाः । तत्र प्रागुक्तमाच्चतुर आवपेत । १ दुरोअग्ने २ उषासानक्ता - ३ दैव्या- होतारा, ४- तिस्रोदेवीः । वार्त्रघ्नावाज्यभागौ । तदन्तं हुत्वा आवाहनोक्ता देवताना- मष्टौ प्रधानयागा श्चातुर्मास्यान्तर्गत वैश्वदेवपर्वणि हूयन्ते । तद्यथा - १ आग्नेय यागः। अग्निर्मूर्धा० भुवोयज्ञस्य० इत्याग्नेयस्य याज्यानुवाक्ये । २ सौम्यः । सोमयास्ते० याते- धामानि० इति सोमस्य । ३ सावित्रः । आविश्वदेवं० वाममद्य० इति सवितुः । ४ सारस्वतः । पावकानः ० पावीरवी० इति सरस्वत्याः । ५ पौष्णः । पूषन्तव०

शुक्रन्ते० । इतिपूष्ण: । ६ मारुत: । इहेह्व० प्रचित्रमर्कं० इतिमरुतां स्वतवसाम् । (केवलमरुत्पक्षेतु - मरुतोयस्यहि० अराइवेद० इति मरुताम्) ७ वैश्वदेव: । विश्वेदेवास आगत० ये के चज्मा० इति विश्वेषां देवानाम् । ८ द्यावापृथिव्य: । महीद्यौ: ० प्रपूर्वजे० इति द्यावा पृथिव्यो: ।६प्रेघोअग्ने० इमो अग्ने० इति स्विष्टकृद्यागे संयाज्ये भवत: ।

प्रधानयागे विशेष:

तत: स्थालीतो जुव्हामुपस्तीर्याग्नेयस्य पूर्वार्धां दवधन्नाह । अग्नये नुब्रू३हि । अग्निं यजेति वषट् कृते हुत्वा त्याक्रम्य सौम्यस्य चरोरपरार्धादवधन्नाह । सोमायानुब्रू३हि । अपरार्धादवदायेत्यादि विहितमनु सोमं यजेति वषट्कृते जुहुयात् । एवं यथा देवतं सर्वाणि । सवितुर्द्यावापृथिव्योश्चोपांशु यागौ । आमिक्षैक कपालयोरुपस्थानाभि मर्शने नस्त: । जौह्वेन संस्त्रावेणाभि जुहोतीति विशेष: । चातुर्मास्येष्वपि - वैश्वदेव - वरुण प्रघास - माहेन्द्र- शुनासिराणां प्रधान - हविषामुपांशुत्वमित्येके । तच्चिन्त्यम् । कृतेत्यागोच्चारानन्तरं मन्त्रगत फलप्राप्ति कामनाघोष: । यथा- अग्नय इदंनमम । अग्नेरहं देवयज्ययान्नादोभूयासम् । सोमायइदं० सोमस्याहं देव यज्यया प्र प्रजया च पशुभिश्चजनिषीय । सवित्रे इदं० । सवितुरहं देव यज्यया स्वस्तिमान्पशुमान् भूयासम् । सरस्वत्याइदं० । सरस्वत्या अहं देवयज्यया वाचमन्नाद्यं पुषेयम् । पूष्णे इदं० । पूष्णोहं देव यज्यया पुष्टिमान्पशुमान्भूयासम् । मरुद्भ्यइदं ०। मरुतामहं देव यज्यया प्राणैर्ऋध्यासम् । विश्वेभ्योदेवेभ्य इदं० । विश्वेषां देवानामहं देव- यज्यया प्राणै: सायुज्यं गमयम् । द्यावापृथिवीभ्यामिदं० । द्यावापृथिव्योरहं देव यज्ययोभयोर्लोकयोर्ऋध्यासम् । अत्राध्वर्यु:-मासनामभिराज्यस्थाल्या: स्त्रुवेणैक कपालमभिजुहोति। तद्यथा-मधुश्चस्वाहा । माधवश्चस्वाहा । शुक्रश्चस्वाहा । शुचिश्च स्वाहा । तथैवत्याग: । स्विष्टकृद्याग: प्रकृतिवत् । इडायामेक कपालस्यांशयादवद्यति । अन्वाहार्यं मासाद्य प्रथमजं वत्संददाति । हविरुच्छिष्टमुद्वासनादि एतदस्तु हुतं तवस्वाहे त्येतदंतं मे प्रकृतिवत् । पृषदाज्यं जुव्हामानीय मन्त्रान्ते वषट् कृते जुहुयात् । ततो १ देवंबर्हि: ०, २ देवीर्द्वार:० , ३ देवीउषासानक्ता० , ४ देवीजोष्ट्री०, ५ देवीऊर्जाहुती०, ६ देवादैव्याहोतारा० , ७ देवीस्तिस्त्र:०, ८ देवोनराशंस:० , ६ देवोअग्नि: - स्विष्टकृद्० इति नवानुयाजयागा: । तत: सूक्तवाक शंयुवाकौ प्रकृतिवत् । सूक्तवाके

नवप्रधानदेवतानां नामग्रहणं विशेषम् । शंयुवाकस्योपरिष्टाद्वाजियाग: । तत्र - शन्नोभवन्तु० इत्यनुवाक्या, वाजेवाजेवत० याज्या । ऊर्ध्वज्ञुरनयानं यजति, तिष्ठतो नु वषट् करोति । ततो वाजिन भक्ष: । सर्वेषां प्राण भक्ष: । यजमानस्यैव वाजिन भक्ष: प्रत्यक्ष: । स्रुग्व्यूहने उपभृदनन्तरं पृषदाज्य ग्रहणीं व्यूहेत् । तथैवान्जनमपि । ततो होत्रे वेद प्रदानादि ब्राह्मण तर्पणान्तं प्रकृतिवत् । ततो ध्वर्युर्यजमानस्य केशान् प्रागादि चतुर्दिक्षु मध्येच त्रेण्या शलल्या पन्चधा विभजेत् । ऋतमेवपरमेष्टि० । इति प्रतिविभाग विभागं प्रति वपनं च मन्त्रावृत्ति: । कर्ता - वपनान्ते स्नात्वा स्वासने उपविश्य संवत्सरीणां स्वस्ति माशास्ते इति वदेत् ।

अथ कपिल पक्षे पाशुक चातुर्मास्ये वैश्वदेव पर्व प्रयोगे विशेष: प्रदर्श्यते

प्रात रग्नि प्रणयनम् । परिधौ पशुनियोजनम् । युवासुवासा: ० इति त्रि: परिव्ययणम् । ततो ग्निमन्थनम् । सप्तदश सामिधेन्य: । आवाहने - अग्निमग्न आवह । सोमम् । अग्निम् । सोमम् । सवितारम् सरस्वतीम् । पूषणम् । मरुत: स्वतवस: । विश्वान्देवान् । वनस्पतिम् । द्यावापृथिवीम् । देवां आज्यपां आवहेत्यादि। सम्मार्गै: सम्मृज्य प्रवृता हुतीर्जुहुयात् । जुष्टोवाचे० इत्यादि मन्त्रै: । प्रशास्तारं तीर्थेन प्रपाद्य मित्रावरुणयो रिति मन्त्रेण दण्डदानम् । होता - होतृषदनाभिमन्त्रणादि स्रुगादापनान्तं कृत्वा एकादश प्रयाजान्यजेत् । मैत्रावरुणस्य होतायक्षा दित्यादि व्यापारेणसह दश प्रयाजानिष्ट्वा पर्यग्नये० इति प्रैषेण प्रेषितो मैत्रावरुणो नभिहिंकृत्य " अग्निर्होतानोअध्वरे ०" इतितृच मन्वाह, आद्योत्तमे त्रिर्ब्रूयात् । पुन: प्रेषित: सन् अजैदग्नि० इत्युप प्रैषं ब्रूयात् । प्रैषमुक्त्वान्तर्वेदि दण्डं निदध्यात् । होता - अध्रिगुप्रैषं " दैव्या: शमितार०" इति ब्रूयात् । दक्षिणावृदावर्तेत मैत्रावरुणश्च, संज्ञप्ते पशावावर्तेरन् । मैत्रावरुण: " स्तोकेभ्यो नुब्रूहि" इति प्रेषित: - जुषस्व सप्रथस्तमम्० इत्येकाक्षक इमन्नेयज्ञम्० इति पन्चर्चं सूक्त माद्योत्तमे त्रिर्ब्रूयात् । पुनर्होतु र्निरसनोपवेशनं स्रुगादापनं च कृत्वा " होतायक्षा दग्निं स्वाहा०" इति प्रेषित उक्त्वा प्रीयाज्यया यजेत् । सप्रैष पक्षे - अग्निर्वृत्राणि० त्वंसोमासि० इत्याज्यभागयो: पुरोनुवाक्ये मैत्रावरुणो ब्रूयात् । तत: प्रेषितो होतायक्षादग्निमाज्यस्य, तथा सोमाज्यस्य जुषतां हविर्होतर्यज इति प्रेषेत् । ततो होता ये ३ यजामहे जुषाणो अग्नि राज्यस्य, इत्यग्ने: । जुषाण: सोमआज्यस्य अविषो वेतु ३ वौ३षट् इति

सोमं यजेत् । यजप्रैषपदो होतैव प्रकृतिवदाज्य भागौ यजति । ततः पूर्वोक्त याज्यानुवाक्याभि रग्न्यादि मरुतां स्वतवसान्तानां प्रधान देवतानां यागाः । अथ वैश्वदेवः पशुर्विशिष्यते । तदनु सावुषाया आमिक्षायाश्च सह प्रदानम् । विश्वे अद्य मरुतो० इति पुरोनुवाक्या । मैत्रावरुणो होतायक्षद्विश्वान्देवा नामिक्षायाश्छागस्य वपाया-मेदसोजुषन्तां हविर्होतर्यज । ततो होता - विश्वेदेवाः शृणुतेमं हवंमे० इति यजति । ततश्चात्वाले मार्जयित्वा द्यावापृथिवीभ्यां यजति । ततः स्विष्टकृदादीडान्तं कुर्यात् । अथवैश्वदेवेन पुरोडाशेन यजेत । आनोदेवानामुपवेतु शंसः० इति पुरोनुवाक्या । ततो मैत्रावरुणः होता यक्षद्विश्वान्देवान् पुरोडाशस्य जुषतां हविर्होतर्यज इतिप्रेषितो होता - येकेचज्मा महिनो० इति याज्यया यजेत् । ततः स्विष्टकृद्याग इडाभक्षणं च । अथवैश्वदेव पशोरङ्गहवियागः । त्रयोदशर्वं मनोता सूक्तं प्रेषितो मैत्रावरुणो नमिहिङ्०-कृत्यान्वाहाधोत्क्मेत्रिरिति । आनोविश्व आस्क्रागमन्तु० इति पुरोनुवाक्या । ततो मैत्रावरुणः - होता यक्षद्विश्वान्देवांश्छागस्य हविषन आदन्नद्यमध्यतो मेद उद्भृतं पुराद्वेषोभ्यः पुरापौरुषेय्यागृभः । घसन्नूनं घासे अज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोप वसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोङ्गा दङ्गादवत्तानां करन्नेव विश्वेदेवा जुषन्तां हविर्होतर्यज । ततो ग्नेयाहिदुत्यं मारिषण्डइतियाज्या । अस्या अर्धर्चेन आरमेत् । ततो वसाहोमः । तदन्ते सरस्वती म्मरुतः इत्यर्धर्चेन यजति । अथवनस्पतियागः । देवेभ्यो वनस्पते - वनस्पते रशनया नियूयेति याज्यानुवाक्ये । ततः स्विष्टकृत् । तत इडा वान्तरेडा प्राशनं च । अथैकादशानुयाजाः । पूर्वोक्ताः प्रैषा मन्त्राश्च । अथ सूक्तवाके - विश्वेभ्योदेवेभ्यश्छागं , विश्वेभ्योदेवेभ्यश्छागेनादांस्तन्मेदस्तत्प्रतिपचताग्रभीषु रवीवृधन्त पुरोडाशेनेतिविशेषः । इदंद्यावा० इत्यादि हृदयशूलावभृथ संस्था जपान्तं कुर्यात् ।

इत्याश्वलायन हौत्रसहितो बौधायनीयः सपशुः पशुरहितश्च वैश्वदेव - पर्व प्रयोगः ।

--००--

विश्वे देवानां स्मार्त कर्मसु सम्बन्धः

यथा पूर्वोक्तेषु विविधाध्यायेषु श्रौत कर्मसु, सूत्रेषु विश्वेदेवानां सम्बन्धो नुसन्धितः । तथैव (दृह्य) स्मार्त कर्मस्वपि विश्वेदेवानां सम्बन्धः केषु प्रयोगेषु, निषेकादिश्मशानान्तेषु संस्कारेषु, शान्तिक-पौष्टिक कर्मसु, कथमस्तीति विचारश्चाप्यते । तदर्थं चतुर्णामपि वेदानां ब्रह्मकर्मसमुच्चयादिभिःप्रयोगरत्न, धर्मसिन्धु, निर्णयसिन्धु, मन्वादिस्मृतिभिश्च विश्वेदेवानां स्मार्त कर्मसु सम्बन्धो नुसन्धिष्यते ।

प्रातः स्मरणे विश्वेदेवाः

तत्रादौ " ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिन्तयेत् " इति मनु वचनानुरोधेन प्रातरुत्थिते सति धर्म चिन्तनमावश्यकम् । " धर्मो नारायणस्मृतः " इत्युक्त्या धर्मस्य नारायण रूपत्वात्, नारायणस्तु साक्षान्मन्त्र रूपो वेदराशिः । उक्तञ्च: - वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः । तावन्ति हरिनामानि नात्रकार्या-विचारणा ।। इति वेद फलश्रुत्यनुसारेण प्रातःप्रबुद्धे सति धर्म स्वरूपैर्वेदमन्त्रैरेव प्रातः स्मरणमावश्यकम् ।

तस्मिन्प्रातः स्मरेण " प्रातरग्निं० " इति सूक्ते " वयं देवानां सुमतौस्याम " " भगएव भगवांअस्तु देवाः " इति पादद्वयाभ्यां विश्वेदेवाः स्मर्यन्ते ।

स्नानकर्मणि

प्रातः स्मरणनन्तरमेव मूत्र पुरीषोत्सर्ग दन्त धावनञ्चकृत्वा स्नानमाचरेत् । तस्मिन्स्नानविधौ स्नानाङ्गतर्पणे " तान्देवां स्तर्पयामि " इति वाक्येन ब्रह्मादयो ये सर्वेदेवाः = विश्वेदेवाः तान् तर्पयामि इत्यर्थः स्फुटः । ततो भूर्देवान्, भवर्देवान्, स्वर्देवान्, भूर्भुवः स्वर्देवान् तर्पयामि । इति तिसृभिर्व्याहृतिभिर्महाव्याहृत्याच लोकत्रयस्थानमपि सर्वेषां देवानां तर्पण विधानेन विश्वेदेवानां तर्पणं सुदृढं सन्जातम् । इत्थं स्नानविधौ विश्वेदेवानां तर्पणमार्गेण सम्बन्धः नि सुस्थिरः ।

संध्यायां प्राणायामे

संध्यासु त्रिष्वपि प्रारम्भे आचमन- प्राणायामौ नित्यौ । स प्रणायामः

प्रणव व्याहृतिपूर्वकं सशिरस्क गायत्र्या एव भवति । उक्तञ्च :- प्रणव व्याहृती: सप्त गायत्रीं शिरसासह । त्रि: पठेदायतप्राण: प्राणायाम: स उच्यते ।। सर्वेषां मन्त्राणा मुच्चारणादौ ऋषिच्छन्ददेवताध्यानं नित्यमुक्तम् । तदनुसृत्य प्रणवस्य परमात्मा देवता । सप्तानां व्याहृतीनां मध्ये सप्तम्या: सत्य नामाभिधायिन्या: विश्वेदेवा देवता: । इति प्राणायामे सम्बन्ध: ।

उपस्थाने

मित्रसूक्ते सदेवान् विश्वान् बिभर्ति इति प्रसिद्धो विश्वेदेवार्थ: । तच्छंयोरावृणीमहे ०' नमो ब्रह्मणे०' इति मन्त्रद्वयो र्विश्वेदेवा देवता: स्पष्टा: ।

देवपूजायाम्

देवोभूत्वायजेद्देवं नादेवो देवमाचरेत् । इत्युक्त्या न्यासै: स्वशरीरे देवतां विन्यस्य तद्रूप: सन् पूजनमारभेत् । तदर्थं क्रियमाणे आसनविधौ, भूमौ प्रादेश करणानन्तरं स्वशरीरान्मानुषगन्ध निवारणे । येभ्योमाता०' एवापित्रे०' इति मन्त्रौ वैश्वदेविकौ विहितौ । शरीरन्यासे, षोडशोपचारेषु च प्रोक्तं पुरुष सूक्तमपि विराड्रूपत्वाद्वैश्वदेविकमेव । इत्थं देवपूजायां सम्बन्ध: ।

पञ्चमहायज्ञेषु

पञ्च महायज्ञेषु सर्वत्र विश्वेदेवेभ्य: आहुति प्रदानं भवत्येव । तस्य विधानं, विचारश्च स्वतन्त्रे प्रकरणे विस्तारेण प्रपञ्चित: । ब्रह्मयज्ञेपि. देवोदेवेभिरागमत् अग्निर्वैदेवानामवमो विष्णु: परम:' नमो ब्रह्मणे' तच्छंयोरावृणीमहे' इत्यादिवेदवाक्यै: सम्बन्धो लक्ष्यते ।

त्रिसुपर्णे पाते पि ' य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छति' इत्यत्रापि विश्वेदेवानां महिमा वर्णिता ।

पवन पावने पि' यद्देवादेवहेडनम्' देवाजीवनकाम्यायत् वैश्वदेवी पुनती - देव्यागात्' इत्यादिमन्त्रै: सम्बन्ध: ।

महान्यासे पि' परोक्ष प्रिया इवहिदेवा:' इत्यादि प्रत्यक्षा प्रत्यक्ष लिङ्गात्मकैर्मन्त्रैस्तत्तदङ्गेषु न्यासरूपो विश्वेदेवानां सम्बन्ध: ।

पूजायां " यज्ञेनयज्ञमयजन्त० " इति मन्त्रेणैकेन पुष्पान्जलिंदत्वा पूजां समाप्यते । परन्तु नैमित्तिकावसरे देवान्तपद मन्त्रैः (देवे संज्ञकैः) पुष्पान्जलिरर्प्यते । ते सर्वे मन्त्रा वैश्वदेविका एव । अतएव सर्वेषां देवतानां विशिष्टार्चने एते देवे संज्ञका मन्त्राः प्रयुज्यन्ते । तत्र देवता लिङ्गभेदो नाम - कर्म - गुणभेदाश्च नगण्यन्ते । ते देवेसंज्ञका मन्त्रा ऋग्वेदे - कृष्णयजुर्वेदेय च विशेषतो विधीयन्ते । अन्येषां शाखिनां कर्मलोप-वशात्तच्छाखिनां देवे मन्त्राः प्रचलिता नसन्तीदानीम् । ऋग्वेद कृष्णयजुर्वेदयोश्च संहितयो विंश्वेदेवानां मन्त्र सङ्ग्रहे ते मन्त्राः साकल्येनोक्ताः । अतो त्र प्रतीकानि लिख्यन्ते सम्बन्धज्ञानार्थम् ।

तत्रादौ ऋग्वेदे - नमो ममत् क्षायज्ञे परात्वेरा उभाउतत् ।
तवस्याम दिवः शंसा त्रिरुनापा प्रतीत कः ।।
त्वमपो मूर्धानं नाभिं ते नो स्केचास्मेपरि ।
प्रयेम्यनृदारागृम्णा समस्मिन् ब्रह्मचारी च ।।
सद्यो जातो इदं तेपा त्रिंशद्देवे प्रकीर्तिताः ।।

प्रतीकात्मका इमेश्लोकमा नुक्रमस्मरणार्थं याज्ञिकै रचिताः सर्वत्र विश्रुताश्चेति ।

ततः कृष्णयजुर्वेदे :- मूर्धानं मम सबुध्ना वायुस्तां जातवे शतम् ।
यज्ञेन बृहर्यईशे ये सहांसि चापामतिम् ।।
मर्माणिते प्रजापतेस्तद्ग्रहाणांतदिष्टीनाम् ।
दशहूतः सप्तषड्ढ पन्चचतुराशिदान्तः ।।
नहिस्पश उपतेगा सहिवेदादिकं परे ।
अयंयज्ञो देवं स्तोमैं क विंश मरुतादित्यान् ।।
आवृत्र नरा शमभि याश्चतो देवेभ्यः श्रेष्ठः ।
लोकस्य यथा सएव तद् ब्रह्महणं तेषातत् ।।
सद्यो जातो त्मन्वान्सोम यज्ञिया विच्छिन्दम्युणाः ।
अन्नं राजा एतद्वैततेनमे वासो ददाति ।।
कृशानुरेवा भुवन मुषाश्च ऋतस्थ शक्रः ।
सप्तपन्चाशद्देवान्ता मन्त्राः पुष्पे प्रचोदिताः ।।

इत्थं कृत्स्नं मन्त्रपुष्प विधानमेव वैश्वदेविकमिति सुस्पष्टम् ।

पौष्टिक कर्मसु

पन्चसूक्ते पवमाने - बहवोमन्त्राः, अस्यवामीय सूक्तन्च वैश्वदेविकम् । उत्सर्जनोपाकर्मणोश्च - प्रधानयागे " योनस्वो० " इति वैश्वदेव्याहुतिः । संप्रावहोमे - सर्वत्र विश्वेदेवा देवताः । तेनैवहवन समाप्ति र्भवति । ऋषिपूजने - वसिष्ठावाहन प्रयुक्तो " उतासि० " मन्त्रो पि वैश्वदेविकः । तथैव पूजन मन्त्रश्च " देवा एतस्या० " इति । तर्पणे - देवास्तृप्यन्तु । इत्यनेन विश्वेषां (सर्वेषां) देवानां तर्पणमुक्तम् । यज्ञोपवीत संस्कार विधौ नवम दोरकतन्तौ विश्वेदेवानांन्यासः । " विश्वान्देवान्नवमतन्तौन्यसामि " । शान्तिपाठे आनोभद्राः० स्वस्तिनो० शन्नइन्द्राग्नी० " इति सूक्तत्रयमपि वैश्वदेविकम् ।

सर्वेषु शाद्धेषु

प्रतिसांवत्सरिकादि सर्व श्राद्धेषु सव्येन यद्यत्कर्म विधीयते तत्सर्वमपि वैश्वदेविक मेव । श्राधे केवलं देवता द्वयमेव गृह्यते । विश्वेदेवाः , पितरश्च । यवोदकम्, यवकूर्चैः, पात्रद्वयोरासादनम् , वैश्वदेविको विप्रः , विप्रौ वा , आवाहनाद्यपचाराः, अङ्गुष्ठपरिवेषणम्, अन्ननिवेदनम्, विकिर पिण्डदानम्, इत्यादि सर्वे विधयो वैश्वदेविका एव । श्राद्धस्यार्धभागो वैश्वदेविकः, अर्धश्च पैतृकः । अतः श्राद्ध विधाने विश्वेदेवानामसाधारण सम्बन्धः ।

संस्कारेषु

सर्व संस्कारादौ क्रियमाणे पुण्याह वाचने " भद्रं कर्णेभिः :" इति मन्त्रेण विश्वेदेवानां प्रार्थना, " अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम्, विष्णुपुरोगाः सर्वेदेवाः प्रीयन्ताम् " इति वाक्यद्वयेन जलप्रक्षेपः , त्रीणि त्रीणिवै देवाना मृद्धानि, इति मन्त्रेण ऋद्धि वाचनम्, तदप्येषश्लोको० इति ब्राह्मण मन्त्रजपः, इत्यादि कर्मसु विश्वेदेवानां सम्बन्धो ज्ञायते ।

गृह्य-शाङ्ग कर्तुरभिषेके पि वैश्वदेविकं " शन्न " इतिसूक्तम् ।

अग्न्युपघात प्रायश्चित होमे आयतनाद्बहि रङ्गारपतन जनित प्रत्यवाय प्रतिहारार्थम् " इदंतस्कं " इति वैश्वदेव्याहुतिरुक्ता । अथ च - " अतोदेवा० " इति सर्वहोम साधारणा दैवी अन प्रायश्चिता आहुति: ।

दत्त पुत्रविधाने - प्रतिग्रहीत्रे पुत्रदानमन्त्रा: " ये यज्ञेन० " इति पन्चवर्गोक्ता वैश्वदेविका: ।

जातकर्माङ्गहोमे प्रधान देवतासु विश्वेभ्यो देवेभ्यो आज्यहोम: प्रोक्त: । सूर्यावलोकन संस्कारे शिशोरङ्कारोपण विधौ " स्वस्तिनो० " इति वैश्वदेव मन्त्रस्य विनियोग: ।

बर्धापन विधौ आयुष्यचरु होमे विश्वेदेवा देवता: । आज्येनदशाहुतय: । कुष्माण्ड होमे - प्रधान ५१ देवतासु द्वितीया स्विष्टकृदाहुति: वैश्वदेविकेन मन्त्रेणेति विशेष: । यद्यपि तस्या देवता स्विष्टकृदग्नि रस्ति । तथा च चतुर्थी विश्वेदेवा देवता । तस्या स्तैत्तिरीय शाखोक्तोमन्त्रोयथा :- " देवाजीवन काम्या यद्वाचानृत मूदिम् । तस्मिन् तस्मान्न इह्मुन्चत विश्वेदेवा: सजोषस: " ।।

उपनयन प्रयोगे - आचार्य समीपेशिशुंनीत्वा माल्य- श्रीफलसमर्पण पूर्वक मभिवाद्य " ये यज्ञेन० " इति पन्चवर्गात्मकं वैश्वदेव सूक्तं पठेत् । ब्रह्मचारिणेदण्ड प्रदाने " स्वस्तिन० " इति वैश्वदेविको मन्त्रो विनियुक्त: ।

महानाम्नी व्रत कर्मणि " भद्रंकर्णेभि: ० शन्न० स्तुषेजनं० " इत्यष्टसु तिसृभिर्वैश्वदेविकैर्मन्त्रैर्भुवमभिमृशेत ।

समावर्तने प्रधान होमे विश्वान्देवान् दशसमिभ्दि: " ममाग्नेवर्चो० " इति सूक्तेन जुहुयात ।

मधुपर्के - वैश्वदेवै: " मधुवाता० " इति त्रिभिर्ऋग्भिर्मधुपर्कविदाणं कुर्यात् । उत्तरस्यां - दिशि मधुपर्कोत्तदोपे " विश्वेत्वादेवा आनुष्टुभेनच्छन्दसा भदायन्तु " इति सौत्रो वैश्वदेविको मन्त्रो विनियुक्त ।

विवाह संस्कारे - वधू हृदयमिमर्शने " यत्कदीवां ० " इति परिशिष्टोक्त वैश्वदेव मन्त्रेण विहितम् ।

आग्रयणहोमे - प्रधान देवतासु तिसृषु मध्यमा विश्वेदेवा: । तेषां सजूर्ऋतुभि: सजूर्विधाभि: सजूर्विश्वेभ्यो देवेभ्य: स्वाहा " इति सौत्रमन्त्रेण चरुद्रव्येण होम: । स्विष्टकृध्होमान्ते अवशिष्टं चरुं ददिाणेनपाणिना भिमृस्य, " भद्रान्ना:

श्रेय: समनैष्ट देवा स्त्वया वशेन समशी महित्वा । सनोमयोभू: पितो आविशेह शन्नोभवद्धिपदेशं चतुष्पदे इति वैश्वदेविक सौत्र मन्त्रेण प्राश्याचामेत् ।

शान्तिकर्मसु

मूल जनन शान्तौ - २४ प्रधान देवतासु प्रथमा- विश्वेदेवा देवता: । अत्र पायसद्रव्यम् । नाममन्त्रेणाष्टावाहुतीर्दद्यात् । अभिषेके पि वैश्वदेव मन्त्रा: पूर्वोक्ता एव परिगृहीता: । प्रसव वैकृत शान्तौ - अस्य वामीय सूक्तेन तद्विष्णो रिति मन्त्रत:। जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् (संस्कारकौस्तुभे शान्त्यध्याये) इति वचनानुसारम् अस्यवामीयाख्यवैश्वदेवसूक्तेन तिलाज्येन होमे विहित: ।

सर्वविध शान्ति कर्मसु स्थापित कुम्भ जलाभिमन्त्रणे वैश्वदेविका: शान्तिसूक्त गता एव नवि मन्त्रा विहिता: ।

व्रतोद्यापने

सर्वविध व्रतोद्यापनादौ सर्वतो भद्र मण्डल देवतानामावाहनं भवति । तत्र स्वतन्त्रेण नाम्ना - अग्नि- यम मध्ये विश्वेदेवा आहूयन्ते । तत्र वैदिको मन्त्र: - " ओमास:" संहिता मन्त्रेषुद्धृत: । अत्र केवलं पौराण मन्त्र: प्रस्तूयते । दैवे कर्मणि पित्र्येच ये मुख्या: सर्वदा शुभा: । मण्डले स्थापयामीह सुखानुष्ठान सिद्धये ।।

एकादशी व्रतोद्यापने - प्रधानदेवताया: परितो ष्टदेवतानामसु - चतुर्थ: विश्वदेवा: सर्वविधमूर्तीनां प्रतिष्ठादौ प्राप्ते जलाधिवासे अस्मवामीयं वैश्वदेविकं सूक्तम् ।

प्रासाद वास्तु प्रतिष्ठायाम् - " अग्निर्यजुर्भि:" इत्यनुवाकेन प्रतिद्रव्यं होमा: । तत्र विश्वेदेवा ऊर्जा" इत्यूर्जा प्राप्तिनिमित्तकं वाक्यं वैश्वदेविकम् ।

काम्यवृषोत्सर्गे - पुराण श्लोकैस्तर्पण विधौ " विश्वेदेवास्तथादित्या: साध्याश्चैवमरुद्गणा: । इति श्लोकेन विश्वेदेवानां विहितम् तर्पणम् ।

तैत्तिरीयाणामुदक् शान्तावपि बहवो मन्त्रा: सूक्तानिच वैश्वदेविकानि सन्ति । ब्रह्मचारिमरणे - तस्य व्रत विसर्गाङ्ग कर्मणि आज्येन विश्वेदेवानां नाममन्त्रेण आज्यहोमो विहित: ।

इत्थं सर्वविध नित्य नैमित्तिक काम्येषु प्रात: स्मरणादारभ्यौर्ध्वदेहिकान्तेषु स्मार्तकर्मसु यत्र तत्र विश्वेदेवानां यावत्सम्बन्धो वलोकित:, तमनुसन्धायात्र सम्बन्धाध्याये प्रतिपादित: ।

इति स्मार्त कर्मसु विश्वेदेवानां सम्बन्ध: ।

--००--

पैतृक कर्मसु विश्वेदेवा:

पूर्वं श्रौतयागेषु विश्वेषांदेवानां विनियोगाा: प्रदर्शिता: । इदानीं पैतृक कर्मसु विश्वेदेवा नुसन्धीयन्ते । वैदिकं कर्म द्विविधम् । दैविकं पैतृकन्च । दैविक कर्मसु आधानादि राजसूयान्ता: श्रौतयागा: प्रोक्ता: । पैतृक कर्मसु मरणादारभ्य सर्वविध श्राद्धानि, स्मार्तसप्त संस्थासु चतस्रो ष्टका संस्था:, पिण्ड पितृयज्ञ:, चातुर्मास्य यागाङ्गा पित्र्येष्टि: पितृमेधश्च । दैविक कार्येषु तत्तत्कार्याभिमानि देवता: प्रधानत्वेन, अन्या अधि- प्रत्यधि- अङ्ग- परिवार- मण्डलादि देवता गौणत्वेन संस्तूयन्ते, आहूयन्ते, इज्यन्ते च । तथैव पैतृक कर्मसु पितृप्रधानत्वात् पितरोदेवता: प्रधाना: । परन्च " दैवंकृत्वा पैतृकं चरेत् " इत्यभियुक्त वचनानुसारेण पैतृक कर्मसु सर्वासां देवतानां समष्टिरूपत्वात् विश्वेदेवास्एव परिगृहीता: सन्ति । सर्वासां देवतानां मुखरूपो यथा अग्नि:, तथैव सर्वासां पितृदेवतानां मुखरूपोविप्रपाणि: । उक्तन्च:- " अग्निमुखावैदेवा: पाणिमुखा: पितर इति " (आ० गृ०सू० ४-८) ज्वालारूपे ग्नि-मुखे यथा देवतोद्देशेन हवनीय द्रव्यं हूयते तथैव पैतृक कर्मसु विप्रपाणावग्नौकरण विधिना सिद्ध: पाको हूयते । को यं पितृलोक इत्यस्मिन्विषये नैरुक्त परिशिष्ट रूपे द्वितीयाध्याये ऊर्ध्वमार्गगति प्रकरणे अष्टमे खण्डे " अथयेहिंसामाश्रित्य० इत्यतो ग्रे दक्षिणायना त्पितृलोकम् " इत्यत्र सम्यक् प्रपन्चितम् । तदनु मरणानन्तरमेव जीवस्य पैतृकत्वम् । पैतृक कर्मस्वादौ वैश्वदेविक कर्म प्राप्ति: । तत्रद्वादशाहे त्रयोदशाहेवा यथाशास्त्रं) सपिण्डिकरण श्राद्धे काम काल संज्ञका विश्वेदेवा आहूयन्ते, दानादिना पूज्यन्ते च । अत्र काम काल संज्ञका एव विश्वेदेवा: कथंस्युरिति विचार्यते ।

विश्वेदेवात्मकस्य विराट् ब्रह्मणो ङ्गरूपा देवता स्तत्तत्कर्मानुसारिण्यो भवन्ति । पैतृक कर्मसु विश्वेदेवा इति नाम्नैव देवतान्हानम् । ते विश्वेदेवा पि कर्मानुसारिणो भवेयु: । मृतस्य या इच्छा (मनीषा:) अतृप्ता: तत्तच्छान्त्यर्थं मुपयुक्ता: कामसंज्ञका स्तथा यमस्य कालवाचकत्वान्मरण कालादारभ्य, ततो ग्रे आतिवाहिक देहग्रहणान्-मोदापर्यन्तं नेतारोदेवा: कालमण्डलत्वात्कालवाचका: सन्ति । अतो विश्वेषांदेवानां काम-काल संज्ञा । तेषां विना सपिण्डी करणमसम्भवं, तर्हि कुत: करिष्यमाणानि पैतृकाणि ? अतएव काम-काल इति संज्ञा चरितार्था ।

अत: परं पार्वण रूपाणि षोडश मासिक श्राद्धानि, अन्यानि च भवन्ति । तेषु पुरूरवार्द्रव संज्ञका विश्वेदेवा आहूयन्ते । तत्र प्रसिद्धमेवैतिह्यं यदिष्टापूर्त कारण-रूपोर्वशी स्वरूपायामधरारण्यां राज्ञ: पुरूरवस: स्वरूप मन्थनदण्डे नाग्नेरुत्पत्ति: । आर्द्रव संज्ञा वरुणस्य वर्तते । सर्वेषु लौकिक- पार्वण श्राद्धेष्वग्नि मन्थनाभावात्कलश-स्थापना भावाच्च केवलं तत्स्वरूपास्तन्नाम्ना प्रसिद्धा अग्नि- वरुण रूपा: पुरूरवार्द्रव संज्ञका विश्वेदेवा गृहीता: । विप्रयो रुपर्यनयोरावाहनं भवति नत्वन्येष्वालम्बेषु । अतएव पुरूरवार्द्रव संज्ञका विश्वेदेवा अग्नि-वरुण स्वरूपा इति स्थितम् ।

पार्वणैकोद्दिष्ट विधि मिश्रिते महालये - तीर्थे- तर्पणे च विश्वेदेवा धुरि लोचन संज्ञका भवन्ति । तस्यदं कारणं यत् प्रावृडन्ते कन्यागते सवितरि (प्राय:) महालयारम्भ: । अतो वर्षा काले सर्वे देवा दिविस्था भवन्ति । मध्ये मेघमण्डल माच्छा-दितं भवति । मेघा असुररूपा: । तेषां वज्रादिना नाशका इन्द्रादयो धुरि लोचना (हिंसक नेत्रा:) भवन्ति । लौकिके पि युद्धे सैनिका धुरि लोचना भूत्वैवाघातयन्ति । " यथादेहे तथा देवे" इत्यभियुक्तानुसारेण विश्वेदेवा पि धुरिलोचना भवन्ति । धुरि हिंसायाम् । धुरसिधुर्वे धुर्वन्तं धूर्वतं० शु०य०सं० (१-१)। तीर्थ श्राद्धे - तत्तत्तीर्थे ष्वागमन-जन्य सद्य: प्रवासेन तेदेवा धुरि लोचना भवन्तीति किमाश्चर्यम् ? मानवाणामपि तथैव ।

माङ्गलिकेषु वृद्धिश्राद्धेषु ते देवा: सत्य वसु संज्ञका: । सत्यं = वाचिकं, यथार्थ भाषणम् इति सायण: । सत्यं ज्ञानमनन्तं ब्रह्मेत्यागम: । ज्ञान स्वरूपा यथार्थ वागभि मानित्योर्देवता: सत्य पदेन, " सर्वारम्भास्तण्डुला: प्रस्थमूला" इत्यभियुक्तोक्तेन धनाभिमानिन्यो देवता वसुपदेन गृहीता: । कार्यस्य सम्पादन रूपं यथार्थ ज्ञानं, कार्येषु सत्यावाणि:, धनानि च प्रभूतान्यपेक्षान्ते । अतस्तत्र सत्यवसुसंज्ञका विश्वेदेवा भवन्ति ।

केषु चित् गर्भाधानादि संस्कारेषु वृद्धिश्राद्धे क्रतुदक्ष (दक्षक्रतुर्वा) संज्ञका विश्वेदेवा भवन्ति । सुस्नातौ दम्पतीएव संसार कार्येगृहस्थाश्रमे दक्षौ जायेते, तथा च क्रतूनां यज्ञादीनामप्यधिकारस्तस्मात्संस्कारादेव प्रारब्धो भवतीतिकारण द्वयेन तेषु गर्भ संस्कारेषु तदनुरूपा: क्रतुदक्ष संज्ञका विश्वेदेवा एवा ह्वयितुं युक्ता: ।

तीर्थ श्राद्धेषु" धनुर्धर संज्ञका विश्वेदेवा:" इति कैश्चिदुच्यते । तन्मते - तीर्थेषु पिण्ड प्रदानेन मृतात्मानो यम लोकाद्देव लोकं यान्ति । तत्र यम दूतानां प्रतिबन्ध

निवारणार्थं विश्वेदेवा धनुर्धरा भवन्ति । तेषां धनुर्धर रूपं दृष्ट्वैव ते पुर्या द्वारमुद्घाट्य तान् पितृगणान् तीर्थं द्वारेण देवलोकं प्रेषयन्ति । अतस्तीर्थश्राद्धे धनुर्धर संज्ञकाएव विश्वेदेवाः कार्याः इति उक्तम् । परन्च तच्चिन्त्यम् ।

एतेषु सर्वविधश्राद्धेषु पितृकार्यात्पूर्वं विश्वेषांदेवानां दाणादिदानम्, आवाहनम्, अर्घ्यदानम्, पूजनम्, अन्ननिवेदनन्च भवति । अधिकारानुसारेण क्वचि दग्नौकरणात्मकः पाणि होमो पि विश्वेदेवस्थानीय विप्रपाणौ भवति । दक्षिणा-दान मध्येतेषां प्रथममेव । विकिर- प्रकिर- उच्छिष्टादि अतिरिक्त पिण्ड त्रयेष्वाद्यो विकिरो वैश्वदेवात्मकः । उक्तास्तस्याधिकारिणः - साध्यादेवा इति । उक्तन्च :-

असोमपाश्चये देवा यज्ञभाग विवर्जिताः ।
तेषामन्नं प्रदास्यामि विकिरं वैश्व देविकम् ।।

अनेन ज्ञायते यदेवाः साध्याः सोमादिक्रतुषु नाहूता अतएव यज्ञ भाग रहिता एव तिष्ठन्ति, तेभ्यो विश्वेदेवैनमिभिर्विकिरमन्नं प्रदेयमिति । नो चेत्तेषां हविर्भागित्वं कुतो पि नस्यात् । श्राद्धाङ्गतर्पणे पि विश्वेषांदेवानामेव द्वितीयया विभक्त्या तर्पण-मादौ कृत्वा पश्चाद्यथाश्राद्धं पितृ तर्पणं विहितम् । इत्थं सप्तसंख्याका विश्वेदेवाः तत्तत्प्रयोगानुसारेण नाम भेदेन च समाम्नाताः । अतः श्राद्ध यज्ञेषु विश्वेषां देवानां प्राथम्यं महत्वन्च सुनिश्चितम् ।

पैतृक कर्मान्तर्गत गृह्योक्त स्मार्तसप्तसंस्थासु अष्टकासु विश्वेदेवाः

श्रौतकर्मसु अग्निष्टोमादिकाः सप्तसंस्थाः सन्ति, तथैव गृह्ये पि सप्तसंस्था भवन्ति । ता यथाः - १- श्रवणाकर्म २- आश्वयुजी कर्म ३- प्रत्यव रोहणम् । ४-७ अष्टकाश्चतस्रः । प्रथमं श्रावण्यां पौर्णमास्यां, द्वितीयम् आश्विन् पौर्णमास्यां, तृतीयंमार्गशीर्षपौर्णिमायाम् , चतुर्थादि सप्त, पौषादारभ्य चैत्र पर्यन्तं चतुर्षु-मासेषु कृष्णपक्षाष्टमीषु (भारतस्य दक्षिणापथे अमान्तमासमानेन मार्गशीर्षा-दारभ्य फाल्गुन पर्यन्तं) स्मार्त संस्थाकर्म विहितम् । तत्र प्रथमादि त्रीणि देवता सम्बद्धानि पराणि चत्वारि पितृसम्बद्धानि । ततो पि प्रतिमासं कृष्णाष्टम्यां , प्रथमायामन्तिमायां वा ष्टम्यां चत्वारि इति विकल्पः सौत्रः । अस्मिन्केवला पितृ-त्रयी ग्राह्या भवति । अस्य प्रारम्भात्पूर्वेद्युः सप्तम्यां पिण्डपितृयज्ञ विधानेन श्राद्धं

कृत्वा, ओदनं, कृसरं (खिचड़ी) पायसं = खीरं च अथवा खीरस्थाने अपूपं = मिष्टान्नं अतः शराव (सेटक) परिमितं निर्माय उदीरताः० ' इत्यष्टाभिर्ऋग्भिश्चतुर्दशभिर्वा गृह्याग्नौ तैरेवद्रव्यै हुत्वा श्राद्धं समापयेत् । अनन्तरं श्वोभूतेऽष्टम्यां पशुकल्पश्चेत्पशुनाथवा स्थालीपाकेन अष्टकाकर्म ' आरभेत् । अस्यकर्मणः प्रधान देवता ' विश्वेदेवाः सन्ति । अन्येषां चिन्त्यमानानां लघ्वाचार्याणां मते - अग्निः, सूर्यः, प्रजापतिः, रात्रिः, नक्षत्राणि, ऋतवः, पितरः, पशवः, एतेऽपि देवताः सन्ति । तत्रास्यैक-मत्याभावे तन्मतं चिन्त्यमेव । सूत्रकाराणां च विश्वेदेवा विषये मतैक्यं ज्ञायते । पशुकल्पश्चे प्रोक्षणोपाकरणवर्जं श्रौतवत्पशुं संज्ञप्य वपामुत्खिद्य ' वहवपां जातवेदः०' (आ० गृ० सू० २-४) इति मन्त्रेण वपां जुहुयात् । पश्चात् पश्वङ्ग भूत स्थालीपाकेन सामान्य स्थालीपाकेन वा सप्ताहुतीर्जुहुयात् । तत्र मन्त्राः समानाः ।' अग्नेनय सुपथा०' इतिद्वे (ऋ०सं०मं०) ' ग्रीष्मोहेमन्तः० शान्तापृथिवी० आपोमरीचीः० विश्वआदित्याः० एतेचत्वारः सौत्रामन्त्राः । (आ०गृ० सू० २-४) सप्तमः - प्रजापतेनत्वदेता० इति प्रसिद्धः अष्टमीं स्विष्टकृदाहुतिं हुत्वा विप्रसन्तर्पणे न कर्म समापयेत् ।

परेऽहनि नवम्यामन्वष्टक्यंनाम कर्मा रभेत् । तत्र पूर्वेद्युः संज्ञप्तस्य पशोः पिशितं संश्रप्य दक्षिणा प्रवणे ऽग्निमुपसमाधाय वस्त्रेणाऽग्नि स्थानं संवेष्ट्योत्तरस्यां दिशिद्वारंकृत्वा समूलैः कुशमुष्टिभि रविधून्वन् स्त्रिः परिस्तीर्य बर्हिषि पञ्च हवींष्या सन्न सादयेत् । १- ओदनं २ कृसरं ३- पायसं ४ दधिमन्थान् ५- मधुमन्थान इति पञ्च हवींषि । मन्थोनामसक्तुः (यवपिष्टम्) ततः श्रौतसूत्रोक्त (अ० २ खं० ६-७) पिण्डपितृ यज्ञ विधानेन मधुमन्थवर्जं हुत्वा पितृभ्यः मधुमन्थमिश्रं० पिण्डदानं कुर्यात् । मातृभ्यः सुरा - यवागूं मधुमन्थञ्च संमिश्र्य पिण्डानि दद्यादित्यधिकम् । इदं पिण्ड-दानं भूमौ कर्षित (नालंकृत्वा) रेखाद्वयोः , षट्सुवा वृक्षाकारेषु कार्यमित्येके । प्रथमरेखायां पितृत्रय्याः नपरायां मातृत्रय्याश्च पिण्डदानं कार्यम् । अस्मिन्नन्वष्टक्य कर्मणि नवावरान् विप्रान् तदधिकानयुग्मान्वा भोजयेत् । तेन विश्वेदेवाः प्रीणन्ति ।

अन्येषु श्राद्धेषु पितरः प्रधाना भवन्ति, अष्टका संस्था श्राद्धेषु विश्वेदेवा एव प्रधाना इति विशेषः । अस्य कर्माप्यन्येभ्यः श्राद्धेभ्यो भिन्नम् । होमो ऽपि गृह्याग्नावेव । पशुकल्पो ऽपि विकल्पेन स्वीकृतः इति ।

--

अथ पिण्डपितृयज्ञे पितृमेधे च विश्वेदेवा:

अत्र विश्वेदेवानां सम्बन्धो निरूप्यते । सर्वेषु श्राद्धजातेषु यथा यवोदकं तिलोदकं च भवति, तदनु यवोदकेन क्रियमाणा: क्रिया: सव्येन वैश्वदेविका भवन्ति । तिलोदकेनापसव्येनानुष्ठेया: क्रिया: पैतृका भवन्ति । पिण्डपितृयज्ञे, मरणान्ते - पितृमेधे च केवलं पिण्डदानं, होमश्च विधीयते । तत्र विश्वेदेवानामावाहनाभावे वैश्वदेविका: सर्वा: क्रिया लुप्यन्ते । श्राद्धे विश्वेदेवस्थानीयौ द्वौ विप्रावामन्त्र्येते, प्रदक्षिणीय क्रियेते, नमस्क्रियेते, वैश्वदेवकानि वचन प्रतिवचनान्युच्यन्ते, अर्चौ सं स्क्रियेते, आवाहनम्, अर्घ्य प्रदानं, पूजनं, पक्वान्न परिवेषणम्, अङ्गुष्ठ निवेशनम्, आचान्तं चापोशनम्, तृप्तिप्रश्नम्, पिण्डदाने वाक्यमस्त्विधं देवतीर्थेन तर्पणं, दक्षिणादानं, विसर्जनम् इत्यादिका वैश्वदेविका: क्रिया यथा भवन्ति, नतथा प्रयोगयोरनयो: । आश्वलायन सूत्रिकाणां कृष्णयजु: शाखीयसूत्रिकाणां च विप्रभोजनं श्राद्धे प्रधानम्, तेन विश्वेषां देवानां विना तस्य कर्तुमशक्यत्वात् । माध्यन्दिनादि कात्यायनानुवर्तिनां तु पिण्ड दान प्रधानं श्राद्धं भवति, तेन केवलं पितृ प्रधानमेव तद् भवति । तथैव पिण्ड पितृ यज्ञ पितृमेधयो: केवलं पितृ प्रधान त्वा त्पित्ष्वेव विश्वेदेवाना मन्तर्भावो पलक्ष्यते, नतु स्वतन्त्ररूपेण । अत: प्रयोगद्वयो र्विश्वेदेवानां श्राद्धवत् स्वतन्त्रोल्लेखाभाव:, पितृष्वेव विश्वेदेवानामन्तर्भूतत्वादिति ।

--

चातुर्मास्ययागान्तर्गतायां वित्र्येष्ट्यां विश्वेदेवा:

इयमिष्टिर्दक्षिणाग्नौ क्रियते । सा शंयुवाकान्ता उपांशु प्रयोज्या च । यानि प्राङ्मुखानि वैश्वदेविकानि तानि दक्षिणामेव प्राचीं मत्वा कार्याणि । अस्या: सामिधेनी स्थाने "उशंतस्त्वा०" इत्यृचं त्रिरनवानं पठित्वा तासामुत्तमेन प्रणवेन आवह देवान् पितृन यजमानाय" इति सौत्र निगदमुपसन्तनुयात् । अस्यामिष्टौ देवा: (विश्वेदेवा:) पितरश्चेज्यन्ते) अस्यायमर्थ: - यत्रैव शब्दवत्सु मन्त्रेषु देवशब्दानन्तरं पितृशब्दं ब्रूयात्, न केवलं देवशब्दमिति । यथा:- ईडामहै देवाँ ईडेन्यान् नमस्यामनमस्यान्यजाम यज्ञियान् । तथाच - इदंमे देवा: पितरोहविर्जुषन्तामित्यादि । प्रतिपत्ति वाक्यादन्यत्र पितृशब्दो न प्रयोक्तव्य इत्येके ।

आवह देवान् पितॄन् यजमानाय इत्यवसाय, आज्यभागावावाह्य, पितॄन्सोमवतः, पितॄन् बर्हिषदः, पितॄनग्निष्वात्तान्, यमं वैवस्वतं वा आवह, देवां आज्यपां आवह, अग्निंहोत्रायेत्यादि० । प्रादेशादिलोपः, तूष्णीं निरसनादि, मन्त्राणां क्रियाविशेषण-त्वान्मन्त्रलोपेपि क्रियालोपो न भवति । शेषं समानम् । अत्रायमेव विशेषः, यत् पैतृक कर्मण्येव विश्वेदेवानामन्तर्भावो विहितः । स्वतन्त्र रूपेणावाहनं, याज्यापुरोनुवाक्यादयो-नोक्ताः इति ।

इति पैतृक कर्मसु विश्वेदेवाः ।

--००--

ऋग्विधानोक्ता वैश्वदेविकाः काम्यप्रयोगाः ।

तत्रादौ सर्वविधानुष्ठान योग्यता सिध्यर्थं काया-वाचा-मनसां शुद्धिरावश्यकी। तच्छुध्यर्थं - बहुविधाः - सांकल्पिकाः, गोशतरूपनिष्कदानात्मकाः, औपवासिकाः, पूर्वोत्तराङ्ग विष्णुश्राद्धहोमसहिताः, कृच्छ्रचान्द्रायणादि व्रतरूपाः प्रायश्चित्त विषयः समाम्नाताः । तदनुरोधेन ऋग्विधानोक्त काम्य कर्माधिकार सिद्धये कृच्छ्र प्रायश्चित्तं विधीयते । तत् स्थालीपाक विधानेन होमपूर्वक मनुष्ठेयम् । तस्मिन्होमे वैश्वदेवी आहुतिरपि वर्तते । उक्तञ्च परिभाषा प्रकरणे - यथा - अन्ते द्वादश रात्रस्य स्थालीपाकं प्रकल्पयेत्। अग्नयेवाथ सोमाय तृतीयाच तयोः सह । वैश्वदेवीच रौद्रंच जुहुयाज्जुहुयाद्धुतेर ततः । कृच्छ्राणामेष सर्वेषां विधिरुक्तो नु पूर्वशः । इति प्रायश्चित्त विधाने विश्वेदेवाः ।

अथ संहितोक्ताः प्रयोगाः ।

आनोभद्रीयमायुष्यं वैश्वदेवं जपन्मुनिः । मुमूर्षुरपि जप्त्वैत दीर्घमायुरवाप्नुयात् ।।अपमृत्यु निवारण पूर्वकं दीर्घायुष्य प्राप्त्यर्थं च ' आनोभद्राः ' (१,८९, १-१०) इति सूक्तं सहस्रं जपेत् । (ऋ० वि० १-१११)

आपत्सुसर्वकामोवा त्रितं नित्यंजपे दृषिम् । जपन्निन्द्रमितिस्नातो वैश्वदेवंतु सप्तकम् । मुच्यते जुहुयादाज्यं विश्वस्मा देवसों हसः । (१-२७,२८)

सर्वविधासु आपात्सु बहुप्रकारेण तत्कामः ' चन्द्रमा अप्स्वन्तरा० ' इति त्रित ऋषिदृष्टं सूक्तं जपेत् , आपद्भ्यः प्रमुच्यते । (१,१०५, १-१९) सर्व पाप प्रणाशार्थं ' इन्द्रंमित्रं वरुणमग्निमूतये ० इत्यनेन सूक्ते नाज्यहोमे पापनाशः । (१,१०६,१-७) निवर्त्यं पंच यज्ञांश्च हुत्वा चाग्निंकृताह्निकः । ये देवासो दिव्यनया जपन्कामानवाप्नुयात् । (१-३८) कर्ता कृत संध्या- पन्च महायज्ञादि नित्याह्निकः, ' येदेवासो ० ' इत्यनयाऋचा जपंविधायेष्टि सिद्धिं प्राप्नोति ।

स्तेयंकृत्वाद्विजोमोहात् त्रिरात्रो पोषितः शुचिः । सूक्तं जप्त्वास्य वामीयं दाप्रमुच्येत किल्बिषात् । ज्ञातिपुत्र सुहृन्मित्रैर्यश्च राज्यंचिकीर्षति । नित्यंस नियतो

भूत्वा सूक्तं तु मनसा जपेत् । (१-४४-४५) कश्चन ब्राह्मण-क्षत्रिय - वैश्यकुलजो द्विज:मोहवशात् स्वर्णचौर्यं करोति तर्हि त्रि दिनात्मकमुपोषणं कृत्वा स्नानादिना-शुचिर्भूय " अस्यवामस्य०" इति सूक्तं जप्त्वा शीघ्रं पापान्मुक्तो भवति । (१-१६४-१-४१) । अथ च अपहृतराज्योन य: पुनाराज्यंप्राप्तुकाम: सन् प्रत्यहं यमनियमादिभि: संयतो ब्रह्मचर्येणावस्थाय मनसा सूक्त पाठानुष्ठानंन कुर्यात् । ज्ञातिपुत्रमित्रैरपहृतं राज्यं प्राप्नोति ।

येकेचज्मेत्यृचं त्वेतां ध्यायन्निशि दिवौकस: । अग्नौहुत्वातयाचाज्यं दीर्घमायु रवाप्नुयात ।। (२-२६२) अनेन मन्त्रेण रात्रौ विश्वेदेवानां ध्यानं कृत्वा उदिते सवितरि अनयैवाग्नौ कृतहोम: कार्य: । तेन दीर्घायुष्यप्राप्तिर्भवति ।

शंवती: शन्न इन्द्राग्नी इत्येतां सततं जपेत् । न रक्षोभ्यो न भूतेभ्यो व्याधिभ्यो न भयं भवेत् । (३-३०३) (अनेन वैश्वदेविकेन शान्ति सूक्तेन," शंवती: ०" इति शान्ति परिशिष्टे न च जपित्वा रक्षोभूतादि व्याधयो नश्यन्ति ।

नतमित्यष्टकं सूक्तं वैश्वदेवं जपन्मुनि: । कृत्स्नंतु कल्मषंहत्वा विश्वेदेवै: सहासते । (६११) अनेनाष्टर्चं सूक्तेन विश्वेदेवानां जपंकृत्वा सर्वपाप विनिर्मुक्त: सन् कर्ता विश्वेदेवानां सायुज्यं गच्छति ।

ममाग्नेवर्च इत्येतत्सर्वं कामैर्जपेद् द्विज: । जुव्हन्नाज्यमनेनैव सर्वान्कामानवा-प्नुयात् । (६२०) । येनकेनापि सङ्कल्पेन सूक्त जपं कृत्वा तद्दशांशाज्य हवनेन च विश्वान् देवान्समाराध्य मनेप्सित फल मवाप्नोति ।

उतदेवा इतिजपे दामयावी यत व्रत: । घृतकुम्भं निधायाथजुहुयाज्जातवेदसि। कुम्भ सम्पातमन्यस्मिन्कांस्यपात्रे निधापयेत् । यो न्नार्थेन न चान्नंस्या त्सइदं सम्प्रकाशयेत् । तेनाज्येनाङ्ग मभ्यज्य शनैरन्नभाग्भवेत् । रोगार्तस्याप्यनेनैव गात्रमंक्त्वा जपेदिदम् । अजीर्णान्नोत्थं जयीत सुखीभवति विज्वर: ।। (६३६-३८)। अमांशपीडित: अनेने जपं कृत्वा, आज्यं जुहुयात् । कुम्भमेकं संस्थाप्य तदुपरि आहुति-शेषमाज्यं सम्पात्यतत्रस्थं घृतंप्राशयत् , निरामो भवति ।अन्नार्थी चे त्पूर्ववत्सम्पाद्य तेनाज्येन स्वशरीमभ्यज्येदं सूक्तं जपेत् । अजीर्णरोग पीडितो ज्वरग्रस्तोवा रोगमुक्त: सन् सुखी भवति ।

अग्ने अच्छावदेत्येतद्धन काम: प्रयोजयेत् । नियत: सर्पिषा हुत्वा जपेदयुतश: पुन: । खादिराणांहि समिधां जुहुयाद्दशतीर्दश । दशकृत्व: सदारेण रायस्पोषेण पुष्यति । बिल्वोदुम्र पालाशैस्तथा रोहितकैश्चय: । जुहुयाद्धन कामस्तु रायस्पोषेण पुष्यति । बैभीतकैर्घ्मैर्बैल्वैश्च जुहुयादर्धमासकम् । द्विषत् द्वेषणं तस्यान्ते सूक्तमेतत् प्रयोजयेत् । द्विर्षतं धनिनं हत्वा द्विषतो विन्दते धनम् । अथवा जप्यमेवस्या द्रायस्पोषा धनार्थिना ।।(६३६-४३) धनकाम: सूक्त मिदमयुतं जप्त्वा तद्दशांशं खादिरै: समिभ्दि राज्येन च हुत्वा धनपतिर्भवति । अथच बिल्व- उदुम्बर- पालाश- रोहितकैश्च समिभ्दि जुहुयात् । अथवा शत्रुदायकाम: बैभीतकैर्बैल्वैश्च समिभ्दि रर्धमासंयावत् जुहुयात् । द्वेष कर्तारं शत्रुं हत्वा तस्यधनं लभते । अथवा अन्न- धन कामार्थी केवलं सूक्त जपेनापि सिद्धि माप्नोति ।

उत्तृदस्त्व भूत्वा प्यग्नेर्मेषजमन्तिकात् । अरण्यमेत्य पाठांतु क्रीणीयाद्यवमुष्ठिना। यदि सौम्येसि सोमाय त्वां परिक्रीणाम्योषधिम् । यदि वारुण्यसि वरुणाय त्वां परि क्रीणाम्य हं तत: । वसुभ्यश्चाथ रुद्रेभ्य आदित्येभ्योथवा पुन: । वैश्वदेव्यसि विश्वेभ्य: परिक्रीणाम्यहंतत: ।प्राप्त्वा सुमनस: पूर्वमोध्यासह वीरुधे: । तस्यवीर्यं समादद्ये कर्मयत्र करिष्यति । तांतुमध्ये संदधीतौषधीनांचविहायसि । ग्रहणे त्वौषधीनान्च सर्वेत्रैष विधिर्भवेत् ।

अत्र विश्वान्देवान्प्ररिक्रय्य पुष्पाणि विदिदा विकिरेत् । तेन विश्वेदेवा: तस्य शत्रोर्षीलं कर्त्रे प्रयच्छन्ति । ग्रहण कालेमन्त्र सिध्यर्थमेष विधिरुक्त: ।

देवा: कपोत इतितु कपोतस्य प्रवेशने । सूक्तेन जुहुयादाज्यं यमदूतं हतं विदु: । (६९०) गृहे कपोत प्रवेशे तेनाज्य होमात्मकं प्रायश्चित्तं विधीयते । तेनापमृत्युनिवारणं लक्ष्यते ।

राज्याभिषेके - विश्वेदेवा उदीच्यांस्त्वा अभिषिंचंतु श्रेयसे । इति मन्त्रेण राजानमभिषिन्चेत् । तेन कल्याणं भवति । (७०२)

एवमेव समाहृत्य वासरी संहिता भवेत् । रौद्रा दित्या वैश्वदेवी यद्देवत्यांच कामयेत् । इमांसंहितां वैश्वदेवीं विद्यात् , यदिविश्वेदेवानांप्रीतिकामनास्यात् ।

तस्यायमर्थः -

ऋग्वेद संहितायां यावन्तो वैश्वदेविकामन्त्रास्तेषां सङ्ग्रहरूपा वैश्वदेवी संहिता भवति । इयमेव दैवत संहिता इत्युच्यते । तस्या वैश्वदेव्याः संहितायाः पारायणं होमादिकञ्च सम्पादनीयम् । तेन विश्वेदेवाः प्रीताः सन्तः ऐहिकामुष्मिकञ्च फलं प्रयच्छन्ति ।

इति ऋग्विधानोक्ता वैश्वदेविकाः काम्य प्रयोगाः ।

--००--

अथ पन्चमहायज्ञेषु वैश्वदेवयाग:

तत्रादौ प्रथमं पन्चमहायज्ञा लिख्यन्ते । १- देवयज्ञ: । २- भूतयज्ञ: । ३- पितृयज्ञ: । ४- ब्रह्मयज्ञ: । ५- मनुष्य यज्ञ इति । अथ तेषां परिभाषा पूर्वकं व्यवस्था व्याख्यायते। अग्नौजुहोति स्वाहाकारेण देवताभिध्यान पूर्वकं स देवयज्ञ: । भूमौ गृह्योक्त स्मृत्युक्त विधिना च देवेभ्यो भूतेभ्यश्च (इदंनममइति) त्यागरहित स्वाहाकार शब्देन बलिरूपा हुतयो विकीर्यन्ते स भूतयज्ञ: । तस्मिन्नेव बलिकर्मणि प्रत्यहं प्राचीनावीतिना " पितृभ्य:- स्वधा " इति सौत्र मन्त्रेण पितृतीर्थेन पितृभ्यो यदन्नं त्यज्यते स पितृयज्ञ: । स्वाध्यायो ध्येतव्य इतिविधि वाक्य प्रयुक्त गुर्वध्ययन पूर्वकं गृहीतानां स्व शाखादि वेद चतुष्टयानां षडङ्गसहितानां यथा नियमं प्रतीकवाक्यैश्च वा ब्रह्मान्जलि निधान पुरस्सरं यत्स्वाध्याय मधीते सब्रह्मयज्ञ: । ब्रह्म वेद: तस्य यजधातो: सङ्गति करणार्थे सम्बन्ध: ।

निवीतिं कृत्वा (सव्यापसव्य रहित माला सदृश यज्ञोपवीत धारणं निवीतीति) सनकादि मनुष्येभ्य ऋषितीर्थेन यदाहुतिरूपं बलिप्रदानं स मनुष्य यज्ञ: । अथवा न्येषां महर्षिणां मते तिथिसत्कारो मनुष्य यज्ञ इति निगद्यते । एतेपन्चयज्ञा पन्चसूना दोष निवृत्त्यर्थं प्रत्यहं सायंप्रात द्विवारं कर्तव्या: ।

कण्डनी- पेषणी- चुल्ली पयोकुम्भी च मार्जनी ।
पन्चसूना गृहस्थस्य ताभि: स्वर्गं न गच्छति ।।

इति स्मृति वचनानुसारं पन्चविध सूक्ष्मजीव हत्यादोष निवृत्त्यर्थं दैनिक पन्च-महा यज्ञानां विधानम् । एतेपन्चयज्ञा वैश्वदेव यज्ञ शब्देन लोके व्यवह्रियन्ते । यथाहि देवयज्ञे सूर्याग्न्यादि सर्वेषां हुतादानां देवानां सङ्ग्राहकत्वात् । भूतयज्ञे पि सर्वेषामहुतादानां देवानां सङ्ग्रह: । पितृयज्ञे पि तल्लोक वासिनां सर्वेषामेवसङ्ग्रह: । ब्रह्मयज्ञे सर्वेषां देवानां मन्त्ररूपेण सङ्ग्रहो स्ति । मनुष्य यज्ञे - " यावतीर्वै देवतास्ता: सर्वा वेद विधि ब्राह्मणे वसन्ति " इति श्रुत्यनुसारमतिथि रूपे वैदिक ब्राह्मण शरीरे सर्वेषां देवतानां वसितत्वादेते पन्चापि महायज्ञा वैश्वदेवा: इति सङ्गतम् । उक्तन्च :-

वैश्वदेवो दिवानक्तं न भवेतां पृथक् पृथक् ।
प्रागेव द्विरावृत्त्या कुर्याद्वासहितो द्विज: ।। (आ०गृ०प०)

अयं पन्च यज्ञात्मको वैश्वदेव याग: प्रत्यंह सायं प्रातर्विधानेन द्विवारं भवति । परमधुना तदुक्त व्यवस्थया कर्तुमशक्यत्वात् गृह्याग्नि धारणाभावाच्च सायंप्रात वैश्व-देवावेकतन्त्रेण भवत: । तत्रान्तरमपि केवल माहुति द्वय भिन्नत्वम् । तथा:- प्रात० वैश्वदेवे आद्यमाहुतिद्वयं सूर्य - प्रजापति रूपम् । सायंवैश्वदेवे अग्निप्रजापति रूपन्चेति । अन्यं समानं तन्त्रम् ।

वैश्वदेव यागे प्रोक्तानां देवानां नामानि

सूर्य:, प्रजापति: (अग्नि: सायम्) सोमोवनस्पति:, अग्नीषोमौ, इन्द्राग्नी, द्यावापृथिवी, धन्वन्तरि:, इन्द्र:, विश्वेदेवा: , ब्रह्म इतिहुतादा: । आप:, ओषधि-वनस्पतय:, गृह्य, गृहदेवता:, वास्तुदेवता:, इन्द्र:, इन्द्रपुरुषा:, यम:, यमपुरुषा:, वरुण:, वरुण पुरुषा:, सोम:, सोमपुरुषा:, ब्रह्म, ब्रह्मपुरुषा:, विश्वेदेवा:, सर्वाणि भूतानि दिवाचारिण:, नक्तन्चारिण: , राक्षसा: इत्यहुतादा: सन्तो पि हुतादानां देवतानां सहैवैतेषामहुतादानां बलिहरणे सङ्गतिर्भवति । उभयत्र विश्वेभ्यो - देवेभ्य इति पृथगाहुतिरपिदीयते । अतएवायं यागो वैश्वदेव नाम्ना प्रसिद्ध: । विश्वेदेवा एवैतेषां पन्च महायज्ञानां मुख्या (प्रधाना) देवता: । अतएवायं वैश्वदेव इति । विधिरयमृग्वेद सूत्रानुसारी व्याख्यात: । अन्यशाखा सूत्रानुसारी यावन्तोविशेषा स्तदग्रे क्रमेण लिख्यन्ते । तत्रादौ कृष्ण यजुर्वेदे विशेष: - रूक्मक नामा ग्नि रस्मिन्प्रयोगे प्रोक्त: । अग्निनामसु वैश्वदेवेतुरुक्मक: इति वचनात् । चत्वारिशृङ्गा० इतध्यानं कृत्वा ग्निंत्रि: परिसमूह्य त्रि: पर्युक्ष्य सिद्धमन्न मग्नावधिश्रित्य, उदगुद्वास्य प्रोक्ष्याग्ने: पश्चान्नीत्वा भिघार्य होमं चरेत् । तत्रदेवता:- अग्नि:, विश्वेदेवा:, ध्रुवोभूम: , ध्रुव-क्षिति:, अच्युतक्षिति:, अग्नि: स्विष्टकृत् , व्याहृतय:, (अग्नि-वायु-सूर्य- प्रजापतय:) पुन: पूर्ववत्परिसमूहनादि प्रार्थनान्तम् । ततो बलिहरणम्। तथा :- धर्म:, अधर्म:, आप:, ओषधि वनस्पतय:, रक्षोदेवजना: गृह्या:, अवसानानि, अवसानपतय:, सर्वभूतानि, काम: , अन्तरिक्षम्, नाम, पृथिवि, अन्तरिक्षम्, दिव: , सूर्य:, चन्द्र:, नक्षत्राणि, इन्द्र:, बृहस्पति: प्रजापति: ब्रह्म, पितर:, रुद्र: पशुपति: , देवा: । इमेदेवाबलि-हरणे समाम्नाता: । बलिहरणे विषये अयं श्लोक: पठ्यते :-

द्वावेकं द्वौ च चत्वारि प्रत्येकं त्रितयं तथा ।

पृथिव्यादि दशैतानि प्रत्येकं शेषमेव च ।।

अस्मिन्बलिहरणे परिषेचन विधिर्विशेष: । यथा:- आदावाहुति द्वयानन्तरमेव आहुत्योर्जलेन सकृत परिषेचनं प्रदक्षिण क्रमेण भवति तत एकस्या आहुते:, पुनर्द्वयो:, ततश्चतसृणां, ततस्तिसृणां प्रत्येकम् ततोदशानां सकृत्, अवशिष्टानां प्रत्येकं सकृत्प्रोक्षणं तैत्तिरीय वैश्वदेवे विशेषतो विधीयते । अत्र बलिहरणे आहुतीनां संख्या सप्तविंशति: । तत्रत्या पञ्चविंशी कुण्डे ग्निमुखेएव हूयते । शेषं काक बल्यादि तन्त्रं समानम् ।

(बलिहरण प्रदान दर्शक: पट्टो ग्रे प्रदर्शित:)

अथ शुक्लयजुर्वेदीय वैश्वदेव यागोक्तं वैशिष्ट्यं प्रदर्श्यते

वैश्वदेवादन्नादुद्धृत्य घृतेनाभिधारणम् । कूष्माण्डीभिरन्न प्रोक्षणं मन्त्रत्रयेण यद्देवादेवहेडनम्० (पूर्वोक्तै:) पूर्ववदग्निस्थापनं पूजनं कृत्वा जुहेत् । तत्र देवताक्रम: - प्रजापति:, अग्नि:, वायु:, सूर्य:, देवकृतो ग्न:, मनुष्यकृत:, पितृकृत: आत्मकृत:, एनस:, सर्वस्यैनस:, प्रजापति:, स्विष्टकृदग्नि: , इति द्वादशाहुति रूपो देवयज्ञ: ।

अत्रबलियज्ञ: - धाता, विधाता, वायु:, प्राचीदिग्, दक्षिणा, प्रतीची , उदीची, ब्रह्म, अन्तरिक्षम्, सूर्य:, विश्वेदेवा:, विश्वेभूता: , उषा, भूतपति: , इति सप्तदशाहुति रूपोबलियज्ञ: । पितृतीर्थेन पितृभ्य: आहुति दानं पितृयज्ञ: । ग्रासचतुष्टय पर्याप्त मन्नमुद्धृत्य विप्रायोदश पूर्वं दद्यादिति मनुष्ययज्ञ: । ब्रह्म यज्ञस्तु स्वाध्यायरूपएव पूर्वोक्त: । शेषमुत्तरमन्त्रं समानम् । वैश्वदेवस्या त्यन्तिक महत्व ज्ञापक: श्लोकोयथा:-

अकृते वैश्वदेवेतु भिक्षुके गृहमागते ।

उद्धृत्य वैश्वदेवार्थं भिक्षुकंतु विसर्जयेत् ।।

बलिहरण प्रदर्शक चक्र मग्रे प्रदर्शितम् ।

इति शुक्ल यजुशाखीयो वैश्वदेव प्रयोगविशेष: ।

--

अथ सामवेदीय वैश्वदेवे विशेष:

अग्न्यादिर्गौतमाद्युक्तो होम: शाकल एव च ।

अनाहिताग्नेरप्येष युज्यते बलिभि: सह ।। (कात्यायन:)

अत्र नादि शब्देन अग्निः, धन्वन्तरिः, विश्वेदेवाः, प्रजापतिः, स्विष्टकृदग्निः इति गौतमोक्तो होमो ग्न्यादिः । अत्र होमे त्रयो विकल्पाः-: अग्न्यादि पञ्चभि-र्होमः प्रथमः । शाकलमन्त्रं होमो द्वितीयः । उभय समन्वित होमस्तृतीयः । पक्षात्रयमपि भाष्यकार सम्मतत्वाद्यथा रुच्यनुष्ठेयम् । पक्षात्रये पि बलिदानं गृह्योक्तमेव । अत्र मन्त्रादौ व्याहृति होमो प्युक्तः । तत्र केचिद् व्याहृतिभिराज्यं हुत्वा ष्टभि रन्नं जुव्हति, तन्नयुक्तम् । उक्तन्च :-

अन्नं व्याहृतिभिर्हुत्वा हुत्वा मन्त्रैश्च शाकलैः ।

भूतेभ्यश्च बलिंदत्वा ततो श्नीया दनग्निमान् ।। (वन्हिपुराणे)

पाकनिष्पत्त्यनन्तरं विष्णुं सर्वोपचारैरभ्यर्च्य वैश्वदेवं कुर्यात् । सामवेदे अग्नेर्नामविशेषः । पावक नामानमग्निं प्रतिष्ठाप्य, परिसमूहनादिकं कृत्वा तुष्णीं समिधं च हुत्वा जुहुयात् । चतस्रो व्याहृतयः । देवकृतस्यैनसः०। पितृ० । मनुष्य० । आत्मकृत०। यद्दिवाच नक्तं० । यत्स्वपन्तश्च० ।यद्विद्वांसश्च० । एनसएनसः० ।स्विष्ट-कृत्०। इति त्रयोदशाहुतयः । पुनः समिधंहुत्वा उत्तरतन्त्रं कुर्यात् । ततो हुतशेषेण बलिदानम् । अग्नेः पश्चाद् भूमिं संशोध्य प्राक्संस्थामुदकधारां दत्वा बलिचतुष्टय पर्याप्तमन्नमादाय प्राक्संस्थं बलि चतुष्टयं दद्यात् । तद्यथा :- पृथिव्यै० , वायवे०, विश्वेभ्यो देवेभ्यः० प्रजापतये० । पुनस्तदुपरि पूर्ववत् जलधारां तदुत्तरस्यां च जलधारां दद्यात् । तदुपरि- अद्भ्यः०, ओषधिवनस्पतिभ्यः०, आकाशाय०, कामाय०, इतिबलि-चतुष्टयम् । पुनर्बल्युपरि धारां दत्वा तदुत्तरे पि पूर्ववत् जलधारां कुर्यात् । तदुपरि - मन्यवे०, इन्द्राय०, वासुकये०, ब्रह्मणे०, इति बलिचतुष्टयं तदुपरि जलधारां चदद्यात्। तदुत्तरे किंचिदुदकं दत्वा पसव्येन पितृतीर्थेन पितृयज्ञं कुर्यात् । तदुपरि जलासेकः । ततउदकं स्पृष्टवा पुनस्तदुत्तरतः पूर्वोक्तैः पृथिव्यादि पितृयज्ञान्तैर्नामाभिः चतुर्दश देवताभ्यो बलीन्दत्वा प्राणिं प्रक्षाल्य कृतान्जलि रग्निं प्रार्थयेत् । ततो वामदेव्य साम गानेन जपः ।

पितृयज्ञे- मनुष्य यज्ञे पि किन्चिद्विशेषः

पितृयज्ञ मनुष्ययज्ञ सिध्यर्थं अशक्तया ग्रासं, ग्रासचतुष्टयं, षोडशग्रास मितं वा न्नं शक्त्या पात्रे उद्धृत्यापसव्यं कृत्वा दक्षिणा मुखः सव्यं जान्वाच्य हस्ते जलं गृहीत्वा पितृ पार्वणेभ्यो मातामह पार्वणेभ्यश्च पितृयज्ञ सिध्यर्थम् इदमन्नस्वधं पितृभ्यः स्वधा इति मन्त्रेण पितृतीर्थेन जलमुत्सृजेत् । ततो निवीती भूत्वा प्रत्यङ्मुख

ऊर्ध्वजानुर्जलमादाय मनुष्य यज्ञ सिद्ध्यर्थं मिदमन्नस्यार्थं सनकादि मनुष्येभ्यो हन्त इति ऋषितीर्थेन जलमुत्सृजेत् । ततः काक बल्यादि ग्रोग्रासन्तं कृत्वा पर्वेणामन्ते स्वयं भुन्जीत ।

पाकासंभवे पि वैश्वदेः कार्यः

पाकासंभवे एकादश्यादौ तण्डुलैः पयोदधिघृत फलोदकादिभिर्वा वैश्वदेवः कार्यः। कार्यः । हस्तेन हस्तेनान्नादिभिः कुर्यादद्भिरंजलिना जले ।
कोद्रवं चणकं माषं मसुरं च कुलित्थकम् ।
क्षारं च लवणं सर्वं वैश्वदेवे विवर्जयेत् ।। (धर्म सिन्धुः)

रात्रिकृत वैश्वदेवे विशेषो यथा -

न्यन्च करणमन्त्रो- ऊँ इदंभूमे र्भजामह इदं भद्रं सुमङ्गलम् ।
परासपत्नान् बाधस्वा न्येषां विन्दते धनम्।।

इत्यस्यान्तिमे वाक्ये "विन्दते वसु" इति पाठः कार्यः । शेषं यवेभ्योनम इत्यन्तं पूर्ववत् । ततो देव पितृ मनुष्य भागाः श्रोत्रिय भोजनादिकं किमपि न कार्यम् । केवलो होमो विहितः । (शांखायन गृह्ये नारायण भाष्ये) ।

साग्निकस्यौपासनाग्ने राहिताग्नेश्च वैश्वदेवे विशेषः

प्रातः सायं वा होमं सम्पाद्य न्यन्चं कृत्वा होमीयं च पर्युक्षणान्तः कुर्वन् सिन्चेत् । ततस्तूष्णीं समिधं हुत्वा कठिन द्रव्यं चेत्पाणिना देवतीर्थेन, द्रवं चेत्स्रुवादिना होम द्रव्यमादाय ऊँ सूर्याय: स्वाहा इतिमन्त्रेणमध्ये जुहुयात् । पुनर्द्वितियामाहुति-मादाय" प्रजापतये स्वाहा" इत्यैशान्यां जुहुयात् । पुनः समिधं हुत्वा देवसवितरिति पर्युक्ष्य शेषं समापयेत् । सायंकाले- सूर्यस्थाने- अग्नयेस्वाहेति विशेषः। शेषं समानम्। अन्यासा माहुतीनां होमो बलिहरणादिक मन्त्र न भवति ।

इति साग्निकस्य वैश्वदेवः ।

--

अथर्व वेदीय वैश्वदेव प्रयोगे विशेष:

स्नानादिना शुचिर्भूता गृहिणी उदयात् प्राक् अस्तमानाच्च प्राक् गृह्याग्निं महानसीयं वा उद्बोध्य सन्धिकाले अतीते इति प्रज्वलिते ग्नौ जुहविणा आग्नये, प्रजापतये इत्याहुतिद्वयं रात्रौ आदित्याय प्रजापतये इत्याहुतीर्दद्यात् । प्रतिहोमे - आधन्तयो: परिसमूहन पर्युक्षणे कृत्वा समिधं च हुत्वा प्रधान होमो विधेय: । अभावे चरौ समिद्भि:, पयसा, आज्येन वा वैश्वदेवो विधेयएव । अन्या: प्रधाना हुतयो यथा :- वनस्पतिभ्य:, वानस्पत्येभ्य:, ओषधिभ्य:, वीरुद्भ्य:, सर्वेभ्यो देवेभ्य:, सर्वेभ्योदेवजनेभ्य: , सर्वेभ्य: पुण्यजनेभ्य: स्वाहा इतिनाम मन्त्रैर्हुत्वा अग्नेर्दक्षिणभागे भूमौ जलं निनीय प्राचीनावीती भूत्वा स्वधा प्रपिता महेभ्य:, स्वधापिता महेभ्य:, स्वधा पितृभ्य इति पितृतीर्थेन आहुतिरूपं पिण्ड त्रयं दद्यात् । पुन: सव्येनाग्नौ तार्क्ष्यायारिष्ट नेमये घृतं मह्यमिति पश्चाद् भागे, सोमाय सप्तर्षिभ्य इत्युत्तरेच हुत्वा स्विष्टकृतं जुहुयात् । वैश्वदेव कालो मध्यान्ह एव । पूर्वोक्त उभय औपासन काल: । यदि स्थालीपाक विधानेन वा वैश्वदेवश्चेदथर्वणाम् अनुमत्यैस्वाहे त्येका विशिष्टाहुति: । अथ च विश्वेभ्यो देवेभ्य: स्वाहेत्यन्तेन स्वाहाकारं समाप्य बलिहरणं कुर्यात् । तद्यथा:- अग्नये, इन्द्राग्निभ्यां, वास्तोष्पतये, प्रजापतये, अनुमतये, इत्याहुतिपञ्चकं वर्तुलाकारं दत्वा गृहाद् बहि: प्रागुदग्देशे ब्रह्मणे, वैश्रवणाय विश्वेभ्यो देवेभ्य:, विश्वेभ्यो भूतेभ्य इति बहुशो बलिं हरेत् । (केचन- सर्वेभ्यो देवेभ्य:, सर्वेभ्यो भूतेभ्य इत्यामनन्ति) पुन: स्वस्थान मागत्य पूर्वे मध्ये मृत्यवे, दद्दक्षिणेधर्माय, उत्तरे अधर्माय, ततो वर्तुलक्रमेण धन्वन्तरये, समुद्राय ओषधिवनस्पतिभ्य: द्यावापृथिवीभ्याम्, दिग्भ्य:, अन्तर्देशेभ्य:, वासुकये, चित्रसेनाय चित्ररथाय, तक्षाय, उपतक्षाय, आशायै, श्रद्धायै, मेधायै, श्रियै, ह्रियै, विद्यायै, अग्ने: प्राक् गृह्याभ्य:, देवजामिभ्य: इति बलिहरणं कृत्वा, समागतमतिथिं भोजयेत् । तत:स्वयमश्नीयात् । वेद त्रयाद्विशिष्टो यं वैश्वदेव: । हुतादेष्वहुतादेषूभयत्र विश्वेभ्योदेवेभ्य: आहुति प्रदानम् । सौत्र मन्त्ररूपेण साग्निक निरग्निकयोश्चैकतन्त्रेण, सिद्धान्नेन स्थालीपाका-न्नेन चैकतन्त्रेण सूत्रे प्रयोग विधानम् । मध्ये मध्ये किञ्चित्सूत्ररूपं गद्यम् । इति वैश्वदेव: ।

(प्रयोगो यं कौशिक सूत्रे नवमाध्यो ७३-७४ कण्डिकायां प्रपञ्चित:)


अथ सूत्रोक्ता वैश्वदेव चोदका मन्त्रा:

पुरोदयादस्तमयाच्च पावकं प्रबोधयेद् गृहिणी शुद्धहस्ता ।
समतीते सन्धिवर्णे थ हावयेत्सुसमिद्धे पावक आहुतीष्व हि: ।।१।।
अग्नये प्रजापतये च रात्रा वादित्यश्च दिवा प्रजापतिश्च ।
उदकं च समिधश्च होमे होमे पुरावरम् ।। २ ।।
होम्यै: समिद्भि: पयसा स्थालीपाकेन सर्पिषा ।
सायं प्रातर्होम एतेषामेकेनापि सिध्यति ।।३।।
अभ्युद्धृतो हुतो ग्नि: प्रमादादुप शाम्यति ।
मथिते व्याहृतीर्जुहुयात्पूर्णहोमौ यथर्त्विजौ ।। ४।।
परिमृष्टे परिलिप्ते च पर्वणि व्रातपतं हावयेदन्नमग्नौ ।
भूयोदत्वा स्वयमल्पं च भुक्त्वा पराण्हे व्रतमुपैति याज्ञिकम्।।५।।
अनशनं ब्रह्मचर्यं च भूमौ शुचिरग्नि मुपशेते सुगन्धि: ।
अग्नीषोमाभ्यां दर्शने इन्द्राग्निभ्यामदर्शने ।।६।।
आग्नेयंतु पूर्वं नित्य मन्वाहार्यं प्रजापते: ।
अथाहुतिस्तु सौविष्ट कृती सर्वेषां हविषा स्मृता।।७।।
आनुमती वा भवति स्थाली पाकेष्वथर्वणाम् ।
उभौ च सन्धि जौ यौ तौ वैश्वदेवौ यथर्त्विं जौ ।।८।।
हुता दो न्ये अहुतादो न्ये वैश्वदेवं हवि रुभये सन्चरन्ति।
वर्जयित्वा सबर्हिष: साज्या यज्ञा: सदक्षिणा: ।। ९ ।।
ते सम्यन्च इहमादयन्ता मिषमूर्जं यजमानायमिच्छत ।
विश्वेदेवा इदं हविरादित्यास: सपर्यत ।। १० ।।
अस्मिन्यज्ञे मा व्यथिष्य मृताय हविष्कृतम् ।
वैश्वदेवस्य हविष: सायंप्रातर्जुहोत्ति च ।।११।।
अप्रति भुक्तौ शुचिकार्यौ च नित्यं वैश्वदेवौ जानतायज्ञ श्रेष्ठौ ।।
ना श्रोत्रियो नानवनिक्त पाणि नमिन्त्रविज्जुहुयान्ना विपश्चित्।।१२।।
बीभत्सव: शुचिकामा हि देवा नाश्रद्दधानस्य हविर्जुषन्ते ।
ब्राह्मणेन ब्रह्मविदा तु हावयेन्न स्त्रीहुतं शूद्रहुतं च देवगम् ।।१३।।


।। इत्यथर्ववेदीयोपासन- स्थालीपाकेन सह वैश्वदेव प्रयोग सङ्ग्रह: ।।

--००--


ऋग्वेदीयं पन्च महायज्ञात्मकं वैश्वदेव चक्रम्




कृष्ण यजुर्वेदीयं पञ्चमहायज्ञात्मकं वैश्वदेव चक्रम




शुक्ल यजुर्वेदीयं पञ्च महायज्ञात्मकं वैश्वदेव चक्रम्



सामवेदीयं पन्च महायज्ञात्मकं वैश्वदेव चक्रम्



अथर्व वेदीयं पन्चमहायज्ञात्मकं वैश्वदेव चक्रम्



अथ चतुर्वेदोक्त पन्च शाखीय वैश्वदेव चक्राणि

प्रथमं तावत् चतुर्वेदोक्त पन्चशाखीय वैश्वदेव प्रयोगा उक्ता:। तेषां प्रयोगाणां प्रत्यक्ष ज्ञानार्थं वैश्वदेवचक्राणि प्रदर्श्यन्ते । परन्च तेषु चित्रेषु देवता नामोल्लेखाय स्थानाभावात् केवलं क्रमाङ्का: प्रदर्शिता: । पत्रे स्मिंस्तदङ्कानुसारेण प्रथमान्त देवता नामानि लिख्यन्ते । आहुतिकाले बलिहरणे च चतुर्थ्यां विभक्त्या ओंकार पूर्वकं स्वाहान्तं नामोच्चारितं भवति । यथा:- सूर्य:- ओं सूर्याय स्वाहा इति । अत्रतु अवबोधार्थं केवलं प्रथमान्तं नामोपयुज्यते ।

ऋग्वेदीय वैश्वदेव चक्रे देवतां नामानि

(प्रदत्त क्रमाङ्कानु सारेण ज्ञेयानि)

१- सूर्य: । २- प्रजापति: । ३- अग्नि: ॥ प्रजापति: । ४- सोमोवनस्पति: । ५- अग्नीषोमौ । ६- इन्द्राग्नी । ७- द्यावापृथिवी । ८- धन्वन्तरि: । ९- इन्द्र: । १०- विश्वेदेवा: । ११- ब्रह्मा । १२- आप: । १३- ओषधि वनस्पतय: । १४- गृह्म् । १५- गृहदेवता: । १६- वास्तु देवता: । १७- इन्द्र: । १८- इन्द्र पुरुषा: । १९ यम: । २०- यमपुरुषा: । २१- वरुण: । २२- वरुण पुरुषा: । २३- सोम: । २४- सोम-पुरुषा: । २५- ब्रह्मा । २६- ब्रह्मपुरुषा: । २७- विश्वेदेवा: । २८- सर्वाणिभूतानि । २९- दिवाचारिण: । नक्तन्चारिण: । ३०- रक्षांसि । ३१- पितर: । ३२- श्याम: । ३३- शबल: । ३४- सनकादि मनुष्या: । इति ।

कृष्णयजुर्वेदीय वैश्वदेव चक्रे प्रदत्तक्रमाङ्कानुसारेण देवतां नामानि

१- धर्म: ।२- अधर्म: । ३- आप: । ४- ओषधिवनस्पतय: । ५- रक्षोदेवजना: । ६- गृह्याणि । ७- अवसानानि । ८- अवसान पतय: । ९- सर्वाणि भूतानि । १०-काम: । ११- अन्तरिक्षम् । १२ नाम । १३- पृथिवी । १४- अन्तरिक्षम् । १५ दिवा । १६- सूर्य: । १७- चन्द्रमा: । १८- नक्षत्राणि । १९- इन्द्र: । २० - बृहस्पति: । २१- प्रजापति: २२- ब्रह्मा । २३ स्वधा पितर: । २४- रुद्र: पशुपति: । २५ - देवा: । २६- पितर: । २७- भूतानि । २८- मनुष्या:(सनकादय:८)२९- प्रजापति: । ३०- परमेष्ठी । ३१-धनधान्या-

शुक्ल यजुर्वेदीय वैश्वदेव चक्रे प्रदत्त क्रमाङ्कानुसारेण देवता नामानि

तत्राधास्तिस्रो देवता वैकल्पिका: । अतस्तत्र एक- द्वि- त्रि शून्याङ्कनं कृतम्।
० पर्जन्यम्। ०० आप:। ००० पृथिवी । १- धाता । २- विधाता। ३- वायु:।
४- वायु:। ५- वायु:। ६- वायु: । ७- प्राची । ८- दक्षिणा। ९- प्रतीची ।
१०- उदीची। ११- ब्रह्मा। १२- अन्तरिक्षम्। १३- सूर्य:। १४- विश्वेदेवा: ।१५-
विश्वानि भूतानि। १६- उषा:। १७- भूतपति:। १८- पितर:। १९-यक्ष्मा।
२०- सनकादय: । इति ।

सामवेदीय वैश्वदेव चक्रे प्रदत्त क्रमाङ्कानुसारेण देवता नामानि

१- पृथिवी। २- वायु:। ३- विश्वेदेवा:। ४- प्रजापति:। ५- आप:।
६- ओषधिवनस्पतय:। ७- आकाशम् । ८- काम:। ९- मन्यु: । १०- इन्द्र: ।
११- वासुकि:। १२- ब्रह्मा। १३- रक्षोजना:। १४- पितर:। इति ।

अथर्ववेदीय वैश्वदेव चक्रे प्रदत्त क्रमाङ्कानुसारेण देवता नामानि

१- प्रपितामह।।२- पितामह:। ३- पिता। ४- अग्नि:। ५-इन्द्राग्नी।
६- वास्तोष्पति:। ७- प्रजापति:। ८- अनुमति:। ९- ब्रह्मा । १०- वैश्रवण:।
११- विश्वेदेवा:। १२- विश्वानि भूतानि । १३- मृत्यु:। १४- धर्म:। १५-अधर्म:।
१६- धन्वन्तरि:। १७- समुद्र:। १८- ओषधिवनस्पतय:। १९- द्यावापृथिवी ।
२०- दिश:। २१- अन्तर्देशा:। २२- वासुकि:। २३- चित्रसेन:। २४- चित्ररथ:।
२५- तक्षा: । २६- उपतक्षा:। २७- आशा। २८- श्रद्धा । २९- मेधाश्च ३०- श्री: ।
३१- ह्री:। ३२- विद्या। ३३- गुह्या: । ३४- देवजामय:। ३५- सनकादय: ।इति ।

सर्वेषु वैश्वदेव चक्रेषु देवयज्ञ: कुण्डरूपेण प्रदर्शित: । ब्रह्मयज्ञस्तु ओंकार पीठेन परिलक्ष्यते । मनुष्य यज्ञो पि ०० एतादृशेनाहुति चतुष्टयेन अविधिवैधाच चित्रित: । पितृयज्ञ:, तत्तत् शाखीय पित्राहुति द्वारा आग्नेय कोणे स्थापित: । अवशिष्टानां देव्येबलिहरण चक्रे बलि रूपेणा हुति प्रदान द्वारा भूत यज्ञ: संस्थापित: ।

इत्थं पन्च महायज्ञात्मकानि वैश्वदेव चक्राणि चित्रद्वारा प्रदर्शितानि । तत्र कृपया अङ्कानुसन्धानेन देवतानुसन्धानं कर्तव्य मिति प्रार्थयेत

--००--

ब्राह्मण ग्रन्थेषु विश्वेदेव सम्बद्धानि विधिवाक्यानि

(तत्रादौ- ऐतरेय ब्राह्मणे- अन्विष्यते)

१- अग्निर्वै देवानामवमो विष्णु: परमस्तदन्तरेण सर्वा अन्या देवता: । सर्वाभ्य एवैनं तद्देवताभ्यो नन्तरायं निर्वपन्ति । अग्निर्वैसर्वादेवता विष्णु: सर्वा देवता:। एतेवै यज्ञस्यान्त्येतन्वौयदग्निश्च विष्णुश्च तयदाग्ना वैष्णवं पुरोडाशं निर्वपन्त्यतएव तद्देवानृध्नुवन्ति । (अध्याय -१ खण्ड १)

२- आहुतयो वै नामैता यदाहुतय एताभिर्वै देवान्यजमानोह्वयति तदाहुतीना माहुतित्वम्। ऊतय: खलु वैतानाम याभिर्देवा यजमानस्य हवमायन्ति । यद्वाव स तत्र यथाभाजनं देवता अमुमावहामुमावहेत्यावाहयति तदेव होतुर्होतृत्वं होता भवति । (१-२)

३- आज्यंवै देवानां सुरभि घृतंमनुष्याणाम् । तयन्मुष्टीकुरुते यज्ञैव तत्सर्वाश्च देवता मुष्ट्यो: कुरुते । तदाहुर्न पूर्वदीक्षिण: संसवो स्ति परिगृहीतो वा एतस्य यज्ञ: परिगृहीता देवता नैतस्या र्तिं रत्त्यपर दीक्षिण एव यथातथेति । (१-३)

४- अग्निर्मुखं प्रथमो देवतानामग्निश्च विष्णो तपउत्तमं मह इत्याग्ना वैष्णवस्य हविषोयाज्या नुवाक्ये भवत: । अग्निश्च हवे विष्णुश्च देवानां दीक्षापालौ । (१-४)

५- सत्य संहिता वैदेवा अनृत संहिता मनुष्या: । (१-६)

६-चक्षुर्वादेवा यज्ञं प्राजानं श्चक्षुषावा एतत्प्रज्ञायते । (२-२)

७- देव विश: कल्पयितव्या इत्याहु: । (स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो- रुद्रा- आदित्या- विश्वेदेवा- मरुत: ' इति सायण:)

८- सर्वैश्छन्दोभिरिष्ट्वा देवा: स्वर्गंलोकमजयंस्तथैवेतयजमान: । (२-३)

८- विराजावेतस्य हविष: स्विष्टकृत: संयाज्ये स्यातां ये त्रयस्त्रिंश दक्षरे, विराड्भ्यां वा इष्ट्वा देवा: स्वर्गं लोक मजयंस्त्थैवेतयजमान: । त्रयस्त्रिंशद्वै देवा अष्टौ वसव एकादशरुद्रा द्वादशा दित्या: प्रजापतिश्च वषट् कारश्च तत्प्रथमे यज्ञमुखे देवता अक्षरभाज: करोत्यक्षरेणाक्षरेणैव तद्देवतां प्रीणाति देव पात्रेणैव तद्देवतास्तर्पयति । (२-४)

९- प्राच्यां वैदिशि देवा: सोमं राजानमक्रीणंस्तस्मात्प्राच्यांदिशि क्रीयते । (३-१)

१०- सोमेराजन्यागते स्मा एतत्दादन्तं यदग्निं मन्थन्त्यग्निर्हि देवानां पशु: (३-४) ।

११- द्यावापृथिवीभ्यामेतं जातं देवा: पर्यगृण्हं स्ताभ्यामेवाचापि परिगृहीत: ।

१२- यद्देवानां नेति तदेषामो ३ मिति । यज्ञेनवैतद्देवा यज्ञमयजन्त यदग्निना ऽग्नि मयजन्त ते स्वर्गं लोक मायन् । छन्दांसि वै साध्या देवाः । यदि हवा अप्य ब्राह्मणोक्तो यदि दुरुक्तोक्तो यजते थ हैषा हुतिर्गच्छत्यैव देवान्नपाप्मना संसृज्यते य एवं वेद । (३-५) ।

१३- इष्कान्तेन वा एतेन देवा अराध्नुवन्यदातिथ्यम् । (३-६) ।

१४- तदेतदेव मिथुनं यद्घर्मः सयोघर्मस्तच्छिश्नं यौशफौ तौशफौ योपयमनी ते श्रोणि कपाले यत्पयस्तद्रेतस्तदिदमग्नौ देवयोन्यां प्रजनने रेतः सिच्यते ऽग्निर्वै देवयोनिः सो ऽग्नेर्देवयोन्या आहुतिभ्यः सं भवति ऋङ्मयो यजुर्मयः साममयो वेदमयो ब्रह्ममयो मृतमयः संभूय देवता आप्येति य एववेद यश्चैवं विद्वानेतेन यज्ञ क्रतुना यजते । (४-५) ।

१५- इषुर्वा एतां देवाः समस्कुर्वत यदुपस द स्तस्या अग्निरनीकमासीत्सोमः शल्यो विष्णुस्तेजनं वरुणः पर्णानि तामाज्य धन्वानो व्यसृजं स्तया पुरोभिन्दत आयं स्तस्मादेता आज्य हविषो भवन्ति । (४-७) ।

१६- देववर्मवा एतद्य त्प्रयाजा श्चानुयाजाश्चा प्रयाजमननुयाजं भवतीष्वैसंशित्या अप्रति-शराय । (४-६)

१७- अग्नेविश्वेभिः सनीकदेवै रूर्णावन्तं प्रथमः सीदयोनिमिति वविश्वेरेवैनं तद्देवैः सहा सादयति । सीद होतः स्वउलोके चिकित्वानित्यग्निर्वै देवानां होता तस्यैषस्वोलोको यदुत्तर वेदीनाभिः । तस्यैतद्धोतृषदनम् । अग्निर्वै देवानां वसिष्ठः । अग्निर्वै देवानां गोपा । (५-२)

१८- ब्रह्मणावा एते देवा अयुन्जत । द्यावा पृथिवी वै देवानां हविर्धाने । (५-३) विष्णुर्वै देवानां द्वारपः । हिरण्मयमिवहवा एष एतद्देवेभ्यश्छदयति यत्कृष्णा-जिनम् ।

१९- एतद्वै मधु दैव्यं यदाज्यम् । यद्वैदेवानां नेति तदेषामोमिति । अथहास्य देवा यज्ञमेवगच्छन्ति । देवेभ्य एवैनं तन्निवेदयति । (६-२)

२०- अग्निः सर्वादेवताः सोमः सर्वा देवताः सायदग्नीषोमीयं पशुमालभते सर्वाभ्य एवतद्देवताभ्यो यजमान आत्मानं निष्क्रीणीते (६-३) वाचा देवेभ्यो हव्यं सं० (६-५)

२१- दैव्याः शमितार आरभध्व मुतमनुष्या इत्याहयेचैव देवानां शमितारोयेच मनुष्याणां तानेव तत्संशास्ति । ६-६)

२२- सर्वाभिर्वा एष देव देवताभिरालब्धो भवति यो दीक्षितो भवति तस्मादाहुर्न दीक्षितस्याश्नीया दिति स य दग्नीषोमा वमुन्वतं गृभीतानिति वपाये यजति सर्वाभ्य एव तद्देवताभ्यो यजमानं प्रमुन्वति तस्मादाहुरशितव्यं वपायां हुतायां यजमानोऽहि सतर्हि भवति । (६-६)

२३- तिस्रोवै देवानां मनोता स्तासुहि तेषां मनांस्योतानि वाग्गौरग्निरिति तत्राग्नि: सर्वमिनोता, तस्मादाग्नेयीरेव मनोतायै हविषो वदीयमानस्यान्वाह । सर्वाभिर्हास्य समृद्धिभि: समृद्धं हव्यं देवानप्येति । (६-१०)

२४- तद्यत्स्तोकाश्चोतन्ति सर्वं देवत्यावैस्तोकानेन्म स्मे नभिप्रीता देवान्गच्छानिति । (७-२)

२५- तदाहु: का देवता: स्वाहाकृतय इति- विश्वेदेवा इति ब्रूयात् । (७-३)

२६- एतेवाव देवा: प्राक्यवाणो यदग्निरुणा अश्विनौ तरते सप्तभि: सप्तभि श्छन्देभिरागच्छन्ति । (७-५) ।

२७- गायत्र्यावै देवा: पाप्मानं शमलमपाघ्नत गायत्र्यैवास्यतत्पाप्मानं शमलमपहन्ति ।

२८- सप्ता ग्नेयानिच्छन्दांस्यन्वाह सप्तवै देवलोका: सर्वेषु देवलोकेषु राघ्नोति७-७ ।

२९- आहुति भागावा अन्या देवता अन्या: स्तोम भागाश्छन्दोभागास्ता या अग्नावा-हुतयो हूयन्ते ताभिराहुति भागा: प्रीणात्यथयत्स्तुवन्ति च शंसन्ति च तेन स्तोम भागा श्छन्दोभागा उभय्यो हास्यैतादेवता: प्रीता अभीष्टा भवन्ति ।त्रयस्त्रिंशद्वै देवा: सोमपा स्त्रयस्त्रिंशदसोमपा अष्टौवसव एकादशरुद्रा द्वादशा दित्या: प्रजापतिश्च वषट्कारश्चैते देवा: सोमपा एकादश प्रयाजा एकादशानुयाजा एकादशोप-जा एते असोमपा: पशुभाजना: सोमेन सोमपान्प्रीणाति पशुना सोमपान् ।(७-८)

३०- उभयेषांवा एष देव मनुष्याणां भक्षो यद् बहिष्पवमान: ।(८-४)

३१- वाक्च प्राणश्च ऐन्द्रवायव: । चक्षुश्चमनश्च मैत्रावरुण: । श्रोत्रं चा त्मा - श्विन: । (६-२)

३२- ऋषयो दैव्यास: । देवेषु भवा इत्यर्थ: । विश्वेदेवानां पुत्ररूपा: । (६-३)

३३- असौवा अग्निर्देवेद्ध एतंहि देवा इन्धत एतमेव तदेवस्मिंल्लोक आयातयति । होतादेव वृत: । एष हि सर्वतो देवैर्वृत एतमेव तदेतस्मिंल्लोक आयातयति । रथीरध्वराणाम् एषहि देवरथ: । एषहि यदेतच्चरति रथीरिवैतमेव । तूर्णिर्हव्यवाट् । वायुर्देवेभ्यो हव्यंवहति वायुमेव तदन्तरिक्षलोक आयातयति । आदेवोदेवान्वदात । असौवा दित्यदेवो देवानावहति । यदादग्निर्देवोदेवान् । अग्निमेवोक्ता यजति ।

३४- देवरथोवा एष यदाज्यस्तस्यैता वन्तरौरश्मी यदाज्य प्रउगे तद्यदाज्येन पवमानमनुशं-
सति प्रउगेणा ज्यं देवरथस्यैवत वन्तरौरश्मी विहरत्यलोभाय ।

३५- वैश्वदेवं शंसति तेना ग्रयण उक्थवान् । ११-१) ।

३६- वैश्वदेवं शंसति तस्मात्कुमारो जात: पश्चेव प्रचरति वैश्वदेवानि ह्यङ्गानि
यद्वैश्वदेवं शंसत्यङ्गान्येवास्य तत्संस्करोति । (११-२)

३७- एषवै जातो जायते सर्वाभ्य एताभ्यो देवताभ्य: । (११-२)

३८- यं कामयेताङ्गैरेनं व्यर्धयानीति वैश्वदेवमस्य लुब्धं शंसे दृचंवा पदंवा तीया तेनैव
तल्लुब्ध मङ्गैरेवैनं तद्व्यर्धयति । (११-३) ।

३९- अथयदेन मेकसन्तं बहुधा विहरन्ति तदस्य वैश्वदेवं रूपम् (११-४)

४०- वैश्वदेवमुक्थं शस्त्वा वैश्वदेव्या यजति यथाभागं तद्देवता: प्रीणाति । (११-४)

४१- देवपात्रंवा एतद्यद्वषट्कारो वषट् करोति देवपात्रेणैव त द्देवतास्तर्पयति(११-५)

४२- एतद्देवता: पुनरभ्याकारं तर्पयन्ति यदनुवषट् करोति (११-५)

४३- यादृगिववै देवेभ्य: करोति तादृगिवास्मै देवा: कुर्वन्ति । ११-६)

४४- देवविश: कल्पयितव्याइत्याहुश्छन्दश्छन्दसि प्रतिष्ठाप्यमिति शोंसावो मित्याह्वयते
प्रात: सवने त्र्यक्षरेण शंसा मो दैवो नित्यध्वर्यु: प्रति गृणाति पन्चाक्षरेण
तदष्टाक्षरं सम्पद्यते ष्टाक्षरावैगायत्री गायत्रीमेव तत्पुरस्तात्प्रात:सवने चीक्लपताम्।

४५- (इन्द्रं) तं पूर्वेद्यु: पितरो विन्दन्नुत्तरमहर्देवास्तस्मात्पूर्वेद्यु: पितृभ्य: क्रियत
उत्तरमहर्देवान्यजन्ते । (१२-४) । ४६- बृहस्पति पुरोहितावै देवा: । १२-६ ।

४६- यत्रयत्रवैदेवा यज्ञस्यच्छिद्रं निरजानं स्तद्धाय्याभिरपि दध्युस्तद्धाय्यानांधाय्यत्वम् ।
(१२-७)

४८- तेदेवा अब्रुवन्नादित्या न्युष्माभिरिदं सवन मुपच्छामेति । (१३-५)

४९- वैश्वदेवं शंसति यथावै प्रजा एवं वैश्वदेवं तद्यथा न्तरं जनता एवं सूक्तानि यथा
रण्यान्येवं धाय्यास्तदुभयतो धाय्यां पर्याह्वयते तस्माज्जान्यरण्ये निसन्त्यनरण्यानि
मृगैश्च वयोभिश्चेति । यथावै पुरुष एवं वैश्वदेवं तस्य यथा वान्तरमङ्गान्येवं
सूक्तानि यथा पर्वाण्येवं धाय्या स्तदुभयतो धाय्यां पर्याह्वयते तस्मात्पुरुषस्य
पर्वाणि शिथिराणि सन्ति दृढानि ब्रह्मणा हितानि धृतानि । पान्चजन्यंवा
एतदुक्थं यद्वैश्वदेवं सर्वेषां वा एतत्पन्चजनानामुक्थं देव मनुष्याणां गन्धर्वाप्सरसां
सर्पाणांच पितृणां चैतेषां वा एतत्पन्चजनाना मुक्थम् सर्वं देवत्योवा एणहोता
यो वैश्वदेवं शंसति सर्वा दिशोध्यायेच्छंसिष्यन्सर्वा स्वेव तद्दिक्षु रसं दधाति ।

विश्वेदेवा: अदिति: पन्चजना इत्यस्या वै विश्वेदेवा अस्यां पन्चजना: । विश्वेदेवा: शृणुतेमं हवम् इति वैश्वदेवमुक्थं शस्त्वा वैश्वदेव्यायजति यथाभागं तद्देवता: प्रीणाति। (१३-७)

५०- मायन्तीव वैतर्हि देवता यदेता होताशंसति तस्मादेतासु मद्व्रतिर्गिर्यम् । देवयानावै ज्योतिष्मन्त: पन्थान स्तानेवास्मा एतद्वितनोति । (१३-१४)

५१- तदाहु: सप्त वीर्याणि छन्दांसि शंसे यथैवा ग्नेयं यथोजस्यं यथा श्विनं सप्तवै देवलोका: सर्वेषु देवलोकेषु राध्नोति । (१७-७) ।

५२- चतुर्विंशमेतदहरुपयन्त्यारम्भणीयमेतेनवै संवत्सरमारभन्त एतेनस्तोमांश्चछंदासि चैतेन सर्वादेवता अनारब्धं वैतच्छन्दो नारब्धा सा देवता यदेतस्मिन्नहनि ना रभन्ते तदारम्भणीयस्या रम्भणीयत्वम् । (१७-६)

५३- अध्याय १८ खण्ड ४,५ सम्पूर्णम् ।

५४- बृहत्यावै देवा इमांल्लोकानाश्नुवत ते वै दशभिरेवाग्रेरिमं लोकमाश्नुवत दशभिरन्तरिक्षं दशभिर्दिवं चतुर्भिश्चतस्रो दिशो द्वाभ्यामेवास्मिंल्लोके प्रत्यतिष्ठन् । (१९-२) ।

५५- ज्येष्ठयज्ञोवा एष यद्द्वादशाह: सर्वेदेवानांज्येष्ठो यएते नाग्रे यजत श्रेष्ठयज्ञोवा एष यद् द्वादशाह: सर्वेदेवानां श्रेष्ठो य एतेनाग्रे यजत ज्येष्ठ: श्रेष्ठो यजेत कल्याणीह समा भवति ।

५६- तत्सवितुर्वृणिमिहे वानोदेव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ राथन्तरे हनि प्रथमे हनि प्रथमस्यान्हो रूपम् । २०-२ । देवान्हुवे बृहच्छ्रवस: स्वस्तय इति वैश्वदेवं प्रथमे पदे देवता विरुच्यन्ते प्रथमे हनि प्रथमस्यान्हो रूपं महान्तं वा एते श्वानमेष्यन्तो भवन्ति ये संवत्सरंवा द्वादशाह वा सते तद्देवान्हुवे बृहच्छ्रवस: स्वस्तय इति वैश्वदेवं प्रथमे हानि शंसति स्वस्तितायै स्वस्त्ययन मेव तत्कुरुते स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद येषां चैवं विद्वानेतद्धोता देवान्हुवे बृहच्छ्रवस: स्वस्तय इति वैश्वदेवं प्रथमे हनि शंसति । (२०-२) ।

५७- विश्वोदेवस्यनेतुस्तत्सवितुर्वरेण्य मा विश्वदेवं सत्पतिमिति वैश्वदेवस्य प्रतिपद नुचरौ बार्हते हनि द्वितीये हनि द्वितीयस्यान्होरूपम् । यज्ञस्य वो रथ्यं विश्वतिं विशामिति वैश्वदेवं वृषाकेतुर्यजतो द्यामशाय तेति वृषण्वद् द्वितीये हनि द्वितीयस्यान्होरूपम् । (२०-४) ।

५८- विश्वे देवा देवतास्तृतीयमहर्वहन्ति । वैश्वदेवस्य प्रतिपदनुचरौ राथंतरे हनि तृतीये हनि । (२१-१)

५९- परावतोये दिधिषन्त आप्यमिति वैश्वदेव मन्तोवैपरावतो न्त स्तृतीयमह स्तृतीये हनि । तज्ञाय मेते नवैगय: प्लातो विश्वेषां देवानां प्रियं धामोपागच्छतुत्र परमं लोकमजयदुपविश्वेषां देवानां प्रियं धामगच्छति । (२१-२)

६०- वैश्वदेवस्य प्रतिपदनुचरौ बार्हते हनि चतुर्थे हनि । प्रशुक्रेतु देवीमनीषेति वैश्वदेवं प्रेतिच शुक्रवच्च चतुर्थे हनि । (२१-५) ।

६१- वैश्वदेवस्य प्रतिपदनुचरौ राथन्तरे हनि पन्चमे हनि । (२२-३) ।

६२- देव क्षेत्रं वा एतद्यत्षष्ठमहर्देवक्षेत्रंवा एत आगच्छन्ति ये षष्ठमहरागच्छन्तिनवै देवा अन्योन्यस्य गृहे वसन्ति । (२२-४) ।

६३- अभित्यंदेवं सवितार मोण्योरितिविश्व देवस्य प्रतिपदतिच्छन्दा: षष्ठे हनि। (२२-८) ।

६४- इडमित्था०- येयज्ञेनेति वैश्वदेवं नाभानेदिष्ठं शंसति । (२२-८,६)

६५- वैश्वदेवस्य प्रतिपदनुचरौ राथंतरे हनि सप्तमे हनि । ऐभिरग्ने दुवोगिर इति वैश्वदेव मेति सप्तमे हनि । (२३-२) ।

६६- वैश्वदेवस्य प्रतिमदनुचरौ बार्हते हन्यष्टमे हनि । देवानामिदवो महदिति वैश्वदेवं महद्वदष्टमे हनि । (२३-४) ।

६७- वैश्वदेवस्य प्रतिपदनुचरौ राथंतरे हनि नवमे हनि । येत्रिंशतित्रयस्पर इतिवैश्वदेवं त्रिवन्नवमे हनि (२४-२) ।

६८- अग्नेवाक्ठिति रथन्तरं स्वाहा वाक्ठिति बृहद् देवानांवा एतन्मिथुनं यद्बृहद्रथन्तरे देवानामेव तन्मिथुनेन मिथुनमवरुन्धते देवानां मिथुनेन मिथुनं प्रजायन्ते ।(२४-३)।

६९- देवानां वा एतद्यज्ञियं गुह्यं नाम य च्चतुर्होतारस्तद्य च्चतुर्होतॄन्होता व्याचष्टे देवानामेव तद्यज्ञियं गुह्यं नाम प्रकाशं गमयति । (२४-४) ।

७०- अथौदुम्बरीं समन्वारभन्त इषमूर्जमन्वारभ इत्यूर्ग्वा अन्नाद्यमुदुम्बरो यद्वैतदेवा इषमूर्जं व्यभजन्त तत उदुम्बर: समभवत्तस्मात्स त्रि:संवत्सरस्य पच्यते ।(२४-५) ।

७१- यो वा अग्निहोत्रं वैश्वदेवं षोडशकलं पशुषु प्रतिष्ठितं वेद वैश्वदेवेनाग्नि होत्रेण षोडशकलेन पशुषु प्रतिष्ठितेन राध्नोति, (२५-१)

७२- उभयान्वा एष देव मनुष्यान्विपर्यासं दक्षिणा नयति सर्वंचेदं यदिदं किन्च

मनुष्यान्वा एष सायमाहुत्या देवेभ्यो दक्षिणा नयति सर्वं तएते प्रलीनान्यौकसवशेरे मनुष्या देवेभ्यो दक्षिणानीता देवान्वा एष प्रातराहुत्या मनुष्येभ्यो दक्षिणानयति त एते विविदाना इवोत्पतन्त्यदो हं करिष्ये दोहं गमिष्यामिति वदन्त: । त्रयस्त्रिंशत्या वेत्याहु स्त्रयस्त्रिंशतो वै स देवानां पाप्मनो पाहं स्त्रयस्त्रिंशतैतस्य देवा इति । (२६-२) ।

७३- यजमाना विश्वेदेव दैवे रात्मभि: पश्चातृतीय सवने सुररक्षांस्यपघ्नते तस्माद्विश्वदेवं तृतीय सवनम् (२७-१) ।

७४- अथोक्षिप्रं देवेभ्यो न्नाद्यं सोमपीथं प्रयच्छानीति क्षिप्रं हास्मिं लोके प्रतितिष्ठति। (२७-५) ।

७५- मायन्तीव वै मध्यन्दिने देवता: समेव तृतीय सवने मादयन्ते तस्मान्मध्यन्दिने मद्वतीरनु चा ह यजन्ति चा भि: । (२८-३) ।

७६- एवमुहैता एन्द्राग्नेभ्यो भवन्ति यन्नानादेवत्यास्तेनान्या देवता: प्रीणाति । (२८-४)

७७- वैश्वदेवं नैष्ठीयायै उक्थम् । अग्निनावै मुखेन देवा असुरा नुक्थेभ्यो निर्जघ्नुस्तस्मादस्या ग्नेयौ स्तोत्रिया नुरूपौ भवत: । शिल्पानि शसन्ति देव शिल्पन्येतेषां

७८-- वै शिल्पानामनुकृतीह शिल्पमधि गम्यते यदेव शिल्पानी ३ । (३०-१) ।

७८- सुकीर्ति शंसति देवेयो निर्वै सुकीर्ति स्तयज्ञाद्देवयोन्यै यजमानं प्रजनयति । ३०-३)।

७९- देवावै यत्किंच कल्याणं कर्म कुर्वं स्तत्कारव्याभि रवाप्नुवं स्तथैवैतद्यजमाना यत्किं च कल्याणं कर्मकुर्वन्ति तत्कारव्याभिराप्नुवन्ति । (३०-६) ।

८०- इन्द्र गाथा: शंसतीन्द्र गाथाभिर्वै देवा असुरानभियाया थैनानत्यायं स्तथैवैतद्यजमाना इन्द्गाथाभिरेवाप्रियं भ्रातृव्यमभिगाया थैनमतियन्ति । (३०-७) ।

८१- प्रवल्हिका: शंसति प्रवल्हिकाभिर्वैदेवा असुरान्प्रवल्ह्या थैनानत्यायं स्तथैवैतद्यजमाना: प्रवल्हिकाभि रेवाप्रियं भ्रातृव्यं प्रवल्ह्याथैनमतियन्ति । (३०-७) ।

८२- आजिज्ञा सेन्या: शंसति । प्रतिराधं शंसति । अतिवादं शंसति सर्वेषां पूर्ववत्फलम्।

८३- भूतेच्छद: शंसति । ऐन्द्राबार्हस्पत्यं शंसति । (३०-१०) ।

८४- तदाहुर्यो दर्शपूर्णमासयोरुपवसति नह्वा अव्रतस्यदेवाहविरश्नन्ति तस्मादुपवसत्युतमे देवा हविरशीयुरिति । (३२-६) ।

८५- (शुन: शेप) तमग्निरुवाच विश्वान्नु देवान् स्तुह्यथत्वोत्स्रक्ष्याम इति स विश्वान्देवां स्तुष्टाव नमोमहद्भ्यो नमोअर्भकेभ्य इत्येतयर्चा तं विश्वेदेवाऊचु रिन्द्रोवैदेवाना मोजिष्ठोबलिष्ठ: सहिष्ठ: सत्तम: पारयिष्णुतमस्तंनुस्तुहीति। (३३-४) ।

८६- यतो वा अधिदेवा यज्ञेनेष्ट्वा स्वर्गं लोकमायं स्तवैतांश्चमसा न्युब्जं स्तेन्यग्रोधा अभवन् । (३५-४) ।

८७- चतुरुत्तरैर्वै देवाश्छन्दोभिः सयुग्भूत्वैतां श्रियमारोहन्त्यस्यामेत एतर्हि प्रतिष्ठिता अग्निर्गायत्र्या सवितोष्णिहा सोमो नुष्टुभा बृहस्पतिर्बृहत्या मित्रावरुणौ पङ्क्त्येन्द्र स्त्रिष्टुभा विश्वेदेवा जात्या । (३७-२) ।

८८- विश्वेत्वा देवा आनुष्टुभेनच्छन्दसैकविंशेनस्तोमेन वैराजेन साम्ना रोहन्तु तानन्वा-रोहामि वैराज्याय । तमेस्यामासन्धामासीनं विश्वे देवा अब्रुवन्न वा अनभ्युत्क्रुष्ट इन्द्रो वीर्यं कर्तुमर्हत्यभ्येनमुत्क्रोशामेति तथेति तं विश्वे देवा अभ्युदक्रोश-न्निमं देवा आभ्युत्क्रोशत सम्राजं साम्राज्यं भोजं भोजपितरं स्वाराजं स्वाराज्यं विराजं वैराज्यं राजानं राजपितरं परमेष्ठिनं पारमेष्ठ्यं दात्रमजनि दात्त्रियो-जनि विश्वस्य भूतस्याधिपतिरजनि विशामत्ता जनि पुरां भेत्ता जन्यसुराणां हन्ता जनि ब्रह्मणो गोप्ता जनि धर्मस्य गोप्ता छाय जनीति तमभ्युत्क्रुष्टं प्रजापतिरभिषेक्ष्यन्नेतयर्चा भ्यमन्त्रयत । (३८-१२)।

८९- अथैन (राजानं) मुदीच्यां दिशि विश्वेदेवाः षड्भिश्चैव पञ्चविंशैरहोभि-रभ्यषिञ्चन्नेतेनच तृचे नैतेनच यजुषैताभिश्च व्याहृतिभिर्वैराज्याय तस्मादेतस्या मुदीच्यां दिशि येके च परेण हिमवन्तं जनपदा उत्तरकुरव उत्तरमद्रा इति वैराज्या-यैव ते भिषिच्यन्ते विराळित्येनानभिषिक्ताना चक्षत एतामेव देवानां विहित मनु । (३८-१३) ।

९०- तदेषाभि यज्ञ गाथागीयते । आसन्दीवतिधान्यादं रुक्मिणं हरितस्रजम् । अश्वं बबन्ध सारङ्गं देवेभ्यो जनमेजय इति । तदप्येषश्लोको भिगितो मरुतः परिवेष्टारो मरुत्तस्या वसन्गृहे । आविक्षितस्य कामप्रे विश्वेदेवाः सभासदः । (३९-७) ।

९१- नहवा अपुरोहितस्य राज्ञो देवा अन्नमदन्ति तस्माद्राजा यक्ष्यमाणे ब्राह्मणं पुरोदधीत देवामे न्नमदन्निति । (४०-१) ।

९२- बृहस्पतिर्हवै देवानां पुरोहितस्तमन्वन्ये मनुष्यराज्ञां पुरोहिताः । ब्रह्मणे राजा तमवन्ति देवा इति पुरोहितमेवैतदभिवदति । (४०-३) ।

९३- पूर्वमन्यमपरमन्यं पादाववने निजे । देवाराष्ट्रस्यगुप्त्या अभयस्यावरुध्यै । ४०-४।

इति एतरेय ब्राह्मणे वैश्वदेव विधि वाक्यानि ।

९४- ओमासश्चर्षणिधृतो विश्वेदेवास आगत त्याहास्य विश्वेदेवा हवं गच्छन्ति य एवं वेद येषां चैवंविद्वानेतद्धोता शंसति । (१-४) ।

९५- तत्सवितु र्वृणिमहे वानोदेव सवितरिति वैश्वदेवस्य प्रतिपदनुचरावैकाहिकौरूप समृद्धौ । अस्यवामस्य पलितस्य होतुरिति वैश्वदेवं बहुरूपं वा एतदहरैतस्यान्होरूपम्। आनोभद्रा: क्रतवो यन्तु विश्वत इति वैश्वदेवं निविद्धानमैकाहिकं रूप समृद्धम् । १-५।

९६- अथातो रेतस: सृष्टि: प्रजापते रेतो देवा, देवानां रेतावर्षम् । (२-१-३) ।

९७- यदक्षरं पञ्चविधं समेति युजोयुक्ता अभियत्संवहन्ति । सत्यस्य सत्यमनुयत्र युज्यते तत्रदेवा: सर्वं एकं भवन्ति । यदक्षरादक्षरमेतियुक्तं युजो युक्ता अभियत्संवहन्ति । सत्यस्येति० ।। एस्मिन्नामा समतृप्यन्कृते धि तत्रदेवा: सर्वयुजो भवन्ति । तेन - पाप्मान मपहत्यब्रह्मणा स्वर्गं लोक मप्येति विद्वान् । (२-३-८) ।

९८- वाक्प्राणेन संहितेति कौण्ठरव्य: प्राण: पवमानेन पवमानो विश्वैर्देवैर्विश्वे देवा: स्वर्गेण लोकेन स्वर्गोलोको ब्रह्मणा सैषा वरपरा संहिता । (३-१-६)

९९- एवाह्येवैवा हि देवा: ३।। (४-१-१) ।

१००- आदित्याया विश्वे अवन्तु देवा: सप्तराजानो य उदाभिषिक्ता: । वायु: पूषा- वरुण: सोमो अग्नि: सूर्यो नक्षत्रैरवत्विहमा नु ।। पितरोमा विश्वमिदं च भूतं पृश्निमातरो मरुत: स्वर्का: । ये अग्निजिव्हा उतवा यजत्रा स्तेनोदेवा: सुहवा: शर्मयच्छतेति ।। (५-१-१) ।

१०१- (प्रेङ्०खे) विश्वेत्वा देवा आनुष्टुभेनच्छन्दसा रोहन्तु तानन्वारोहामीति समारो- हति । (५-१-४) ।

१०२- उत्तमादाभिप्लविकातृतीयसवनमन्यद्वैश्वदेवा न्निविद्धानादस्यवामस्य पालितस्य होतुरिति सलिलस्य दैर्घतमस एकचत्वारिंशत मानोभद्रीयं च तस्यस्थाने ऐकाहिकौ वैश्वदेवस्य प्रतिपदनुचरौ । (५-३-२) ।

इत्यैतरे यारण्यके वैश्वदेववाक्यानि ।

शाङ्खायन ब्राह्मणे वैश्वदेविकानि विधिवाक्यानि

१- अथयदरण्योरग्नीन्समारोहयते देवरथोवा अरणी देवरथ एवैनं तत्समारोहयते देव- स एतेन देवरथेन स्वस्ति स्वर्गं लोकं समश्नुते यदेव पुन: पुनर्निर्मन्थते तेनोहैवास्य पुनराधेय मुपाप्तं भवति । (अ० २ खं० ६) ।

२- अथ यद्वैश्वदेवश्चरु रेतैवैसर्वे देवा यद्विश्वेदेवा: सर्वेषामेव देवानां प्रीत्यै । ४-१३।

३- तयत्फाल्गुन्यां पौर्णमास्यां वैश्वदेवेन यजते मुखतएव तत्संवत्सरं प्रीणाति। चतुर्णां वै पौर्णमासीनां वश्वदेवं स मासो थ यदग्निर्मथ्यते प्रजापतिर्वै वैश्वदेवं तस्मादेतं देवं गर्भं प्रजनयति (५-१) ।

४- अथ यद्वैश्वदेवी पयस्यैतेवै सर्वे देवा यद्विश्वेदेवा: सर्वेषामेव देवानां प्रीत्यै । अथ यत्परस्तात्पौर्णमासेन यजते तथाह्यस्य पूर्वपक्षो वैश्वदेवेनेष्टं भवति ।(वैश्वदेवेनवै प्रजापति: प्रजा असृजत । यदग्निं प्रणयन्ति यमेवामुं वैश्वदेवेमन्थन्ति तमेव तत्प्रणयन्ति । (५-३) ।

५- अथयदग्निर्मथ्यते यद्वैश्वदेवस्य तन्त्रं तत्तन्त्रम् । (५-८) ।

६- स एष प्रजापतिरेव संवत्सरश्चतुर्विंशो यच्चातुर्मास्यानि तस्यमुखमेव वैश्वदेवम्। ६-१५

७- त्रयस्त्रिंशद्वैसर्वे देवा: सर्वेषामेव देवानांप्रीत्यै । (१०-३) ।

८- वैश्वदेवं शंसति तेन तृतीय सवनमाप्तम् । १४-४) ।

९- अथवैश्वदेवीं पुरोरुचं शंसति साष्टपदाभवति तांत्वामृतव इत्याहु: षड्ऋतवस्तस्यै द्वेद्वे पदे अवग्राहं शंसति तस्माद् द्वन्द्वं समस्ता ऋतव आख्यायन्ते । (१४-५) ।

१०- विश्वेदेवा अनु(का)मयन्त तस्यांनो माध्यन्दिने सवने थो प्रात: सवन इति ता अमुतोवा च्यो देवतास्तृतीय सवनात्प्रात: सवनम भिप्रायुन्जत तयदभिप्रायुन्जत तत्प्रउगस्य प्रउगत्वं तस्माद बव्हयो देवता: प्रउगेशस्यन्ते तस्मात्सर्वाणि सवनानि सर्वदेवत्या भवन्ति विश्वेभि: सोम्यं मध्वित्युक्थंशस्त्वा यजति वैश्वदेव्या वैश्वदेवंह्येतत् दुक्थं गायत्र्या गायत्रं प्रात: सवन मन्विदु । (१४-१४) ।

११- सविता वैश्वदेवं प्रतिपद्यते सवितृ प्रसूतावै देवास्तृतीय सवनं समभरं स्तस्मात्प्रतिपद नुचरौ सूक्त मिति सावित्राणि भवन्ति तत्सवितुर्वृणीमह इत्यनुष्टुभा वैश्वदेवं प्रतिपद्यते पवमानोवयं वा एतद्वैश्वदेव मनुष्टुप् सोमस्यच्छन्द उक्थं पदविग्रहणस्य ब्राह्मणम् । अथोवैश्वदेवं वै शस्त्र देवतानामपरिहाणाय वैश्वदेवं शंसति वैश्वदेवो ग्रहो गृहीतो भवति तमेवैते नानुशंसति तस्य द्विपच्छ: परिधानीयां शंसत्यर्धर्चशस्त्

तीयं सा विराज मभिसम्पद्यते श्री विंशच्छन्दांश्रियो विराजो न्नाद्यस्योपाप्त्यै
चत्वारि सूक्तानि वैश्वदेवे शंसति पशवो वै वैश्वदेवम् । (१६-३)।

१२- नि षोडशाहावं वैश्वदेवं शंसति षोडशकलंवा इदं सर्वं मस्यैवसर्वस्याप्त्यै । विश्वे-
देवा: श्रृणुतेमं हवंम इत्युर्थ शस्त्वा यजति वैश्वदेव्या वैश्वदेवंहूयेतुदुक्थं महत्या
महद्दि तृतीय सवनम् । (१६-४) ।

१३- यज्ञस्यवोरथ्यं विश्पतिं विशामिति शार्यातं वैश्वदेवम्, इन्द्रो मित्रो वरुण:
संचिकित्रिर इति संवत्सरंवत्सरमभिवदति तदेतस्यान्होरूपम् । (२०-६) ।

१४- यत्पन्चमस्यान्हो वैश्वदेवं तद्वैश्वदेवं यत्षाष्ठस्यान्ह आग्निमारुतम् । (२०-१०)।

१५- तदाहु: कस्माद्वैश्वदेवान्येवान्वायात्यन्ते नैकदेवत्यानि न द्विदेवत्यानीतिनैक-
देवत्येन यातयामं भवति न द्विदेवत्येन वैश्वदेवेनैव यातयामं भवति तस्माद्वैश्वदेवान्ये-
वा न्वायात्यन्त एतेषामेवदेवानां सबलताया एतेषामभिप्लवानामयातयामताये ।

(२१-५) ।

१६- परावतोये दिधिषन्त आप्यमिति वैश्वदेवं परावत इत्यन्तोवै परावतोन्तस्तृतीय-
महरन्ते अन्तं दधाति । (२२-५) ।

१७- को नुवां मित्रावरुणा तृतायन्निति वैश्वदेवं यज्ञायतेवा पशुणोन वाजानिति
पशुण इति पशुमत्पशुमदितिवा अस्यरूपम् । (२३-३) ।

१८- अभित्यं देवं सवितारमोन्यो: कविक्रतुमित्यतिच्छन्दसा वैश्वदेवं प्रतिपद्यत सर्व आति-
च्छन्दसं वैषाष्ठमहस्ततृतीयसवनमतिच्छन्दाभ्यश्नुते । इदमित्थारौद्रंगूर्तवचा इति
वैश्वदेवम् । ऊर्ध्वां दिशंशिशिरमृतूनां विश्वान्देवान्देवजातं प्रजापतिमधिपतिम्। २३-

१६- तदुवा आहु: किंतदुभौ संप्रवयेन्नाद्रियेत माधुच्छन्दस एव प्रउगे सति गात्समर्द
वैश्वदेवमुपरिष्टान्माधुच्छन्दसस्य वैश्वदेवस्य पर्यहरेच्छा अत्रैकं निरुक्तं बार्हतम् ।
विश्वेदेवास आगत णुताम इमं हवम् । एदंबर्हिं र्निषीदतेतिबर्हिरिति तद्
बार्हतं रूपम् । (२४-१,२) ।

२०- पृष्ठस्य षाडहस्य समूढस्य या: पूर्वस्य त्र्यहस्य वैश्वदेवानां प्रतिपद स्ता: प्रतिपदो
या न्युत्तरस्य त्र्यहस्य तृतीय सवनानि तानि तृतीय सवनानि सानुचराणि तथा
तत्र वैश्व देवानि भवन्ति तान्युद्धृत्यान्यानि प्राजापत्यान्यनिरुक्तानि परोदा
वैश्वदेवान्यवधीयन्ते भव: पान्तं रघुमन्यवो न्धस्तं प्रत्नथा पूर्वथा विश्वथेमथा
कदित्थानृं: पात्रं देवयतामितिप्रति नाभानेदिष्ठ स्तद्वैखलु प्रत्यदं वैश्वदेवान्येवा

येरन् । (२४-६) ।

२१- प्रप्रैतु सदनादृतस्येति वैश्वदेवं विरश्मिभि: सृजे सूर्योगा इति पूर्वैवछदेतस्यान्वो रूपम् । (२५-२) ।

२२- ऋजुनीतिनो वरुण इति पन्चर्चं वैश्वदेवं नीतवन्नीतवद्वैसप्तमस्यान्वोरूपम् । अमोसस्वर्णणिघृत इति वैश्वदेवं विश्वेदेवास आगतेत्यावदावद्वै प्रथम स्यान्वो रूपम् । (२६-१०) ।

२३- देवानामिदवो महदिति नवर्चं वैश्वदेवं । महद्वत्सदन्यार्थ्यवद्विमानुकंभुवना सीण-धामेतिद्विपदा इन्द्रश्च विश्वे च देवा इत्यार्थ्यवद्विश्वे देवा ऋतावृद्धइति वैश्व-देवं वृद्धवन्महद्व थ्येतदह: । २६-१३) ।

२४- अथ वैश्वदेवं मनु: सर्वं आयुर्वैमनुरायुरेव तद्वैच यजमानेषुच दधात्यत्रैव द्विपदास्ता-सामुकं ब्राह्मणं विश्वेदेवास आगतेति वैश्वदेव मागतेति गतवच्छन्तद्रूप मन्तोनव-ममह: । (२६-१७) ।

२५- अभित्यंदेवं सवितारमोण्यो: कविक्रतुमित्यतिच्छन्दसा वैश्वदेवं प्रतिपद्यते सासम्पन्ना वतु: षष्ट्यदारा । (२७-२) ।

२६- अनवानं प्रात: सवने यजेदुरितिहस्माह पैङ्गय: दिप्रं देवेभ्यो हवि: प्रदास्याम इत्यर्थवैश इति कौषितकि रेतद्वै छन्दसां पर्वं यदर्धर्च: पर्वंश एव तद्देवेभ्यो हवि: प्रयच्छन्ति । (२७-७) ।

शाङ्खायनारण्यके विश्वेदेवा:

२७- विश्वेत्वा देवा आनुष्टुभेनच्छन्दसा रोहन्तु तत आरोल्हार इत्येवतदाह तानह-मन्वारोहानि कामप्रायेति कामप्रहवे सर्वेषां पराध्यम् । (१-७) ।

२८- अस्य वामस्य पलितस्य होतुरिति सलिलं वैश्वदेवं सलिलं ह्येतद्देवानामेकाह्निके निविदं दधाति । २-१८ ।

२९- वाक् प्राणेन सन्धीयत इति कौष्ठरव्य: प्राण: पवमानेन पवमानो विश्वैर्देवै-र्विश्वेदेवा: स्वर्गेण लोकेन स्वर्गोलोको ब्रह्मणा सैषावरपरा संहिता । ७-१५।

३०- सैषा दिति: संहिता दिति ह्येवेदं सर्वं यदिदं किन्चिद्विश्वभूतं तदेतदृचा भ्युदितम्। " अदितिर्द्यौ० " इति । (७-१६) ।

इति शाङ्खायने वैश्वदेविकानि विधिवाक्यानि ।

१- तस्नमेतद् व्रतमुपयन्तं विदुः प्राशीन्नोऽन्यत इति तेस्य विश्वेदेवा गृहानागच्छन्ति ते स्य गृहेषूपवसन्ति स उपवसथः । का० १ अ० १ ब्रा०१ ।

२- अग्निर्वै देवानां व्रतपतिः । सत्यमेवदेवाः । एतद्वैदेवाव्रतंचरन्ति । मनोहवैदेवा मनुष्यस्या जानन्ति । यद्यु अश्नाति देवानत्य अश्नाति । यस्य हविर्नं गृण्हन्ति तेनोदेवान्नात्य अश्नाति । देवान्वारण उपावर्तते यो व्रतमुपैति । ततोदेवा एतं वज्रं ददृशुर्यदापः । यज्ञोवैविष्णुः सदेवेभ्य इमांविक्रान्तिं विचक्रमे । सर्वेदेवा अध्वर्युहिं विगृहीष्यन्तमुपतिष्ठन्ते । अहर्देवाः सूर्यः । सविताबै देवानां प्रसविता । आदिष्टं वा एतद्देवतायै हविर्भवत्यथैत द्वैश्वदेवं करोति । (१-१) ।

३- धान्यं हि देवानां विनवत् । ततो देवा एतांदर्शपूर्णयोर्दक्षिणामकल्पन्यदन्वाहार्यं। प्राचीहि देवानांदिक् । हविः प्रदानाद्देवाउपजीवन्ति । (१-२) ।

४- स्रुचः सम्मार्ष्टि यथावैदेवानां चरणम् । इयंवैपृथिव्यदिति सेयेदेवानां पत्नी सा पश्चात्प्राची । यज्ञोदेवेभ्यस्तायते । यद्धविस्तद्देवानाम् । देवानां प्रियतमं धाम यदाज्यम् । (१-३) ।

५- ब्राह्मण भारतेत्येष हिदेवेभ्यो हव्यं भरति । ऋषिभ्यश्चैवेनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापत् । देवपात्रं वा एषयदग्निः । मनोवै देववाहनं । मनश्चहैव वाक्चयुजौ देवेभ्यो यज्ञं वहतः । पूर्वेजप्रचावन्जलिं निदधाति नमोदेवेभ्यश्चैवार्त्विज्यं करिष्यन्निन्हुते । ओश्रावयेतिवैदेवा विराजमभ्याजुहुवुः । स्वाहादेवा आज्यपाः । अनुयाजावैदेवा आज्यपाः । (१-४) ।

६- यज्ञेनवदेवा इमांजितिं जिग्युः पूर्वाण्हे देवा अशनमभिहरन्ति । सयदेव यजेत तेन देवेभ्य ऊऋणं जायते । बृहस्पतिर्वै देवानां ब्रह्मा । (१-७) ।

७- देव्यावा एते होतारो यत्परिधयः । सर्वे विश्वेभ्यो देवेभ्यः सम्प्रगृण्हाति । यद्धाअनादिष्टं देवतायै हविर्गृह्यते सर्वावै तस्मिन्देवता अपित्विन्न्यो मन्यन्ते नवाएतत्कस्यैचन देवतायै हविर्गृण्हन्नादिशति यदाज्यं तस्माद्विश्वेभ्योदेवेभ्यः सम्प्रगृण्हात्येतद्धु वैश्वदेवं हविर्यज्ञे । (१-८) ।

८- यद्वैदेवा हविर्जोषयन्ते तदपि गिरिमात्रं कुर्वते तस्मादाहावीवृधतेति । (१-६)

९- वसन्तो ग्रीष्मो वर्षा: । ते देवाऋतव: । यत्वापूर्यतेमास: स देवा: । अन्ह: पूर्वाण्होदेवा: । अपह्त पाप्मानो देवा: । (२-२) ।

१०- सय: पुरा दित्यस्या स्तमयात् । आहवनीयमुद्दरत्येते वैविश्वेदेवारश्मयो ययत्परं भा: प्रजापतिर्वा सइन्द्रोवै तदुहवै विश्वेदेवा अग्निहोत्रं जुव्हतो गृहानागच्छन्ति स यस्यानुद्धृतमागच्छन्ति तस्माद्देवा अपप्रयन्ति तद्वाअस्मै तद्व्यृध्यते यस्माद्देवा अपप्रयन्ति तस्यानुव्यृद्धिं यश्च वेदयश्च नानुद्धृतमभ्यस्तमगा दित्याहु: । (२-३) ।

११- तौयत्रेन्द्राग्नी उज्जिगिवांसौ तस्थतुस्तद्विश्वेदेवा अन्वाजग्मु: । दात्रं वा इन्द्राग्नी। विशो विश्वेदेवा यत्रवै दात्रमुज्जयत्यन्वाभक्तावैतत्र विट् तद्विश्वान्देवा नन्वा भजतां तस्मादेष वैश्वदेव चरुर्भवति । तदुह विश्वेदेवा ऊचु: । अनयोर्वा अयं द्यावा पृथिव्योरसो हन्तेमे अस्मिन्नाभजामेति ताभ्यामेतं भागमकल्पयन्नेतं द्यावापृथिव्य- मेक कपालं पुरोडाशं तस्माद्द्यावापृथिव्य एक कपाल: पुरोडाशो भवति तस्ययेय मेव कपालमेकेन हीयं तस्मादेक कपाले भवति । अथयत्पूर्वेद्यु: । ऐन्द्राग्नेन यजते मावस्यायां तृतीय सवनमेवास्य तद्वैश्वदेवं वै तृतीय सवन मिन्द्राग्नीवै विश्वेदेवा: । (२-४)।

१२- तस्यां मिथुनमस्ति । योषा पयस्या रे तो वाजिनं तस्मान्मिथुनाद्विश्वमसंमित मनुप्राजायत तद्यदेतस्मान्मिथुना द्विश्वमसंमित मनु प्राजायत तस्माद्वैश्वदेवी भवति,। वैश्वदेवेन वै प्रजापति: । प्रजा: ससृजेता अस्य प्रजा: सृष्टा वरुणस्य यवान्जक्षु- र्वरुण्योहवा अग्रेयव स्तद्यन्वेव वरुणस्य यवान्प्रादंस्तस्माद्वरुणप्रघासो नाम ।२-५

१३- सयद्वैश्वदेवे यजते । अग्निर्वैवैत द्राज्ञा ग्निना नीकेन चतुरोमास: प्रजयति । २-६।

१४- सवेन सर्वैणेव संवदेत । देवान्वा एष उपावर्तते । यो दीक्षते स देवतानामेको भवति नवैदेवा: सर्वैणेव संवदन्ते ब्राह्मणेन वैव राजन्येनवा वैश्येनवा तेहि यज्ञिया: । यद्वाह । यत्र देवासो अजुषन्त विश्व इति तदस्य विश्वैर्देवैर्जुष्टं भवति । ऋक्सा- माभ्यां सन्तरन्तो यजुर्भिरिति । ऋक्सामाभ्यांवै यजुर्भिर्यज्ञस्योदृचं गच्छन्ति । (३-१) ।

१५- उदरमेवास्यसद: । तस्मात्सदसि भक्षयन्ति यद्धीदं किन्चाश्नन्त्युदर एवेदं सर्वं प्रतितिष्ठत्यथ यदस्मिन्विश्वेदेवा असीदंस्तस्मात्सदोनाम तउ एवास्मिन्नेते ब्राह्मण विश्वगोत्रा: सीदन्ति । हविर्धानयो: सर्वमेवान्तर्वेदिस्याद्यन्निष्ठितमभिमृशति वैश्वदेवमसीति द्वयेनैतद्वैश्वदेवं यदस्मिन्पूर्वेद्यु विश्वेदेवा वसतिवरीषूप वसन्ति तेन वैश्वदेवम् । (३-६) ।

पृषदाज्यं ज्योतिरसि विश्वरूपं विश्वेषां देवानां समिदिति वैश्वदेवं हि पृषदाज्यं धारयन्ति ध्रुचो यदाप्रदीप्त इध्मो भवति । (३-६) ।

१६- हैतृणो अध्वर्युरादत्ते स आश्राव्याहोय प्रेष्य होतर्हव्या देवेभ्य इत्येतद् वैश्वदेवं पशौ । स जुहोति " घृतंघृतपावानः " इत्येतेन वैश्वदेवेन यजुषा जुहोति वैश्वदेवं वा अन्तरिक्षं तद्यदेनेनेमाः प्रजाः प्राणत्यश्चोदनत्यश्चान्तरिक्षा मनुचरन्ति तेन वैश्वदेवं वषट्कृते जुहोति याजि जुव्हामवदानानि भवन्ति । (३-८) ।

१७- अथवैश्वदेवम् । सर्वं वै विश्वेदेवाः सर्वेणैवतत्प्रजापतिः पुनरात्मानमाप्याययत सर्वमेनमुपसमावर्तत सर्वमनुकमात्मनोकुरुत सर्वेणो एवैषएतदाप्यायते सर्वमेन मुपसमावर्तते सर्वमनुकमात्मनः कुरुते । (३-९-१) ।

१८- दिवा गृण्हीयात् । पश्यन्यज्ञस्य रसं गृण्हानीति तस्माद्दिवा गृण्हीया देतस्मैवै गृण्हाति य एष तपति विश्वेभ्योह्येनादेवेभ्यो गृण्हाति रश्मयोह्यस्य विश्वेदेवा स्तस्माद्दिवा गृण्हीयाद्दिवेव वा एष तस्माद्देव दिवा गृण्हीयात् । एतद्वै विश्वेदेवाः । यजमानस्य गृहानागच्छन्ति सयः पुरादित्यस्या स्तमया द्वसतीवरी गृण्हाति । एतस्मै वै गृण्हाति य एष तपति विश्वेभ्योह्येना देवेभ्यो गृण्हाति। रश्मयो ह्यस्य विश्वेदेवास्तस्मादाह हविष्मां अस्तुसूर्य इति । इन्द्राग्न्योर्भाग-धेयीस्थेति विश्वेभ्योह्येना देवेभ्योगृण्हातीन्द्राग्नी हि विश्वेदेवास्ताः पुनरा-हृत्याग्रेण पत्नीं सादयति । विश्वेषां देवानां भागधेयीस्थेति तदाशु विश्वान्दे-वान्संवेशपत्येतेवै वसतांवरं तस्माद्वसती वर्यो नाम वसतां ह्वैवरंभवति यस्वमेतद्वेद। (३-९-२)।

१९- सजूर्देवेभिरवरैः परैश्वेति तदेनं वैश्वदेवं करोति तद्यदेनेनेमाः प्रजाः प्राणत्यश्चोदन त्यश्चान्तरिक्षामनुचरन्ति तेन वैश्वदेवोन्तयामिमघवन्मादयस्वे तीन्द्रोवै मघवानिन्द्रो यज्ञस्य नेता तस्मादाह मघवन्निति । (४-१-२)।

२०- (आग्रयणग्रहः) विश्वेभ्योदेवेभ्योगृण्हाति । सर्वं वै विश्वेदेवाः सर्वमेष ग्रह स्तस्माद्विश्वेभ्यो देवेभ्योगृण्हाति । ब्रह्मवर्चसायपवत इति तदु तथा न ब्रूयाद्यद्वा आद्यास्मै ब्रह्मणइति तदेव ब्रह्मवर्चसायाह विश्वेभ्यस्त्वा देवेभ्य एषते योनिर्विश्वे-भ्यस्त्वा देवेभ्य इतिसादयति विश्वेभ्यो ह्येनं देवेभ्यो गृण्हातितं वै मध्ये सादय यात्माह्यस्यैष मध्य इवह्ययमात्मा । (४-२-२) ।

२१- अथ वैश्वदेवं मे ग्रहं गृण्हाति । सर्वा इदं प्रा जीजनत कथ्यहा नगृहीत्त यदैताबदेवा भविष्य यावत्यो हैवाग्रे प्रजा: सृष्टास्तावत्यो हैवा भविष्यन्त प्राजनिष्यन्त । अथयद्वैश्वदेवं ग्रहं गृण्हाति । इदमेवैतत्सर्वमिमा: प्रजा यथार्थ व्यवसृजति तस्मादिमा: प्रजा: पुनरभ्यावर्त प्रजायन्ते शुक्रपात्रेण गृण्हात्येषवै शुक्रो यएषतपति तस्यये रश्मय स्ते विश्वेदेवास्तस्माच्छुक्र पात्रेण गृण्हाति । ओमास इति । उपयाम गृहीतो सि विश्वेभ्यस्त्वा देवेभ्य एषते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति विश्वेभ्यो ह्येनं देवेभ्यो गृण्हाति । (४-३-१) ।

२२- अथाभदितेन पात्रेण वैश्वदेवं ग्रहं गृण्हाति तद्य दभदितेन पात्रेण वैश्वदेवं ग्रहं गृण्हाति नवै सावित्रस्यानुवषट् करोत्येतस्मा है वैश्वदेवं ग्रहं गृहीष्यंन्भवति तदस्य वैश्वदेवे नैवानु वषट् कृतो भवति । (४-४-१)। यद्वेव वैश्वदेवं ग्रहं गृण्हाति । मनो ह वा अस्य सविता सर्वमिदं विश्वे देवा इदमेवैतत्सर्वं मनस: कृतानुकरमनुवर्त्मं करोति तददिं सर्वं मनस: कृतानुकरमनुवर्त्मं । यद्वेव वैश्वदेवं ग्रहं गृह्णाति । प्राणो ह वा अस्य सविता सर्वमिदं विश्वे देवा अस्मिन्नेवैतत्सर्वस्मिन् प्राणोदानौ दधाति ताविमावस्मिन्त्सर्वस्मिन् प्राणोदानौ हि तौ । यद्वेव वैश्वदेवं ग्रहं गृह्णाति । वैश्वदेवं वै तृतीयसवनं तदुच्यत एव सामतो यस्माद्वैश्वदेवं तृतीयसवनमुच्यत कक्षो थैतदेव यजुष्ट: पुरश्चरणतो यदेतं महावैश्वदेवं गह्णाति । तं वै पूतभृतो गृह्णाति वैश्वदेवो वै पूतभृदतो हि देवेभ्य उन्नयन्त्यतो मनुष्येभ्यो त: पितृभ्यस्तस्माद्वैश्वदेव:

पूतभृत पूतभृत। तं वा अपुरोरुक्कं गृह्णाति । विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति सर्वं वै विश्वे देवा यदृचो यजूंर्षि यत्सामानि स यदेवैनं विश्वभ्यो देवेभ्यो गृह्णाति तेनो हा स्यैष पुरोरुङ्मान्भवति तस्मादपुरोरुक्कं गृह्णाति । अथा तो गृण्हात्येव । उपयामगृहीतो सि सुशर्म्मा सि सुप्रतिष्ठान इति प्राणो वै सुशर्म्मा सुप्रतिष्ठानो बृहदुक्षाय नम इति प्रजापतिर्वै बृहदुक्ष: प्रजापतये नम इत्येवैतदाह विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति विश्वेभ्यो ह्येनं देवेभ्यो गृह्णात्यथेत्य प्राङुपविशति । अथय तृतीय सवन उपावर्तत वैश्वदेवं वै तृतीय सवनं सर्वमिदं विश्वेदेवा स्तस्मादिने सर्वत्रैव पशव: । (४-४-१)

२३- अथाम्भृणो विश्वाभ्योमे प्रजाभ्यो वर्चोदसौ वर्चसा पवेशमिति वैश्वदेवो वा अम्भृणावतो हि देवेभ्य उन्नयन्त्यतो मनुष्येभ्यो त: पितृभ्यस्तस्माद्वैश्वदेवा अम्भृणा (४-५-६) ।

२४- (परिशिष्टेनाभिजिन्वति) तदुक्तमाहुः । विश्वेषां त्वा देवानां यन्तुर्यन्त्रिये दधामीति सर्वं वै विश्वेदेवास्तदेनं सर्वस्यैव यन्तुर्यन्त्रिये दधाति । (५-४-२) ।

२५- वैश्वदेवेन यजते । वैश्वदेवेन वै प्रजापतिर्भूमानं प्रजाः ससृजे भूमानं प्रजाः सृष्ट्वा स्यामिति तथो एवैष एतद्वैश्वदेवेनैव भूमानं प्रजाः सृजते भूमानं प्रजाः सृष्ट्वा स्यामिति । (५-२-४) ।

२६- वैश्वदेवश्चरुर्भवति तं पश्चार्धे आसादयति । अथय एष वैश्वदेवश्चरुर्भवति । तस्य पृषन् गौर्दक्षिणा भूमावा एतद्रूपाणां यत्पृषतो गोर्विशो वै विश्वेदेवा भूमावै विट् तस्मात्पृषन् गौर्दक्षिणा तं होत्रेददाति । (५-५-१) ।

२७- यां मरुद्भ्य आलभन्ते विश्वेभ्यस्तां देवेभ्य आलभन्ते सर्वं वै विश्वेदेवाः सर्वस्यैन मेतद् गर्भं करोति । (५-५-२) ।

२८- अथैतेन चतुर्थेन यजुषा करोति । विश्वेत्वादेवा वैश्वानराः कृण्वन्त्वानुष्टुभेन-च्छन्दसा ङ्गिरस्वदिति दिशो हैतद्यजुरेतद्धै विश्वेदेवा वैश्वानरा एषु लोकेषू-खायामेतेन चतुर्थेन यजुषा दिशो दधुः (६-५-२) ।

२९- विश्वेत्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छन्दसा ङ्गिरस्वत् । (६-४-३) ।

३०- अथैनमुधच्छति । उदुत्वा विश्वेदेवा अग्नेभरन्तचित्तिभि रिति विश्वेवा एत मग्रेदेवा-श्चित्तिभि रुदभरन्नेतध्येषां तदा चित्तमासीत्थैवैनमयमेता च्चित्तिभि रुद् भर त्येतध्यस्य तदा चित्तं भवति । (६-८-१) ।

३१- समानोल्बाः समेव जानते देवैः समानो ल्बोसानी त्युवै यजते यो यजते तद्दूणार्न न्निवपति देवैरेव तत्समानोल्बो भवति । (७-१-१) ।

३२- विश्वैर्देवैरनुमतामरुद्भिरिति विश्वेच वै देवा मरुतश्च वर्षस्येशत ऊर्जस्वती पयसा पिन्वमानेति । (७-२-२)

३३- अथ वैश्वदेवीरुपदधाति । एषा वै सा द्वितीया चितिर्यामिभ्यस्तदश्विना उपाधत्तां तामुपधायेदं सर्वमभवतां यदिदं किन्च । ते देवा अब्रुवन् । अश्विनौ वा इदं सर्वमभूतामुप तज्जानीत यथावयमिहाप्यसामेति ते ब्रुवंश्चेतयध्वमिति चिति-मिच्छतेति वाव तदब्रुवंस्तदिच्छत यथा वयमिहाप्यसामेति ते चेतयमाना एता इष्टका अपश्यन्वैश्वदेवीः । यद्वेव वैश्वदेवीरुपदधाति । ये वै ते विश्वे देवा एतां द्वितीयां चितिमपश्यन्ये त सर्वः-म- एतेन रसेनोपायंस्त एते तानेवैतदुपद-धाति सा एताः सर्वाः प्रजास्ता रेतः सिचोर्वैलयोपदधातीमे वै रेतः सिचावनयो-स्तत्प्रजा दधाति तस्मादनयोः प्रजाः सर्वत उपदधाति सर्वतस्तत्प्रजा दधाति

यद्वेव वैश्वदेवीरुपदधाति । प्रजापतेर्विस्रस्तात्सर्वा: प्रजा मद्भुयत उत्क्रामन्नेतस्या अधि योनेस्ता एनमेतस्मिन्नात्मन:प्रतिहिते प्रापद्यन्त । यद्वेव वैश्वदेवीरुपदधाति। एतद्वै प्रजापतिरेतस्मिन्नात्मन: प्रतिहिते कामयत प्रजा सृजेय प्रजायेयेति स ऋतुभिरद्भि: प्राणै: संवत्सरेणाश्विभ्यां सयुग्भूत्वैता: प्रजा: प्राजनयत । सर्वैर्वैश्वैदेवैरित्युपरिष्टाचद्विश्वान्देवान्प्राजनयत्ता वै समानप्रभृतय: समानोदर्का नाना मद्भुयतस्ता यत्समानप्रभृतय: समाननोदर्का: समानीभिर्हि देवताभि: पुरस्ताचोपरिष्टाच सयुग्भूत्वा प्राजनयदथ यन्नाना मद्भुयतो न्या अन्या हि प्रजा मद्भुयत: प्राजनयत् ।(८-२-२) ।

३४- प्रजापति: प्रजा असृजत । स ऊर्ध्वेभ्य एव प्राणेभ्यो देवानसृजत । (१०-१-३) तस्या अस्त्येवाग्नेयम् । अस्त्यैन्द्रमस्ति वैश्वदेवन्तद्यदस्या आग्नेयं यदेवैतस्याग्ने - राग्नेयन्तदस्य तेन समस्कुर्वन्यदैन्द्रं तदैन्द्रेण यद्वैश्वदेवन्तद्वैश्वदेवेन तमत्रैव सर्वङ्० - कृत्स्नसमस्कुर्वन् । (१०-१-३) ।

३५- सप्तवैदेव लोकाश्चत्वारो दिशस्त्रयइमे लोका एतेवै सप्त देवलोका: । (१०-२--५)

३६- आत्मानन्दात्मानो हैव सर्वेदेवा: साहैषैव देवानामद्धा विद्या सहसन मनुष्यो य एवं विद्देवानां हैव स एक: । (१०-३-१) । पन्च वैश्वदेव्य: (इष्टका:)।१०-४

३७- प्रजापतिर्ह चातुर्मास्यै रात्मानं विदधे । सहममेव दक्षिणम्बाहुं वैश्वदेवं हविर कुरुत । तस्मान्मारुतमिदं वैश्वदेवन्दोर्घावापृथिवीयन्तद्धा अनिरुक्तम्भवति । वैश्वदेवन्दुग्धम् । वैश्वदेवमुन्नीतम् । ११-५-२,३) ।

३८- पय आहुतयो हवा एता देवानाम् । यदृच: सयएवं विद्वानृचो हरह: स्वाध्यायमधीते पय आहुतिभि रेव तद्देवांस्तर्पयति । आज्याहुतयो हवाएता देवानाम् । यद्यजूंषि सय एवं विद्वान्यजूंष्यहरह: स्वाध्याय मधीत आज्याहुतिभिरेव तद्देवांस्तर्पयति । सोमाहुतयोहवाएता देवानाम् । यत्सामानि सय एवं विद्वान्त्सामान्यहरह: स्वाध्यायमधीते सोमाहुतिभिरेव तद्देवांस्तर्पयति । मेद आहुतयो हवाएतादेवानाम्। यदथर्वाङ्गिरस: सयएवं विद्वानथर्वाङ्गिरसो हरह: स्वाध्यायमधीते मेद आहुति रेव तद्देवां स्तर्पयति । मध्वाहुतयोहवा एता देवानाम् । यदनुशासनानि विद्या वाको वाक्यमितिहास पुराणङ्गाथा नाराशंस्य: सयएवं विद्वा ननुशासनानि ।

(११-५-६)

३९- अथयक्षशरात्रमुपयन्ति । विश्वानेव देवान्देवतायजन्ते विश्वेदेवादेवता भवन्ति विश्वेषान्देवानां सायुज्यं सलोकतांञ्जयति । (१२-९-३) ।

४०- ब्राह्मण आर्षेय उद्धरेद्ब्राह्मणो वा आर्षेयः सर्वा देवताः सर्वाभिरेवैनन्तद्देवताभिः समर्धयति तमुपसमाधाय प्रतिपरेत्य गार्हपत्य आज्यमधिश्रित्योद्वास्योत्पूयावेक्ष्य चतुर्गृहीतमाज्यङ्गृहीत्वा समिध मुपसङ्गृह्य प्राङुदाद्रवत्याहवनीये समिधमभ्याधाय दक्षिणञ्जान्वाच्य जुहोति विश्वेभ्यो देवेभ्यः स्वाहेति । तदाहुः यस्याहवनीय मनुद्धृतमादित्योऽभ्युदियात्किन्तत्र कर्म का प्रायश्चित्तिरित्येते वै रश्मयो विश्वे देवास्ते स्मादुष्णिवांसो पप्रयन्ति तदस्मै व्यृध्यते यस्माद्देवा अपप्रयन्ति तामनु वृद्धिं यश्च वेद । १२-४-१) ।

४१- हिरण्येन पावयन्ति । देवानांवा एतद्रूपं यद्धिरण्यन्देवानामेवैनं रूपेण पुनन्ति । (१२-८-१)

४२- विश्वेभ्यस्त्वा देवेभ्यो जुष्टम्प्रोक्षामीति । विश्वेवै देवा देवानां यशस्वितमा यशएवास्मिन्दधाति तस्मादश्वः पशूनां यशस्वितमः सर्वेभ्यस्त्वा देवेभ्यो जुष्टम्प्रोक्षामीति । (१३-१-२) ।

४३- प्रजापतिरकामयत । अश्वमेधेन यजेयेति सो श्राम्यत्सतपो तप्यत तस्य श्रान्तस्य तप्तस्य सप्तधात्मनो देवता अपाक्रामन्सा दीक्षा भवत्स एतानि वैश्वदेवान्यपश्यत्तान्यजुहोतैवै सदीक्षा मवरुन्ध यद्वैश्व देवानि जुहोति दीक्षामेवैतद्यज मानो वरुन्धेन्वह ञ्जुहोत्यन्वहमेव दीक्षामवरुन्धे सप्तजुहोति सप्तवैता देवता अपाक्रामंस्ताभिरेवास्मै दीक्षा मवरुन्धे (१३-१-८) ।

४४- चत्वार्यौद् ग्रभणानि जुहोति त्रीणि वैश्वदेवानि सप्त सम्पद्यन्ते सप्तवैशीर्षण्याः प्राणाः प्राणादीक्षाः प्राणैरेवास्मै प्राणान्दीक्षामवरुन्धे । १३-१-८-४)

४५- प्रजापतिरश्वमेधमसृजत । स सृष्टः प्रच्यमल्लीनात्प्रशाम तं वैश्व देवान्युदयच्छन्यद्वैश्व देवानि जुहोत्यश्वमेधस्यैवोधत्यै । (१३-१-८) ।

४६- वैश्वदेवा भवन्ति वैश्वदेवो वा अश्वोश्वस्यैव सर्वत्वाय बहुरूपा भवन्ति तस्माद् बहुरूपाः पशवो नानारूपा भवन्ति तस्मान्नानारूपाः पशवः । (१३-२-५) ।

४७- अथातो वपानां होमः । नानैव चरेयु रा वैश्वदेवस्यवपायै वैश्वदेवस्य वपायां हुतायान्तदन्वितरा जुहुयुरिति हस्माह सत्यकामो जाबालो । विश्ववैसर्वेदेवास्से- स्तदेनान्यथादेव तम्प्रीणातीति । (१३-५-३) ।

४८- एतेश्व पूर्वे अहनी । महाव्रतमतिरात्रस्तेनह मरुत्त आविक्षित ईजे आयोगवो राजा तस्यह ततो मरुत: परिवेष्टारोऽग्नि: क्षत्ता विश्वेदेवा: सभासदो बभूवुस्तदेतद् गाथयाभिर्गीतम्मरुत: परिवेष्टारो मरुत्तस्या वसन् गृहे । आविक्षितस्याग्नि: क्षत्ता विश्वेदेवा: सभासदो भवन्ति योऽश्वमेधेन यजते । वैश्वदेवी बार्हस्पत्या एतासान्देवतानामाप्त्यै । (१३-५-४-१था ३)

४९- वैश्वदेवश्चतुर्थं महर्भवति । विश्वेवैसर्वेदेवा: सर्वेषान्देवानामाप्त्यै तस्यवैश्वदेवा ग्रहा भवन्ति वैश्वदेव्य: पुरारुच: सर्वं वैश्वदेव्य मतदिति । (१३-७-१)

५०- सवित्रे त्व ऋभुमते विभुमते वाजवते स्वाहेति । अयं सवितायोयम्पवते तस्मा एवैनन्जुहोति तस्मादाहसवित्रे त्वे त्यृभुमते विभुमते वाजवत इति तदस्मिन् विश्वान्देवानन्वाभजति । बृहस्पतये त्वा विश्वदेव्यावते स्वाहेति । अयं वै बृहस्पतिर्योयम्पवते तस्मा एवैन न्जुहोति तस्मादाह बृहस्पतये त्वेति विश्वदेव्या वतइति तदस्मिन् विश्वान्सर्वान्देवानन्वा भजति । (१४-२-२) ९, १० ।

५१- स्वाहा विश्वेभ्यो देवेभ्य इति । प्राणावै विश्वेदेवा: प्राणानेवास्मिन्नेतद्द-धाति हुत्वा मध्यमे परिधा उपक्षयति । (१४-२-३७) ।

५२- सनैव व्यभवत् । सविशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति । १४-४-२-२५)

५३- याज्ञवल्क्येति होवाच । यत्रायम्पुरुषो म्रियते किमेनन्न जहातीतिनामेत्यनन्तं वै नामानन्ता विश्वेदेवा अनन्तमेव स तेन लोकन्जयति । (१४-६-२-११) ।

इति शतपथ ब्राह्मणे वैश्वदेव विधिवाक्यानि ।

सामवेदीय षड्विंश ब्राह्मणे वैश्वदेविकानि विधि वाक्यानि

अस्य ब्राह्मणान्तर्गत देवत ब्राह्मणे प्रथम सूत्रे सामदेवता दशसंख्याका: प्रोक्ता: । ता यथा :- अग्निरिन्द्र: प्रजापति: सोमो वरुणस्त्वष्टाङ्गिरस: पूषा सरस्वती- न्द्राग्नी । एता दशसंख्याका देवता विश्वेदेव गण विशिष्टा एव । उक्तन्व:- "विश्वेदेवा दशस्मृता:" इति । सर्वेषां साम्नां निधन चतुष्टय भेदेन देवता यथा :- वसवो, रुद्रा, आदित्या, विश्वेदेवा: । तत्र- वसूनां स्वराणि, रुद्राणां निधनवन्ति, आदित्याना मैडानि , विश्वेषां देवानां वाङ्०निधनानि । (खण्ड १- १७,१८) ।

साम्नां छन्दसां देवता परिज्ञाने - जातीछन्दो विश्वेदेवानाम् । अत्रमन्त्र: - " विश्वान् देवान् जात्याविशेर्श (दै० ब्रा० २, ८)। तत्र जाती छन्दसो लक्षणम् :- जाती गततमं छन्दोजज्नगतीति भवति दिप्र गतिर्जिज्मला कुर्वन्नसृजतेतिहि ब्राह्मणम्।(३- १७) त्रेधायज्ञ उत् क्रामति देवान दिवं तृतीयमन्तरिक्षं मनुष्यां स्तृतीयं पृथिवीं पितृ स्तृतीयं तदभिमृशेद् देवान् दिवं यज्ञोगा ततो मा द्रविणमाष्टु (ष० ब्रा० १-५) ।

देवानां वा एतयज्ञस्य मुखं यदुद्गातृचमसं तस्मादुद्गातृ चमसं नान्यो भक्षयेत् । २-७ ज्ञात्वालन्वोत् कुर्न्वैतद्ध देवानांतीर्थं तदेतदृषि राहाप्नानं तीर्थं कइह प्रवोचयेन देवा: पथा प्रपिबन्ते सुतस्ये त्येतद्ध देवानां तीर्थम् । तदाहु: कान्दिशमवभृथमभ्यवयुरिति प्राञ्चो भ्युवेयुर्देवानांवा एषा दिग्यत् प्राची या देवानां दिक्तान्मोनुयज्ञ: सन्तिष्ठाता इति । (३- १) ।

यूपस्य यदूर्ध्वं रशनायास्तद्विश्वेषां देवानाम् । यदूर्ध्वं चषालस्यांङ्गुल मात्रं कार्यं तत्साध्यानां देवानां प्राचीं सन्नमति । (५-४) ।

पूर्वपक्षो वै देवादीदान्ते ते परपक्षेन सोमं भक्षयन्ति तत्रेमानि त्रीणि पात्रा- ण्युपधीयन्ते पृथिवीमन्तरिक्षांचो: पात्रमिति तं देवा दिव्येन पात्रेण प्रथमं पन्चकलं पन्चमीं भक्षयन्ति । (४-६) ।

एतद्ध देवानां यथोक्त मार्गस्य रूपं देवानां तीर्थं सर्वपाप निवारकत्वात् । आप्नानं व्यापकं तीर्थमिह लोकेक: प्रवोचत् । एतदेव देवानां सम्बन्धि तीर्थं मतोस्मादन- यज्ञस्य सम्बन्धि तदतीर्थमिवेति । (३-१) ।

अनन्तरो ब्राह्मणांभ्यांत्रयोदशाहं वैश्वदेवाख्यं सत्रं निरूप्यते । अतिरात्रं चतुर्विंशस्तोमयुक्तं प्रायणिमह: । एते प्रथमे अह्नी अभिजिदाद्यो विश्वजिदन्तो मध्यमो नवरात्र: । महाव्रतमतिरात्र इत्यत अन्तिम अह्नी इति । तदेतद्विश्वेदेव कर्तृत्वेन च प्रशंसति विश्वेदेवा-इति । (प्र० ४ खं० ६) ।

इतिषड्विंश ब्राह्मणे वैश्वदेवकानि विधि वाक्यानि ।

ताण्ड्य महा ब्राह्मणे वैश्व देविकानि विधि वाक्यानि

१- वेद्याक्रमण मन्त्र: - मृदाशिशिरा देवानां तीर्थं वेदिरसि मामाहिंसी: । (१-१-७)

२- प्रवृत्तहोमे: - बेकुरा नामासि जुष्टा देवेभ्य: । (१-३-१)

३- अस्तमित उपस्थाने - सुभूरसि श्रेष्ठो रश्मिर्देवानां संसदेवानायातु: । (१-६-७) ।

४- एतया(उद्यतारव्या विष्टुत्या स्तुत्वा) वै देवा: स्वर्गं लोक मायन् स्वर्गकाम: स्तुवीत स्वर्गस्य लोकस्य समष्ट्यै (२-६-२) ।

५- एतया(दशसप्तया विष्टुत्या) वै देवा असुरा नत्यक्रामन्नति पाप्मानं भ्रातृव्यं क्रामति य एतयास्तुते (२-७-२) ।

६- प्रायणीये न वा अन्हा देवा: स्वर्गलोकं प्रायन्यत् प्रायं स्तत्प्रायणीयस्य प्रायणीयत्वम् तस्मा प्रदयणीयस्यान्हा ऋत्विजा भवितव्यम् (४-२-२) ।

७- अभीवर्तेनवै देवा: स्वर्गं लोक मभ्यवर्तन्त यदभीवर्तो ब्रह्म सामभवति स्वर्गस्य लोकस्याभि वृत्त्यै (४-३-२) ।

८- स्वर सामान एते भवन्ति स्वर्भानुर्वा आसुर आदित्यन्तमसांविध्यत् देवा: स्वरै रस्पृण्वन्यत् स्वरसामानो भवन्त्यादित्यस्य स्पृत्यै (४-५२) ।

९- वायुर्वा एतन्देवतानामानशे नुष्टुप छन्दसां यदतोन्या प्रतिपत्स्यात्प्रदहेत् ।४-६-७

१०- वारवन्तीयमग्निष्टोम साम कार्यम् । एतेन हि देवा आत्मान मत्रायन्त तस्माद् ब्राह्मणो वारणेन पिबेत् । (५-३-८-११)

११- वैश्वदेव्यामृचि भवति विश्वरूपं वै पशूनां रूपं पशूनेव तन्जयन्ति । (५-४-६) ।

१२- देवावै वाचं व्यभजन्त तस्यायो रसो त्यरिच्यत तद्गौरीतमभवदनुष्टुभमनुपरिप्लवते वागनुष्टुब्वाचोरसो गौरीतं यद्गौरीवितेना न्वहंस्तुवते वाच्येवतद्वाचा रसन्दधाति । (५-७-१,२) ।

१३- ततश्चरुणा वैश्वदेवेन तत्प्रात: सवनं सन्तिष्ठते । पशुना प्रचरन्ति तत: सवनीयेन द्वादश कपालेन ततो वैश्वदेवेन द्वादश कपालेन । (५-१०-६, ११) ।

१४- स (प्रजापति:) मध्यत एव प्रजननात्सप्तदशमसृजत तज्जातीछन्दो न्वसृज्यत विश्वेदेवा देवता वैश्यो मनुष्यो वर्णा ऋतु स्तस्माद्वैश्योधमानो न दीयते प्रजननाधि सृष्टस्तस्माद् बहुपशुर्वैश्वदेवो हि जागतो वर्षाह्यस्यर्तु: (६-१-१०) ।

१५- स (आदित्य:) अस्य (प्रजापते:) मूर्धानमुदहन स द्रोणकलशो भवत्तस्मिन् देवा: शुक्रमगृण्हत तांवै स आयुणातिमित्यब्रवीत् । तं प्रोहे द्वानस्पत्योसि बार्हस्पत्योसि। यदाह बार्हस्पत्यइति बृहस्पतिर्वै देवानामुद्गाता तमेवतद्धुनक्ति। देवपात्रं द्रोण कलश: । (६-५-१-७) ।

१६- छन्दांसिवै देवानि पवित्राणि तै द्रोण कलशं पावयन्ति (६-६-६) ।

१७- चात्वालमवेक्ष्य बहिष्पवमानं स्तुवन्त्यत्रवा असावादित्य आसीत्तं देवा बहिष्पवमानेन स्वर्ल्लोकमहरन् (६-७-२०) ।

१८- उपास्मै गायतानर इति ग्राम कामाय प्रतिपदं कुर्यात् । नरोवै देवानां ग्रामो ग्राममेवास्मा उपाक: (६-६-१) ।

१६- यद् बहुदेवत्य मुत्तमंपदं (वामदेव्यतृचस्य) तेन वैश्वदेवं सर्वेष्वेव रूपेषु प्रतितिष्ठति। (७-८-७)

२०- अभीवर्तो नवे देवा असुरानभ्यावर्तन्त यदभीवर्तो ब्रह्मसाम भवति (८-२-८)

२१- देवावै ब्रह्मव्यभजन्त तस्ययो रसो त्यरिच्यत तद्यज्ञायज्ञीय मभवत्, यज्ञायज्ञीयेन स्तुवन्ति ब्रह्मणएव रसे यज्ञं प्रतिष्ठापयन्ति । (८-६-२) ।

२२- अथाश्विनमुच्यते सर्वा: खलु देवता: शस्यन्ते (६-१-३७) ।

२३- अयंत इन्द्र सोम इति दैवोदासमग्निष्टोमेन वै देवा इमं लोक मभ्यजयन्नन्तरिक्षा मुक्थे नाति रात्रेणामुं त इमंलोकं पुनरभ्य कामयन्त इहेत्यस्मिं लोके प्रत्यतिष्ठन् यदेतत्साम भवति प्रतिष्ठित्यै (६२-८) ।

२४- संवत्सरोवै देवानां गृहपति: स एव प्रजापति स्तस्य मासा एव सह दीक्षिण: । (१०-३-६) ।

२५- ओको वै देवानां द्वादशाहो यथावै मनुष्या इमं लोक माविष्टा एवं देवता द्वादशा माविष्टा देवता हवा एतेन यजते य एवं विद्वान् द्वादशाहेन यजते । (१०-५-१५)

२६- सफेन वै देवा इमां लोकान्समाप्नुवन् यत्समाप्नुवं स्तत्सफस्य सफत्वमिमा नेवैतेन लोकान्समाप्य सत्रमासते (११-५-६) ।

२७- इन्द्रो दधीचो अस्थभिरिति दाधीच स्तृचो भवति दध्यङ्वा आङ्गिरसो देवानां पुरोधानीय आसीदन्नं वै ब्रह्मण: पुरोधा अन्नाद्यस्या वरुध्यै । (१२-८-६) ।

२८- भारद्वाजस्य पृश्न्यच्छावाक साम भवत्यन्नं वै देवा: पृश्नीति वदन्त्यन्नाद्यस्या वरुध्यै। (१२-१०-२४)

२९- आपोवै हविररसा आसंस्ते देवा: पापवसीयसा दभिमपुर्यदप उपनिधाय स्तुवते पापवसीयसो विधृत्यै (' १३-४-७) ।

३०- त्रयस्त्रिंश एवस्तोमोभवति प्रतिष्ठायै देवतासु वा एष प्रतिष्ठिति: ।(१३-७-१६) ।

३१- यज्ञस्य हिस्थ ऋत्विज इत्यैन्द्राग्नं सोदर्क मिन्द्रियस्यवीर्यस्य रसस्या नदी दाराय यत्रवै देवा इन्द्रियं वीर्यं रसमपस्यं स्तदनु न्युदन स्तोम: । (१३-८-५) ।

३२- गौङ्गवं भवति, यत्साम देवता प्रशंसति तेनयजमाना: सत्याशिष: सत्याशिषो सामेति वै सत्रमासते सत्याशिष एव भवन्ति । १४-३-२०) ।

३३- प्रवद्भार्गवं भवति प्रवता वै देवा: स्वर्गं लोकं प्रायन्नुद्वतो दायन् (१४-३-२४) ।

३५- तमिन्द्रं वाजयामसीत्यैन्द्रमष्टमेनवै देवा अन्हेन्द्र मवाजयन्नवमेन पाप्मानमघ्नन्नहरे वैतेन वाजयन्ति । (१३-८-६) ।

३६- महां इन्द्राय ओजसे त्यैन्द्र मष्टमेन वै देवा अन्हेन्द्र मवाजयन्नवमेन पाप्मानमघ्नन्नहरे वैतेन महयन्ति (१५-२-७) ।

३७- अहवरित दव्लीयत तद्देवा देवस्थाने तिष्ठन्त: सङ्कृतिना समस्कुर्व स्तत् सङ्कृते संकृतित्वं देवस्थाने न वै देवा: स्वर्गे लोके प्रत्यतिष्ठन् । देवस्थानं भवति प्रतिष्ठायै संस्कृति भवति संस्कृत्यै । (१५-३-२८) ।

३८- सर्वजितावै देवा: सर्वमजयन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवतेनाप्नोति सर्वं जयति (१६-७-२) ।

३९- अनुष्टुभ्याथर्वणे भवति, भेषजंवै देवाना मथर्वाणो भेषजायैवारिष्ट्यै ।१६-१०-१०)

४०- सतो बृहत्यावै देवा इमां लोकान् व्याप्नुवन्निमानेवैताभिर्लोकान् व्याप्नोति(१६-११

४१- त्रिवृदग्निष्टोमो वैश्वदेवस्य लोक: (१७-१३-१) ।

४२- आग्नेयी प्रतिपद वैश्वदेव: पशुर्बार्हस्पत्या नु बन्ध्या अग्नि संवत्सरं वैश्वदेवेनाप्नोति (१७-१३-१७)

४३- यदा संवत्सरस्य गृहपतिर्भवत्यथ वैश्वदेवस्य मात्रामाप्नोत्यतोवा इतरे परस्तरां परस्तरामेव सर्वे (१७-१४-२)

४४- इन्द्रं प्रजापति मुपाधावत्तस्मा एतमुपहव्यं प्रायच्छन्तं विश्वेदेवा उपाव्ह्यन्त तस्मा-
दुपहव्य: (१८-१-६) ।

४५- वैश्वदेवी भवति विश्वेह्येनं देवा उपाव्हयन्त (१८-१-१७)

४६- देवव्रतं वै घृतं देव व्रतेनैव देवता अप्येति (१८-२-६)।

४७- अथैतत्त्रयस्त्रिंशमह स्त्रयस्त्रिंशद्देवता देवताएवाप्नोति (२२-७-४) ।

४८- अभिजितावै देवा इमांलोकानभ्यजयन्विश्वजिता विश्वमजयन् सर्वजिता सर्वमजयन्
सर्वस्तोमो तिरात्रोभवति सर्वस्याप्त्यै सर्वस्यजित्यै सर्वमेव तेनाप्नोति सर्वं जयति
(२२-८-४)।

४९- यद्वैमनुष्याणां प्रत्यक्षं तद्देवानां परोक्षमथयन्मनुष्याणां परोक्षं तद्देवानां प्रत्यक्षम्,
एतद्वैपरोक्षं व्रतं यद्विश्वजित् प्रत्यक्ष मेव तेनान्नाद्य मवरुन्धे (२२-१०-३) ।

५०- पृष्ठ्य: षडहोमहाव्रतं ज्योतिष्टोमो ति रात्र एते नवै देवा देवत्वमगच्छन्(२२-११-१)

५१- अथयत् पृष्ठ्य: षडहो मध्यतो भवत्येष वाव देवतल्पो देवतल्पमेव तदारोहन्ति
तल्प्या भवन्ति (२३-४-५)

५२- एतद्वै (प्रथमं पन्चदश रात्रं) देवानां सत्रं तदथापि देवा: सत्रमासते (२३-६-३) ।

५३- एतेन (अर्यम्णायमास्येन सत्रेण) वा यमैतं लोकमजयत्, यदाहुरर्यम्ण: पन्था इत्येष
वाव देवयान: पन्था: (२५-१२-२) ।

५४- (तुरायणेष्ट्या यने) आग्नेयो ष्टाकपाल ऐन्द्रएकादश कपालो वैश्वदेवश्चरु:।
(२५-१४-१)

५५- यद्वैश्वदेवश्चरुर्भवति वैश्वदेवं वै तृतीयसवनं तृतीय सवनमेव तेनाप्नोति(२५-१४-४)

इति ताण्डय महा ब्राह्मणे वैश्वदेविकानि विधि वाक्यानि ।

अथर्ववेदीय गोपथ ब्राह्मणे विश्वेदेवात्मकानि विधिवाक्यानि

१- परोक्षप्रिया इवहि देवा भवन्ति प्रत्यक्षद्विषः (१-१) ।

२- (एकविंशतिसंस्थे यज्ञे) विश्वेदेवा होत्रकाः । (१-१३)

३- तद्वा एतदथर्वणोरूपं यदुष्णिषी ब्रह्मा तं दक्षिणतो विश्वेदेवा उपासीरं स्तंय दक्षिणतो विश्वेदेवा उपासीरं स्तत्सदस्यो भवत् (२-१६) ।

४- इन्द्र उक्थानि सामानि लुलोच तानि होत्रे प्रायच्छ दाज्यंहवै होतुबर्भव प्रउगंपोतु वैश्वदेवंहवै होतुर्बभूव । (३-५) ।

५- अथह प्राचीन योग्य आजगामाग्नि होत्रं भवन्तं पृच्छेद् गोत्रम इति पृच्छ प्राचीन योग्येति । किन्देवत्यं वत्समुन्नीयमानम् ? वैश्वदेवमुन्नीयमानम् (३-११, १२)

६- अथयत् त्र्यमुपयन्ति सोममेव तद्देवं देवतां यजन्ते सोमोदेवी देवता भवति सोमस्य देवस्य सायुज्यं सलोकतां विश्वेभ्योदेवेभ्यो य एत दुपयन्ति । (४-८) ।

७- अथयद्दशरात्र मुपयन्ति विश्वानेव तद्देवान्देवतां यजन्ते विश्वदेवा देवता भवन्ति विश्वेषां देवानां सायुज्यं सलोकतां यन्तियएतदुपयन्ति । (४-१०)।

८- अथसंस्थिते सवने वाचयति मयि भर्गो मयि महो मयि यशो मयि सर्वमिति (तत्र) विश्वदेवा एवसर्वम् । (५-१५) ।

९- सयदाह मयिसर्वमित्यप एवैतल्लोकानामाह चन्द्रमसन्देवानां विश्वांदेवां देवगणानाम्। (५-१६) ।

१०- द्वया वै देवा यजमानस्य गृह मागच्छन्ति सोमपाअन्ये, असोमपा अन्ये हुतादो न्ये अहुतादो न्य एतेवै देवा अहुतादो यद् ब्राह्मणा एतद्देवत्य ऋणयः पुरानीजान एतेहवा एतस्य प्रजायाः पशूनामीशते ते स्या प्रीता इषमूर्जं मादायाप क्रामन्ति यदन्वाहार्य मन्वाहरति तानेव तेन प्रीणाति दक्षिणतः सद्भ्यः परिहत्वा आह दक्षिणावृतैव यज्ञेन यजत आहुतिभिरेव देवान् हुतादः प्रीणाति दक्षिणाभि र्मनुष्य देवांस्ते स्मै प्रीता इषमूर्जं नियच्छन्ति । (उत्तरार्धे १-६) ।

११- देवावा ओषधीषु पक्वास्वजिम्युः सइन्द्रोवेद (अग्निरेन्द्राग्नानन्तरं) तद्विश्वे-देवा अब्रुवन वयं वा एतत्प्रथयिष्यामो भागोनो स्त्वति तद्भूम एव वैश्वदेवो थो प्रथयत्येतेनैव पयसिस्या द्वैश्वदेवत्वाय वैश्वदेवंहि पयो थेमे अब्रुतां नवाकृत आवाभ्या मेवैतद्यूयं प्रथयत । (उ० १-१७) ।

१२- अथो भैषज्य यज्ञावा एते य च्चातुर्मास्यानि तस्मा दृतु सन्धिषु प्रयुज्यन्ते ऋतु सन्धिषु वै व्याधिर्जायते तान्येतान्यष्टौ हवींषि भवन्ति अष्टौवैचतसृणां पौर्णमासीनां हवींषि भवन्ति, चतसृणां वै पौर्णमासीनां वैश्वदेवं समासः । अथयदग्निं मन्थन्ति प्रजापतिर्वै वैश्वदेवं प्रजात्या एवार्थेन देवगर्भं प्रजनयति । (१-१९)

१३- अग्नीषोमो वै देवानां मुखं मुखतएव तद्देवान् प्रीणाति । अथयद्विश्वान्देवान्यजति एतेवै विश्वेदेवायत्सर्वे देवा स्तानेव तेन प्रीणाति । अथयत्परस्तात् पौर्णमासेन यजते तथा हास्य पूर्वं पदो वैश्वदेवेनेष्टं भवति । (१-२०) ।

१४- वैश्वदेवेन वै प्रजापतिः प्रजा असृजत । अथयदग्निं प्रणयन्ति यमेनामुं वैश्वदेवे मन्थन्ति तमेवतत् प्रणयन्ति (उ० १-२१) ।

१५- तैर्वा एतैश्चातुर्मास्यैर्देवाः सर्वान्कामानाप्नुवन् सर्वाइष्टीः सर्वममृतत्वं सवारण प्रजापतिश्चतुर्विंशो यच्चातुर्मास्यानि तस्यमुखमेव वैश्वदेवम् । (१-२६) ।

१६- पञ्चधा वै देवाने व्युत्क्रामानग्निर्वसुभिः सोमोरुद्रै रिन्द्रो मरुद्भिर्वरुण आदित्यै बृहस्पतिर्विश्वैर्देवैः । (२-२) । घृतंवैदेवा वज्रं कृत्वा सोममघ्नन।२-४।

१७- प्राचीनं हि धिष्ण्येभ्यो देवानां लोकाः । (गो० ब्रा०उ० २-१७) ।

१८- देवपात्रं वै वषट् कारो यद्वषट् करोति देवपात्रेणैवतद्देवतास्तर्पयति(उ० ३-१)

१९- यद्गांददाति वैश्वदेवी वै गौः, विश्वेषामेव तद्देवानां तेन प्रियंधामोपैति। ३-१९।

२०- अहर्वै देवा आश्रयन्त । (५-१) नवेदेवा अन्योन्यस्यगृहे वसन्ति (६-१०) ।

इति गोपथ ब्राह्मणे वैश्वदेवात्मकानि विधिवाक्यानि

-----oo-----

।। चतुर्थो ध्यायः ।।

विश्वे देवानां कार्य विमर्शः

(अत्रोक्ता विषयाः)

वेदोक्तानि कार्याणि, प्रभावः, महत्वम्, सम्बन्धिनः, सम्पत्तयः, वैदिक मैतिह्यम्, वेदोप ग्रन्थेषु विश्वेदेवाः, पुराणेषु चेति ।

--०--

विश्वेषां देवानां कार्याणि

(ऋग्वेदे)

१।१।३।७-९ एते रक्षकाः । मनुष्याणांधारकाः । फलदातारः । वृष्टिप्रदाः। त्वरायुक्ताः। दाय-शोषरहिताः। सर्वतोव्याप्त प्रज्ञाः । द्रोहरहिताः।

१।१४।१-१२ सोमपानार्थमग्नेरनुगामिनः । घृतपृष्ठादि गुणैर्युक्तेन रथेन गच्छन्तः । यष्टव्याः । स्तोतव्याः। उषः काले याग गमनाय प्रबुद्धाः ।

१।२३।१-१२ इन्द्रज्येष्ठाः । पूषरातयः। शोभन दानयुक्ताः । वृत्रहन्तारः। मरुदित्यपर नाम संज्ञकाः। नानावर्णयुक्तायाभूमेः पुत्राः । उग्राः। असह्य बलाः । दीप्यमानान्तरिक्षादुत्पन्नाः।

१।८९।१-१२ प्रत्यहं रक्षां कुर्वन्तः । निविद्भिराहूताः । शोभनगतयः। यज्ञेषुगन्तारः। अग्निजिह्वाः। मन्तारः । सूर्यइव चक्षुः प्रकाशाः। मनुष्याणामायुः १२० वर्षात्मकः कर्तारः ।

१।९०।१-९ अभिमत फलं प्रति नेतारः । ऋजु नीतिमन्तः । धनस्याच्छादकाः। मूर्च्छारहिताः । प्राज्ञाः । आत्मतेजोयुक्ताः । स्वकर्मपालकाः ।अमृताः। पापरूप शत्रु नाशकाः। सुखप्रदाः । वन्द्याः । पुत्रदातारः ।

१।१०५।१-१९ पृथिव्यादि स्थान त्रयेषु ऋतानृतयो र्भेद द्रष्टारः । सत्यधारकाः । अनुग्राह्य दर्शनाः । रश्मिरूपाः । महतिलोके वासमानाः पन्चमुख्य देवता संज्ञाभिः प्रसिद्धाः । अरण्य पशुनिवारकाः । नदी प्रवाहकाः । सूर्यतेज विस्तारकाः । अग्निरूपेण हविर्वाहकाः । वरुण रूपेण रक्षकाः । आदित्यरूपेण देवैरपि नाति क्राम्याः । चन्द्ररूपेण तारा-मण्डल दर्शकाः । द्यावा पृथिवी रूपेण स्तुति श्रावकाः । द्वादश संख्या-काभिर्देवताभिः सह कूपात त्रित नामक ऋषे रुद्धारकाः ।

१।१०७।१-३ यजनयोग्याः । यज्ञफलदातारः । इन्द्रवरुणार्यमादिभिर्विभूतिभिः सर्वगुण समूहानां धारकाः ।

१।१२२।१-१५ स्तोतृन समृद्धान्नेन पोषकाः । सस्यक्षेत्राणां समृद्धि कर्तारः । महिमधाः । (महत् धनमन्नंवा यस्य स देव संघः) द्रोग्धारं यक्ष्मादिभि पीडकाः । पूजकेभ्यः दंसु- शर्ध- गूर्तयाभिमत फल दातारः ।

१।१३९।११ द्युलोके एकादश संख्याका भिर्देवताभि: सह वसन्ति । अन्तरिक्षे पि एकादश संख्या युक्तास्तिष्ठन्ति । पृथिव्यामप्येकादश संख्या युक्ता: सन्तो विराजन्ते । यद्यपि तिस्र एव देवता इत्युक्तं निरुक्ते, तथापि स्व विभूतिभि: महिमाभिश्च ते त्रय:, त्रयस्त्रिंशत्संख्या का भवन्ति ।

१।१८५।१-११ द्यावापृथिवीरूपेण जगतश्चक्र रूपेण स्थिता: । पाद राहित्ये पि कृत्स्नं जगत् धारयन्ति । एतौ द्यावा पृथिवी पूर्वं संसृष्टे एव सत्यौ पश्चाद्वियुज्य वृष्टि - हविषी अकुर्वन्त्यौ पुन: विवाहिते सत्यौ सङ्गते अभूताम् । एतौ नित्य तरुण्यौ सर्वमुदकं स्पृशन्त्यौ, जनान् अ रक्षान्त्यौ।

१।१८६।१-११ ~~स्तनः~~ एते आरुक्षा: = शत्रूणामाक्रमितार:। इन्द्ररूपेण नित्य युवान:। मरुद्रूपेण प्रवृद्ध बला: । मैत्रीयुक्ता व्यवहर्तार: । अश्विनौ रूपेण व्याधि नाशका:। पूष्ण रूपेण स्वायत्तबला: । विष्णु रूपेण व्याप्ता:। वायु रूपेण वाहका: । स्वकीया वसुमत्या दीप्त्या स्तावकान् निवासयन्ति ।

२।२९।१-७ धृतव्रता: , धृतकर्माणि:। गमनशीला:। रक्षाणार्थमागच्छन्ति । बलरूपा:। अन्तर्हित प्रदेशे रक्षा: पिशाचादीनि बाधारूपाणि पृथक्कुर्वन्ति ।

२।३१।१-७ समानं प्रीयमाण: । विश्वस्य द्रष्टार:, मरुत्समूहेन सह आगच्छन्ति ।

२।४१।३-१५ बर्हिषि उपविशन्ति । सोमपा: । एतेषामग्रेसर: इन्द्र: । समूहो मरुताम् पूषाख्यो देव: कोषाध्यक्ष:, द्योतमाना: ।

३।५४।१-२२ पुरातना: विद्युत् रूपम् अपेक्षित मर्थं लेभिरे । द्यावापृथिव्यो: सङ्गमन निमित्ते युद्धे युवयोर्माहात्म्यम् अद्यतनानरापि जानंति ।एतेषां मार्ग: उत्तमं स्थानं न को पि जानाति । एते जलस्य स्थाने अन्तरिक्षे हृष्यन्ति । एते स्थावर जङ्गमात्मकं पृथिवीस्थानमेव अभिगच्छन्ति । शत्रूणांमारयितार: उदकाद्यज्ञाद्वा प्रादुर्भूता: । माधुर्योपेतेनोदकेन औषधय: सिन्चन्ति।

३।५६।१-८ मनुष्यादीनां द्यावा पृथिव्याधारकतया अवस्थापनं, यच्च पर्वतादीनामुन्नत तयावस्थापनं तदिदं देवानां कर्म । षड्भारान् (वसन्तादिषड् ऋतुभि: पुष्प-फलादि भारान्) बिभर्ति। त्रयोलोका: उपर्युपरि स्थापयन्ति गुहायां स्वात्मनि द्वे निहिते परमेका भूमिरेव दृग्गोचरा कुर्वन्ति । त्रयोलोका: तेच प्रत्येकं त्रि र्भवन्ति । ते, देवानां निवास स्थानानि भवन्ति । एतेषां पुत्रा: अग्नि-वायु सूर्य रूपा: केनापि विनाशयितु मशक्येषु दीप्यमानेषु उत्तमस्थानेषु त्रिषु राजन्ते ।

३।५७।१-६ एते प्रीताः सन्तो वृष्टिद्वारा अपेक्षितं फलं दुहन्ति । आेषधयः एभ्यः पुष्प-फलादि सेचन सामर्थ्यं मिच्छन्ति । यूयं रश्मयो पि तेभ्यो वर्षण शक्ति मिच्छन्ति । ताः इन्द्रे प्रथमं सामर्थ्यम् , आदित्ये अपरं अब्रूप गर्भाधान सामर्थ्यं जानन्ति । एतेषां दीप्तयो मनुष्य व्यवहारा-योर्ध्वं मुखा भवन्ति । यथा पर्वतस्य (मेघस्य वा) धारा ओषधि वनस्पत्यादिषु संगतिं कुर्वाणा तान वर्धयन्ति । तथैव नाना रूपा प्रमतिरेषामपेक्षित फलप्रदानेन वर्धयति ।

४।५५।१-१० एते त्रातारः (उद्धारकाः(वरूतारः (सम्भक्तारः) स्थान दातारः। तमाप सारकाः, अभिमत फल प्रदातारः। सत्कर्माणो रोचन्ते । वयं मित्रस्य वरुणस्य अग्नेः समुच्छ्रितं अन्नं न नाशितुं समर्था भवाम । किन्तु अनुष्ठानेन क्रियाकलापेनसंवर्धितुमर्हामः । येन धनेन विश्वेदेवाः आगच्छन्ति, तानि धनानि अस्मान् प्रयच्छन्ति ।

५।४२।५ एते धनानां सम्यग्जेतारः। यज्ञं प्रतित्वरमाणाः। एत दनुगृहीताजनाः- अश्वदाः- गोदाः- वस्त्रदाः- धनदा भवन्ति । इति तेषां कृपाफलम्। अस्य यतुनस्य गमनशीलस्य तव केतुना तमोनिर्हरणादिकर्मणा विशिष्टं त्वा चरति ।

६।२१।६ एते रात्र्यभिमानिं वरुणम्, अहरभिमानिं मित्रम्, इन्द्रं बलिनम्, मरुतः अन्तरिक्षास्थावायवः, पूषणं- पुष्टिकरं, विष्णुं सर्वं व्यापिनं प्रकाश-मयं पुरुधियं पुर (नगर) कर्माणि पुरन्धिम् , अग्निं च दाहकं , सवितारं प्रेरकं ओषधीः, तदभि मानिनो देवान्, पर्वतान् अद्रीन अस्माकं तर्पणाय रक्षणाय च अभिमुखाः कुर्वन्ति ।

६।४६।१४ रातिं दानं सचन्ते सेवन्ते इतिरातिषचो विश्वेदेवाः ते तिलमाषादिभि सार्धं तत् अन्नम् प्रयच्छन्ति ।

६।५०।५,११ एतेषा मागमनेन भूमारेजन्ते- भूत जातानि कम्पन्ते । एते दस्यन्तः कामान् प्रयच्छन्तः। दिव्याः दिविभवाः। पार्थिवासः पृथिव्यां भवाः वसवः । गोजाताः, गव्यस्य षोडशावस्थासु प्रतिष्ठिताः । अप्याः अन्तरिक्षे भवाः रुद्राः। लोकान् मृळयन्ति ।

६।५२।१-१७ एते आव्हानं श्रुत्वा आगच्छन्ति बर्हिषि सीदन्ति च । हविर्दातार मेव ते गच्छन्ति । सुखयन्ति च अस्मान् । एते अमृतस्य पुत्राः ।

७।३४।१ उभयोर्लोकयोरुत्पत्तिं विश्वेदेवा जानन्ति ।

७।३४।१० सहस्रचक्षा: एते नदीनां पाथः अभिपश्यन्ति । ७

७।३४।१६ विश्वेदेवानां वरुणः राष्ट्राणां राजा भवति। अस्यबलं सर्वतोगन्तृ भवति । एतेषां बलानि शत्रून् बाधन्ते ।

७।३४।२० यदा देव पत्न्यः आगच्छन्ति तदा त्वष्टा वीरान् पुत्रान् प्रयच्छन्ति ।

७।३५।१-१५ विश्वेदेवा: स्वकीयैः सर्वैरंशैरस्माकं कल्याणं साधयन्ति ।

७।३६।१,६, एते गणस्था: स्वंस्वं नियतं कार्यमत्राध रूपेणाचरन्ति । धर्माधर्मयोर्धारयितारः । एतेषां प्रभावेण सर्वानिद्यः सुष्वयन्ते ।

७।३६।३ देवा अस्यां देव यजन भूमौ रमन्ते ।

७।४०।३-४ एते पृषदश्वाः। अस्माकं देवतानान्च नेतारः प्रापयितारः ।

८।२७।५,८,६ एते समान मनस्का: । अपामावरण भेदकास्तन्नियन्तारश्च । संङ्गरे समान क्रोधयुक्ता: आहवे सरातयः युद्धादन्यत्र अद्रुहः अहिंसकाः । य स्त एभ्यो हविः प्रयच्छति तस्यैते गृहम् अन्नादि वर्धयन्ति । सुगमे दुर्गमे अगम्यस्थले पि एतेषां गमनागमनं सुकरमेव । शत्रोरस्त्राणि स्थाने एव नाशयन्ति।

८।२७।२०-२२ सङ्ग्रामे आयुधानांदोप्तारः, अस्माकं यज्ञे फलदोप्तारश्च। वयं त्रिष्वपि कालेषु एभ्यो वननीयं धन वृणीमहे य द्धनमेभिः प्रचतसे मनवेदद्य मासीत् । एभिर्वयं पुत्रवत् पाल्याःस्म । धनिकाश्च भवेम ।

८।२८।१,३-५ एते द्वि प्रकारकं मन्न रूपं-पशुरूपन्च धनं प्रयच्छन्ति । सर्वाभ्यो दिग्भ्यो स्माकं रक्षका भवन्ति । यद्येतेषामनुकम्पा अदात्रे पिस्याचर्हि सो पि हविः प्रदाता भवति । तत्र बाधा कर्तुं को पि न प्रभवति । कर्तुमकर्तुमन्यथा कर्तुमपि समर्थाः । सप्त संख्याकानां गणानां सप्त संख्याका आयुधविशेषाः, कुण्डलादीन्याभरणानिच + सन्ति । एतेषां श्रियो पि परस्परमधिकं दधिरे ।

८।२६। सूक्ते विश्वेषां देवानां दश संख्याकानां नामानि भिन्नानि । अतः सायणेनोक्तम् - किन्चित्पदलिङ्गात पृथग्देवता: । तत्र प्रथमः बभ्रुः ।

८।२६। स कुण्डलमण्डलादिकं धारयति । सऋत्वा, रात्रीणां नेता । द्वितीय: अग्नि:
१-१० स योनिम् आहवनीयमासीदति । सस्वतेजसैव दीप्यमानोऽस्ति । तृतीय: निश्रुवि:- त्वष्टा लोहमयीं वाशीम्- कुठारं धारयति । चतुर्थ: इन्द्र:, स वज्रं हस्ते बिभर्ति, तेन रक्षांसि जिघ्नते । पञ्चमो रुद्र:, स तिग्मं तीक्ष्ण धारम् पिनाकं गृण्हाति, तेन स उद्गूर्ण बल: सन् रोगाणां जलीय चिकित्सा कर्तुं प्रभवति । अतएव स जलाष भेषज इत्युच्यते । षष्ठ: पूषादेव: स मार्गदर्शकं मार्गं संरक्षकञ्च शस्त्रं प्रधार्य याजीनां स्वर्गमार्गविपर्ययो यथानस्यां तथोर्ध्वपन्थानं पालयति । अथ च एष भूमिगत निधिज्ञ: । तंधनं दाशुषे ददाति । सप्तम: उरुगायो विष्णु:, स असहायो पिबहुकीर्ति: शत्रूणामाक्रन्दनं कारयिता त्रीणि पदानि धारयति। अथ च तै: पद्भि: भुवनानि विचक्रमे । अष्टम: अश्विनौ- तौ एकयासह इति लिङ्गात् ज्ञायेते । तौ गमन साधनौ अश्वौ धारयत: । ताभ्यां संचरेते । अथचेमौ एकया सूर्यया सह सर्वत्र गमनं कुरुत: । नवम: मित्रा- वरुणौ।तौ सम्राजौ इति द्विवचनान्तलिङ्गा दभिधीयेते । एतौ घृतहविष्कौ स्त:। तौ हवीधारयत: । तौ परस्परमुपमौ, कान्तिमन्तौ सद: स्थानम्, चक्राते। दशम: अत्रय:- अत्रिगोत्रोत्पन्ना ऋषयो त्र देवा: । ते त्रिवृदादि सामान्यमन्वत। तेन सूर्यं मदीपयन् । नोचेत्सर्वत्रान्धकार: स्यात् । अतस्तेषां स्तोमान्येवान्धकार निवारकाणि वाग्रूपाणि शस्त्राणि । इत्थं विश्वेदेव गणस्थानां दशसंख्याकानां नामान्तरेण परिचय:, कर्माणि च प्रदर्शितानि।

८।३०।१ एते सर्वदा युवान: सर्वस्माद विद्यमानात प्रथिव्यामपि महत्व प्रभावात् सतो महान्त इत्युच्यन्ते । एते नार्भका: नकुमाराश्च । सर्वदा लोकोत्तम मार्गेण यज्ञ कर्तुन्नियन्ति ।

९।५।११ पवमान सोमस्य पानार्थं मागमने सर्वेषां सङ्गठनं भवति।

९।१४।३ परिष्कृते बलवते क्षीरादिभिर्मिश्रिते सोमरसे एव विश्वे देवा माद्यन्ति ।

९।६७।२७ एते यज्ञकर्तारं पावयन्ति- पाङ्तं कुर्वन्ति ।

९।१०२।५ एते द्रोह वर्जिता: सोम पानार्थं सङ्गता: सन्त: स्पृहणीया भवन्ति ।

१०।३१।२ मनुष्य: सर्वतो यागार्थं धनं कामयेत । लब्ध्वा च यज्ञ मार्गेणहविषा परिचरेत। अपि च आत्मियेन प्रज्ञानेन सं वदेत् । अयं संवाद: अत्र समाध्यानमित्युच्यते । स यथा कर्ता हविर्गृहीत्वा वषट् कर्तुमुद्युक्तो विश्वान्देवान्मनसा ध्यायेदिति ।

यागानन्तरमेव तत्कृपया प्रशस्यमात्मानं प्रवृद्धं सर्वं व्यापिनं ध्यानादि साधनेनान्तःकरणेन गृह्णीयात् । उक्तञ्च गोपथ ब्राह्मणे यस्यै देवतायै हविर्गृहीतस्यात्तां मनसा ध्यायन् वषट् कुर्यात् साक्षादेव तद्देवतां प्रीणाति प्रत्यक्षा देवतां परिगृह्णाति। यस्माद् वृक्षात् द्यावा पृथिव्यौ विश्वेदेवाः निः शेषेण कृतवन्तः, स वृक्षः कीदृशो जातः, तदुत्पादकम् अरण्यमपि केन निर्मितम् इति सम्यक्पिच्छन्त्यौ जरा-वर्जिते देवरक्षितौ द्यावापृथिव्यौ अथ च सर्वाणि दिनानि बव्हीः, उषसश्च देवाः निःशेषेण कृतवन्तः ते एव तयोर्जन्म अवस्थानादिकं सर्वं जानन्ति । तानेव विश्वा-न्देवान् सर्वेस्तोतारः स्तुवन्ति । ऊर्ध्वमार्गे गन्तारं याजिनं विश्वेदवा रक्षन्ति । अथ च मार्गे केनापि दुः शासनो य मिति घोषं कारयन्ति च । ~~१०-३६-१३-१४~~

१०।३६।१३-१४ प्रधान याग दिने विश्वेदेवा रक्षणार्थं सन्नद्धा भवन्ति, तेन सर्वे अग्नयः प्रदीप्ता भवन्ति । इन्द्रादयो देवयजने आगच्छन्ति । अथ च सर्वं विश्वजातं धनं यज्ञ कर्त्रे प्रयच्छन्ति । एते अभीष्टदाने क्षिप्राः, रक्षणे भयं न विन्दन्ति।

१०-५१, ५२।१-१५ सूक्त । अपसुप्रविष्टस्याग्नेः कर्माणि विश्वेदेवैर्ज्ञातानि, तेषां प्रश्नोत्तर रूपे सूक्ते । तमग्निं मन्तिमया ऋचा ३३३९ संख्याका देवाः पर्यचरन् क्षारद्भिराज्यैः सिक्तवन्तः, बर्हिः रास्तृतवन्तः, तदुपरि होतारमासदितवन्तः च ।

१०।६३।३ विश्वेभ्यो देवेभ्यो माता (पृथिवी) माधुर्यापितं सारभूतं क्षीरमन्नादिकं क्षरति। मेघैः परिवृढा द्यौः पीयूषम् अमृतं पिन्वते । ते उक्थशुष्माः- स्तुतिबलाः वृषभराः वृष्टिराहर्ताः अविनाशाय आगच्छन्ति ।

१०।६३।८ एते स्थावर जङ्गमस्य विश्वस्य ईश्वराः । अस्मान् कायिकादि पापरहितान् कुर्वन्ति ।

१०।६४।५ एते प्रातरेव युद्धसज्ज रथयुक्ताः , त्वरारहितनियतगतिकाः, बहुर्हणाः सन्ति।

१०।६५।१ इन्द्र वृत्रयोर्युद्धे विश्वेदेवाः सङ्गताः सन्तो न्तरिक्षं स्वमहिम्ना पूरयन्ति । ओजसा - स्वबलेन शत्रूनभि भावयन्ति ।

१०।६५।६ प्रत्नी गौः विश्वेदेवेभ्यो हविः (पयः) दानार्थं संस्कृत मावासस्थानम् यज्ञप्रार्थि-ता पि स्वयमेवागच्छन्ति । वसिष्ठेन ऊगायार्थं स्वस्तिभ्यश्च एते प्रार्थिताः ।

१०।८५।४७ एते वधू वरयोः परस्परयोर्मनांसि समञ्जन्ति । अपगत दुःखादि क्लेशानि कृत्वा वैदिक लौकिक विषयेषु प्रकाशयन्ति ।

१०।१००।७ एते (कर्षणादि रूपेणारित्रेण पारयितव्यां) नावं कुर्वन्ति । तथा सीरस्त्रादीन्यायुधानि निर्मापयन्ति ।

१०।१०१।७-८ सङ्ग्रामे सैनिकाः एतेषां प्रसादेन बलीवर्दान् पोषयन्ति । तेनान्न पूर्तिः स्यात् । कर्षणं सम्पादयन्ति, तेन कृषि बाहुल्यं स्यात् । कल्याण करं रथंनिर्मापयन्ति। जलाधार पात्रं निम्नं कुर्वन्ति । पाषाण मयेन चक्रेण जलकोषं कवचवद्रक्षन्ति । शत्रून्मारयन्ति च अस्माकं योद्धारः प्रत्यर्थिनां प्राणानपिबन्ति। कवचानि बहुलानि निर्मापयन्ति । लोह-मयीरन्यैरधृष्टाः पुरीः निर्मापयन्ति, येन शाश्वतं संरक्षणं भवेत् ।

१०।१०९।१-७ एते येनकेनापि कारणेन (नत्वपातिव्रत्येन) परित्यक्तां जायां पुनस्तस्मै दानाय समर्थाः । ब्रह्मजायाजुहूर्विषये ते तथा कृतवन्तः ।

१०।११४।३ चतुष्कपर्दया युवत्या सुपेशया घृतप्रतीकया वाचा देवाभागं धारयन्ति ।

१०।११५।६ एते चत्वारिंशत् ग्रहान् सोमेन पूरयन्तः , द्वादश शस्त्र समाप्तिं यावत् गायत्र्यादि छन्दांसि धारयन्ति । ऋक्सामाभ्यां यज्ञ रथं प्रवर्तयन्ति ।

१०।११५।८ अनन्तेषु देहेषु उत्कृष्टानि पञ्चदशाङ्गानि विद्यन्ते, तेषां द्यावा पृथिव्योः परिमाणं यावत् तावत् प्राणिदेह जातमपि भवति । तेषां व्यवहारा पि अनन्ताः भवन्ति । विश्वेषां देवानां जगत्कारणं ब्रह्म यावत्परिमाणं भूत्वा स्थितं तत्परिमाणा ~~क~~ वागपि भवति।

१०।११५।९-१० वेदानां नियोगम्, सप्तधिष्ण्या स्थानानि, अष्टसंख्यापूरकं ऋत्विजं, इन्द्रस्याश्वौ, केचन सप्ताश्वाः रथस्य धूर्युक्तासः भूम्याः द्युलोकस्य च सर्वतः आगच्छन्ति, तेषां श्रमनिवारकं घासादिकं भक्षं, सूर्यस्य हर्म्य-स्थानीयेरथे अवस्थानम् विश्वेदेवा एव जानन्ति नान्ये ।

१०।१२८।१-३ विश्वेदेवां देवाना माध्यन्दोण शत्रु पराजयो भवति, सर्वलोक प्रकाशः, वायुः सञ्चारः, द्रविणं, यज्ञफलं, विवादे जयः, प्राप्यते ।

१०।१३८।६-७ एते जलीयचिकित्साया देवाः। ते नाडी- जिव्हा वाग्भिः रोग ~~परीक्षणं~~ परीक्षणं कुर्वन्ति ।

१०।१५५-५ विश्वेदेवाः, पणिभिरसुरै रपहृतागावः पर्यनयन, अग्निं च परितो व्यवहरन्। को प्येना नभि भवितुं न शक्नोति।

(कृ० य० तैत्तिरीय संहितायाम्)

१।२।१ विश्वेदेवाः सत्यधर्माणः सन्ति । ते मनोजाता मनोयुजः सुदक्षाः सन्ति।

१।४।१० एते द्युलोके एकादश संख्यया तिष्ठन्ति पृथिव्या मपि तथा, एवं अप्सु।
इत्थं ३३ संख्याकाः सर्वे सङ्गत्य हविर्जुषन्ते ।

१।४।२६ सुशर्मा सु प्रतिष्ठो बृहदुक्षो वैश्वदेवग्रहो विश्वेषांदेवानां योनिः ।

१।४।४४ एते गातुविदः मनसस्पतयश्च वर्तन्ते ।

१।५।३ एतेषां मनोज्योतिः आज्यं जुषित्वा विनष्टंयज्ञं सन्दधते ।

१।६।४ उद्ग्राभं निग्राभं च ब्रह्म, देवा अवर्धयन ।

१।६।७ आहवनीयोग्निरेतेषामायतनम् । एतेषां व्रतपतिः कार्यप्रमुखः अग्निः ।

१।६।८ तस्यैव हविर्देवा जुषन्ते यः प्रतिप्रोच्य यज्ञेन यजते ।

२।४।१० एते वसव्याः, शर्मण्याः सपीतयः सन्तो वृष्टिं विदधति ।

२।६।९ देवानां यागः आश्राव्यपूर्वको भवति ।

३।१।४ यज्ञस्य यूपे बद्धः उपाकृतश्चपशु रेतेषां जुष्टं हव्यं भवति । ते तं पशुं
स्वस्वरूपं कुर्वन्ति ।

३।२।८ विश्वेषांदेवानां चिकित्सया कृपया च दम्पत्योर्वीरः पुमान्पुत्रो जायते।

३।३।२ देवयज्ञे विश्वेदेवाः सूक्तवाचो भवन्ति ।

४।१।११ विश्वेदेवाः सर्वाणि सहांसि सहरूपेण सहन्ते ।

४।३।९ त्रयस्त्रिंशत् स्तोमा विश्वेषांदेवानामाधिपत्यं भजन्ते ।

४।४।२ स्वराड् रूपाया उदीच्यादिशः विश्वेदेवा अधिपतयः ।

४।४।१० उत्तराषाढा नक्षत्रं विश्वेषांदेवानाम् । सा नक्षत्रष्टेकापि तन्मन्त्रे
णोपधेया भवति ।

४।७।१३ स्तीर्णं बर्हिषम् पत्नीभिः पुत्रैर्भ्रातृभिर्हिरण्यैः सह देवा अनुगच्छन्ति ।

५।५।१९-२१ हुतादाना महुतादानान्च विश्वेषांदेवानामग्नि चयने न प्रीतिर्भवति ।
अश्वमेध शेष भूतोत्सृदय माणानामेकादश पशुसंघानां हविर्भोक्तारः।
तेउत्सृष्टानांपशूनां प्राणानि भजन्ते ।

५।५।२२,२४ ग्राम्यपशुसंघेषु शिल्पः, पिशङ्गो तूपरो च पूर्ववद्वैश्वदेविकौ ।

५।६।११-२३ आश्वमेधिकाष्टादश्यादि त्रयोदश पशुसंघानां विश्वदेवामोकार: ।

५।७।६ एते सूर्ये गोषु अश्वेषु च रुचिं कुर्वन्ति ।

६।१।१,३,६ एते नवनीतेना भ्यन्जन्ति । मेध्यैर्यज्ञियैरद्भि: स्नान्ति । एतेषां वास: ओतु: तंपरिदधति । ऋक्साम्नोरूपं शुक्लकृष्ण मिश्रवर्णं मजिन मेतेषामासनम् । कामुका: स्त्रियोगन्धर्वाश्च देवानुगायन्ति ।

७।३।१० पृथिवीस्थ मादित्यं विश्वेदेवा: पृष्ठे संस्थाप्य स्वर्गलोकम् एकविंशतिरात्रेण नीतवन्त: ।

(कृ०य०मैत्रायणी संहितायाम्)

१।१।४२ विश्वेदेवा:, वैदिकींवाचं श्रृयन्त: अमृतवद् संप्रावभागान् जुषन्ते ।

७।१।२ पृथिव्या मन्युपरोप्तस्य विश्वेदेवा: पुनरामरन् ।

२।२।५ एते देवानां परमेष्ठी रूपा: । ते द्वादश कपाल पुरोडाश निर्वप्त्रे त्रीणि धनूंषि प्रयच्छन्ति । इमा वर्तमाना वैश्वदेवी प्रजा: । ताभिरात्मानं समूहति ।

२।६।६ ये देवा: पुर: सद: ते अग्नि नेत्रा: । दक्षिणात्सदो यमनेत्रा:। पश्चात्सदो मरुन्नेत्रा: । उत्तरात्सदो मित्रावरुणनेत्रा:। उपरिषद: सोमनेत्रा:। सर्वे रक्षोहण: सन्ति ।

२।७।६ उखा सम्भरणे विश्वेदेवा आनुष्टुभेन च्छन्दसा आच्छृन्दन्ति ।

अन्यास्ववशिष्टासु संहितासु इमान्येवकार्याणि तेषां महत्व प्रतिपादन सहितानि प्रकारान्तरेण वाक्यान्तरेण च वर्तन्ते । अतस्तेषां विस्तर भिया पुनर्लेखनं न कृतम् ।

।। इतीमानि समहत्व युक्तानि विश्वेषांदेवानां कार्याणि ।।

--००--

विश्वेषां देवानां सम्बन्धिन: तथा रथ-सेना-दूत-नौकादय:

विश्वा अदिति: , एतेषां माता। त्रयोदशो ब्रह्मणो मानसपुत्रा ऋषय एतेषां पितर: । (भाग० ६।६।७।६) अथ च द्यौ: पिता, पृथिवी माता (ऋ०मं०१)

भगिनी

सिनीवाली एतेषां भगिनी । यापूर्वमावास्यासा सिनीवाली (ऐ०ब्रा०३२-१०)

पत्नी

कुहूर्देवानां पत्नी। योचरासाकुहू:। विश्वदेव्यावती उखा देवानां पत्नी(तै०सं०४।१।६ देवपत्न्यो दिश: (तै०सं० ५।२।११) विकर्णी इष्टका एतेषां विक्रान्तिरूपा । (तै०सं० ५।३।७)

देव्य:

एतेषां तिस्रो देव्य: सन्ति । तत्र प्रथमा इळा, सारथं प्रेरयित्री । द्वितीया सरस्वती, तृतीया भारती। (ऋ० २।३१।५)

भ्राता

सोमो देवानां भ्राता । तथा च इन्द्रो विश्वेषांदेवानामानुजावर: ।(तै०सं०६।६।१

अध्वर्यू

अश्विनौ देवानामध्वर्यू भवत: । (तै०सं० ६।२।१०) ।

राजानौ

चक्षुषी यागौ देवानां राजानौ । तै०सं० २।६।२ । यज्ञोपवीतन्चोपवीतं भवति

प्राणा: - ओषधि:

घृतमेतेषां प्राण स्वरूपम् । तथा च घृत मेतेषामोषधि रूपमपि। (तै०सं०२।३।१०)

प्रजा:

सप्त सप्त संख्याका: सप्त गणा: ४९ मरुतो विश्वेषांदेवानां प्रजा:। इमा - वर्तमाना वैश्वदेवी प्रजा:, ताभिरात्मानं समूहति ।(तै०सं० २।२।५)

भक्ष्यम्

एतेषां भक्ष्यं द्वादश कपाल: पुरोडाश: । (तै०सं० ३।३।७) मधुर्वै देवानां परमपन्नाद्यम् । (खाद्यम्) (तै०सं० ७।५।१०) ।

दक्षिणा

पृषती गौ र्धेनुर्दक्षिणा वैश्वदेवी भवति । (मै०सं० २।३।४)

जिव्हा

एतेषां तिस्रो जिव्हा: । गार्हपत्य- आहवनीय- दक्षिणाग्निरूपा: । तथा च हविर्ग्रहणयोग्यानि त्रीण्गिस्थानानि ।आग्नीध्रीयादि धिष्ण्या रूपाणि । ऋ३।२०।२

रूपम्

दधिग्रहो विश्वेषां देवानांरूपम् ।(तै०सं० ३।५।६) तथा च पृषदाज्यं विश्वेषां देवानां तद्ववर्धकम् । (तै०सं० ३-२-६)।

पात्रम्

विश्वेषां देवानां शुक्र पात्रम् । शुक्रपात्रेण वैश्वदेवं गृण्हाति । तै०सं० ६।५।५। द्वितीयमादित्यपात्रम् । तृतीयसवने सवितृपात्रेण वैश्वदेवं कलशाद् गृण्हाति । ६।५।७।

पशव:

विश्वेभ्यो देवेभ्य: पृषतान् । (मै०सं० ३।१४।६) । खड्गो वैश्वदेव: । ३।१४।२१ विश्वेदेवयानं त्रिमनुषा: पर्यश्वं नयन्ति । (ऋ० १६-१-४)

सम्पत्ति:

प्रतीचीदिक्, वर्षाऋतु:, विश्वेदेवा: (स्वयमेव) देवता:, विड्द्रविणम्,जातीछन्द:, वैरूपं साम, सप्तदश:स्तोम:, सउ एकविंशवर्तनि, रहमुनाक्रमिण:, त्रिवत्सोवय:, द्वापरो यानाम्, पश्चाद्वातोवात:, पितर: पितामहा:, परे वरे । (मै०सं० २।७।२०)

नौका

विश्वेदेव लोक गमनार्थं, सुष्ठु त्रायन्तीं विस्तृताम्, दोषरहितां,सुखोपेताम् , दैवीं, अदीनां, सुप्रणयनां,शोभनारित्राम्, अविनश्वरीं, द्यौ रूपां नावमारुह्य तत्र गन्तव्यं भवति (ऋ० १०।६३) ।

नेता

देवानां नेता सूर्यः । हविषां रसभोगो देवानप्रतिनयति ।(अ० ५।५३।५) उक्तञ्च-

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः ।। इति ।।

दूतः

विश्वेषां देवानां विश्वस्तो दूतः वायुः । (ऋ० १०।१३७।३)

रथः

घृतपृष्ठादि गुण युक्तः। वज्राभिर्युक्तः ।(ऋ० १।१४३।१) श्वेत बिन्दुभिर्युक्ताश्वाः। अश्वावतः। रथिनः । सूरिः - प्रेरकः (ऋ०१-८६।७) दीर्घाप्साः- अतिविस्तृतः। स्यूमगभस्तिः - सुखकर दीप्तिः। पृषद्वर्णाश्वाः। सूर्य इव द्योतते ।(ऋ०१।१८६।१-११) विद्युद्रथाः । ऋष्टिरायुधधारकाः । (ऋ० ३।५४) दर्शपूर्णमास याग एव विश्वेषां देवानां रथः । अयमेवदेवयानः पन्थाः । एतौ दर्शपूर्णमासावेव देवानामश्वौ । (तै०सं० - २।५।६) गार्हपत्यादयस्त्रयो ग्नयो देवानां हव्यवाहनः । (तै०सं० २।५।८) गायत्र्यादिच्छन्दांसि देवेभ्योहव्यं वहन्ति । (तै०सं० ५।१।१)

सेना

एतेषां देवीसेना मरुद्रूपधारिणी वृष्ट्युत्पादिका वर्तते, नकेवल मिदमेवास्याः कार्यम्, अपितु विश्वं सर्वं भुवनम् ऊषर प्रदेशमपि सर्वतः उत्पादयति ।

लोकाः

एतेषां देवलोका २१ संख्याकाः सन्ति । १२ मासाः, ५ ऋतवः, ३ इमे (भूर्भुवः स्वः) लोकाः, १ आदित्य इति । (तै०सं० ५।१।१०) ।

नगरी

मण्लेष्टका एतेषां दुःख रहिता नगरी (तै०सं० ५।३।६)

प्रियं धाम

अनाधृष्टं देवयजनं देवानां प्रियं धाम । (मै०सं० १।४।३२) ।

[illegible]

प्रियम्

जुहू, उपभृत, ध्रुवा:, विश्वेषांदेवानां प्रिया:। ता: सदसि सीदन्ति । (काठकसं० १।११।३७) ।

अग्नेर्यत्सध्रूमं ज्योति:, तद्विश्वदेव प्रियम् । (मैं०सं० १।८।६) ।

।। इति विश्वेषां देवानां सम्बन्धादि सम्पत्ति: ।।

--००--

अथ विश्वेदेवात्मकं वैदिकमैतिह्यम् ।

(ऐतरेय ब्राह्मणे नुसन्धीयते)

१- यज्ञोवै देवेभ्य उदक्रामत्तमिष्टिभिः प्रैषमैच्छन्यदिष्टिभिः प्रैषमैच्छं स्तदिष्टीनामिष्टित्वं तमन्वविन्दन्ननुविच यज्ञो राध्नोति य एवंवेद । (अ०१ खं० २)।

२ यज्ञोवै देवेभ्य उपक्राम तेदेवा न किं चनाशक्नुवन्कर्तुं न प्राजानंस्ते ब्रुवन्नदितिं त्वयेमं यज्ञं प्रजानामेति सातथेत्यब्रवीत्सावैवो वरं वृणा इति वृणीष्वेति सैतमेव वरमवृणीत मत्प्रायणा यज्ञाः सन्तु मदुदयना इति तथेति तस्मादादित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयो वरवृतोह्यस्या अथो एतं वरमवृणीत मयैव प्राचीं दिशं प्रजानाथाग्निना दक्षिणां, सोमेन प्रतीचीं सवित्रोदीचीमिति ।२-२।

३- देवासुरावाएषु लोकेषु समयतन्त त एतासुप्राच्यादि दवयतन्त तां स्ततो सुरा अजयंस्त उदीच्यां प्राच्यां दिश्ययतन्त ते ततो न पराजयन्त सैषा दिगपराजिता। ते देवा अब्रुवन्नराजतयावैनो जयन्ति राजानं करवामहा इतितथेति ते सोमं राजानमकुर्वंस्ते सोमेन राज्ञा सर्वां दिशो जयन्। (३-३) ।

४- यज्ञोवै देवेभ्य उदक्रामन्न वो हमन्नं भविष्यामीति नेतिदेवा अब्रुवन्नन्नमेव नो भविष्यसीति तं देवा विमेथिरे सहैभ्यो विहृतो न प्रबभूव ते होचुर्देवा नवैन इत्थं विहृतो लं भविष्यति हन्तेमं यज्ञं सं भरामेति तथेति संजभ्रुस्तं संभृत्यो चु रश्विना- विमं भिषज्यतमित्यश्विनो वै देवानां भिषजावश्विनावध्वर्यूं तस्मादध्वर्यूं घर्मं संभरतः (४-२) ।

५- यज्ञेन वै देवा ऊर्ध्वाः स्वर्गं लोकमायं स्ते बिभयुरिमंनोदृष्ट्वा मनुष्याश्च ऋषयश्चानु प्रज्ञास्यन्तीति तंवैयूपे नैवायोपयंस्तं यद्यपेनैवापोषयं स्तद्यूपस्य यूपत्वं तमवाचीनाग्रं निमित्योर्ध्वा उदायं स्ततावै मनुष्याश्च ऋषयश्चदेवानां यज्ञवा स्त्वभ्यायन्यज्ञस्य किं चि देषिष्यामः प्रज्ञात्या इति ते वै यूपमेवा विन्दन्नवा चीनाग्रं निमितं ते विदुरनेनवैदेवा यज्ञमयूयुन्निति तमुत्खायोर्ध्वं न्यमिन्वं स्ततोवै ते प्रयज्ञ मजानन्प्रस्वर्गं लोकम् । खादिरेणवै यूपेन देवाः स्वर्गलोक मजयन्।(६-१) ।

६- देवेभ्योवैपशवो न्नाधाया लम्भाय नातिष्ठन्त ते पक्रम्य प्रतिवावदतो तिष्ठन्नास्मा नालप्स्यध्वे नास्मानिति ततोवैदेवा एतं यूपं वज्र मपश्यं स्तमेभ्य उदश्रयंस्तस्माद् बिभ्यत उपावर्तन्त तमेवाद्याप्युपावृत्तास्ततोवै देवा देवेभ्यः पशवो न्नाधाया लम्भायातिष्ठन्त ।

७- पशुर्वैनीयमानः समृत्युं प्रापश्यत्स देवान्नान्व कामयतैतुं तं देवा अब्रुवन्नेहि स्वर्गं वै त्वा लोकं गमयिष्याम इति सतथेत्यब्रवीत्तस्यवैमे युष्माकमेकः पुरस्ता देत्विति तथेति तस्याग्निः पुरस्ता देत्सो ग्नि मनुप्राच्यवत । (६-६) ।

८- देवावै यज्ञमतन्वत तां स्तन्वाना नसुरा अभ्याय न्यज्ञवेश समेषां करिष्याम इति ताना प्रीते पशौ पुरञ्व पर्यग्नेर्यूपं प्रति पुरस्ता दुपायंस्ते देवाः प्रति बुद्ध्याग्निमयीः पुरस्त्रिपुरं पर्यस्यन्त यज्ञस्य चा त्मनश्चगुप्त्यै ता एषा मिमा अग्निमय्यः पुरा दीप्यमाना भ्राजमाना अतिष्ठंस्ता असुराअनपधृष्यैवापा द्रवं स्ते ग्निनैव पुरस्ता दसुर रक्षांस्यपाघ्नता ग्निना पशचत् । (७-१) ।

९- देवावै यज्ञेन श्रमेण तपसा हुतिभिः स्वर्गं लोक मजयं स्तेषां वपायामेव हुतायां स्वर्गोलोकः प्राख्यायत तेवपामेव हुत्वा ना दृत्यै तराणि कर्माण्यूर्ध्वाः स्वर्गं लोक मायंस्ततोवै मनुष्याश्च ऋषयश्च देवानां यज्ञवास्तवम्यायन्यज्ञस्य किंचि देणिष्यामः प्रज्ञात्या इति ते भितः परिचरन्त ऐतत्पशुमेव निरान्त्रं शयानं ते विदुरियान्वावकिल पशुर्यावती वपेति । (७-४) ।

१०- प्रजापतौ वै स्वयं होतरि प्रातरनुवाकमनुवक्ष्यत्युभये देवासुरा यज्ञमुपवसन्नस्मभ्यमनु-वक्ष्यत्यस्मभ्यमिति सवै देवेभ्यएवान्वब्रवीत्ततोवै देवा अभवन्परा सुराः । प्रातर्वै सतं देवेभ्यो न्वब्रवीयत्प्रातरन्वब्रवीत्तत्प्रातरनुवाकस्य प्रातरनुवाकत्वम् ।(७-५) ।

११- आसुरी वै दीर्घं जिव्ही देवानां प्रातः सवनमवालेट् तद्व्यमादच्च देवाः प्राजिज्ञासन्त ते मित्रा वरुणा बब्रुवन्युवमिदं निष्कुरुत मिति तौ तथे त्यब्रूतां तौ वै वो वरं वृणावहा इति वृणिथामिति तावेत मेव वरमवृणातां प्रातः सवने पयस्यां सैनयो-रेषाऽच्युता वरवृता ह्येनयोस्तद्यदस्यै विमत्तमिव तदस्यै समृद्धं विमत्त मिवहि तौ तथा निरकुरुताम् । (८-४) ।

१२- देवानां वै सवनानि नाध्रियन्त त एतान्पुरोळाशा नपश्यंस्तानानुसवनं निरवपन्सवन-नानां धृत्यै ततो वैतानि तेषामध्रियन्त तद्यदनुसवनं पुरोळाशा निरुप्यन्ते सवना-नामेवधृत्यै तथा हि तानि तेषामध्रियन्त पुरो वा एतान्देवा अक्रत यत्पुरोळाशा स्तत्पुरोळाशानां पुरोळाशत्वम् (८-५) ।

१३- देवावै सोमस्य राज्ञो ग्रपेये न समपादयन्नहं प्रथमः पिबेय महं प्रथमः पिबेय मित्येवा कामयन्त ते संपादयन्तो ब्रुवन्हन्ता जिमयाम स यो न उज्जेष्यति स प्रथमः सोमस्य पास्यतीति तथेति त आजिमयुस्तेषामाजिं यतामभिसृष्टानां वायुर्मुखं प्रथमः

प्रत्यपद्यता थेन्द्रो थ मित्रावरुणा वथाश्विनो । तौ सहैवेन्द्रवायू उदजयतां सह मित्रावरुणौ सहाश्विनौ त एषामेते यथोज्जितं मद्दा इन्द्रवायवोः प्रथमो थ मित्रावरुणयो रथाश्विनोः । (६-१) ।

१४- यज्ञोवै देवेभ्य उदक्रामत्तं प्रैषैः प्रैषमैच्छन्यत्प्रैषैः प्रैषमैच्छं स्तत्प्रैषाणां प्रैषत्वम्। तंपुरोरुग्भिः प्रारोचयन्यत्पुरोरुग्भिः प्रारोचयं स्तत्पुरोरुचां पुरोरुक्त्वम् । तं वेधामन्वविन्दन्यद्वेधामन्वविन्दं स्तद्वेदेर्वेदित्वम् । तं वित्तं ग्रहैर्व्यगृण्हत यद्वित्तं ग्रहैर्व्यगृण्हत तद्ग्रहाणां ग्रहत्वम् । तं वित्वा निविद्भिर्न्यवेदयन्यद्वित्वा निविद्भि- र्न्यवेदयंस्तन्निविदां निवित्वम् ।११-६।

१५- पच्छोवै देवा यज्ञं समभरंस्तस्मात्पच्छो निविदः शस्यते । यद्वैतद्देवा यज्ञं समभरं स्तस्मादश्वः सममवत्तस्मादाहु रश्वंनिविदांशस्त्रेदयात् (११-११) ।

१६- प्रजापतिर्वै यज्ञं छन्दांसि देवेभ्योभागधेयानि व्यभजत्स गायत्रीमेवाग्नये वसुभ्यः प्रातः सवने भजत्त्रिष्टुभमिन्द्राय रुद्रेभ्यो मध्यन्दिने जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्य- स्तृतीय सवने । (१२-२) ।

१७- इन्द्रोवै वृत्रंहनिष्यन्सर्वादेवता अब्रवीदनुमोपतिष्ठध्वमुपमाह्वयध्वमिति तथेति तं हनिष्यन्त आद्रवन्सो वेन्मां वै हनिष्यन्त आद्रवन्ति हन्तेमान्भीषया इति तानभि प्राश्वसीत्तस्य श्वसथा दीषमाणा विश्वेदेवा अद्रवन्मरुतो हैनं नाजहुः। (अतो) मरुत्वतीमनुक्थं शस्त्वा मरुत्वतीययायजति यथाभागं तद्देवताः प्रीणाति। (१२-६) ।

१८- सोमोवैराजा मुष्मिं ल्लोक आसीत्तं देवाश्चऋषयश्चाभ्यध्याय न्कथमयमस्मान्सोमो राजा गच्छेदिति ते ब्रुवंश्छन्दांसि यूयंन इमं सोमं राजानमाहरतेति तथेति ते सुपर्णी भूत्वादपतन् । (इदं वैदिकं सौपर्णमाख्यानं पुराणेषु विस्तरशः प्रपञ्चितम्) । सर्वाणिच्छन्दांसि मध्ये गत्वा श्राम्यन् । ते देवा गायत्रीं सर्वेण स्वस्त्ययनेनान्वमन्- मन्त्रयन्त । सा चोप समगृभ्णात् । तस्य पतन्ती रसमधयत्तद्धीत रसं नान्वाप्नोत्पूर्वे सवने ते देवाः प्राजिज्ञासन्त तत्पशुष्वपश्यंस्तयदा शिरमवनयन्त्याज्येन पशुना चरन्ति तेन तत्समावद्वीर्यमभवत्पूर्वाभ्यां सवनाभ्याम् । १३- १-३) ।

१९- देवावा असुरैर्विजिग्याना ऊर्ध्वाः स्वर्गं लोकमायंन्सो ग्निर्दिविस्पृगूर्ध्व उदश्रयत् स स्वर्गस्य लोकस्य द्वारमवृणोत् । (तत्र वसुरुद्रादित्यानां गमनानन्तरं) तं विश्वेदेवा आगच्छं स्त एन मब्रुवन्नतिनो जेस्याकाशं नः कुर्विति सनास्तुतो तिस्रक्ष्य इत्य ब्रवीत्स्तुतनुमेति तथेति तत एकविंशेन स्तोमेनास्तुवं स्तान्स्तुतो त्याजेत ते यथा लोक मगच्छन् (१४-४) ।

२०- अग्निस्टोमं वै देवा अश्रयन्तोक्थान्यसुरास्ते समावद्वीर्या एवा सन्न व्यावर्तन्त तान्भरद्वाज ऋषीणामपश्य दिमेवा असुरा उक्थेषु श्रितास्ता नेषां न कश्चन पश्यतीति सो ग्नि मुदव्हयत् एहयेषु व्रवाणितेo इत्यनेनेति । (१५-५-) ।

२१- देवावै प्रथमे नान्हेन्द्राय वज्रं समभरंस्तं द्वितीये नान्हा सिन्चंस्तं तृतीये नान्हा प्रायच्छं स्तं चतुर्थे ह न्प्राहरत्तस्माच्चतुर्थे हन्षोक्थाशंस्ति शंसति । (१६-१) ।

२२- अहर्वै देवा अश्रयन्त रात्रीमसुरास्ते समाव द्वीर्या एवा सन्न व्यावर्तयन्त सो ब्रवी दिन्द्र: कश्चाहंचेमा वितोसुरान्रात्रीमन्ववेष्याव इति स देवेषु न प्रत्यविन्ददबि- भयू रात्रेस्तमसो मृत्योस्तस्माद्वाप्येतर्हि नक्तं यावन्मात्र निमेवापक्रम्य विभेति तम इवहि रात्रिर्मृत्युरिव । (१६-५) ।

२३- प्रजापतिर्वै सोमायराज्ञे दुहितरं प्रायच्छत्सूर्यां सावित्रीं तस्यै सर्वेदेवावरा आगच्छं स्तस्याएतत्सहस्रं वहतुमन्वा करोद्यदेत दाश्विनमित्या चक्षते । तस्मिन्देवा न समजानत ममेदमस्तु ममेद मस्त्विति ते संजा नाना अब्रुवन्नाजिमस्या यामहै स योन उज्जेष्यति तस्येदं भविष्यतीति ते ग्ने रेवाधिगृहपते रादित्यं काष्ठ मकुर्वत तस्मादाग्नेयी प्रतिपद् भवत्याश्विनस्य । तासां वै देवताना माजिं धावन्तीनामभिसृष्टाना मग्निर्मुखं प्रथम: प्रत्यपद्यत तमश्विना वन्वागच्छतां त उषसमन्वागच्छतां ता विन्द्रम वागच्छतां तदश्विना उदजयतामश्विनावाश्नुवातां तस्मादेत दाश्विनमित्याचक्षते । (१७-१,२) ।

२४- इन्द्राय वै देवा ज्येष्ठ्याय श्रैष्ठ्याय नातिष्ठन्त सो ब्रवीद् बृहस्पतिं याजय मा द्वादशाहेनेति तमया जयत्ततोवै तस्मैदेवा ज्येष्ठयाय श्रैष्ठायातिष्ठन्त ।(१९-३)।

२५- इमौ वै लोकौ सहा स्तां तौ व्येतां नावर्षन्न समतपच्चे पन्चजना न समजानत तौ देवा: समनयं स्तौ संयन्तावेतं देव विवाहं व्यवहेतां रथन्तरेणेवेयममूं जिन्वति बृहता साविमाम् नौधसेनेवेय ममू जिन्वति श्येतेनासा विमांधूमेनेवेय ममूं जिन्वति वृष्ट्या साविमां देवयजन मेवेय ममुष्यामदधात्पशुनसावस्यामेतद्वाइय ममुष्यां देवयजनमदधाद्यदेतच्चन्द्रमसि कृष्णमिव । (१९-६) ।

२६- देवावैतृतीयेमान्हा स्वर्गं लोक मायं स्तानसुरा रक्षांस्यन्ववारयन्त ते विरूपामवत विरूपा भवतेति भवन्त आयंस्तेयद्विरूपा भवत विरूपा भवतेति भवन्त आयं स्तद्वै रूपं सामाभवत्तद्वैरूपस्य वैरूपत्वम् । (२१-१) ।

२७- देवाहवै सर्वंचरो सत्रं निषेदु स्तेह पाप्मानं नापजघ्निरे तान्होवाचार्बुद: काद्रवेय: सर्प ऋषिर्मन्त्रकृ देकावैवो होत्राकृता तां वो हं करवाण्यथ पाप्मानमपहनिष्यध्व इति तेह तथेत्यूचुस्तेषां हस्मसमध्यं दिने मध्यंदिन एवो पोदा सर्पेंड् ग्राव्णोंभिष्टौति । (२६-१) ।

२८- ते वै पुरस्ता दपहता असुरा: पश्चात्परीत्य प्राविशंस्ते देवा: प्रतिबुध्य विश्वान्देवानात्मानं पश्चात्तृतीय सवने पर्यौहं स्ते विश्वेदेव देवै रात्मभि: पश्चात्तृतीय सवने सुर रक्षांस्यापाघ्नत । तेवैदेवा असुरा नेवमपाघ्नत सर्वस्मादेव यज्ञात्ततोवै देवा अभवन्परा सुरा: । (२७-१) ।

२९- ते वै देवाश्च ऋषयश्चा द्रियन्त समानेन यज्ञं संतनवामेति त एतत्समानं यज्ञस्यापश्यन्समानान्प्राथान्समानी: प्रतिपद: समानानि सूक्तानि । (२६-२) ।

३०- देवा वै वलो: पर्यपश्यं स्ता यज्ञेनैवेप्सं स्ता: षष्ठेनान्हा प्सुवंस्ते प्रात: सवने नभाकेन वलमनमर्यस्तं यदनभया न् । अश्रथयन्नेवैनं तद्ध तृतीय सवने वज्रेण वालखिल्याभिर्वाच: कूटेनैक पदया वलविरुज्य गा उदाजन् । (२६-८) ।

३१- देवा सुरा वा एषुलोकेषु संयेतिरे त एतस्यां प्राच्यां,दक्षिणस्यां, प्रतीच्यां उदीच्यां दिशि येतिरे तांस्ततो सुरा अजयंस्तएतस्मिन्नवान्तरदेशे ये तिरे यएष प्राङुदङ्तेहततो जिग्यु: । (३७-६) ।

३२- ते देवा अब्रुवन्सप्रजापतिका अयंवै देवाना मोजिष्ठो बलिष्ठ: सहिष्ठ: सत्तम: पारयिष्णुतम इममेवाभिषिन्चामहा इति तथेति तद्वैतदिन्द्र मेव । (३८-१) ।

३३- देवासुरा वा एषु लोकेषु समयतन्त ते वा असुरा इमानेव लोकान्पुरो कुर्वत यथौजीयांसो बलीयांस एवं ते वा अयस्मयीमेवेमामकुर्वत रजतामन्तरिक्षं हरिणीं दिवं ते तथेमांल्लोकान्पुरो कुर्वत ते देवा अब्रुवन्पुरो वा इमे सुरा इमांल्लोकानक्रत पुत इमांल्लोकान्प्रतिकरवामहा इति तथेति ते सद एवास्या: प्रत्यकुर्वता ग्नीध्रमन्तरिक्षाद्धविर्धाने दिवस्ते तथेमांल्लोकान्पुर: प्रत्यकुर्वत, इति ।

ते देवा अब्रुवन्नुपसद उपायामोपसदा वै महापुरं जयन्तीति तथेति ते यामेव प्रथमामुपसदमुपायंस्तयैवैनानस्मांल्लोकादनुदन्त यां द्वितीयां तया न्तरिक्षाद्यां तृतीयां तया दिवस्तांस्तेभ्यो लोकेभ्यो नुदन्त , ते वा एभ्यो लोकेभ्यो नुत्ता असुरा ऋतून्नश्रयन्त ते देवा अब्रुवन्नुपसद एवोपायामेति तथेति त इमा स्त्रिस्र: सतीरुपसदो द्विर्द्विरेकैकामुपायंस्ता: षट् समपद्यन्त षड् वा ऋतवस्तान्वा

ऋतुभ्यो नुदन्त ते वा ऋतुभ्यो नुत्ता असुरा मासानश्रयन्त ते देवा अब्रुवन्नुपसद एवोपायामेति तथेति त इमाः षट् सतीरुपसदो द्विर्द्विरेकैकामुपायंस्ता द्वादश समपद्यन्त द्वादश वै मासास्तान्वै मासेभ्यो नुदन्त, ते वै मासेभ्यो नुत्ता असुरा अर्धमासानश्रयन्त ते देवा अब्रुवन्नुपसद एवोपायामेति तथेति त इमा द्वादश सतीरुपसदो द्विर्द्विरेकैकामुपायंस्ताश्चतुर्विंशतिः समपद्यन्त चतुर्विंशतिर्वा अर्धमासास्तान्वा अर्धमासेभ्यो नुदन्त, ते वा अर्धमासेभ्यो नुत्ता असुरा अहोरात्रे अश्रयन्त ते देवा अब्रुवन्नुपसदावेवोपायामेति तथेति ते यामेव पूर्वाण्ह उपसदमुपायंस्तयैवेनानन्हो नुदन्त यामपराण्हे तया रात्रेस्तांस्तथोभाभ्यामहोरात्राभ्यामन्तरायन्, तस्मात्पूर्वाण्ह एव पूर्वयोपसदा प्रचरितव्यं स्वपराण्हे परया तावन्तमेव तद्द्विषते लोकं परिशिनष्टि । ४-६।

३४- जितयो वै नामैता यदुपसदो सपत्नां वा एताभिर्देवा विजितिं व्यजयन्त, असपत्नां विजितिं विजयते य एवं वेद, यां देवा एषु लोकेषु यामृतुषु यां मासेषु यामर्धमासेषु यामहोरात्रयोर्विजितिं व्यजयन्त तां विजितिं विजयते य एवं वेद, ते देवा अबिभयुरस्माकं विप्रेमाणमन्विदमसुरा आभविष्यन्तीति ते व्युत्क्रम्यामन्त्रयन्ताग्निर्वसुभिरुदक्रामदिन्द्रो रुद्रैर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैः, ते तथा व्युत्क्रम्यामन्त्रयन्त ते ब्रवन्हन्त या एव न इमाः प्रियतमास्तन्वस्ता अस्य वरुणस्य राज्ञो गृहे संनिदधामहै ताभिरेव नः स न संगच्छातै यो न एतदतिक्रामाद्य आलुलोभयिषादिति तथेति ते वरुणस्य राज्ञो गृहे तनूः संन्यदधत्, ते यद्वरुणस्य राज्ञो गृहे तनूः संन्यदधत तत्तानूनपत्रमभवत्तत्तानूनप्त्रस्य तानूनप्त्रत्वम्, तस्मादाहुर्न सतानूनप्त्रिणे द्रोग्धव्यमिति, तस्माद्विदमसुरा नान्वाभवन्ति । ४-७ ।

३५- सोमो वै राजा गन्धर्वेष्वासीत्तं देवाश्च ऋषयश्चाभ्यध्यायन्कथमयमस्मान्सोमो राजा गच्छेदिति सा वागब्रवीत्स्त्रीकामा वै गन्धर्वा मयैव स्त्रिया भूतया पणध्वमिति नेति देवा अब्रुवन्कथं वयं त्वदृते स्यामेति सा ब्रवीत्क्रीणीतैव यर्हि वाव वो मया र्थो भविता तर्ह्येव वो हं पुनरागन्तास्मीति तथेति तया महानग्न्या भूतया सोमं राजानमक्रीणन्, तामनुकृतिमस्कन्नां वत्सतरीमाजन्ति सोमक्रयणीं तया सोमं राजानं क्रीणन्ति, तां पुनर्निष्क्रीणीयात्पुनर्हि सा तानागच्छत्, तस्मादुपांशु वाचा चरितव्यं सोमे राजनि क्रीते गन्धर्वेषु हि

तर्हि वाग्भवति सा ग्नावेव प्रणीयमाने पुनरागच्छति । ५-१ ।

३६- पुरुषं वै देवा: पशुमालभन्त तस्मादालब्धान्मेध उदक्रामत्सो श्वं प्राविशत्तस्मादश्वो मेध्यो मभवदथैनमुत्क्रान्तमेधमत्यार्जन्त स किंपुरुषो भवत्, ते श्वमालभन्त सो श्वादालब्धादुदक्रामत्स गां प्रविशत्तस्माद्गौर्मेध्यो भवदथैनमुत्क्रान्तमेधमत्यार्जन्त स गौरमृगो बवत्, ते गामालभन्त स गोरालब्धादुदक्रामत्सो विं प्राविशत्तस्मादविर्मेध्यो भवदथैनमुत्क्रान्तमेधमत्यार्जन्त स गवयो भवद्वे विमालभन्त सो वेरालब्धादुदक्रामत्सो जं प्राविशत्तस्मादजो मेध्यो भवदथैनमुत्क्रान्तमेधमत्यार्जन्त स उष्ट्रो भवत्, सो जे ज्योक्तमामिवारमत तस्मादेष एतेषां पशूनां प्रयुक्ततमो यदज:, ते जमालभन्त सो जादालब्धादुदक्रामत्स इमां प्राविशत्तस्मादियं मेध्या भवदथैनमुत्क्रान्तमेधमत्यार्जन्त स.शरभो भवत्, त एत उत्क्रान्तमेधा अमेध्या: पशवस्तस्मादेतेषां नाश्नीयात्, तमस्यामन्वगच्छन्सो नुगतो व्रीहिरभवद्यत्पशौ पुरोळाशमनु निर्वपन्ति समेधेन न: पशुनेष्टमसत्केवलेन न: पशुनेष्टमसदिति, समेधेन हास्य पशुनेष्टं भवति केवलेन हास्य पशुनेष्टं भवति य एवं वेद । ६-८।

३७- प्रजापतौ वै स्वयं होतरि प्रातरनुवाकमनुवक्ष्यति सर्वा देवता आशंसन्त मामभि प्रतिपत्स्यति मामभीति स प्रजापतिरैक्षत यद्येकां देवतामादिष्टामभि प्रतिपत्स्यामितरामेकेन देवता उपाप्ता भविष्यन्तीति स एतामृचमपश्यदापो रेवतीरित्यापो वै सर्वा देवता रेवत्य: सर्वा देवता: स एतयर्चा प्रातरनुवाकं प्रत्यपद्यत ता: सर्वा देवता: प्रमोदन्त मामभि प्रत्यपादि मामभीति, सर्वा हास्मिन्देवता: प्रातरनुवाकमनुब्रुवति प्रमोदन्ते, सर्वाभिर्हास्य देवताभि: प्रातरनुवाक: प्रतिपन्नो भवति य एवं वेद, ते देवा अबिभयुरादातारो वै न इमं प्रार्यज्ञम सुरा यथोजीयांसो बलीयांस एवमिति तानब्रवीदिन्द्रो मा बिभीत त्रिषमृद्धमेभ्यो हं प्रातर्वज्रं प्रहर्तास्मीत्येतां वाव तदृचमब्रवीद्वज्रस्तेन यदपोनप्त्रीया वज्रस्तेन यत्त्रिष्टुव्वज्रस्तेन यद्वाकमेभ्य: प्राहरत्तेनैनानहंस्ततो वै देवा अभवन्परा सुरा:, इति । ७-६ ।

३८- देवा वै यदेव यज्ञे कुर्वंस्तदसुरा अकुर्वंस्ते समावद्वीर्या एवासन्न व्यावर्तन्त तो वै देवा एतं तूष्णींशंसमपश्यंस्तमेषामसुरा नान्ववायंस्तूष्णींसारो वा एष यत्तूष्णींशंस:, देवा वै यं यमेव वज्रमसुरेभ्य उदयच्छंस्तं तमेषामसुरा: प्रत्यबुध्यन्त ततो वै देवा एतं तूष्णीं शंसं वज्रमपश्यंस्तमेभ्य उदयच्छंस्तमेषामसुरा न प्रत्यबुध्यन्त तमेभ्य: प्राहरंस्तेनैनानप्रतिबुद्धेनाघ्नंस्ततो वै देवा अभवन्परा सुरा:, भवत्यात्मना रा स्य द्विषन्पाप्मा भ्रातृव्यो भवति एवं वेद, ते वै देवा विजितिनो मन्यमाना

यज्ञमतन्वत तमेषामसुरा अभ्यायन्यज्ञवशसमेषां करिष्याम इति तान्समन्तमेवोदरा-न्परियत्तानुदपश्यंस्ते ब्रुवन्संस्थामयामेमं यज्ञं यज्ञं नो असुरा मा वधिषुरिति तथेति तं तूष्णीं शंसे संस्थापयन्भूरग्निर्ज्योतिर्ज्योतिरग्निरित्याज्यप्रउगे संस्थापयन्निन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्र इति निष्केवल्यमरुत्वतीये संस्थापयन्सूर्यो ज्योतिर्ज्योतिः स्वः सूर्य इति वैश्वदेवाग्निमारुते संस्थापयंस्तमेवं तूष्णींशंसे संस्थापयंस्तमेवं तूष्णीं शंसे संस्थाप्य ततोरिष्टेनादृचमाश्नुवत्, स तदा वाव यज्ञः संतिष्ठते यदा होता तूष्णींशंसं शंसति, । ६-७।

३९- देवासुरा वा एषु लोकेषु समयतन्त ते वै देवाः सद एवा यतनमकुर्वत तान्सदसो जयंस्त आग्नीध्रं संप्रापद्यन्त ते ततो न पराजयन्त तस्मादाग्नीध्र उपवसन्ति न सदस्याग्नीध्रे ह्यधारयन्त यदाग्नीध्रे धारयन्त तदाग्नीध्रस्याग्नीध्रत्वम् , तेषां वै देवानामसुराः सदस्यानग्नीन्निर्वापयांचक्रुस्ते देवा आग्नीध्रादेव सदस्यानग्नी-न्विहरन्त तैरसुररक्षांस्यपाघ्नत तथैवैतद्यजमाना आग्नीध्रादेव सदस्यानग्नीन्वि-न्विहरन्त तैरसुररक्षांस्यपाघ्नत तथैवैतद्यजमाना आग्नीध्रादेव सदस्यानग्नीन्विहर-न्त्यसुररक्षांस्येव तदपघ्नते, ते वै प्रातराज्यैरेवा जयन्त आयन्यदाज्यैरेवा जयन्त आयंस्तदाज्यानामाज्यत्वम् ।·१०-४।

४०- अग्निर्वै देवानां होतासीत्तं मृत्युर्बहिष्पवमाने सीदत्सोनुष्टुभाज्यं प्रत्यपद्यत मृत्युमेव तत्पर्यक्रामत्तमाज्ये सीदत्स प्रउगेण प्रत्यपद्यत मृत्युमेव तत्पर्यक्रामत्, तं माध्यंदिने पवमाने सीदत्सोनुष्टुभा मरुत्वतीयं प्रत्यपद्यत मृत्युमेव तत्पर्यक्रामत्तं माध्यंदिने बृहतीषु नाशक्नोत्सत्तुं प्राणा वै बृहत्यः प्राणनेव तन्नाशक्नोद्व्येतुं तस्मान्माध्यंदिने होता बृहतीषु स्तोत्रियेणैव प्रतिपद्यते प्राणा वै बृहत्यः प्राणनेव तदभिप्रतिपद्यते, तं तृतीयपवमाने सीदत्सोनुष्टुभा वैश्वदेवं प्रत्यपद्यत मृत्युमेव तत्पर्यक्रामत् , तं यज्ञायज्ञीये सीदत्स वैश्वानरीयेणाग्निमारुतं प्रत्यपद्यत मृत्युमेव तत्पर्यक्रामद्वज्रो वै वैश्वानरीयं प्रतिष्ठा यज्ञायज्ञीयं वज्रेणैव तत्प्रति-ष्ठाया मृत्युं नुदते स सर्वान्पाशान्सर्वान्स्थाणून्मृत्योरतिमुच्य स्वस्त्येवोदमुच्यत स्वस्त्येव होतोन्मुच्यते सर्वायुः सर्वायुत्वाय, सर्वमायुरेति य एवं वेद । १२-३।

४१- देवा वा असुरैर्युद्धमुपप्रायन्विजयाय तानग्निर्नान्विकामयतेतुं तं देवा अब्रुवन्नपि त्वमेह्यस्माकं वै त्वमेकोसीति स नास्तुतोन्वेष्यामीत्यब्रवीत्स्तुत नु मेति तथेति तं ते समुत्क्रम्योपनिवृत्यास्तुवंस्तांस्तुतोनु प्रैत , स त्रिश्रेणिर्भूत्वा

त्र्यनीको ऽसुरान्युद्धमुपप्रायद्विजयाय त्रिश्रोणिरिति च्छन्दांस्येव श्रेणीकुर्वत
त्र्यनीक इति सवनान्येवानीकानि तानसंभाव्यं परमावयत्ततो वै देवा अभवन्परा
ऽसुराः। १४-१ ।

४२- यज्ञो वै देवेभ्यो न्नाद्यमुदक्रामत्ते देवा अब्रुवन्यज्ञो वै ना न्नाद्यमुदक्रमीदन्विमं यज्ञ-
न्नमन्विच्छामेति ते ब्रुवन्कथमन्विच्छामेतिब्राह्मणेन च च्छन्दोभिश्रेत्यब्रुवंस्ते ब्राह्मणं
छन्दोभिरदीक्षयंस्तस्या न्तं यज्ञमतन्वतापि पत्नीः समयाजयंस्तस्माद्धाप्येतर्हि
दीक्षणीयायामिष्टावान्तमेव यज्ञं तन्वते पि पत्नीः संयाजयन्ति तमनुन्यायमन्व-
वायन, ते प्रायणीयमतन्वत तं प्रायणीयेन नेदीयो न्वागच्छंस्ते कर्मभिः समत्वरन्त
तच्छंयुवन्तमकुर्वंस्तस्माद्धाप्येतर्हि प्रायणीयं शंयुवन्तमेव भवति तमनुन्यायमन्ववायन्,
त आतिथ्यमतन्वत तमातिथ्येन नेदीयोन्वागच्छंस्ते कर्मभिः समत्वरन्त तदिळान्त-
मकुर्वंस्तस्माद्धाप्येतर्ह्यातिथ्यामिळान्तमेव भवति तमनुन्यायमन्ववायन्, त उपसदो
तन्वत तमुपसद्भिर्नेदीयो न्वागच्छंस्ते कर्मभिः समत्वरन्त ते तिस्रः समिधेनीरनूच्य
तिस्रो देवता अयजंस्तस्माद्धाप्येतर्ह्युपसत्सु तिस्र एव सामिधेनीरनूच्य तिस्रो देवता
यजन्ति तमनुन्यायमन्ववायन्, त उपवसथमतन्वत तमुपवसथ्ये हन्याप्नुवंस्तमाप्त्वा न्तं
यज्ञमतन्वतापि पत्नीः समयाजयंस्तस्माद्धाप्येतर्ह्युपवसथ आन्तमेव यज्ञं तन्वते पि
पत्नीः संयाजयन्ति, तस्मादेतेषु पूर्वेषु कर्मसु शनैस्तरां शनैस्तरामिवानुब्रूयात्,
अनुत्सारमिवहि ते तमायंस्तस्मादुपवसथे यावत्या वाचा कामयीत तावत्यानुब्रूया-
दाप्तो हि स तर्हि भवतीति, तमाप्त्वा ब्रुवंस्तिष्ठस्व नो न्नाद्यायेति स नेत्यब्रवी-
त्कथं वस्तिष्ठेयेति तानीक्षांचव तमब्रुवन्ब्राह्मणेन च नश्छन्दोभिश्च सयुग्भूत्वा न्नाद्याय
तिष्ठस्वेति तथेति तस्माद्धाप्येतर्हि यज्ञः सयुग्भूत्वा देवेभ्यो हव्यं वहति ब्राह्मणेन
च च्छन्दोभिश्च । १५-१ ।

४३- देवासुरा वा एषु लोकेषु समयतन्त ते वै देवाः षष्ठेनैवाह्नैभ्यो लोकेभ्यो ऽसुरा-
न्प्रणुदन्त तेषां यान्यन्तर्हस्तीनानि वसून्यासंस्तान्यादाय समुद्रं प्रौप्यन्त त
एतेनैव च्छन्दसा नुहायान्तर्हस्तीनानि वसून्याददत तद्यदेतत्पदं पुनः पदं स एवाङ्कुश
आसञ्जनाय । २२-६ ।

४४- स प्रजापतिर्यज्ञं देवेभ्यः संप्रायच्छत्ते देवा यज्ञमतन्वत तमाहरन्त तेनायजन्त त
ऋचैव हौत्रमकुर्वन्यजुषा ध्वर्यवं साम्नोद्गीथं यदेवैतत्त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वमकुर्वन,

ते देवा अब्रुवन्प्रजापतिं यदि नो यज्ञ ऋक्त आर्तिः स्याद्यदि यजुष्टो यदि सामतो यद्यविज्ञाता सर्वव्यापद्वा का प्रायश्चित्तिरिति स प्रजापतिरब्रवीद्देवान्यदि वो यज्ञ ऋक्त आर्तिर्भवति भूरिति गार्हपत्ये जुहवाथ यदि युजुष्टो भुव इत्याग्नीध्रीये न्वाहार्यपचने वा हविर्यज्ञेषु यदि सामतः स्वरित्याहवनीये यद्यविज्ञाता सर्वव्यापद्वा भूर्भुवः स्वरिति सर्वा अनुद्रुत्या ह्वनीय एव जुहवाथेति। २५-७।

४५- विश्वेदेवाः सत्रमाशत सोमेन राज्ञा गृहपतिना ते ब्रुवन्सोमस्वनो राजा सर्वत्र विभवेदिति तस्मात् सोमोराजा सर्वाणि नक्षत्राण्युपैति सोमो हि रेताधा नवकृत्वः संवत्सरस्य गर्भमुपयन्ति नवाहोवै संवत्सरस्य प्रतिमा नवप्राणाः प्राणानेवावरुन्धते प्रजावन्तो जीवाज्यैतिरश्नुवते य एता उपयन्ति। (षड्ब्रा०३-१२)

४६- प्रजापतिर्देवा नसृजत दिवा नक्तमसुरान् यद्दिवादेवा नसृजत तद्देवानां देवत्वम्।

(ष० ब्रा० ४-१)

४७- बृहस्पतिर्वै देवानामुद्गाय्च रक्षांस्यगिघांसन् सयएषां लोकानामधिपतयस्त्वन् भागधेये नोपाधावत् । (ताण्ड्य ब्रा० ६-७-१) ।

इति विश्वेदेवात्मकं वैदिक मैतिह्यम् ।

इदं वैदिक मैतिह्यं समुपलव्ध्यै ब्राह्मणग्रन्थैरनुसन्धाय लिखितम् । शतपथादि ब्राह्मणेष्वपि इमान्यैवैतिह्यानि वाक्यान्तरेण प्रकारान्तरेण च प्रतिपादितानि दृश्यन्ते । अतो ग्रन्थ विस्तार भया तेषांपुनरावृत्तिमकृत्वा यान्यैतिह्यानि प्रबन्धोपयुक्तान्यवलोकितानि तान्येव सङ्गृहीतानि । अत्रापि देवाःपदेन, विश्वेदेवाः पदेन, सर्वेदेवाः पदेन च विश्वेदेवानामैतिह्य मवलोक्यते, न केवलं विश्वेदेवानाम् । अतः स्वरूप प्रकरणोक्तैः पन्चभिः पदैः रूपबृंहितानां विश्वेदेवानामिदं वैदिक मैतिह्य मपि आनुपूर्वी रहितं यत्र तत्र चोक्तं सङ्गृह्य प्रदर्शितमिति।

---००---

ब्राह्मणेन निष्कारण: षडङ्गो वेदो ध्येयो ज्ञेयश्च ।
इति भगवदाज्ञात्मक ब्राह्मण कर्म बोधक प्रसिद्ध वाक्येनेदं ज्ञायते यत् सोपग्रन्थ: (अङ्गोपाङ्गसहित:) वेद: कर्तव्यतया पठनीय एव ।

वेदस्याङ्गोपाङ्गानि

छन्द: पादौ तु वेदस्य हस्तौ कल्पो थ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्र मुच्यते ।।
शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ।। इत्यङ्गानि ।।

तथा च- छन्दो- भाषा- धर्म- मीमांसा- न्याय-स्तर्क- इत्युपाङ्गानि ।।
एतद्विषयका वेद संरक्षणार्थमभिप्रवृत्ता ग्रन्था उपग्रन्था इत्युच्यन्ते । (चरणव्यूह०खं०२)
तत्रादौ केषुचिदुपग्रन्थेषु विश्वेदेवा अनुसन्धीयन्ते । यथा घ्राण रूपायां शिक्षायां:- "विश्वेदेवा:" इतिपदस्य निषाद: स्वर:, स उदात्त: । उक्तञ्च:- (पा० शि०खं०३)
उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रय: । तथा - उदात्ते निषाद गान्धारौ। इति ।
अथ मूर्धारूपे ज्योतिषे यथा:- मूल नक्षत्रस्य विश्वेदेवा देवता: । (ल०ज्यो०खं०६) यथा-

सविता त्वष्टा थवायुश्चेन्द्राग्नी मित्र एव च ।
इन्द्रो निर्ऋतिरापो वै विश्वेदेवा स्तथैव च ।।

तत्र- अग्नि: प्रजापति: सोमो० इत्यारम्य सप्तविंशति नक्षत्र देवता: क्रमेणोक्ता: ।
तेषु विश्वेदेवा: एकोनविंशति तमा: । अथच- नक्षत्रगणनया मूलम् ऊनविंशति तमम्।
अतस्तस्य साम्या द्विश्वेदेवा देवता इति ।

पादरूपे छन्दसियथा:- जातीछन्दसो विश्वेदेवा देवता:। स्वरो निषाद: ।
गौरोवर्ण:। गोत्रं वासिष्ठमिति । उक्तञ्च (पिं०छ०खं०७) देवतादितश्च ।
अग्नि: सविता सोमो बृहस्पतिर्मित्रावरुणाविन्द्रो विश्वेदेवा देवता: ।
स्वरा: षड्ज ऋषभ गान्धार मध्यम पञ्चम धैवत निषादा: ।
सित सारङ्ग पिशङ्ग कृष्ण नील लोहित गौरावर्णा: ।
आग्निवेश्य काश्यप गौतमाङ्गिरस भार्गव कौशिक वासिष्ठानि गोत्राणि।
गायत्र्युष्णि गनुष्टुप बृहती पंक्ति त्रिष्टुप जात्यश्छन्दांसि ।

अत्रोक्तेषु जातीछन्द: सप्तम: । अत: सप्तम संख्यया देवता स्वर-वर्ण-गोत्र व्यवस्था ज्ञेया । तेन पूर्वोक्तं निष्पन्नं भवति ।

वामश्रोत्ररूपे निघण्टु कोषे:- १- देवा:। २- विश्वेदेवा:। ३- साध्या: । इति त्रीणि विश्वेषां देवानां नामानि । तेषामर्थो यथा :-

देवा:- दानाद्वा दीपनाद्वा द्योतनाद्वा रश्मयोवेति ।

विश्वेदेवा: - तारश्मय उपहित विश्वविशेषणासन्तो विश्वेदेवा भवन्ति ।

साध्या:- साधनात् देवा:, तेहि सर्वमिदं साधयन्ति । यदन्येन सर्वं कर्ममिरसाधितं तत्साधयन्तीति साध्या उच्यन्ते ।(निघण्टुभाष्ये)

तथा च दैवतसंहितायां क्रमेणार्थो यथा:- नक्षत्र-ग्रह- किरणा: । सर्वेदेवा: किरणाश्च सूर्यरश्मय: किरणाश्चेति ।

दक्षिण श्रोत्र रूपे निरुक्ते यथा:- अवितारो वा वनीयावा मनुष्यधृत: सर्वेच देवा इहागच्छत दत्तवन्तो दत्तवत: सुतमिति तदेतदेकमेव वैश्वदेवं गायत्रं तृचं दशतयीषु विद्यते यत्तु किन्चिद्बहुदैवतं तद्विश्वदेवानां स्थाने युज्यते यदेव विश्वलिङ्गमिति शाकपूणि रनत्यन्तगात स्त्वेष उद्देशो भवति बभ्रुरेक इति दश द्विपदा अलिङ्गा भूतांश: काश्यप आश्विन मेकलिङ्ग मभितष्टीयं सूक्त मेकलिङ्गम् ।। (निरुक्त १२,४०)

निवित्सु विश्वेदेवा:

विश्वेदेवा: सोमस्य मत्सन् । विश्वेवैश्वानरा: । विश्वेहि विश्वमहस: । महिमहान्त:। तक्वानामेमतिथीवान: । आस्क्रा: पचत वाहस: । वातात्मानो अग्निदूता:। येषांच पृथिवीचातस्थु: । अपश्चस्वश्च । ब्रह्मच क्षात्रंच । बर्हिश्च वेदिंच । यज्ञंचोरुचान्चरिक्षम्। येस्थ त्रय एकादशा: । त्रयश्चत्रिंशच्च । त्रयश्चत्रीचशता । त्रयश्चत्रीच सहस्रा । तांवतो भिक्षाच: । तावंतो रातिषाच: । तावती: पत्नी: । तावतीग्नां: । तावंत उदरणे । तावंतो निवेशने । अतोवा देवा भूयांसस्थ । मावोदेवा अपिशसा मा परिशसा वृदिा। विश्वेदेवा इहश्रवन्निह सोमस्य मत्सन् । प्रेमांदेवा देवहूति मवंतु देव्याधिया । प्रेदंब्रह्म प्रेदंक्षात्रम्। प्रेमं सुन्वन्तं यजमान मवन्तु । चित्राश्चित्राभिरूतिभि:। श्रवन्ब्रह्माण्या-वसागमन् । त्रि०७) अग्निर्वैश्वानर: सोमस्यमत्सत् । विश्वेषां देवानां समित।(नि०८)

कुन्तापाध्याये विश्वेदेवा:

विश्वान्देवान्हवामहे स्मिन्यज्ञे सुपेशस: । तइमं यज्ञमागमं देवासो देव्याधिया ।।

जुषाणा अध्वरे सदो ये यज्ञस्य तनूकृतः । विश्व आ सोमपीतये । (कु० ५-८)
येच देवा अयजंताथो ये च परादद्दिः । सूर्यौं दिवमिवगत्वा मघवानो विरप्शते।।
इति दिशांक्लृप्तयः ।

प्रैषाध्याये विश्वेदेवाः

होता यक्षत्तनूनपात मदितेर्गर्भं भुवनस्यगोपाम् । मध्वाद्य देवो देवेभ्यो देवयानान्पथो अनक्तु वेत्वाज्यस्य होतर्यज ।

होतायक्षदाप्रीर्देवीरपसामपस्तमाः अच्छिद्रमद्येदमपस्तन्वताम् । देवेभ्यो देवीर्देव मपोव्यंत्वा ज्यस्य होतर्यज ।

होतायक्षद्वनस्पति मुपावस्रक्षद्धियो जोष्टारं शशमं नरः।स्वदात्स्वधितिर्ऋतुथाय देवो देवेभ्यो हव्यवाट् वेत्वाज्यस्य होतर्यज ।

अंजदग्नि रसनद्वाजं निदेवो देवेभ्यो हव्यवाट् प्राञ्चोभिर्हिन्वानो धेनाभिः कल्पमानो यज्ञस्यायुः प्रतिरन्नुपप्रेष्य होतर्हव्या देवेभ्यः । इति ।

।। इत्युपग्रन्थेषु विश्वेदेवाः ।।

--00--

इदानीं यावत् वेद ग्रन्थेषु बहुविधं विश्वेदेवाना मनुसन्धानं कृतम् । परन्च यावत् पुराणे वेदस्योप बृंहणं न भवति तावत्पर्यन्तंतस्य विस्तरशो वर्णनं कथानक मुखेन न भवितुं शक्यते । उक्तन्च :-इतिहास पुराणाभ्यां वेदं समुप बृंहयेत् ।

बिभेत्यल्प श्रुताद्वेदो मामयं प्रहरिष्यति ।। इति ।।

अत्राल्पश्रुतत्वमपि प्रहरण भीतिजनकम् । तत्र पुराणगत कथानक प्रमाणं विना न दूरी भविष्यति । सङ्कल्पे पि श्रुति-स्मृति - पुराणोक्त फल प्राप्त्यर्थं मित्युच्यते । श्रुति-स्मृति मूलकत्वात्पुराण प्रामाण्यमपि पूर्वाचार्यैः प्रतिपादित मस्ति । अतः पुराणोक्तं " विश्वेषां देवानां " मैतिह्यमप्यनुसन्धीयते ।

पुराणे पि विश्वेदेव शब्दार्थो नेक देवता वाचकः । न तत्र देवतानां नामनिश्चयः, अपितु सर्वासां देवतानां प्रतिनिधि रूपो यं देवतानां संघः । यज्ञेषु आवाहन स्तुत्यादि व्यवहार काले का पि देवता न्तरिता नभवेत् अतो विश्वेषां देवाना मावाहनादिभवति। भाषा शास्त्र दृष्ट्या त्वयं संयुक्तः शब्दः, अतः सर्वेदेवा इतिनामान्तर मपि युज्यते । वेदे आप्री सूक्तान्तर्गताः सुसमिद्धादयोदेवा अपि विश्वेदेव संज्ञा वाचका एव। ऐतरेय ब्राह्मणे (३६-८-२१) इत्यत्र विश्वेदेवानां समूह वाचको निर्देशः । यत्र आविदित कामप्रि राज्ञो राजसूये राज्याभिषेके च विश्वेषां देवानां समासदत्वेन निर्देश उपलभ्यते। यथा " आविदितस्य कामप्रेर्विश्वेदेवाः समासद इति " ।

अथ च पुराणेषु विश्वेषां देवानामुत्क्रान्तं रूपं दृश्यते, यत्र इमे स्पष्टरूपेण देवता समूहवाचकाः प्रोक्ताः । वायु पुराणे दक्षकन्या विश्वाया धर्म नामक ऋषेश्च पुत्रा इमे इत्युक्तम् । तत्र त्वेतेषां दश संख्यास्व उक्ता । अथ च राज्य प्राप्त्यर्थं विश्वेषां देवानां विस्तृता उपासना पि विहिता स्ति । पुराणेषूपलब्धा स्तेषां नामावलिर्यथाः- क्रतुः, दक्षः, श्रवः, सत्यः, कालः, कामः, पुरूरवाः, आर्द्रवः, रोचमानः ((ब्रह्माण्ड - पुराणे ३,१२ तथा ४-२-२८) अन्येषु पुराणेषु एतेषां नामान्तरं लभ्यते । यथा - वसु, कुरुज, मनुज, बीज, धुरि, लोचन इत्यादि ।(मा० ६-६-६० तथा मत्स्य पु०२०२ एवं साम्ब पु० १८) महाभारते तु एतेषां विस्तृता नामावलिः प्रदत्ता स्ति, यस्याः पुनर्लेखनमत्रानावश्यकमेव । तत्र एतेषां निवासो भुवर्लोके प्रोक्तः । (महा०भा०अनु०९१, २८)

एते विश्वेदेवा: स्वयमप्रजा: (पुत्रहीना:) सन्तो पि लोकेभ्य: पुत्र पौत्रादि दातुं समर्थां सन्ति । इन्द्रसभायामेतेषा मुपस्थितिर्महाभारते वर्णिता । (भा० ६-६-६०) देवसुर संग्रामे देवपक्षेण पौलोमै: सह एभिर्युद्धं कृतम् (म०भा० ८-१०-३४) । सोमस्य राज्ञो राजसूये एभिश्चसाध्वर्यैं सम्पादितमासीत् । (मत्स्यपु० ३७-१४) मरुतायज्ञे पि एते समासदत्वेन वृता आसन् । एतेषामेव कृपया ज्या मघाय पुत्र प्राप्ति रभूत। (भा० ६-२-२८) हिमालये विश्वैदैवै ब्रह्मण: पितृणांचोपासनारूपंतपो विहितम् । अनेन तपसा सन्तुष्टैस्तेरेभ्यो वर: प्रदत्त: यदद्यदिनमारभ्य श्राद्धेषु विश्वेषां देवानां प्राथम्येन पूजनमन्नदानञ्च भविष्यति । अन्येषां देवानां पूर्वमेव विश्वेदेवा: पूजिता: स्यु: । तथा च विश्वेषां देवानां पूजनेनैव श्राद्धविधीनां संरक्षणं पितृणांच तृप्ति र्भूया-दिति । (वायु पु० ७६-१-१५) तथा ब्र० ३-३-१६) श्रीमद् भागवते विश्वेदेवा:, साम्प्रतिक वैवस्वतमन्वन्तरस्य देवता: प्रोक्ता: । भा० ६-१०-३४) विश्वामित्र शापवशा देते द्रौपद्या: पञ्चपुत्र रूपेणाजीजनन् । येषां शयने निमग्नानां वधो श्वत्थामा नामक द्रोण पुत्रेण कृत: । (मार्कण्डेयपु० ६२-६६) ।

इत्थं वायु- ब्रह्माण्ड- मत्स्य- साम्ब- मार्कण्डेय- वन्हि- पुराणेषु तदतिरिक्ते श्रीमदभागवते - हरिवंशे तथा च महाभारते तिहासे च विश्वेषां देवानामैतिह्य मनुसन्धानेन इतस्ततो न्विष्टं यदत्रोप स्थापितम् । तद्विश्वेषां देवानां प्रीत्यैक्षया दिति ।

--00--

।। पन्चमो ध्याय: ।।

सोपसंहारो विश्वे देवानां वैज्ञानिक महत्व विमर्श:

(अत्रोक्ता विषया:)

आधिभौतिक: पदा:, वैदिक जलविद्युत्, विद्युदस्त्र निर्माता, विद्युत:-स्वभाव:, विद्युदुपकरणानि, जलविद्युदुत्पादन रीति:, वैदिक ऊर्जा-सिद्धान्त:, ऊर्जावृद्धा रेखा चित्रम्, विद्युदुत्पादकं यन्त्रम्, द्योत्रीय-चुम्बकम् संवाहक वेष्टनम्, ताम्र कङ्कणम्, अग्निजिव्हा, कम्पनम्, संशोधन विचार:, आधिभौतिक स्वरूप चित्रम्, प्रमाण चतुष्टयम्, लोक कल्याण साधनन्चेति ।

--o--

(वैदिक जल विद्युन्निर्माणात्मकः)

तत्रादौ जल विद्युन्निर्माण परिभाषात्मका मन्त्रा अनुसन्धीयन्ते ।

यथा- उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसो धिजातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करेत्वा ददन्त ।। (ऋ० ७-३३-११)

विद्युन्नया पतन्ती दविद्योद् भरन्ती मे अप्या काम्यानि ।
जनिष्टो अपोनर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ।। (ऋ०१०-९५-१०)
विद्युतो ज्योतिः परिसंजिहानं मित्रावरुणा यदपश्यताम् ।।(ऋ०७-३३-१०)

अन्तरिक्षस्या विद्युत् देहान्तरपरिग्रहेण पृथिव्यामुत्पद्यते । तत्र मित्रावरुणौ = उष्ण शीततत्त्वे संयुक्ते भूत्वा उर्वश्या विद्युत् प्रवाहरूपं दृष्ट्वा स्व द्रप्साणि तेजांसि स्कन्नयामासुः । तानि स्थितिज ऊर्जारूपाणि आपोज्योतींषि पुष्करे जलखातरूपे सरसि विश्वेदेवा अधारयन्त । अस्मात् विद्युद्रूपस्य वशिष्ठस्य जन्म । अतः इयं जल विद्युत् वैश्वदेवी इत्युच्यते । उर्वश्यारूपं द्वितीये मन्त्रे प्रतिपाद्यते । सा गच्छन्ती सती विद्युदिव द्योतते । सान्तरिक्षस्था अप्या । परन्च पृथिव्यामानी तायास्तस्याः सकाशात अपः = व्याप्तः कर्मसु, नर्यः = मनुष्याः, नरेभ्यो हितं प्रकाशात्मकं भूमि सिन्चनात्मकन्च कार्यं साधयन्ति ।

निगूढाया ऊर्जाया देवी ऊर्जाहुती इति वैदिकं नाम । तयोः कार्य रूपौ नैरुक्तेन्विष्टौ मन्त्रौ यथा -१, देवी ऊर्जाहुती मिषमूर्जं मन्यावदात्सग्धिं सपीति मन्यानवेन पूर्वं दयमानास्याम पुराणेननवन्ता मूर्जमूर्जाहुती ऊर्जयमाने अधातां वसुवने वसधेयस्य वीताम् ।। २, देवी जोष्ट्री वसुवने वसुधेयस्य वीताम् । नि०उ०४-४३)
साऊर्जा विद्युद्रूपेण अन्नं, शक्ति स्रोतः , प्रकाशः, उत्पादकसाधनाम्, सर्वदा नूतन रूपेणदात्रीभवति । देवी जोष्ट्री रूपेण सा पृथिवी जातस्य पदार्थस्य प्रकाशनं करोति । अन्यथा ते सर्वे वैज्ञानिकाः पदार्थाः पृथिवीगर्भे एव लीनास्युः ।

एषायर्यो परमादन्तरद्रेः कूचित्सतीरूर्वे गाविवेद ।
दिवोन विद्युत् स्तनयन्त्यभ्रैः सोमस्यते पवत इन्द्रधारा ।। (ऋ०६-७७-८)
विद्युदुत्पादिका सोम (शीत) जलधारा उच्छ्रितात् स्थानात् स्वयं प्राप्तव्य देशं म गच्छति । सा पर्वतस्यै गूढ प्रदेशे स्थिता ऊर्जां (गाः) लब्धवती । सा प्रवहणकाले, अभ्रैः प्रेरिता विद्युदिव, शब्दं करोति । इत्थं कतिचिन्मन्त्रैर्जल विद्युतः पूर्वरूपं, गतिज ऊर्जाया वेग नियन्त्रणेन विशिष्ट यन्त्रेण विद्युदुत्पादनस्य प्रारम्भिकं विज्ञान मुपस्थापितम् । अथतस्योपयोग विषये पि श्रुतिमुखेनैवोप स्थाप्यते । तद्यथाः-

विद्युदस्त्र निर्माता

मायया (यन्त्र समूहैः) विद्युत्, विद्युच्चालितानां शस्त्राणान्चायो निर्माता त्वष्टासुतो वृत्रः । (इत्यैतिहासिकः पक्षः) (ऋ० १-३२-१३)

विद्युतः स्वभावः

मेघस्था (सन्चय रूपेण यन्त्रस्था) विद्युत् शब्दायते । सा, मरुतः = वर्षाकारकावायवः (प्रवहण योग्यांस्तारा समूहान्) सेवते । (ऋ०१-३८-८) सा शोषके स्तत्वे विद्योतते । स्पर्शमात्रेणैव महतामपिवृद्धानां, गजसदृशानां वने - चराणाम् मानवाणान्च शरीराणि नीरसाणि करोति । तस्याः प्रवाह स्पर्शेनैव मृतानां जीवानां शरीराणि विदीर्यन्ते चेत् रसभागः, जलतत्वं शरीरे न प्राप्यते । (ऋ० ६-३-८) । सा अभ्राणि दोग्धि । विभिन्नैर्यन्त्र समुदाये जीवनोपयुक्तानि निर्माणानि उपलब्धानि करोति । (ऋ० ६-७६-३) । विद्युतः अचिरप्रभाः नाम प्रकाशातिशयः । अस्याः संयोगेन निर्मिता दीपाः तीव्रतमं प्रकाशं धारयन्ति , विश्वं च दीप्यते । (ऋ० ५-१०-५) मूलरूपा विद्युतः अन्तरिक्षे चरन्ति । ता वर्षा कारिण्यः । (ऋ० ६-४१-३) ।

विद्युन्निर्मितान्युपकरणानि

बहुभिर्देवै रेतेषामुपकरणानामुपयोगः कृतः । तेषु केचन यथा :-

इन्द्रः । असौ विद्युदस्त्रयुक्त आसीत् । (ऋ०१०-६६-२)

अग्निः । अस्य सविधे विद्युद्रथोदृश्यते । (ऋ० ३-१४-१)

मरुत: । एतेषां बहुविधा पि रथा विद्युच्चालिता: । (ऋ० ३-५४-१३)
तथा च एते विद्युध्दस्ता: , नाम विद्युदायुध बहव: । (ऋ० ८-७-२५)
अस्य स्पष्टमेवतात्पर्यं यद्विद्युत्सम्बन्धेन युक्तानि बहु न्यस्त्राणि हस्तेषु धारयन्ति । सार्थं विशेषणम् । एभि: कतिचि दुदाहरणं विद्युदुपयोग कर्तृभि: सहोपकरणानि प्रदर्शितानि ।

जलविद्युदुत्पादनरीति:

कस्यामपि नद्यां, प्रवहणशीले बृहत् स्रोतसिवा जलविद्युत् निर्माणार्थं जलनियामको बन्ध आवश्यक: । तदर्थमेतादृशं स्थान मावश्यकं यत्र जलधारा स्व प्रकृत्या उच्चस्थानादधस्तले प्रवहति। तथाच सा उपरि बृहती सति प्रवहणमार्गे क्रमश: सङ्कुचिता स्यात् । एतादृक्स्थले स्वाभाविकतया सरणकेन जलप्रवाहो वेगवान्भवति। जल बन्ध: एतादृक् निर्मीयते यत्तस्य काश्चन आपोदेवी: , स्थिरभारेण शक्त्युत्पादक चक्र भ्रामणार्थं गुहासु कृत्रिम नदी प्रवाहेषुवा प्रवाहयितुं युक्ता: स्यु: । बन्धेषु द्वाराणि निर्मीयन्ते । तानि जलधारातलं नियन्तुमुपयुक्तानि भवन्ति । अथचावश्यकतया न्यूनाधिक द्वारोद् घाटनेन जल-तल स्तरमपि नियम्यते । अस्य बन्धस्यापरे भागे नद्या-वर्तनस्थाने नदी तल गतानि गुहा द्वाराणि निर्मीयन्ते यस्यान्तिमं गुहामुखं द्वादशारे चक्रे ७२० किमपि प्राचीन परिमाणात्मकं जलधारं दिपति, वेगेनाघातयति । उक्तञ्च:- द्वादशारं नहितज्जराय वर्वर्तिचक्रं परिद्यामृतस्य । आपुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्चतस्थु: । (ऋ० १-१६४-११) चक्रमेतत् अदाीय माणकाष्ठस्य शुद्ध लौह पिण्डस्य अजराश्मनोवा स्यात् । अदाश्मार्णं काष्ठन्तु जम्बु वृक्षात्मक मिति कृषि शास्त्रे कूप खनन प्रकरणे उक्तम् । जल धारा ग्रहणायाष्टौ द्वाराणि भवन्ति, तान्यष्टौ वसव इति । प्रदर्शिते चित्रे द्वादशारं चक्रं वर्तते । अष्टौ द्वाराण्यि च सन्ति । उपर्युक्त विधिना आनीता: सवेगाआप: सर्वैरपि द्वारै: सहैव प्रविश्य चक्रेषु पंख रूपेषु चक्रारेष्वाघातयन्ति । आसा मपां प्रबलाघातेन । तत्रत्यं व्यजनं स्वयमेव चलन् काष्ठ चक्रं भ्रामयति । आघातितं जलं निर्गमन मुखेन बहि: प्रवहति । चक्रे बहूनि लघु व्यजनानि अपेक्ष्यन्ते । अधिकया तीव्र गत्या चक्र भ्रामणार्थं बहुभिर्द्वारै-र्गुहाभिश्च सहैवस्थिररूपेणानीतानांजल धाराणामुपयोग आवश्यको भवेत् । आघातित जल निर्गमन द्वारंतु नदी तल समसमं कुर्यात् । इत्थं सातत्येन चक्र भ्रमणेन तस्यो

परिस्थापिता अश्मान: परिभ्रमन्ति तेन केवलं धान्यादि पेषणमेव कर्तुं पार्यते । नचान्यान्यानि यन्त्राणि चालयितुम् । तदर्थं तु एकं मध्यस्थं यन्त्र निर्माणमावश्यकमेव, येन तस्या गतिज ऊर्जाया विद्युदुर्जायां रुपान्तरं स्यात् । सातत्येन विद्युतं प्रवाहयेत्, शक्तिं च सङ्गृह्यात्, कोण रूपं च कार्यं कुर्यात् ।

उपर्युक्ता जल विद्युदुत्पादिका वैश्वदेवी कृति: वैदिक कालादद्य यावत् उत्तुङ्गपर्वतीय भागेषु गङ्गा यमुनोद्गम मार्गेषु प्रचलिता वर्तते । ते आधुनिक विद्युद्विज्ञानाभिज्ञा: । अत: केवलं धान्यपेषणमेवकुर्वन्त आस्ते । तेस्तु-एकं चक्रं संस्थाप्य त न्निर्गमन द्वारेण बहि: प्रवाहितं जलं पुनर्नियम्य द्वितीयं चक्रं, ततो धस्तात्तृतीयं, चतुर्थमपियन्त्रं स्थापयन्ति । अभ्यासकाले एव मया सा गङ्गोत्री यात्रा विहिता । तत्रेदमस्मद्विषयस्य प्रत्यक्षादर्शनं कृत्वा नूनं स्तब्धतां यातो हम् ।

वैदिक ऊर्जा सिद्धान्त:

देवी ऊर्जाहुती० इति पारिभाषिको मन्त्र: प्रथममेव लिखित: । अत्र केवलं सिद्धान्त: प्रतिपाद्यते । अद्भिषु गुह्यमाना देवी ऊर्जाहुती इति कथ्यते । सा ऊर्जासंघरूपा । वस्तुजातस्य विशिष्टस्थित्त्ववस्थाभ्यां कार्यकरी ऊर्जा एव स्थितिज-ऊर्जा इत्युच्यते । पृथ्वीतला दुत्तुङ्गस्थान स्थिता जलधारा स्व स्थित्या पृथ्वीतल सापेक्षां स्थितिज ऊर्जात्वं प्राप्नोति । यदि सा धारा अध: पतनोद्यता स्यात तदा गुरुत्वेन तस्या गति: सातत्येन वर्धमाना जायते , अथच पृथ्वीतल सापेक्षा स्थितिज ऊर्जा ह्रासमाना भवति । अथवा यदोत्तुङ्ग पर्वत खण्डयोर्मध्यभागात् अध: पतति, तदातस्या ऊर्जाया: क्रमश: गतिज ऊर्जायां परिवर्तनं भवति । यदा सा पूर्ण रूपेण गुरुत्ववशात् धरातल स्पृष्टा भवेत तदा सा गतिजऊर्जा " देवीजोष्ट्री " इति वैदिक संज्ञया ज्ञायते । अस्यद्योतकं रेखाङ्कनं यथा -

कृ०पृ०उ०

अद्रिषु गूढा ऊर्जा संघ रूपा देवी ऊर्जाहुतिः

- संहिति रूर्जा परमाणु रूपा
  - यांत्रिक ऊर्जा
- स्थितिजऊर्जा स्थिररूपा
  - गतिज ऊर्जा
    - यांत्रिक ऊर्जा (पेषणादिसमर्था)
    - विद्युदूर्जा
      - यांत्रिक ऊर्जा
- किरण ऊर्जा परमाणुकम्पनरूपा
  - यान्त्रिक ऊर्जा

इत्थं यान्त्रिक ऊर्जा एव बहु प्रकारैः लोकोपयोगीय भवति ।

संवाहक वेष्टन युक्तं विद्युदुत्पादकं वर्धापकञ्च यन्त्रम्

बहुविध मन्वेषणेनाप्येतादृशं वैदिकं यन्त्रं (निर्मितं चित्ररूपं वा) दृष्टिगोचरं न जातम् । परञ्च बहुविधासु ऋक्षु देवता सम्बन्धेन, प्रकृतिवर्णन व्याजेन च इतस्ततो विकीर्णानि श्रुतिवाक्यानि सङ्गृह्य त्वष्टा प्रयुक्तं तादृशं यन्त्रं कल्पनया प्रस्तूयते । तदित्थम् -

एकस्मिन्कङ्कणे उपपादिता विद्युद्वाहक मित्रावरुणसंयोगजन्य शक्त्युत्पन्ना उर्वशी तावती परिपूर्णा न भवति यया बहुविधं लोक कल्याणं साधितुं शक्येत । अस्या उर्वश्याः शक्ति प्रापकं पूर्वोक्तं बलं, वेष्टित कङ्कणानां संख्यासु चुम्बकीय क्षेत्र तीव्रतासु, कङ्कण भ्रमण गतिषु निर्भरं भवति । एतत् सिद्धान्तानुसारेण कार्यकरं यन्त्रं विद्युदुत्पादकम् स्यात् । तस्य चत्वारि परिमितानि पदानि भवन्ति । १, क्षेत्रीय चुम्बकम् । २, संवाहक वेष्टणम् । ३, ताम्र कङ्कणम् (धुरासंलग्नं समकोणिकञ्च) । ४, अग्नि जिह्वाचेति(धातुपत्रयुगम्) तेषु त्रीणि यन्त्र संलग्नानि,

अत: अदृष्टानि । तुरीयं दृश्यमानं वर्तते एव । (ऋ० १-१६४-४५) तेन पदानरा स्वारजालं दोत्रेषु प्रसारयन्ति । तेषांत्रयाणा मग्नि वायु सूर्या देवता: । चतुर्थस्य मित्रावरुणौ देवते । तत्र प्रथमं दोत्रीय चुम्बकम् विविच्यते ।

चुम्बकीय फलकयो र्यावा पृथिव्योर्मध्ये रिक्तस्थाने = अन्तरिदो तारसंघटनेनातिप्रबलं चुम्बकीय दोत्रमुत्पादनीयं भवति । अन्तरिदो तत्प्राकृतिकम् । यदीदं यन्त्रं लघ्वुत्पादकं भवेत्तदा नाल चुम्बकं प्रयुज्यते । महदुत्पादकेषु वैद्युतिकं चुम्बकमपेदाते । एतदर्थं फलकयो: परित: तार प्रदशदािणवेष्टनं निर्मीयते । एतत् दोत्रीय वेष्टनमित्युच्यते ।

द्वितीयं संवाहक वेष्टनं विशदी क्रियते ।

इदं सवाहक वेष्टन मुपर्युक्त दोत्रीय चुम्बकस्य ददिाणोत्तरयो र्ध्रुवयोर्मध्ये संलग्नं भवेत् । तस्य निर्मिति:, मुसलाकार लोहदण्डे सूक्ष्मतार वेष्टन प्रादक्षिण्येन कर्तुं शक्यते । स लोहदण्ड एकस्मिन्धुरौ संयोज्य: । अथ च जल प्रपातजन्या घातेन स चुम्बकीय ध्रुवयोरन्तरिदो (मध्येरिक्तस्थाने) सुगमतया भ्रामयितुं शक्य: । इत्थं यन्त्रस्य द्वितीय: पादो व्याख्यात: ।


अथ तृतीय: पाद: ताम्र कङ्कणम् व्याख्यायते

इदं ताम्रधातु निर्मितं बलयाकारं कर्तव्यम् । यन्त्रे द्वे कङ्कणे संवाहक वेष्टन धुरौ दृढे समकोणिकेचस्थापनीये । अनयो: परस्परं, तथाचोभयो: संवाहक वेष्टनेन सह पृथक् न्यास: कार्य: । संवाहक वेष्टनस्य तारा द्वयोरग्रा ताम्र कङ्कणाभ्याम् संयोज्यौ । सवाहक वेष्टने उत्पन्ना उर्वशी आभ्यामेव कङ्कणाभ्याम् अग्निजिव्हायां (धातु पत्र युगे) प्रवहति, विद्योतते च । इति तृतीय पादोव्याख्यात: अत्रे दमवधेयं यदग्नेर्द्वेशीर्षेस्त:, अतो जिव्हे पिद्धे स्वाभाविके एव । (ऋ०१-८६-७)

अथ चतुर्थो दृश्यमान: अग्निजिव्हो त्मक: पाद:

इयमग्निजिव्हा धातुपत्रयुग निर्मिता भवतीति ज्ञातमेव पूर्वम् । अनयो - जिव्हयोरैकैकमग्रं धनुषा ताम्रकङ्कणयोभरिेण स्थाप्येते । अपरे ग्रे संयोजन बन्धैश्चक्र कण्टकैर्वा संलग्ने स्याताम् । बाह्यभागे विद्युतप्रसारणार्थमेभिरेव कण्टके रुर्वशी प्रवाह्यते । इत्थ मस्मामि र्ज्ञातं यत् वेष्टनेषूत्पन्ना उर्वशी अग्निजिव्हाभ्यां संयोजक कण्टकैश्च बहिर्भागे गन्तुं सिद्धा भवति । जलाघातद्वारा भ्रामित चक्रेण गतिमत:

उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसो धिजातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करेत्वा धारयन्त ।। (ऋ०वेद)



संवाहक वेष्टनस्य एकया पूर्ण प्रदक्षिणया उत्पादिता उर्वशी बाह्य अर्ध प्रदक्षिणाया मेकस्यां दिशि तथा च शेषार्ध प्रदक्षिणायां पूर्वस्या विपरीतायां दिशि प्रवाहिता भवति । संवाहकस्य प्रदक्षिणं " कम्पनम् " इत्यभिधीयते । (क्र० ५-७८-८) ।

यदि संवाहक वेष्टनं पन्चाशत प्रतिक्षण मानेन प्रदक्षिणां करोति तर्हि यन्त्रस्यास्य कम्पनाङ्को पि पन्चाशत कम्पन प्रतिक्षणात्मको भवेत् । अनेन प्रत्यावर्ति विद्युद्धारा सिद्धान्त: सिद्ध: । इदमेव यन्त्रं बहुभि वैदिकोपायै: प्रकारान्तरै रपि निर्मातुं शक्यते । तत्र विज्ञानवतां वैदिकानां सश्रद्ध प्रयत्ना आवश्यका: । यदि शासनेन वेदेष्वाधि भौतिक विज्ञान संशोधका: पुरस्कृता: स्यु स्तर्हि ते निकट भविष्ये एव पूर्वोक्तानि यन्त्रोप करणानि, नून-तथा च नूनं नूत्नान्यप निर्मापयिष्यन्तीति मे विश्वास: । परतन्त्र काले अस्माकं शास्त्राणि सङ्गृह्य विशदमभ्यस्य तत्रत्यानां सिद्धान्तानां कुव्यवस्थितं चौर्यं सम्पाद्य आंग्ल भाष्या अनूद्य स्वकीयै र्नामभि: पुरस्कृत्यायं गुरुत्वाकर्षण सिद्धान्त: अमुकस्य, बाष्प सिद्धान्त अमकुकस्य, प्रथमो विमान निर्माता: अमुक:, अयमाद्योन्तरिक्षचारी इतिघोषितवन्त: । किमस्माभिर्विस्मृतं यद् विजितेन रावणस्य पुष्पक विमानेन कतिचिदेव पलकेषु श्री लङ्कात: अयोध्यायां श्री रामचन्द्र समागत: । विश्वामित्रा क्रमणे वसिष्ठेन यान्त्रिकै: सैनिकैरेव स पराजित: । विश्वामित्रेणातु जीवोत्पादकं रासायनं निर्माय प्रति जीवसृष्टिर्निर्मिता या अद्यापि परम्परां विधत्ते । पारद प्रक्रियया स्वर्ण निर्मितिस्तु श्रीमतां कैलासवासिनां मदन मोहन मालवीयानामुपस्थितावेव हरिद्वारस्थेनैकेन पुरुषेण कृतासीत् । यस्या: शिलालेखो पि काशी-हिन्दूविश्वविद्यालयस्थ नूत्ने अन्ताराष्ट्रिय विश्वनाथ मन्दिरे उत्कीर्णो वर्तते दिनांक सहित: । विद्युद्रथ:, विद्युदायुधानि वेदेषुवर्णितानि पूर्वमेवोद्धृतानि । तथैवास्या वैश्वदेव्या जलविद्युतोन्वेषका: केचं नाग्ला भारतोच्छिष्टं जलविद्युदुत्पादकं वैश्वदेवशास्त्रं भुक्त्वा इदानी मस्मानेवास्मकं शास्त्रं शिक्षायितुं पूर्वोक्तानां संशोधकाना मृषीणां नामान्यपि कृतघ्नतया विस्मार्य , ओरस्टेड, मैक्सवेल, फैराडे इत्याद्यनार्यैर्नामभि: सिद्धान्तरूपे रुपस्थिता: । परन्चाद्यापि स्वकीयमेव शास्त्रं ज्ञापयितुं वेदेष्वनुसन्धानं कर्तुं भारतीय वैज्ञानिका न प्रयतन्ते इति परमाश्चर्यमेव । चौरेणापहृतं धनं दृष्ट्वा पि ममैवेदमिति विश्वासेन कथने पि सङ्को चो धिक्कार योग्य एव । परन्चे यथाराजा तथा प्रजा " इति दृष्ट्वा तूष्णीं भवामि ।

इत्थं कतिपयैर्मन्त्राधारै वैदिक जलविद्युन्निर्माणात्मको विश्वेदेवाना- माधिभौतिक: पदार्थो त्र लघुरूपेण केवल सूत्र रूपेणैव प्रपन्चित: । अस्य सविस्तर मनुसन्धानंतु भारतीयास्मितायाः दृष्टिधारकै वैज्ञानिकै वेद प्रामाण्य मन्यमानै: सहैव वैदिकै: कर्तुं शक्यते । अन्यथा यत्र वैदिका:संशोधका उपलब्धा स्तत्र वैज्ञानिकाना मसहयोग: । ये वैज्ञानिका स्तथेच्छन्ति तत्र वेद ज्ञानामभावो दरीदृश्यते । तदर्थ मुभयो: संयोग आवश्यक: । यथा विज्ञाने मित्रावरुण संयोगेनैव विद्युद्धियोततै, तथैव लोक कल्याणे पि वैदिक वैज्ञानिकयो: सह प्रयत्न: परमावश्यक: । स्न-

स तथा भूयादिति विश्वान्देवान्प्रार्थये ।

उपसंहृति:

इत्थं बहुविधै वैदिक ग्रन्थैरन्यैश्च सन्दर्भग्रन्थै: प्रमाणितो देवता शास्त्रा- न्तर्गतो जल विद्युत् निर्माण विज्ञान परिचायको य मपूर्व: शोध प्रबन्ध: पूर्णतां गच्छति । अस्मिन्नन्तिमे प्रकरणे प्रमाण चतुष्टयेन ईदृशा " विश्वेदेवा: " इति निश्चयो भि धास्यते । अथ च तैर्विश्वकल्याणं कथं सम्भविष्यती त्यनुसन्धानेन समाराध- नीयं वर्तते । तत्रास्माभिरवलोकितं यत् जलविद्युद्रूपा विश्वेदेवा: स्वयं प्रकाशिता स्तत्र प्रत्यक्ष रूपेण दृष्टिगोचरा : सन्ति । इदं विज्ञानात्मकं तेषामाधि भौतिकं रूपम् । यत दृश्य मानै पन्चमहाभूतात्मकै: प्राकृतिक पदार्थै प्रत्यक्षमेव । तत्र नास्ति काचन विप्रति पत्ति: । इति प्रथमं प्रमाणं साधितम् ।

द्वितीयेनानुमान प्रमाणेन सर्वदेवतासंघरूपा " विश्वेदेवा: " इति सिध्यति । तथा - यत्किमपि पृथिव्यां प्रत्यक्षं दरीदृश्यते नुनयलेच तत्सर्वमप्यन्त रिक्षे (मध्यस्थाने) अथ च द्युस्थाने पि वर्तते इति वैदिक विज्ञान वादिभि: स्वर्गीयै: श्री मधुसूदन ओझा, श्री म०म० गिरिधर शर्मा चतुर्वेदि प्रभृतिभि रनेक विध प्रमाणै: साधित मकाट्यं सर्वजन मान्यं तत्वंवर्तते । तत्सिधान्तानुसारेण विश्वेदेवानां दृश्यमानं रूपं यथावर्तते तथैव तेजोरूपा अन्तरिक्षस्था पि विश्वेदेवा: सन्तीत्यनुमानेन सिध्यति । येन देवता संघेन पृथिव्यां यल्लोक कल्याण साध्यते ततोप्यधिकं लोक

कल्याणं विश्वजनीनं यथन्तरिक्षस्थैः स्तेजोरूपैर्देवैः क्रियते चेत्तद् विश्वेदेवानामेव कार्यमित्यनुमानेन सिध्यति । इत्थमाधिदैविका विश्वेदेवाः सर्वदेवता संघ रूपा इति द्वितीयेनानुमानप्रमाणेन निश्चीयते ।

तृतीय मुपमान प्रमाणम् । तेनाधि यज्ञात्मका विश्वेदेवाः निश्चीयन्ते । जल विद्युद्रूपस्योपमया अधिदैविकस्य च गविस्थिताः षोडश संख्याका ऐतरेय प्रोक्ताः, सर्वदेवा इति व्यासोक्ताश्च अधियज्ञात्मका विश्वेदेवाः साधिता भवन्ति । गविस्थिताः षोडश संख्याका अनन्तावा विश्वेदेवा गव्यं षोडश संख्याकास्ववस्थासु यज्ञार्हं सम्पाद्य यज्ञद्वारा श्रुति प्रोक्तानि सुफलानि प्रयच्छन्ति । तत्फलमुपमानेन पूर्वमेव प्रोक्तम् । अतो यज्ञसम्पादकाः स्वयमपि यज्ञार्हा, गविप्रतिष्ठिताः सन्तोऽपि स्वयं षोडशावस्थासु गव्यं भुन्जाना अतएव अधियज्ञात्मका विश्वेदेवा इत्यैतरेयश्रुत्या व्यासवचनेन च निश्चिता ।

तुरीयं शब्द प्रमाणं वर्तते । तेन दश देवता संघ रूपा दैवत ब्राह्मणोक्ता, अनन्तावा आध्यात्मिका विश्वेदेवाः निश्चीयन्ते । शब्द प्रामाण्य विषये भूमिकायां बहुविस्तरेण प्रतिपादितमेव । तद्वदेव येदेवा त्रिषु लोकेषु नानाविध ब्रह्माण्डेषु च विद्यमाना स्ते संघीभूय स्वगणस्य विश्वेदेव संघस्य दशभागान्कृत्वा दशनामभिः पिण्डीभूतस्य मानवशरीरस्य परम कल्याणं साधयितुं मानव शरीरे निवसन्ति । नात्र प्रत्यक्षं प्रमाणम् नचानुमानोपमाने । केवलं मौपनिषदिकं मन्त्रात्मकंच शब्द प्रमाणमेव शरणम् तेनैव ज्ञायते यत शरीरे विश्वेदेवा निवसन्ति, ब्रह्माण्डवत् पिण्ड कल्याणं साधयन्तो नरं,नारायणं कारयन्ति, एक मानव देहं विश्वेदेव स्वरूपं विदधति । इत्थमनन्ता विश्वेदेवाः दशधा विभक्ताः सन्तो विश्वेदेवा दश प्रोक्ताः इति वचनाधार रूपा दशभिर्नामभिः प्रसिद्धाः आध्यात्मिका विश्वेदेवाः शब्द प्रामाण्येनैव ज्ञाताः ।

इत्थं प्रमाण चतुष्टयें निश्चिता आधिभौतिक आधिदैविक अधियज्ञात्मक- आध्यात्मिक इति रूप चतुष्टयात्मका विश्वेदेवा इति । ते राधि भौतिक रूपेण इह लौकिकं कल्याणम्, आधिदैविक रूपेण पारलौकिकम्, अधियज्ञात्मकेन समाज धारणात्मकं जागतिकम्, तथा चान्तिमेन आध्यात्मिकेन स्वस्वरूप प्राप्ति कारकं (मोक्षरूपं) कल्याणन्च कुर्वन्ति ।

संहितासु विश्वेदेवाः प्रबन्धो लिखितो मया ।
तेषां विश्वात्मिकादृष्टि र्भूयान्मेतदनुग्रहात् ।। इति ।।

।। षष्ठो ध्याय: ।।

वैश्वदेवी मन्त्र संहिता विमर्शः

(अत्रोक्ता विषया:)

ऋग्वेदे शाकल संहितायां विश्वेदेवा:, बाष्कल-आश्वलायन-शांख्यायन-माण्डूकायन संहितासु च, शुक्लयजुर्वेदे माध्यन्दिन संहितायां, काण्व-संहितायाम्, कृष्णयजुर्वेदे तैत्तिरीय- काठक- कपिष्ठलकठ-मैत्रायणी - संहितासु, सामवेदे कौथुम- जैमिनीय संहितयो:, अथर्ववेदे पिप्पला-स शौनक शाखोक्ता विश्वेदेव मन्त्रा:, स्वस्तये प्रार्थना, समर्पणम्, सहायक ग्रन्थ तालिका चेति ।

--oo--

।। श्री: ।।

।। श्री गणेशाय नम: ।। श्री सरस्वते नम: ।। श्री गुरुभ्यो नम: ।।

।। ऋग्वेदे - शाकल संहितायां विश्वेदेवा: ।।

(अत्र मण्डल सूक्त मन्त्राणा मङ्का विहिता:)

प्रथमं मण्डलम्

१-३-७,८,९

।। हरि: ऊं ।। ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वांसो दाशुष: सुतम् ॥
विश्वे देवासो अप्तुर: सुतमा गन्त तूर्णय: । उस्रा इव स्वसराणि ।।
विश्वे देवासो अस्रिध एहिमायासो अद्रुह: मेधं जुषन्त वन्हय: ।।

१।१४।१२ १२

एभिरग्ने दुवो गिरो विश्वेभि: सोमपीतये। देवेभिर्याहि यक्षि च ।।
आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धिय:। देवेभिरग्न आ गहि ।।
इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम् । आदित्यान् मारुतं गणम्।
प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णव:।द्रप्सा मध्वश्चमूषद: ।।
ईळते त्वामवस्यव: कण्वासो वृक्तबर्हिष: । हविष्मन्तो अरंकृत: ।।
घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वन्हय: । आ देवान्त्सोमपीतये ।।
तान् यजत्रां ऋतावृधो ग्ने पत्नीवतस्कृधि । मध्व: सुजिह्व पायय ।।
ये यजत्रा य ईड्यास् ते ते पिबन्तु जिह्वया।मधोरग्ने वषट्कृति ।।
आकीं सूर्यस्य रोचनाद् विश्वान्देवां उषर्बुध:। विप्रो होतेह वक्षति।।
विश्वेभि: सोम्यं मध्व ग्न इन्द्रेण वायुना । पिबा मित्रस्य धामभि:।।
त्वं होता मनुर्हितो ग्ने यज्ञेषु सीदसि । सेमं नो अध्वरं यज ।।
युक्ष्वा ह्यरुषी रथे हरितो देव रोहित:। ताभिर्देवां इहा वह ।।

विश्वान् देवान् हवामहे मरुत: सोमपीतये । उग्रा हि पृश्निमातर: ।।
जयतामिव तन्यतु र्मरुतामेति धृष्णुया । यच्छुभं याथना नर: ।।
हस्काराद् विद्युतस्पर्यतो जाता अवन्तु न: । मरुतो मृळयन्तु न: ।।

१।८६। १-१०

आ नो भद्रा: क्रतवो यन्तु विश्वतो दब्धासो अपरीतास उद्भिद: ।
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ।।
देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो नि वर्तताम् ।
देवानां सख्यमुप सेदिमा वयं देवा न आयु: प्र तिरन्तु जीवसे ।।
तान् पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणं सोममश्विना सरस्वती न: सुभगा मयस्करत् ।।
तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत् पिता द्यौ: ।
तद् ग्रावाण: सोमसुतो मयोभुव स्तदाश्विना शृणुतं धिष्ण्या युवम् ।।
तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्ध: स्वस्तये ।।
स्वस्ति न इन्द्रो वृद्धश्रवा: स्वस्ति न: पूषा विश्ववेदा: ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमि: स्वस्ति नो बृहस्पतिर्दधातु ।।
पृषदश्वा मरुत: पृश्निमातर: शुभंयावानो विदथेषु जग्मय: ।
अग्निजिह्वा मनव: सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ।।
भद्रं कर्णेभि: शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा: ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभि व्यशेम देवहितं यदायु: ।।
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तो: ।।
अदितिर्द्यौरदितिरन्तरिक्ष मदितिर्माता स पिता स पुत्र: ।
विश्वे देवा अदिति: पञ्च जना अदितिर्जातमदितिर्जनित्वम् ।।

ऋजुनीती नो वरुणो मित्रो नयतु विद्वान् । अर्यमा देवै: सजोषा: ।।
ते हि वस्वो वसवाना स्ते अप्रमूरा महोभि: । व्रता रक्षन्ते विश्वाहा ।।
ते अस्मभ्यं शर्म यंस न्नमृता मर्त्येभ्य: । बाधमाना अप द्विष: ।।
वि न: पथ: सुविताय चियन्त्विन्द्रो मरुत: । पूषा भगो वन्द्यास: ।।
उत नो धियो गोअग्रा: पूषन् विष्णवेवयाव: । कर्ता न: स्वस्तिमत: ।।
मधु वाता ऋतायते मधु क्षरन्ति सिन्धव: । माध्वीर्न: सन्त्वोषधी: ।।
मधु नाक्तमुतोषसो मधुमत् पार्थिवं रज: । मधु द्यौरस्तु न: पिता ।।
मधुमान्नो वनस्पति र्मधुमां अस्तु सूर्य: । माध्वीर्गावो भवन्तु न: ।।
शं नो मित्र: शं वरुण: शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पति: शं नो विष्णुरुरुक्रम:

१।१०५।१-१६

चन्द्रमा अप्स्व १ न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमय: पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ।।
अर्थमिद् वा उ अर्थिन आ जाया युवते पतिम् ।
तुन्जाते वृष्ण्यं पय: परिदाय रसं दुहे वित्तं मे अस्य रोदसी ।।
मो षु देवा अद: स्व १ रवपादि दिवस्परि ।
मा सोम्यस्य शंभुव: शूने भूम कदा चन वित्तं मे अस्य रोदसी ।।
यज्ञं पृच्छाम्यवमं स तद् दूतो वि वोचति ।
क्व ऋतं पूर्व्यं गतं कस्तद् बिभर्ति नूतनो वित्तं मे अस्य रोदसी ।।
अमी ये देवा: स्थन त्रिष्वा रोचने दिव: ।
कद् व ऋतं कदनृतं क्व प्रत्ना व आहुति र्वित्तं मे अस्य रोदसी ।।
कद् व ऋतस्य धर्णसि कद् वरुणस्य चक्षणम् ।
कदर्यम्णो महस्पथा ति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी ।।
अहं सो अस्मि य: पुरा सुते वदामि कानि चित् ।
तं मा व्यन्त्याध्यो ३ वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी ।।

सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ।
मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं तेशतक्रतो वित्तं मे अस्य रोदसी ।।
अमी ये सप्त रश्मय स्तत्रा मे नाभिरातता ।
त्रितस्तद दवेदाप्त्यः स जामित्वाय रेभति वित्तं मे अस्य रोदसी ।।
अमी ये पन्चोक्षणो मध्ये तस्थुर्महो दिवः ।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतु वित्तं मे अस्य रोदसी ।।
सुपर्णा स्त आसते मध्य आरोधने दिवः ।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे अस्य रोदसी ।।
नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनम् ।
ऋतमर्षन्ति सिन्धवः सत्यं तातान सूर्यो वित्तं मे अस्य रोदसी ।।
अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यम् ।
स नः सत्तो मनुष्वदा देवान् यक्षि विदुष्टरो वित्तं मे अस्य रोदसी ।।
सत्तो होता मनुष्वदा देवां अच्छा विदुष्टरः ।
अग्निर्हव्या सुषूदति देवा देवेषु मेधिरो वित्तं मे अस्य रोदसी ।।
ब्रह्मा कृणोति वरुणो गातुविदं तमीमहे ।
व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे अस्य रोदसी ।।
असौ यः पन्था आदित्यो दिवि प्रवाच्यं कृतः ।
न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोदसी ।।
त्रितः कूपे वहितो देवान् हवत ऊतये ।
तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी ।।
अरुणो मा सकृद् वृकः पथा यन्तं ददर्श हि ।
उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी ।।
एनाङ्गूषेण वयमिन्द्रवन्तोऽभिष्याम वृजने सर्ववीराः ।
तन्नो मित्रो वरुणो मामहन्ता मदितिः सिन्धुः पृथिवी उत द्यौः ।।

१।१०६। १-७

इन्द्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे ।
रथं न दुर्गाद् वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ।।

त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्येषु शंभुवः । रथं न०।।
अवन्तु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा । रथं न०।।
नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे ।। रथं न० ।।
बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत् ते मनुर्हितं तदीमहे । रथं न० ।।
इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्हह ऋषिरह्वदूतये । रथं न० ।।
देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
तन्नो मित्रो वरुणो मामहन्ता मदितिः सिन्धुः पृथिवी उत द्यौः ।।

१।१०७।१-३

यज्ञो देवानां प्रत्येति सुम्न मादित्यासो भवता मृळयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्या दंहोश्चिद्या वरिवोवित्तरासत् ।।
उप नो देवा अवसा गमन्त्वङ्गिरसां सामभिः स्तूयमानाः ।
इन्द्र इन्द्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत् ।।
तन्न इन्द्रस्तद् वरुणस्तदग्निस्तदर्यमा तत् सविता चनो धात् । तन्नो मित्रो०।।

१।१२२। १-१५

प्र वः पान्तं रघुमन्यवोऽन्धो यज्ञं रुद्राय मीळ्हुषे भरध्वम् ।
दिवो अस्तोष्यसुरस्य वीरै रिषुध्येव मरुतो रोदस्योः ।।
पत्नीव पूर्वहूतिं वावृधध्या उपासानक्ता पुरुधा विदाने ।
स्तरीर्नात्कं व्युतं वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः ।।
ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् ।
शिशीतमिन्द्रापर्वता युवं न स्तन्नो विश्वे वरिवस्यन्तु देवाः ।।
उत त्या मे यशसा श्वेतनायै व्यन्ता पान्तौशिजो हुवध्यै ।
प्र वो नपातमपां कृणुध्वं प्र मातरा रास्पिनस्यायोः ।।
आ वो रुवण्युमौशिजो हुवध्यै घोषेव शंसमर्जुनस्य नंशे ।
प्र वः पूष्णे दावन आँ अच्छा वोचेय वसुतातिमग्नेः ।।
श्रुतं मे मित्रावरुणा हवेमो त श्रुतं सदने विश्वतः सीम् ।
श्रोतु नः श्रोतुरातिः सुश्रोतुः सुक्षेत्रा सिन्धुरद्भिः ।।

स्तुषे सा वां वरुण मित्र रातिर्गवां शता पृक्षयामेषु पज्रे ।
श्रुतरथे प्रियरथे दधाना: सद्य: पुष्टिं निरुन्धानासो अग्मन् ।।
अस्य स्तुषे महिमघस्य राध: सचा सनेम नहुष: सुवीरा: ।
जनो य: पज्रेभ्यो वाजिनीवानश्वावतो रथिनो मह्यं सूरि: ।।
जनो यो मित्रावरुणावभिध्रुगपो न वां सुनोत्यक्ष्णयाध्रुक् ।
स्वयं स यक्ष्मं हृदये नि धत्त आप यदीं होत्राभिर्ऋतावा ।।
स व्राधतो नहुषो दंसुजूत: शर्धस्तरो नरां गूर्तश्रवा: ।
विसृष्टरातिर्याति बाळ्हसृत्वा विश्वासु पृत्सु सदमिच्छूर: ।।
अध ग्मन्ता नहुषो हवं सूरे: श्रोता राजानो अमृतस्य मन्द्रा: ।
नभोजुवो यन्निरवस्य राध: प्रशस्तये महिना रथवते ।।
एतं शर्धं धाम यस्य सूरेरित्यवोचन् दशतयस्य नंशे ।
द्युम्नानि येषु वसुताती रारन् विश्वे सन्वन्तु प्रभृथेषु वाजम् ।।
मन्दामहे दशतयस्य धासेर्द्विर्यत् पञ्च बिभ्रतो यन्त्यन्ना ।
किमिष्टाश्व इष्टरश्मिरेत ईशानासस्तरुष ऋञ्जते नॄन् ।
हिरण्यकर्णं मणिग्रीवमर्णस्तन्नो विश्वे वरिवस्यन्तु देवा: ।
अर्यो गिर: सद्य आ जग्मुषीरोस्राश्चाकन्तूभयेष्वस्मे ।।
चत्वारो मा मशर्शारस्य शिश्वस्त्रयो राज्ञ आयवसस्य जिष्णो: ।
रथो वां मित्रावरुणा दीर्घाप्सा: स्यूमगभस्ति: सूरो नाद्यौत् ।।

१।१३९। १,११

अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु तच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे।
यद्ध क्राणा विवस्वति नाभा संदायि नव्यसी ।
अध प्र सू न उप यन्तु धीतयो देवाँ अच्छा न धीतय: ।। १।।
ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ।। ११।।

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः ।
तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् ।।
सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ।।
इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्यश्वाः ।
सप्त स्वसारो अभि सं नवन्ते यत्र गवां निहिता सप्त नाम ।।
को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्ति ।
भूम्या असुरसृगात्मा क्व स्वित् को विद्वांसमुप गात् प्रष्टुमेतत् ।।
पाकः पृच्छामि मनसाविजानन् देवानामेना निहिता पदानि ।
वत्से बष्कये धि सप्त तन्तून् वि तत्निरे कवय ओतवा उ ।।
अचिकित्वान्चिकितुषश्चिदत्र कवीन् पृच्छामि विद्मने न विद्वान् ।
वि यस्तस्तम्भ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकम् ।।
इह ब्रवीतु य ईमङ्ग वेदास्य वामस्य निहितं पदं वेः ।
शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः ।।
माता पितरमृत आ बभाज धीत्यग्रे मनसा सं हि जग्मे ।
सा बीभत्सुर्गर्भरसा निविद्धा नमस्वन्त इदुपवाकमीयुः ।।
युक्ता मातासीद् धुरि दक्षिणाया अतिष्ठद् गर्भो वृजनीष्वन्तः ।
अमीमेद् वत्सो अनु गामपश्यद् विश्वरूप्यं त्रिषु योजनेषु ।।
तिस्रो मातॄस्त्रीन् पितॄन् बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति ।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम् ।।
द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ।।
पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितम् ।।
पञ्चारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा ।
तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः ।।

सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति ।
सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ।।
साकंजानां सप्तथमाहुरेकजं षळिद् यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः ।।
स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदन्धः ।
कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात् स पितुष्पितासत् ।।
अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात् ।
सा कद्रीची कं स्विदर्धं परागात् क्व स्वित् सूते नहि यूथे अन्तः ।।
अवः परेण पितरं यो अस्यानुवेद पर एनावरेण ।
कवीयमानः क इह प्र वोचद् देवं मनः कुतो अधि प्रजातम् ।।
ये अर्वाञ्चस्ताँ उ पराच आहुर्ये पराञ्चस्ताँ उ अर्वाच आहुः ।
इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति ।।
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ।।
यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति ।
इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश ।।
यस्मिन् वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे ।
तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ।।
यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद् वा त्रैष्टुभं निरतक्षत ।
यद् वा जगज्जगत्याहितं पदं य इत् तद् विदुस्ते अमृतत्वमानशुः ।।
गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाऽक्षरेण मिमते सप्त वाणीः ।।
जगता सिन्धुं दिव्यस्तभायद् रथंतरे सूर्यं पर्यपश्यत् ।
गायत्रस्य समिधस्तिस्र आहुस्ततो मन्हा प्र रिरिचे महित्वा ।।
उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।
श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचम् ।।
हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ।।

गौरमीमिदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ ।
सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ।।
अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद् भवन्ती प्रति वव्रिमौहत ।।
अनच्छये तुरगातु जीवमेजद् ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ।।
अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ।।
य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् ।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा विवेश ।।
द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।
उत्तानयोश्चम्वो ३ र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ।।
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ।।
इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ।।
सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ।।
न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि ।
यदा मागन् प्रथमजा ऋतस्यादिद वाचो अश्नुवे भागमस्याः ।।
अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्य १ न्यं चिक्युर्न नि चिक्युरन्यम् ।।
ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत तद् विदुस्त इमे समासते ।।
सूयवसाद भगवती हि भूया अथो वयं भगवन्तः स्याम् ।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ।।
गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ।।

आ न इळाभिर्विदथे सुशस्ति विश्वानर: सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा।।
आ नो विश्व आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुण: सजोषा: ।
भुवन् यथा नो विश्वे वृधास: करन्त्सुषाहा विथुरं न शव: ।।
प्रेष्ठं वो अतिथिं गृणीषेऽग्निं शस्तिभिस्तुर्वणि: सजोषा: ।
असद् यथा नो वरुण: सुकीर्तिरिषश्च पर्षदरिगूर्त: सूरि: ।।
उप व एषे नमसा जिगीषोषासानक्ता सुदुघेव धेनु: ।
समाने अहन् विमिमानो अर्कं विषुरूपे पयसि सस्मिन्नूधन् ।।
उत नोऽहिर्बुध्न्यो ३ मयस्क: शिशुं न पिप्युषीव वेति सिन्धु: ।
येन नपातमपां जुनाम मनोजुवो वृषणो यं वहन्ति ।।
उत न ईं त्वष्टा गन्त्वच्छा स्मत् सूरिभिरभिपित्वे सजोषा: ।
आ वृत्रहेन्द्रश्चर्षणिप्रास्तुविष्टमो नरां न इह गम्या: ।।
उत न ईं मतयोऽश्वयोगा: शिशुं न गावस्तरुणं रिहन्ति ।
तमीं गिरो जनयो न पत्नी: सुरभिष्टमं नरां नसन्त ।।
उत न ईं मरुतो वृद्धसेना: स्मद् रोदसी समनस: सदन्तु ।
पृषदश्वासोऽवनयो न रथा रिशादसो मित्रयुजो न देवा: ।।
प्र नु यदेषां महिना चिकित्रे प्र युञ्जते प्रयुजस्ते सुवृक्ति ।
अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायन्त सेना: ।।
प्रो अश्विनाववसे कृणुध्वं प्र पूषणं स्वतवसो हि सन्ति ।
अद्वेषो विष्णुर्वात ऋभुक्षा अच्छा सुम्नाय ववृतीय देवान् ।।
इयं सा वो अस्मे दीधितिर्यजत्रा अपिप्राणी च सदनी च भूया: ।
नि या देवेषु यतते वसूयुर्विधामेषं वृजनं जीरदानुम् ।।

२।२९।१-७

धृतव्रता आदित्या इषिरा आरे मत् कर्त रहसूरिवागः ।
शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः ।।
यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत ।
अभिक्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च ।।
किमू नु वः कृणवामापरेण किं सनेन वसव आप्येन ।
यूयं नो मित्रावरुणादिते च स्वस्तिमिन्द्रामरुतो दधात ।।
हये देवा यूयमिदापयः स्थ ते मृळत नाधमानाय मह्यम् ।
मा वो रथो मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म ।।
प्र व एको मिमय भूर्यागो यन्मा पितेव कितवं शशास ।
आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट ।।
अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ।।
माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन् त्सुयमादव स्थां बृहद वदेम विदथे सुवीराः ।।

२।३१।१-७

अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा ।
प्र यद् वयो न पप्तन्वस्मनस्परि श्रवस्यवो हृषीवन्तो वनर्षदः ।।
अध स्मा न उदवता सजोषसो रथं देवासो अभि विक्षु वाजयुम् ।
यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः ।।
उत स्य न इन्द्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः ।
अनु नु स्थात्यवृकाभिरूतिभि रथं महे सनये वाजसातये ।।
उत स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद् रथम् ।
इळा भगो बृहद्दिवोत रोदसी पूषा पुरन्धिरश्विनावधा पती ।।
उत त्ये देवी सुभगे मिथूदृशोषासानक्ता जगतामपीजुवा ।
स्तुषे यद् वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिवया उपस्तिरे ।।

उत वः शंसमुशिजामिव श्मस्याहिर्बुध्न्यो ऽज एकपादुत ।
त्रित ऋभुक्षाः सविता चनो दधे ऽपां नपादाशुहेमा धिया शमि ।।
एता वो वश्म्युद्यता यजत्रा अतक्षन्नायवो नव्यसे सम् ।
श्रवस्यवो वाजं चकानाः सप्तिर्न रथ्यो अह धीतिमश्याः ।।

२।४१।१३-१५

विश्वे देवास आ गत शृणुता म इमं हवम् । एदं बर्हिर्नि षीदत ।।
तीव्रो वो मधुमां अयं शुनहोत्रेषु मत्सरः । एतं पिबत काम्यम् ।।
इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः । विश्वे मम श्रुता हवम् ।।

।। अथ तृतीयं मण्डलम् ।।

३।२०।१-५

अग्निमुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः ।
सुज्योतिषो नः शृण्वन्तु देवाः सजोषसो अध्वरं वावशानाः ।।
अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।
तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ।।
अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य नाम ।
याश्च माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबन्धो ।।
अग्निर्नेता भग इव क्षितीनां दैवीनां देव ऋतुपा ऋतावा ।
स वृत्रहा सनयो विश्ववेदाः पर्षद् विश्वाति दुरिता गृणन्तम् ।।
दधिक्रामग्निमुषसं च देवीं बृहस्पतिं सवितारं च देवम् ।
अश्विना मित्रावरुणा भगं च वसून् रुद्राँ आदित्याँ इह हुवे ।।

३।५४।१-२२

इमं महे विदथ्याय शूषं शश्वत् कृत्व ईड्याय प्र जभ्रुः ।
शृणोतु नो दम्येभिरनीकैः शृणोत्वग्निर्दिव्यैरजस्रः ।।

नहि मे दिवे वर्चा पृथिव्यै कामो न इच्छन्चरति प्रजानम् ।
ययोर्हि स्तोमे विदथेषु देवाः सपर्यवो मादयन्ते सचायोः ।।
यवो॒कृतं रोदसी सत्यमस्तु महे षु णः सुविताय प्र भूतम् ।
इदं दिवे नमो अग्ने पृथिव्यै सपर्यामि प्रयसा यामि रत्नम् ।।
उतो हि वां पूर्व्या आविविद्र ऋतावरी रोदसी सत्यवाचः ।
नरश्चिद् वां समिथे शूरसातौ ववन्दिरे पृथिवि वेविदानाः ।।
को अद्धा वेद क इह प्र वोचद् देवाँ अच्छा पथ्या ३ का समेति ।
ददृश्र एषामवमा सदांसि परेषु या गुह्येषु व्रतेषु ।।
कविर्नृचक्षा अभि षीमचष्ट ऋतस्य योना विघृते मदन्ती ।
नाना चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने ।।
समान्या वियुथे दूरेअन्ते ध्रुवे पदे तस्थतुर्जागरूके ।
उत स्वसारा युवती भवन्ती आदु ब्रुवाते मिथुनानि नाम ।।
विश्वेदेते जनिमा सं विविक्तो महो देवान् बिभ्रती न व्यथेते ।
एजद् ध्रुवं पत्यते विश्वमेकं चरत् पतत्रि विषुणं वि जातम् ।।
सना पुराणमध्येम्यारान्महः पितुर्जनितुर्जामि तन्नः ।
देवासो यत्र पनितार एवैरुरौ पथि व्युते तस्थुरन्तः ।।
इमं स्तोमं रोदसी प्र ब्रवीम्यृदूदराः शृणवन्नग्निजिह्वाः ।
मित्रः सम्राजो वरुणो युवान आदित्यासः कवयः पप्रथानाः ।।
हिरण्यपाणिः सविता सुजिह्वस्त्रिरा दिवो विदथे पत्यमानः ।
देवेषु च सवितः श्लोकमश्रेरादस्मभ्यमा सुव सर्वतातिम् ।।
सुकृत सुपाणिः स्ववाँ ऋतावा देवस्त्वष्टावसे तानि नो धात् ।
पूषण्वन्त ऋभवो मादयध्वमूर्ध्वग्रावाणो अध्वरमतष्ट ।।
विद्युद्रथा मरुत ऋष्टिमन्तो दिवो मर्या ऋतजाता अयासः ।
सरस्वती शृणवन् यज्ञियासो धाता रयिं सहवीरं तुरासः ।।
विष्णुं स्तोमासः पुरुदस्ममर्का भगस्येव कारिणो यामनि ग्मन् ।
उरुक्रमः ककुहो यस्य पूर्वीर्न मर्धन्ति युवतयो जनित्रीः ।।

इन्द्रो विश्वैर्वीर्यै३: पत्यमान उभे आ पप्रौ रोदसी महित्वा ।
पुरंदरो वृत्रहा धृष्णुषेण: संगृभ्या न आ भरा भूरि पश्व: ।।
नासत्या मे पितरा बन्धुपृच्छा सजात्यमश्विनोश्चारु नाम ।
युवं हि स्थो रयिदौ नो रयीणां दात्रं रक्षेथे अकवैरदब्धा ।।
महत् तद् व: कवयश्चारु नाम यद्ध देवा भवथ विश्व इन्द्रे ।
सख ऋभुभि: पुरुहूत प्रियेभिरिमां धियं सातये तक्षता न: ।।
अर्यमा णो अदितिर्यज्ञियासो दब्धानि वरुणस्य व्रतानि ।
युयोत नो अनपत्यानि गन्तो: प्रजावान् न: पशुमाँ अस्तु गातु: ।।
देवानां दूत: पुरुध प्रसूतो नागान् नो वोचतु सर्वताता ।
शृणोतु न: पृथिवी द्यौरुताप: सूर्यो नक्षत्रैरुर्वन्तरिक्षम् ।।
शृण्वन्तु नो वृषण: पर्वतासो ध्रुवक्षेमास इळया मदन्त: ।
आदित्यैर्नो अदिति: शृणोतु यच्छन्तु नो मरुत: शर्म भद्रम् ।।
सदा सुग: पितुमाँ अस्तु पन्था मध्वा देवा ओषधी: सं पिपृक्त ।
भगो मे अग्ने सख्ये न मृध्या उद् रायो अश्यां सदनं पुरुक्षो: ।।
स्वदस्व हव्या समिषो दिदीह्यस्मद्र्य१क् सं मिमीहि श्रवांसि ।
विश्वाँ अग्ने पृत्सु ताञ्जेषि शत्रूनहा विश्वा सुमना दीदिहीन: ।।

३।५५।१-२२

उषस: पूर्वा अध यद् व्यूषुर्महद् वि जज्ञे अक्षरं पदे गो: ।
व्रता देवानामुप नु प्रभूषन् महद् देवानामसुरत्वमेकम् ।।

मो षू णो अत्र जुहुरन्त देवा मा पूर्वे अग्ने पितर: पदज्ञा:। पुराण्यो: सद्मनो: केतुरन्तर्म
वि मे पुरुत्रा पतयन्ति कामा: शम्यच्छा दीद्ये पूर्व्याणि।समिद्धे अग्नावृतमिद् वदेम म०।।
समानो राजा विभृत: पुरुत्रा शये शयासु प्रयुतो वनानु । अन्या वत्सं भरति क्षेति माता म
आक्षित् पूर्वास्वपरा अनूरुत् सद्यो जातासु तरुणीष्वन्त: ।अन्तर्वती: सुवते अप्रवीता म०।
शयु: परस्तादध नु द्विमाता बन्धनश्चरति वत्स एक:। मित्रस्य ता वरुणस्य व्रतानि म०।।

द्विमाता होता विदथेषु सम्राळ्न्वग्रं चरति क्षेति बुध्नः। प्र रण्यानि रण्यवाचो भरन्ते म०।
शूरस्येव युध्यतो अन्तमस्य प्रतीचीनं ददृशे विश्वमायत्। अन्तर्मतिश्चरति निष्षिधं गोर्महद्०।।
नि वेवेति पलितो दूत आस्वन्तर्महांश्चरति रोचनेन । वपूंषि बिभ्रदभि नो वि चष्टे म०।।
विष्णुर्गोपाः परमं पाति पाथः प्रिया धामान्यमृता दधानः।अग्निष्टा विश्वा भुवनानि वेद०
नाना चक्राते यम्या३ वपूंषि तयोरन्यद् रोचते कृष्णमन्यत्। श्यावी च यदरुषी च स्वसारौ०
माता च यत्र दुहिता च धेनू सबर्दुघे धापयेते समीची । ऋतस्य ते सदसीळे अन्तर्महद्० ।।
अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः। ऋतस्य सा पयसा पिन्वतेळा म०।।
पद्या वस्ते पुरुरूपा वपूंष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा । ऋतस्य सद्म वि चरामि विद्वान्म०।
पदे इव निहिते दस्मे अन्तस्तयोरन्यद् गुह्यमाविरन्यत्। सध्रीचीना पथ्या३ सा विषूची म०।।
आ धेनवो धुनयन्तामशिश्वीः सबर्दुघाः शशया अप्रदुग्धाः। नव्यानव्या युवतयो भवन्तीर्महद्० ।।
यदन्यासु वृषभो रोरवीति सो अन्यस्मिन् यूथे नि दधाति रेतः। स हि क्षपावान् त्स भगः-

स राजा महद्० ।।

वीरस्य नु स्वश्व्यं जनासः प्र नु वोचाम विदुरस्य देवाः। षोळ्हा युक्ताः पञ्चपञ्चा वहन्ति
देवस्त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान । इमा च विश्वा भुवनान्यस्य म०
मही समैरच्चम्वा समीची उभे ते अस्य वसुना न्यृष्टे । शृण्वे वीरो विन्दमानो वसूनि महद्०।।
इमां च नः पृथिवीं विश्वधाया उप क्षेति हितमित्रो न राजा । पुरः सदः शर्मसदो न वीरा०
निष्षिध्वरीस्त ओषधीरुतापो रयिं त इन्द्र पृथिवी बिभर्ति ।
सखायस्ते वामभाजः स्याम महद् देवानामसुरत्वमेकम् ।।

३।५६।१-८

न ता मिनन्ति मायिनो न धीरा व्रता देवानां प्रथमा ध्रुवाणि ।
न रोदसी अद्रुहा वेद्याभिर्न पर्वता निनमे तस्थिवांसः ।।
षड् भाराँ एको अचरन् बिभर्त्यृतं वर्षिष्ठमुप गाव आगुः ।
तिस्रो महीरुपरास्तस्थुरत्या गुहा द्वे निहिते दर्श्येका ।।
त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान् ।
त्र्यनीकः पत्यते माहिनावान् त्स रेतोधा वृषभः शश्वतीनाम् ।।

अभीक आसां पदवीरबोध्यादित्यानामह्वे चारु नाम ।
आपश्चिदस्मा अरमन्त देवीः पृथग् व्रजन्तीः परि षीमवृञ्जन् ॥
त्री षधस्था सिन्धवस्त्रिः कवीनामुत त्रिमाता विदथेषु सम्राट् ।
ऋतावरीर्योषणास्तिस्रो अप्यास्त्रिरा दिवो विदथे पत्यमानाः ।
त्रिरा दिवः सवितर्वार्याणि दिवेदिव आ सुव त्रिर्नो अह्नः ।
त्रिधातु राय आ सुवा वसूनि भग त्रातर्धिषणे सातये धाः ॥
त्रिरा दिवः सविता सोषवीति राजाना मित्रावरुणा सुपाणी ।
आपश्चिदस्य रोदसी चिदुर्वी रत्नं भिक्षन्त सवितुः सवाय ॥
त्रिरुत्तमा दूणशा रोचनानि त्रयो राजन्त्यसुरस्य वीराः ।
ऋतावान इषिरा दूळभासस्त्रिरा दिवो विदथे सन्तु देवाः ॥

३।५७।१-६

प्र मे विविक्वाँ अविदन्मनीषां धेनुं चरन्तीं प्रयुतामगोपाम् ।
सद्यश्चिद् या दुदुहे भूरि धासेरिन्द्रस्तदग्निः पनितारो अस्याः ॥
इन्द्रः सु पूषा वृषणा सुहस्ता दिवो न प्रीताः शशयं दुदुह्रे ।
विश्वे यदस्यां रणयन्त देवाः प्र वो त्र वसवः सुम्नमश्याम् ॥
या जामयो वृष्ण इच्छन्ति शक्तिं नमस्यन्तीर्जानते गर्भमस्मिन् ।
अच्छा पुत्रं धेनवो वावशाना महश्चरन्ति बिभ्रतं वपूंषि ॥
अच्छा विवक्मि रोदसी सुमेके ग्राव्णो युजानो अध्वरे मनीषा ।
इमा उ ते मनवे भूरिवारा ऊर्ध्वा भवन्ति दर्शता यजत्राः ॥
या ते जिह्वा मधुमती सुमेधा अग्ने देवेषूच्यत उरूची ।
तयेह विश्वाँ अवसे यजत्राना सादय पायया चा मधूनि ॥
या ते अग्ने पर्वतस्येव धारासश्चन्ती पीपयद् देव चित्रा ।
तामस्मभ्यं प्रमतिं जातवेदो वसो रास्व सुमतिं विश्वजन्याम् ॥

।। अथ चतुर्थं मण्डलम् ।।

४।५५।१-१०

को वस्त्राता वसवः को वरूता द्यावाभूमी अदिते त्रासीथां नः ।
सहीयसो वरुण मित्र मर्तात् को वोऽध्वरे वरिवो धाति देवाः ।।
प्र ये धामानि पूर्व्याण्यर्चान् वि यदुच्छान् वियोतारो अमूराः ।
विधातारो वि ते दधुरजस्रा ऋतधीतयो रुरुचन्त दस्माः ।।
प्र पस्त्या३मदितिं सिन्धुमर्कैः स्वस्तिमीळे सख्याय देवीम् ।
उभे यथा नो अहनी निपात उषासानक्ता करतामदब्धे ।।
व्यर्यमा वरुणश्चेति पन्थामिषस्पतिः सुवितं गातुमग्निः ।
इन्द्राविष्णू नृवदु षु स्तवाना शर्म नो यन्तममवद् वरूथम् ।।
आ पर्वतस्य मरुतामवांसि देवस्य त्रातुरव्रि भगस्य ।
पात् पतिर्जन्यादंहसो नो मित्रो मित्रियादुत न उरुष्येत् ।।
नू रोदसी अहिना बुध्न्येन स्तुवीत देवी अप्येभिरिष्टैः ।
समुद्रं न संचरणे सनिष्यवो घर्मस्वरसो नद्यो३ अप व्रन् ।।
देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
नहि मित्रस्य वरुणस्य धासिमर्हामसि प्रमियं सान्वग्नेः ।।
अग्निरीशे वसव्यस्या ग्निर्महः सौभगस्य।तान्यस्मभ्यं रासते ।।
उषो मघोन्या वह सूनृते वार्या पुरु । अस्मभ्यं वाजिनीवति ।।
तत् सु नः सविता भगो वरुणो मित्रो अर्यमा । इन्द्रो नो राधसा गमत् ।

।। अथ पञ्चमं मण्डलम् ।।

५।२६।१-९

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् वक्षि यक्षि च
तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम् । देवाँ आ वीतये वह ।।
वीतिहोत्रं त्वा कवे द्युमन्तं समिधीमहि । अग्ने बृहन्तमध्वरे ।।

अग्ने विश्वेभिरा गहि देवेभिर्हव्यदातये । होतारं त्वा वृणीमहे ।।
यजमानाय सुन्वत आग्ने सुवीर्यं वह । देवैरा सत्सि बर्हिषि ।।
समिधानः सहस्रजिदग्ने धर्माणि पुष्यसि । देवानां दूत उक्थ्यः ।।
न्य१ग्निं जातवेदसं होत्रवाहं यविष्ठ्यम् । दधाता देवमृत्विजम् ।।
प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः । स्तृणीत बर्हिरासदे ।।
एदं मरुतो अश्विना मित्रः सीदन्तु वरुणः । देवासः सर्वया विशा ।।

५।४१।१-२०

को नु वां मित्रावरुणावृतायन् दिवो वा महः पार्थिवस्य वा दे ।
ऋतस्य वा सदसि त्रासीथां नो यज्ञायते वा पशुषो न वाजान् ।।
ते नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतो जुषन्त ।
नमोभिर्वा ये दधते सुवृक्तिं स्तोमं रुद्राय मीळ्हुषे सजोषाः ।।
आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन् रथ्यस्य पुष्टौ ।
उत वा दिवो असुराय मन्म प्रान्धांसीव यज्यवे भरध्वम् ।।
प्र सक्षणो दिव्यः कण्वहोता त्रितो दिवः सजोषा वातो अग्निः ।
पूषा भगः प्रभृथे विश्वभोजा आजिं न जग्मुराश्वश्वतमाः ।।
प्र वो रयिं युक्ताश्वं भरध्वं राय एषे वसे दधीत धीः ।
सुशेव एवैरौशिजस्य होता ये व एवा मरुतस्तुराणाम् ।।
प्र वो वायुं रथयुजं कृणुध्वं प्र देवं विप्रं पनितारमर्कैः ।
इषुध्यव ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धिये धुः ।।
उप व एषे वन्द्येभिः शूषैः प्र यह्वी दिवश्चितयद्भिरर्कैः ।
उषासानक्ता विदुषीव विश्वमा हा वहतो मर्त्याय यज्ञम् ।।
अभि वो अर्चे पोष्यावतो नॄन् वास्तोष्पतिं त्वष्टारं रराणः ।
धन्या सजोषा धिषणा नमोभिर्वनस्पतीँरोषधी राय एषे ।।
तुजे नस्तने पर्वताः सन्तु स्वैतवो ये वसवो न वीराः ।
पनित आप्त्यो यजतः सदा नो वर्धान्नः शंसं नर्यो अभिष्टौ ।।

वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नपातमपां सुवृक्ति ।
गृणीते अग्निरेतरी न शूषैः शोचिष्केशो नि रिणाति वना ॥
कथा महे रुद्रियाय ब्रवाम कद् राये चिकितुषे भगाय ।
आप ओषधीरुत नोऽवन्तु द्यौर्वना गिरयो वृक्षाकेशाः ॥
शृणोतु न ऊर्जां पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा ।
शृण्वन्त्वापः पुरो न शुभ्राः परि स्रुचो ववृहाणस्याद्रेः ॥
विदा चिन्नु महान्तो ये व एवा ब्रवाम दस्मा वार्यं दधानाः ।
वयश्चन सुभ्व१ आव यन्ति क्षुभा मर्तमनुयतं वधस्नैः ॥
आ दैव्यानि पार्थिवानि जन्मापश्चाच्छा सुमखाय वोचम् ।
वर्धन्तां द्यावो गिरश्चन्द्राग्रा उदा वर्धन्तामभिषाता अर्णाः ॥
पदपदे मे जरिमा नि धायि वरूत्री वा शक्रा या पायुभिश्च ।
सिषक्तु माता मही रसा नः स्मत् सूरिभिर्ऋजुहस्त ऋजुवनिः ॥
कथा दाशेम नमसा सुदानू नेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ ।
मा नो हिर्बुध्न्यो रिषे धादस्माकं भूदुपमातिवनिः ॥
इति चिन्नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो व आ देवासे वनते मर्त्यो वः ।
अत्रा शिवां तन्वो धासिमस्या जरां चिन्मे निर्ऋतिर्जग्रसीत ॥
तां वो देवाः सुमतिमूर्जयन्तीमिषमश्याम वसवः शसा गोः ।
सा नः सुदानुर्मृळयन्ती देवी प्रति द्रवन्ती सुविताय गम्याः ॥
अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु ।
उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः । सिषक्तु न ऊर्जव्यस्य पुष्टेः ।

५।४२।१-१८

प्र शंतमा वरुणं दीधिती गीर्मित्रं भगमदितिं नूनमश्याः ।
पृषद्योनिः पञ्चहोता शृणोत्वतूर्तपन्था असुरो मयोभुः ॥
प्रति मे स्तोममदितिर्जगृभ्यात् सूनुं न माता हृद्यं सुशेवम् ।
ब्रह्म प्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु ॥

उदीरय कवितमं कवीनामुनत्तैनमभि मध्वा घृतेन ।
स नो वसूनि प्रयता हितानि चन्द्राणि देवः सविता सुवाति ॥
समिन्द्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्ति ।
सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमत्या यज्ञियानाम् ॥
देवो भगः सविता रायो अंश इन्द्रो वृत्रस्य संजितो धनानाम् ।
ऋभुक्षा वाज उत वा पुरंधिरवन्तु नो अमृतासस्तुरासः ॥
मरुत्वतो अप्रतीतस्य जिष्णोरजूर्यतः प्र ब्रवामा कृतानि ।
न ते पूर्वे मघवन् नापरासो न वीर्यं१ नूतनः कश्चनाप ॥
उप स्तुहि प्रथमं रत्नधेयं बृहस्पतिं सनितारं धनानाम् ।
यः शंसते स्तुवते शंभविष्ठः पुरूवसुरागमज्जोहुवानाम् ॥
तवोतिभिः सचमाना अरिष्टा बृहस्पते मघवानः सुवीराः ।
ये अश्वदा उत वा सन्ति गोदा ये वस्त्रदाः सुभगास्तेषु रायः ॥
विसर्माणं कृणुहि वित्तमेषां ये भुञ्जते अपृणन्तो न उक्थैः ।
अपव्रतान् प्रसवे वावृधानान् ब्रह्मद्विषः सूर्याद् यावयस्व ॥
य ओहते रक्षसो देववीतावचक्रेभिस्तं मरुतो नि यात ।
यो वः शमीं शशमानस्य निन्दात् तुच्छ्यान् कामान् करते सिष्विदानः ॥
तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।
यक्ष्वा महे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥
दमूनसो अपसो ये सुहस्ता वृष्णः पत्नीर्नद्यो विभ्वतष्टाः ।
सरस्वती बृहद्दिवोत राका दशस्यन्तीर्वरिवस्यन्तु शुभ्राः ॥
प्र सू महे सुशरणाय मेधां गिरं भरे नव्यसीं जायमानाम् ।
य आहना दुहितुर्वक्षणासु रूपा मिनानो अकृणोदिदं नः ॥
प्र सुष्टुतिः स्तनयन्तं रुवन्तमिळस्पतिं जरितर्नूनमश्याः ।
यो अब्दिमाँ उदनिमाँ इयर्ति प्र विद्युता रोदसी उक्षमाणः ॥
एष स्तोमो मारुतं शर्धो अच्छा रुद्रस्य सूनूँर्युवन्यूँरुदश्याः ।
कामो राये हवते मा स्वस्त्युप स्तुहि पृषदश्वाँ अयासः ॥

प्रेण: स्तोम: पृथिवीमन्तरिक्षं वनस्पतींरोषधी राये अश्या: ।
देवोदेव: सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ।।
उरौ देवा अनिबाधे स्याम् ।।
समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ।।

५।४३।१-१७

आ धेनव: पयसा तूर्ण्यर्था अमर्धन्तीरुप नो यन्तु मध्वा ।
महो राये बृहती: सप्त विप्रो मयोभुवो जरिता जोहवीति ।।
आ सुष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे ।
पिता माता मधुवचा: सुहस्ता भरेभरे नो यशसावविष्टाम् ।।
अध्वर्यवश्चकृवांसो मधूनि प्र वायवे भरत चारु शुक्रम ।
होतेव न: प्रथम: पाह्यस्य देव मध्वो ररिमा ते मदाय ।।
दश क्षिपो युन्जते बाहू अद्रिं सोमस्य या शमितारा सुहस्ता ।
मध्वो रसं सुगमस्तिर्गिरिष्ठां चनिश्चदद् दुदुहे शुक्रमंशु: ।।
असावि ते जुजुषाणाय सोम: क्रत्वे दक्षाय बृहते मदाय ।
हरी रथे सुधुरा योगे अर्वागिन्द्र प्रिया कृणुहि हूयमान: ।।
आ नो महीमरमतिं सजोषा ग्नां देवीं नमसा रातहव्याम् ।
मधोर्मदाय बृहतीमृतज्ञामाग्ने वह पथिभिर्देवयानै: ।।
अन्जन्ति यं प्रथयन्तो न विप्रा वपावन्तं नाग्निना तपन्त: ।
पितुर्न पुत्र उपसि प्रेष्ठ आ घर्मो अग्निमृतयन्नसादि ।।
अच्छा मही बृहती शंतमा गीर्दूतो न गन्त्वश्विना हुवध्यै ।
मयोभुवा सरथा यातमर्वाग्गन्तं निधिं धुरमाणिर्न नाभिम् ।।
प्र तव्यसो नमउक्तिं तुरस्या हं पूष्ण उत वायोरदिक्षि ।
या राधसा चोदितारा मतीनां या वाजस्य द्रविणोदा उत त्मन ।।

आ नामभिर्मरुतो वक्षि विश्वाना रूपेभिर्जातवेदो हुवानः ।
यज्ञं गिरो जरितुः सुष्टुतिं च विश्वे गन्त मरुतो विश्व ऊती ।।
आ नो दिवो बृहतः पर्वतादा सरस्वती यजता गन्तु यज्ञम् ।
हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु ।।
आ वेधसं नीलपृष्ठं बृहन्तं बृहस्पतिं सदने सादयध्वम् ।
सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णमरुषं सपेम ।।
आ धर्णसिर्बृहद्दिवो रराणो विश्वेभिर्गन्त्वोमभिर्हुवानः ।
ग्ना वसान ओषधीरमृध्रस्त्रिधातुशृङ्गो वृषभो वयोधाः ।।
मातुष्पदे परमे शुक्र आयोर्विपन्यवो रास्पिरासो अग्मन् ।
सुशेव्यं नमसा रातहव्याः शिशुं मृजन्त्यायवो न वासे ।।
बृहद्वयो बृहते तुभ्यमग्ने धियाजुरो मिथुनासः सचन्त ।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ।।१६।१७।

५।४४।१-१५

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम् ।
प्रतीचीनं वृजनं दोहसे गिराऽऽशुं जयन्तमनु यासु वर्धसे ।।
श्रिये सुदृशीरुपरस्य याः स्वर्विरोचमानः ककुभामचोदते ।
सुगोपा असि न दभाय सुक्रतो परो मायाभिर्ऋत आस नाम ते ।।
अत्यं हविः सचते सच्च धातु चारिष्टगातुः स होता सहोभरिः ।
प्रसर्स्राणो अनु बर्हिर्वृषा शिशुर्मध्ये युवाजरो विस्रुहा हितः ।।
प्र व एते सुयुजो यामन्निष्टये नीचीरमुष्मै यम्य ऋतावृधः ।
सुयन्तुभिः सर्वशासैरभीशुभिः क्रिविर्नामानि प्रवणे मुषायति ।।
संजर्भुराणस्तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः ।
धारवाकेष्वृजुगाथ शोभसे वर्धस्व पत्नीरभि जीवो अध्वरे ।।
यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्स्वा ।
महीमस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरमनपच्युतं सहः ।।
वेत्यग्रुर्जनिवान्वा अति स्पृधः समर्यता मनसा सूर्यः कविः ।
घ्रंसं रक्षन्तं परि विश्वतो गयमस्माकं शर्म वनवत्स्वावसुः ।।

ज्यायांसमस्य यतुनस्य केतुन ऋषिस्वरं चरति यासु नाम ते ।
यादृश्मिन् धायि तमपस्यया विदद् य उ स्वयं वहते सो अरं करत् ।।
समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता ।
अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर्विद्यते पूतबन्धनी ।।
स हि क्षत्रस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सध्रेः ।
अवत्सारस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यम् ।।
श्येन आसामदितिः कक्ष्यो३ मदो विश्ववारस्य यजतस्य मायिनः ।
समन्यमन्यमर्थयन्त्येतवे विदुर्विषाणं परिपानमन्ति ते ।।
सदापृणो यजतो वि द्विषो वधीद् बाहुवृक्तः श्रुतवित् तर्यो वः सचा ।
उभा स वरा प्रत्येति भाति च यदीं गणं भजते सुप्रयावभिः ।।
सुतंभरो यजमानस्य सत्पतिर्विश्वासामूधः स धियामुदञ्चनः ।
भरद् धेनू रसवच्छिश्रिये पयोऽनुब्रुवाणो अध्येति न स्वपन् ।।
यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।
यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ।।
अग्निर्जागार तमृचः कामयन्तेऽग्निर्जागार तमु सामानि यन्ति ।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ।।

५।४५।१-११

विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः ।
अपावृत व्रजिनीरुत् स्वर्गाद् वि दुरो मानुषीर्देव आवः ।।
वि सूर्यो अमतिं न श्रियं सादोर्वाद् गवां माता जानती गात् ।
धन्वर्णसो नद्य१ः खादोअर्णाः स्थूणेव सुमिता दृंहत द्यौः ।।
अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय ।
वि पर्वतो जिहीत साधत द्यौराविवासन्तो दसयन्त भूम ।।
सूक्तेभिर्वो वचोभिर्देवजुष्टैरिन्द्रा न्व१ग्नी अवसे हुवध्यै ।
उक्थेभिर्हि ष्मा कवयः सुयज्ञा आविवासन्तो मरुतो यजन्ति ।।

एतो न्वद्य सुध्यो ३ भवाम प्र दुच्छुना मिनवामा वरीयः ।
आरे द्वेषांसि सनुतर्दधामायाम प्राञ्चो यजमानमच्छ ॥
एता धियं कृणवामा सखायोऽप या माताँ ऋणुत व्रजं गोः ।
यया मनुर्विशिशिप्रं जिगाय यया वणिग्वङ्कुरापा पुरीषम् ॥
अनूनोदत्र हस्तयतो अद्रिरार्चन् येन दश मासो नवग्वाः ।
ऋतं यती सरमा गा अविन्दद् विश्वानि सत्याङ्गिराश्चकार ॥
विश्वे अस्या व्युषि माहिनायाः सं यद् गोभिरङ्गिरसो नवन्त ।
उत्स आसां परमे सधस्थ ऋतस्य पथा सरमा विदद् गाः ॥
आ सूर्यो यातु सप्ताश्वः क्षेत्रं यदस्योर्विया दीर्घयाथे ।
रघुः श्येनः पतयदन्धो अच्छा युवा कविर्दीदयद् गोषु गच्छन् ॥
आ सूर्यो अरुहच्छुक्रमर्णोऽयुक्त यद्धरितो वीतपृष्ठाः ।
उद्ना न नावमनयन्त धीरा आशृण्वतीरापो अर्वागतिष्ठन् ॥
धियं वो अप्सु दधिषे स्वर्षां ययातरन् दश मासो नवग्वाः ।
अया धिया स्याम देवगोपा अया धिया तुतुर्यामात्यंहः ॥

५।४६- ५१सूक्त । १-४५ मन्त्र ।

हयो न विद्वाँ अयुजि स्वयं धुरि तां वहामि प्रतरणीमवस्युवम् ।
नास्या वश्मि विमुचं नावृतं पुनर्विद्वान् पथः पुरएत ऋजु नेषति ॥
अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त ॥
इन्द्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्यां मरुतः पर्वताँ अपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये ॥
उत नो विष्णुरुत वातो अस्रिधो द्रविणोदा उत सोमो मयस्करत् ।
उत ऋभव उत राये नो अश्विनोत त्वष्टोत विभ्वानु मंसते ॥
उत त्यन्नो मारुतं शर्ध आ गमद् दिविक्षयं यजतं बर्हिरासदे ।
बृहस्पतिः शर्म पूषोत नो यमद् वरूथ्यं१ वरुणो मित्रो अर्यमा ॥

उत त्ये नः पर्वतासः सुशस्तयः सुदीतयो नद्य१स्त्रामणे भुवन् ।
भगो विभक्ता शवसावसा गमदुरुव्यचा अदितिः श्रोतु मे हवम् ॥
देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये ।
याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छत ॥
उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्य१ग्नाय्यश्विनी राट् ।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ॥
प्रयुञ्जती दिव एति ब्रुवाणा मही माता दुहितुर्बोधयन्ती ।
आविवासन्ती युवतिर्मनीषा पितृभ्य आ सदने जोहुवाना ॥
अजिरासस्तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिम् ।
अनन्तास उरवो विश्वतः सीं परि द्यावापृथिवी यन्ति पन्थाः ॥
उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्तौ ॥
चत्वार ईं बिभ्रति क्षेमयन्तो दश गर्भं चरसे धापयन्ते ।
त्रिधातवः परमा अस्य गावो दिवश्चरन्ति परि सद्यो अन्तान् ॥
इदं वपुर्निवचनं जनासश्चरन्ति यन्नद्यस्तस्थुरापः ।
द्वे यदीं बिभृतो मातुरन्ये इहेह जाते यम्या३ सबन्धू ॥
वि तन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयन्ति ।
उपप्रक्षे वृषणो मोदमाना दिवस्पथा वध्वो यन्त्यच्छ ॥
तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम् ।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥
कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयम् ।
आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी ॥
ता अत्नत वयुनं वीरवक्षणं समान्या वृतया विश्वमा रजः ।
अपो अपाचीरपरा अपेजते प्र पूर्वाभिस्तिरते देवयुर्जनः ॥
आ ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा जिघर्ति मायिनि ।
शतं वा यस्य प्रचरन्त्स्वे दमे संवर्तयन्तो वि च वर्तयन्नहा ॥

तामस्य रीतिं परशोरिव प्रत्यनीकमख्यं भुजे अस्य वर्पंस: ।
सचा यदि पितुमन्तमिव क्षयं रत्नं दधाति भरहूतये विशे ।।
स जिह्वया चतुरनीक ऋञ्जते चारु वसानो वरुणो यतन्नरिम् ।
न तस्य विद्म पुरुषत्वता वयं यतो भग: सविता दाति वार्यम् ।।
देवं वो अद्य सवितारमेषे भगं च रत्नं विभजन्तमायो: ।
आ वां नरा पुरुभुजा ववृत्यां दिवेदिवे चिदश्विना सखीयन् ।।
प्रति प्रयाणमसुरस्य विद्वान् त्सूक्तैर्देवं सवितारं दुवस्य ।
उप ब्रुवीत नमसा विजानञ्ज्येष्ठं च रत्नं विभजन्तमायो: ।।
अदत्रया दयते वार्याणि पूषा भगो अदितिर्वस्त उस्र: ।
इन्द्रो विष्णुर्वरुणो मित्रो अग्निरहानि भद्रा जनयन्त दस्मा: ।
तन्नो अनर्वा सविता वरूथं तत् सिन्धव इषयन्तो अनु ग्मन् ।
उप यद् वोचे अध्वरस्य होता राय: स्याम पतयो वाजरत्ना: ।।
प्र ये वसुभ्य ईवदा नमो दुर्ये मित्रे वरुणे सूक्तवाच: ।
अवैत्वभ्वं कृणुता वरीयो दिवस्पृथिव्योरवसा मदेम ।।
विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे ।।
ते ते देव नेतर्ये चेमाँ अनुशसे ।
ते राया ते ह्याऽपृचे सचेमहि सचथ्यै: ।।
अतो न आ नॄनतिथीनत: पत्नीर्दशस्यत ।
आरे विश्वं पथेष्ठां द्विषो युयोतु यूयुवि: ।।
यत्र वह्निरभिहितो दुद्रवद् द्रोण्य: पशु: ।
नृमणा वीरपस्त्योऽर्णा धीरेव सनिता ।।
एष ते देव नेता रथस्पति: शं रयि: ।
शं राये शं स्वस्त्य इष: स्तुतो मनामहे देवस्तुतो मनामहे ।।
अग्ने सुतस्य पीतये विश्वैरूमेभिरा गहि । देवेभिर्हव्यदातये ।।
ऋतधीतय आ गत सत्यधर्माणो अध्वरम् । अग्ने पिबत जिह्वया।।

विप्रेभिर्विप्र सन्त्य प्रातर्यावभिरा गहि । देवेभि: सोमपीतये ।।
अयं सोमश्चमू सुतो मत्रे परि षिच्यते । प्रिय इन्द्राय वायवे ।।
वायवा याहि वीतये जुषाणो हव्यदातये । पिबा सुतस्यान्धसो अभि प्रय: ।।

इन्द्रश्च वायवेषां सुतानां पीतिमर्हथ: । तान्जुषेथामरेपसावभि प्रय: ।।
सुता इन्द्राय वायवे सोमासो दध्याशिर: । निम्नं न यन्ति सिन्धवोऽभि प्रय: ।।
सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजू: । आ याह्यग्ने अत्रिवत् सुते रण ।।
सजूर्मित्रावरुणाभ्यां सजू: सोमेन विष्णुना । आ याह्यग्ने अत्रिवत् सुते रण ।।
सजूरादित्यैर्वसुभि: सजूरिन्द्रेण वायुना । आ याह्यग्ने अत्रिवत् सुते रण ।।

स्वस्ति नो मिमीतामश्विना भग: स्वस्ति देव्यदितिरनर्वण: ।

स्वस्ति पूषा असुरो दधातु न: स्वस्ति द्यावापृथिवी सुचेतुना ।।

स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पति: ।

बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु न: ।।

विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्नि: स्वस्तये ।

देवा अवन्त्वृभव: स्वस्तये स्वस्ति नो रुद्र: पात्वंहस: ।।

स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।

स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ।।

स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव ।

पुनर्ददताघ्नता जानता सं गमेमहि ।।

६।२१।६,११

प्रोतये वरुणं मित्रमिन्द्रं मरुत: कृष्वावसे नो अद्य ।
प्र पूषणं विष्णुमग्निं पुरंधिं सवितारमोषधी: पर्वतांश्च ।।
नू म आ वाचमुप याहि विद्वान् विश्वेभि: सूनो सहसो यजत्रै: ।
ये अग्निजिह्वा ऋतसाप आसुर्ये मनुं चक्रुरुपरं दसाय ।।

६।४९।१-१५

स्तुषे जनं सुव्रतं नव्यसीभिर्गीर्भिर्मित्रावरुणा सुम्नयन्ता ।
त आ गमन्तु त इह श्रुवन्तु सुक्षत्रासो वरुणो मित्रो अग्नि:।।
विशोविश ईड्यमध्वरेष्वदृप्तक्रतुमरतिं युवत्यो: ।
दिव: शिशुं सहस: सूनुमग्निं यज्ञस्य केतुमरुषं यजध्यै ।।
अरुषस्य दुहितरा विरूपे स्तृभिरन्या पिपिशे सूरो अन्या ।
मिथस्तुरा विचरन्ती पावके मन्म श्रुतं नक्षत ऋच्यमाने ।।
प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्राम् ।
द्युतद्यामा नियुत: पत्यमान: कवि: कविमियक्षसि प्रयज्यो ।।
स मे वपुश्छदयदश्विनोर्यो रथो विरुक्मान् मनसा युजान: ।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ।।
पर्जन्यवाता वृषभा पृथिव्या: पुरीषाणि जिन्वतमप्यानि ।
सत्यश्रुत: कवयो यस्य गीर्भिर्जगत: स्थातर्जगदा कृणुध्वम् ।।
पावीरवी कन्या चित्रायु: सरस्वती वीरपत्नी धियं धात् ।
ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यंसत् ।।
पथस्पथ: परिपतिं वचस्या कामेन कृतो अभ्यानळर्कम् ।
स नो रासच्छुरुधश्चन्द्राग्रा धियंधियं सीषधाति प्र पूषा ।।
प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुगभस्तिमृभ्वम् ।
होता यक्षद् यजतं पस्त्यानामग्निस्त्वष्टारं सुहवं विभावा ।।
भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ ।
बृहन्तमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितास: ।।

आ युवानः कवयो यज्ञियासो मरुतो गन्त गृणतो वरस्याम् ।
अचित्रं चिद्धि जिन्वथा वृधन्त इत्था नक्षन्तो नरो अङ्गिरस्वत् ॥
प्र वीराय प्र तवसे तुरायाऽजा यूथेव पशुरक्षिरस्तम् ।
स पिस्पृशति तन्वि श्रुतस्य स्तृभिर्न नाकं वचनस्य विपः ॥
यो रजांसि विममे पार्थिवानि त्रिश्चिद् विष्णुर्मनवे बाधिताय ।
तस्य ते शर्मन्नुपदद्यमाने राया मदेम तन्वा३ तना च ॥
तन्नोऽहिर्बुध्न्यो अद्भिरर्कैस्तत् पर्वतस्तत् सविता चनो धात् ।
तदोषधीभिरभि रातिषाचो भगः पुरंधिर्जिन्वतु प्र राये ॥
नू नो रयिं रथ्यं चर्षणिप्रां पुरुवीरं मह ऋतस्य गोपाम् ।
क्षयं दाताजरं येन जनान् त्स्पृधो अदेवीरभि च क्रमाम विश आदेवीरभ्य१श्नवाम ॥

६।५०।१-१५

हुवे वो देवीमदितिं नमोभिर्मृळीकाय वरुणं मित्रमग्निम् ।
अभिक्षदामर्यमणं सुशेवं त्रातॄन् देवान् त्सवितारं भगं च ॥
सुज्योतिषः सूर्य दक्षपितॄननागास्त्वे सुमहो वीहि देवान् ।
द्विजन्मानो य ऋतसापः सत्याः स्वर्वन्तो यजता अग्निजिह्वाः ॥
उत द्यावापृथिवी क्षत्रमुरु बृहद् रोदसी शरणं सुषुम्ने ।
महस्करथो वरिवो यथा नोऽस्मे क्षयाय धिषणे अनेहः ॥
आ नो रुद्रस्य सूनवो नमन्तामद्या हूतासो वसवोऽधृष्टाः ।
यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान् ॥
मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा ।
श्रुत्वा हवं मरुतो यद्ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते ॥
अभि त्यं वीरं गिर्वणसमर्चेन्द्रं ब्रह्मणा जरितर्नवेन ।
श्रवदिद्धवमुप च स्तवानो रासद् वाजाँ उप महो गृणानः ॥
ओमानमापो मानुषीरमृक्तं धात तोकाय तनयाय शं योः ।
यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः ॥

आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात् ।
यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि ॥
उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे ववृत्याः ।
स्यामहं ते सदमिद् रातौ तव स्यामग्नेऽवसा सुवीरः ॥
उत त्या मे हवमा जग्म्यातं नासत्या धीभिर्युवमङ्ग विप्रा ।
अत्रिं न महस्तमसोऽमुमुक्तं तूर्वतं नरा दुरितादभीके ॥
ते नो रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः ।
दशस्यन्तो दिव्याः पार्थिवासो गोजाता अप्या मृळता च देवाः ॥
ते नो रुद्रः सरस्वती सजोषा मीळ्हुष्मन्तो विष्णुर्मृळन्तु वायुः ।
ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यतामिषं नः ॥
उत स्य देवः सविता भगो नोऽपां नपादवतु दानु पप्रिः ।
त्वष्टा देवेभिर्जनिभिः सजोषा द्यौर्देवेभिः पृथिवी समुद्रैः ॥
उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात् पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु ॥
एवा नपातो मम तस्य धीभिर्भरद्वाजा अभ्यर्चन्त्यर्कैः ।
ग्ना हुतासो वसवोऽधृष्टा विश्वे स्तुतासो भूता यजत्राः ॥

६।५१।१-१६

उदु त्यच्चक्षुर्महि मित्रयोराँ एति प्रियं वरुणयोरदब्धम् ।
ऋतस्य शुचि दर्शतमनीकं रुक्मो न दिव उदिता व्यद्यौत् ॥
वेद यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः ।
ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान् ॥
स्तुष उ वो मह ऋतस्य गोपानदितिं मित्रं वरुणं सुजातान् ।
अर्यमणं भगमदब्धधीतीनच्छा वोचे सधन्यः पावकान् ॥
रिशादसः सत्पतीँरदब्धान् महो राज्ञः सुवसनस्य दातॄन् ।
यूनः सुक्षत्रान् क्षयतो दिवो नॄनादित्यान् याम्यदितिं दुवोयु ॥
द्यौ३ष्पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृळता नः ।
विश्व आदित्या अदिते सजोषा अस्मभ्यं शर्म बहुलं वि यन्त ॥

मानो वृकाय वृक्ये समस्मा अघायते रीरधता यजत्राः ।
यूयं हि ष्ठा रथ्यो नस्तनूनां यूयं दक्षस्य वचसो बभूव ।।
मा व एनो अन्यकृतं भुजेम मा तत् कर्म वसवो यच्चयध्वे ।
विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस्तन्वं रीरिषीष्ट ।।
नम इदुग्रं नम आ विवासे नमो दाधार पृथिवीमुत द्याम् ।
नमो देवेभ्यो नम ईश एषां कृतं चिदेनो नमसा विवासे ।।
ऋतस्य वो रथ्यः पूतदक्षानृतस्य पस्त्यसदो अदब्धान् ।
ताँ आ नमोभिरुरुचक्षसो नॄन् विश्वान्व आ नमे महो यजत्राः ।।
ते हि श्रेष्ठवर्चसस्त उ नस्तिरो विश्वानि दुरिता नयन्ति ।
सुक्षत्रासो वरुणो मित्रो अग्निर्ऋतधीतयो वक्मराजसत्याः ।।
ते न इन्द्रः पृथिवी क्षाम वर्धन् पूषा भगो अदितिः पञ्च जनाः ।
सुशर्माणः स्ववसः सुनीथा भवन्तु नः सुत्रात्रासः सुगोपाः ।।
नु सद्मानं दिव्यं नंशि देवा भारद्वाजः सुमतिं याति होता ।
आसानेभिर्यजमानो मियेधैर्देवानां जन्म वसूयुर्ववन्द ।।
अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम् । दविष्ठमस्य सत्पते कृधी सुगम् ।।
ग्रावाणः सोम नो हिकं सखित्वनाय वावशुः । जही न्यत्रिणं पणिं वृको हि षः ।।
यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः । कर्ता नो अध्वन्ना सुगं गोपा अमा ।।
अपि पन्थामगन्महि स्वस्तिगामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ।

६। ५२। १-१७

न तद् दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिराभिः ।
उब्जन्तु तं सुभ्वः पर्वतासो नि हीयतामतियाजस्य यष्टा ।।
अति वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात् ।
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषमभि तं शोचतु द्यौः ।।
किमङ्ग त्वा ब्रह्मणः सोम गोपां किमङ्ग त्वाहुरभिशस्तिपां नः ।
किमङ्ग नः पश्यसि निद्यमानान् ब्रह्मद्विषे तपुषिं हेतिमस्य ।।
अवन्तु मामुषसो जायमाना अवन्तु मा सिन्धवः पिन्वमानाः ।
अवन्तु मा पर्वतासो ध्रुवासोऽवन्तु मा पितरो देवहूतौ ।।

विश्वदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरन्तम् ।
तथा करद् वसुपतिर्वसूनां देवां ओहानोऽवसागमिष्ठः ।।

इन्द्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिन्धुभिः पिन्वमाना ।
पर्जन्यो न ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव ।।

विश्वे देवास आ गत शृणुता म इमं हवम् । एदं बर्हिर्नि षीदत ।।
यो वो देवा घृतस्नुना हव्येन प्रतिभूषति । तं विश्व उप गच्छथ ।।
उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये । सुमृळीका भवन्तु नः ।।
विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः । जुषन्तां युज्यं पयः ।।
स्तोत्रमिन्द्रो मरुद्गणस्त्वष्टृमान् मित्रो अर्यमा । इमा हव्या जुषन्त नः ।
इमं नो अग्ने अध्वरं होतर्वयुनशो यज । चिकित्वान् दैव्यं जनम् ।।
विश्वे देवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम् ।।
विश्वे देवा मम शृण्वन्तु यज्ञिया उभे रोदसी अपां नपाच्च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद् वो अन्तमा मदेम ।।
ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे ।
ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा वरिवस्यन्तु देवाः ।।
अग्नीपर्जन्याववतं धियं मेऽस्मिन् हवे सुहवा सुष्टुतिं नः ।
इळामन्यो जनयद्गर्भमन्यः प्रजावतीरिष आ धत्तमस्मे ।।
स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा नमसा विवासे ।
अस्मिन् नो अद्य विदथे यजत्रा विश्वे देवा हविषि मादयध्वम् ।।

७।३४-३७ सूक्त। १-५७

प्र शुक्रैतु देवी मनीषा अस्मत् सुतष्टो रथो न वाजी ।।
विदुः पृथिव्या दिवो जनित्रं शृण्वन्त्यापो अध क्षरन्तीः ।।
आपश्चिदस्मै पिन्वन्त पृथ्वीर्वृत्रेषु शूरा मंसन्त उग्राः ।।
आ धूर्ष्वस्मै दधाताश्वानिन्द्रो न वज्री हिरण्यबाहुः ।।
अभि प्र स्थाताहेव यज्ञं यातेव पत्मन् त्मना हिनोत ।।
त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरम् ।।
उदस्य शुष्माद् भानुर्नार्त बिभर्ति भारं पृथिवी न भूम ।।
ह्वयामि देवाँ अयातुरग्ने साधन्नृतेन धियं दधामि ।।
अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वम् ।।
आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः ।।
राजा राष्ट्रानां पेशो नदीनामनुत्तमस्मै क्षत्रं विश्वायु ।।
अविष्टो अस्मान् विश्वासु विक्ष्वद्युं कृणोत शंसं निनित्सोः ।।
व्येतु दिद्युद् द्विषामशेवा युयोत विष्वग्रपस्तनूनाम् ।।
अवीन्नो अग्निर्हव्यान्नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः ।।
सजूर्देवेभिरपां नपातं सखायं कृध्वं शिवो नो अस्तु ।।
अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजः सु षीदन् ।।
मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः ।।
उत न एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः ।।
तपन्ति शत्रुं स्व१र्ण भूमा महासेनासो अमेभिरेषाम् ।।
आ यन्नः पत्नीर्गमन्त्यच्छा त्वष्टा सुपाणिर्दधातु वीरान् ।।
प्रति नः स्तोमं त्वष्टा जुषेत स्यादस्मे अरमतिर्वसूयुः ।।
ता नो रासन् रातिषाचो वसून्या रोदसी वरुणानी शृणोतु ।
वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः ।।
तन्नो रायः पर्वतास्तन्न आपस्तद् रातिषाच ओषधीरुत द्यौः ।
वनस्पतिभिः पृथिवी सजोषा उभे रोदसी परि पासतो नः ।।

अनु तदुर्वी रोदसी जिहातामनु द्युक्षो वरुण इन्द्रसखा ।
अनु विश्वे मरुतो ये सहासो रायः स्याम धरुणं धियध्यै ॥
तन्न इन्द्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषन्त ।
शर्मन् त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥
शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥
शं नो भगः शमु नः शंसो अस्तु शं नः पुरन्धिः शमु सन्तु रायः ।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥
शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः ।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु ॥
शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम् ।
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः ॥
शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु ।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः ॥
शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ॥
शं न सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः ।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्व १ः शम्वस्तु वेदिः ॥
शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु ।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ॥
शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।
शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ॥
शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः ॥
शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु ।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥
शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः ।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ॥

शं नो अज एकपाद् देवो अस्तु शं नोऽहिर्बुध्न्य १: शं समुद्रः ।
शं नो अपां नपात् पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा ॥
आदित्या रुद्रा वसवो जुषन्तेदं ब्रह्म क्रियमाणं नवीयः ।
शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥
ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥
प्र ब्रह्मैतु सदनादृतस्य वि रश्मिभिः ससृजे सूर्यो गाः ।
वि सानुना पृथिवी सस्र उर्वी पृथु प्रतीकमध्येधे अग्निः ॥
इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असुरा नवीयः ।
इनो वामन्यः पदवीरदब्धो जनं च मित्रो यतति ब्रुवाणः ॥
आ वातस्य ध्रजतो रन्त इत्या अपीपयन्त धेनवो न सूदाः ।
महो दिवः सदने जायमानोऽचिक्रदद् वृषभः सस्मिन्नूधन् ॥
गिरा य एता युनजद्धरी त इन्द्र प्रिया सुरथा शूर धायू ।
प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्याम् ॥
यजन्ते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन् ।
वि पृक्षो बाबधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठम् ॥
आ यत् साकं यशसो वावशानाः सरस्वती सप्तथी सिन्धुमाता ।
याः सुष्वयन्त सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः ॥
उत त्ये नो मरुतो मन्दसाना धियं तोकं च वाजिनोऽवन्तु ।
मा नः परि ख्यदक्षरा चरन्त्यवीवृधन् युज्यं ते रयिं नः ॥
प्र वो महीमरमतिं कृणुध्वं प्र पूषणं विदथ्यं १ न वीरम् ।
भगं धियोऽवितारं नो अस्याः सातौ वाजं रातिषाचं पुरंधिम् ॥
अच्छायं वो मरुतः श्लोक एत्वच्छा विष्णुं निषिक्तपामवोभिः ।
उत प्रजायै गृणते वयो धुर्यूयं पात स्वस्तिभिः सदा नः ॥
आ वो वाहिष्ठो वहतु स्तवध्यै रथो वाजा ऋभुक्षणो अमृक्तः ।
अभि त्रिपृष्ठैः सवनेषु सोमैर्मदे सुशिप्रा महभिः पृणध्वम् ॥
यूयं ह रत्नं मघवत्सु धत्थ स्वर्दृश ऋभुक्षणो अमृक्तम् ।
सं यज्ञेषु स्वधावन्तः पिबध्वं वि नो राधांसि मतिभिर्दयध्वम् ॥

उभोचिद्ध हि मघवन् देष्णं महो अर्भस्य वसुनो विभागे ।
उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या ।।
त्वमिन्द्र स्वयशा ऋभुक्षा वाजो न साधुरस्तमेष्यृक्वा ।
वयं नु ते दाश्वांस: स्याम ब्रह्म कृण्वन्तो हरिवो वसिष्ठा: ।।
सनितासि प्रवतो दाशुषे चिद् याभिर्विवेषो हर्यश्व धीभि: ।
ववन्मा नु ते युज्याभिरूती कदा न इन्द्र राय: आ दशस्ये: ।।
वासयसीव वेधसस्त्वं न: कदा न इन्द्र वचसो बुबोध: ।
अस्तं तात्या धिया रयिं सुवीरं पृक्षो नो अर्वा न्युहीत वाजी ।।
अभि यं देवी निर्ऋतिश्चिदीशे नक्षन्त इन्द्रं शरद: सुपृक्षा: ।
उप त्रिबन्धुर्जरदष्टिमेत्यस्ववेशं यं कृणवन्त मर्ता: ।।
आ नो राधांसि सवित: स्तवध्या आ रायो यन्तु पर्वतस्य रातौ ।
सदा नो दिव्य: पायु: सिषक्तु यूयं पात स्वस्तिभि: सदा न: ।।

७।३९-४० सूक्त । १-१४

ऊर्ध्वो अग्नि: सुमतिं वस्वो अश्रेत् प्रतीची जूर्णिर्देवतातिमेति ।
भेजाते अद्री रथ्येव पन्थामृतं होता न इषितो यजाति ।।
प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।
विशामक्तोरुषस: पूर्वहूतौ वायु: पूषा स्वस्तये नियुत्वान् ।।
ज्मया अत्र वसवो रन्त देवा उरावन्तरिक्षे मर्जयन्त शुभ्रा: ।
अर्वाक् पथ उरुज्रय: कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य ।।
ते हि यज्ञेषु यज्ञियास ऊमा: सधस्थं विश्वे अभि सन्ति देवा: ।
ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरंधिम् ।।
आग्ने गिरो दिव आ पृथिव्या मित्रं वह वरुणमिन्द्रमग्निम् ।
आर्यमणमदितिं विष्णुमेषां सरस्वती मरुतो मादयन्ताम् ।।
ररे हव्यं मतिभिर्यज्ञियानां नक्षत् कामं मर्त्यानामसिन्वन् ।
धाता रयिमविदस्यं सदासां सक्षीमहि युज्येभिर्नु देवै: ।।
नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्नि: ।
यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभि: सदा न: ।।

ओ श्रुष्टिर्विदथ्या ३ समेतु प्रति स्तोमं दधीमहि तुराणाम् ।
यदद्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे ।।
मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिन्द्रो अर्यमा ददातु ।
दिदेष्टु देव्यदिती रेक्णो वायुश्च यन्नियुवैते भगश्च ।।
सेदुग्रो अस्तु मरुतः स शुष्मी यं मर्त्यं पृषदश्वा अवाथ ।
उतेमग्निः सरस्वती जुनन्ति न तस्य रायः पर्येतास्ति ।।
अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः ।
सुहवा देव्यदितिरनर्वा ते नो अंहो अति पर्षन्नरिष्टान् ।।
अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः ।
विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ।।
मात्र पूषन्नाघृण इरस्यो वरूत्री यद् रातिषाचश्च रासन् ।
मयोभुवो नो अर्वन्तो नि पान्तु वृष्टिं परिज्मा वातो ददातु ।।
नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ।।

७।४२-४३ सूक्त । १-११

प्र ब्रह्माणो अङ्गिरसो नक्षन्त प्र क्रन्दनुर्नभन्यस्य वेतु ।
प्र धेनव उदप्रुतो नवन्त युज्यातामद्री अध्वरस्य पेशः ।।
सुगस्ते अग्ने सनवित्तो अध्वा युक्ष्वा सुते हरितो रोहितश्च ।
ये वा सद्मन्नरुषा वीरवाहो हुवे देवानां जनिमानि सत्तः ।।
समु वो यज्ञं महयन् नमोभिः प्र होता मन्द्रो रिरिच उपाके ।
यजस्व सु पुर्वणीक देवाना यज्ञियामरमतिं ववृत्याः ।।
यदा वीरस्य रेवतो दुरोणे स्योनशीरतिथिराचिकेतत् ।
सुप्रीतो अग्निः सुधितो दम आ स विशे दाति वार्यमियत्यै ।।
इमं नो अग्ने अध्वरं जुषस्व मरुत्स्विन्द्रे यशसं कृधी नः ।
आ नक्ता बर्हिः सदतामुषासोशन्ता मित्रावरुणा यजेह ।।
एवाग्निं सहस्यं १ वसिष्ठो रायस्कामो विश्वप्स्न्यस्य स्तौत् ।
इषं रयिं पप्रथद् वाजमस्मे यूयं पात स्वस्तिभिः सदा नः ।।

प्र वो यज्ञेषु देवयन्तो अर्चन् द्यावा नमोभिः पृथिवी इषध्यै ।
येषां ब्रह्माण्यसमानि विप्रा विष्वग्वियन्ति वनिनो न शाखाः ॥
प्र यज्ञ एतु हेत्वो न सप्तिरुद्यच्छध्वं समनसो घृताचीः ।
स्तृणीत बर्हिरध्वराय साधूर्ध्वा शोचींषि देवयून्यस्थुः ॥
आ पुत्रासो न मातरं विभृत्राः सानौ देवासो बर्हिषः सदन्तु ।
आ विश्वाची विदथ्यामनक्त्वग्ने मा नो देवताता मृधस्कः ॥
ते सीषपन्त जोषमा यजत्रा ऋतस्य धाराः सुदुघा दुहानाः ।
ज्येष्ठं वो अद्य मह आ वसूनामा गन्तन समनसो यति ष्ठ ।
एवा नो अग्ने विक्ष्वा दशस्य त्वया वयं सहसावन्नास्क्राः ।
राया युजा सधमादो अरिष्टा यूयं पात स्वस्तिभिः सदा नः ॥

७।४८।१-४

ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः सुतस्य ।
आ वोऽर्वाचः क्रतवो न यातां विभ्वो रथं नर्यं वर्तयन्तु ॥
ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि ।
वाजो अस्माँ अवतु वाजसाताविन्द्रेण युजा तरुषेम वृत्रम् ॥
ते चिद्धि पूर्वीरभि सन्ति शासा विश्वाँ अर्य उपरताति वन्वन् ।
इन्द्रो विभ्वाँ ऋभुक्षा वाजो अर्यः शत्रोर्मिथत्या कृणवन् वि नृम्णम् ॥
नू देवासो वरिवः कर्तना नो भूत नो विश्वेऽवसे सजोषाः ।
समस्मे इषं वसवो ददीरन् यूयं पात स्वस्तिभिः सदा नः ॥

७।५०।३

यच्छल्मलौ भवति यन्नदीषु यदोषधीभ्यः परि जायते विषम् ।
विश्वे देवा निरितस्तत् सुवन्तु मा मां पद्येन रपसा विदत् त्सरुः ॥

७।१०४।११

परः सो अस्तु तन्वा३ तना च तिस्रः पृथिवीरधो अस्तु विश्वाः ।
प्रति शुष्यतु यशो अस्य देवा यो नो दिवा दिप्सति यश्च नक्तम् ॥

८।२५।१०-१२

उत नो देव्यदितिरुरुष्यतां नासत्या । उरुष्यन्तु मरुतो वृद्धशवसः ।।
ते नो नावमुरुष्यत दिवा नक्तं सुदानवः । अरिष्यन्तो नि पायुभिः सचेमहि ।।
अघ्नते विष्णवे वयमरिष्यन्तः सुदानवे । श्रुधि स्वयावन् त्सिन्धो पूर्वचित्तये ।।

८।२७।१-२२

अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।
ऋचा यामि मरुतो ब्रह्मणस्पतिं देवाँ अवो वरेण्यम् ।।
आ पशुं गासि पृथिवीं वनस्पतीनुषासा नक्तमोषधीः ।
विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः ।।
प्र सू न एत्वध्वरो ऽग्ना देवेषु पूर्व्यः ।
आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभानुषु ।।
विश्वे हि ष्मा मनवे विश्ववेदसो भुवन् वृधे रिशादसः ।
अरिष्टेभिः पायुभिर्विश्ववेदसो यन्ता नोऽवृकं छर्दिः ।।
आ नो अद्य समनसो गन्ता विश्वे सजोषसः ।
ऋचा गिरा मरुतो देव्यदिते सदने पस्त्ये महि ।।
अभि प्रिया मरुतो या वो अश्व्या हव्या मित्र प्रयाथन ।
आ बर्हिरिन्द्रो वरुणस्तुरा नर आदित्यासः सदन्तु नः ।।
वयं वो वृक्तबर्हिषो हितप्रयस आनुषक् ।
सुतसोमासो वरुण हवामहे मनुष्वदिद्धाग्नयः ।।
आ प्र यात मरुतो विष्णो अश्विना पूषन् माकीनया धिया ।
इन्द्र आ यातु प्रथमः सनिष्युभिर्वृषा यो वृत्रहा गृणे ।।
वि नो देवासो अद्रुहोऽच्छिद्रं शर्म यच्छत ।
न यद् दूराद् वसवो नू चिदन्तितो वरूथमादधर्षति ।।
अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यम् ।
प्र णः पूर्वस्मै सुविताय वोचत मक्षू सुम्नाय नव्यसे ।।

इदा हि व उपस्तुतिमिदा वामस्य भक्तये ।
उप वो विश्ववेदसो नमस्युराँ असृक्ष्यन्यामिव ।।
उदु ष्य व: सविता सुप्रणीतयोऽस्थादूर्ध्वो वरेण्य: ।
नि द्विपादश्चतुष्पादो अर्थिनोऽविश्रन् पतयिष्णव: ।।
देवंदेवं वो वसे देवंदेवमभिष्टये ।देवंदेवं हुवेम वाजसातये गृणन्तो देव्या धिया
देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातय: ।
ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोविद: ।।
प्र व: शंसाम्यद्रुह: संस्थ उपस्तुतीनाम् ।न तं धूर्तिर्वरुण मित्र मर्त्यं यो वो धामभ्योऽविधत्
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति।प्र प्रजाभिर्जायते धर्मणस्पर्यरिष्ट:सर्व
एधते ।।
ऋते स विन्दते युध: सुगेभिर्यात्यध्वन: ।
अर्यमा मित्रो वरुण: सरातयो यं त्रायन्ते सजोषस: ।।
अज्रे चिदस्मै कृणुथा न्यञ्चनं दुर्गे चिदा सुसरणम् ।
एषा चिदस्मादशनि: परो नु सास्रेधन्ती वि नश्यतु ।।
यदद्य सूर्य उद्यति प्रियक्षत्रा ऋतं दध ।
यन्निम्रुचि प्रबुधि विश्ववेदसो यद् वा मध्यंदिने दिव: ।।
यद् वाभिपित्वे असुरा ऋतं यते छर्दिर्येम वि दाशुषे ।
वयं तद् वो वसवो विश्ववेदस उप स्थेयाम मध्य आ ।।
यदद्य सूर उदिते यन्मध्यंदिन आतुचि ।
वामं धत्थ मनवे विश्ववेदसो जुह्वानाय प्रचेतसे ।।
वयं तद् व: सम्राज आ वृणीमहे पुत्रो न बहुपाय्यम् ।
अश्याम तदादित्या जुह्वतो हविर्येन वस्योऽनशामहे ।।

८।२८।१-५

ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन् । विदन्नह द्वितासनन् ।।
वरुणो मित्रो अर्यमा स्मद्रातिषाचो अग्नय: । पत्नीवन्तो वषट्कृता: ।।
ते नो गोपा अपाच्यास्त उदक्त इत्था न्यक् । पुरस्तात् सर्वया विशा ।।
यथा वशन्ति देवास्तथेदसत् तदेषां नकिरा मिनत् । अरावा चन मर्त्य: ।।
सप्तानां सप्त ऋष्टय: सप्त द्युम्नान्येषाम् । सप्तो अधि श्रियो धिरे ।।

८।२९।१-१०

बभ्रुरेको विषुणः सूनरो युवाञ्ज्यङ्क्ते हिरण्ययम् ।

योनिमेक आ ससाद द्योतनोऽन्तर्देवेषु मेधिरः ।। १।।

वाशीमेको बिभर्ति हस्त आयसीमन्तर्देवेषु निध्रुविः ।

वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते ।। २।।

तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः ।

पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनाम् ।। ३।।

त्रीण्येक उरुगायो वि चक्रमे यत्र देवासो मदन्ति ।

विभिर्द्वा चरत एकया सह प्र प्रवासेव वसतः ।। ४।।

सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती ।

अर्चन्त एके महि साम मन्वत तेन सूर्यमरोचयन् ।। ५।।

८।३०।१-४

नहि वो अस्त्यर्भको देवासो न कुमारकः। विश्वे सतोमहान्त इत् ।।

इति स्तुतासो असथा रिशादसो ये स्थ त्रयश्च त्रिंशच्च। मनोर्देवा यज्ञियासः ।।

ते नस्त्राध्वं ते अवत त उ नो अधि वोचत । मा नः पथः पित्र्यान्मानवादधि दूरं नैष्ट पराव

ये देवास इह स्थन विश्वे वैश्वानरा उत । अस्मभ्यं शर्म सप्रथो गवेऽश्वाय यच्छत ।।

८।५४।१-८

एतत् त इन्द्र वीर्यं गीर्भिर्गृणन्ति कारवः ।

ते स्तोभन्त ऊर्जमावन् घृतश्चुतं पौरासो नक्षन् धीतिभिः ।।

नक्षन्त इन्द्रमवसे सुकृत्यया येषां सुतेषु मन्दसे ।

यथा संवर्ते अमदो यथा कृश एवास्मे इन्द्र मत्स्व ।।

आ नो विश्वे सजोषसो देवासो गन्तनोप नः ।

वसवो रुद्रा अवसे न आ गमञ्छृण्वन्तु मरुतो हवम् ।।

पूषा विष्णुर्हवनं मे सरस्वत्यवन्तु सप्त सिन्धवः ।

आपो वातः पर्वतासो वनस्पतिः शृणोतु पृथिवी हवम् ।।

यदिन्द्र राधो अस्ति ते माघोनं मघवत्तम ।

तेन नो बोधि सधमाद्यो वृधे भगो दानाय वृत्रहन् ।।

आजिपते नृपते त्वमिद्धि नो वाज आ वक्षि सुक्रतो ।
वीती होत्राभिरुत देववीतिभिः ससवांसो वि शृण्विरे ।।
सन्ति ह्य१र्य आशिष इन्द्र आयुर्जनानाम् ।
अस्मान् नक्षस्व मघवन्नुपावसे धुक्षस्व पिप्युषीमिषम् ।।
वयं त इन्द्र स्तोमेभिर्विधेम त्वमस्माकं शतक्रतो ।
महि स्थूरं शशयं राधो अह्रयं प्रस्कण्वाय नि तोशय ।।

८।५८।१-३

यमृत्विजो बहुधा कल्पयन्तः सचेतसो यज्ञमिमं वहन्ति ।
यो अनूचानो ब्राह्मणो युक्त आसीत् का स्वित् तत्र यजमानस्य संवित् ।।
एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः ।
एकैवोषाः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वम् ।।
ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं सुखं रथं सुषदं भूरिवारम् ।
चित्रामघा यस्य योगेऽधिजज्ञे तं वां हुवे अति रिक्तं पिबध्यै ।।

८।६९।११

अपादिन्द्रो अपादग्निर्विश्वे देवा अमत्सत् ।
वरुण इदिह क्षयत् तमापो अभ्यनूषत् वत्सं संशिश्वरीरिव ।।

८।१८।१०

अवीवृधद्वो अमृता अमन्दीदेकद्यूर्देवा उत याश्च देवीः ।
तस्मा उ राधः कृणुत प्रशस्तं प्रातर्मक्षू धियावसुर्जगम्यात् ।।

८।८३।१-९

देवानामिदवो महत् तदा वृणीमहे वयम् । वृष्णामस्मभ्यमूतये ।।
ते नः सन्तु युजः सदा वरुणो मित्रो अर्यमा । वृधासश्च प्रचेतसः ।।

अति नो विष्पिता पुरु नौभिरपो न पर्षथ । यूयमृतस्य रथ्यः ।।
वामं नो अस्त्वर्यमन् वामं वरुण शंस्यम् । वामं ह्यावृणीमहे ।।
वामस्य हि प्रचेतस ईशानासो रिशादसः । नेमादित्या अघस्य यत् ।।
वयमिद्वः सुदानवः क्षियन्तो यान्तो अध्वन्ना । देवा वृधाय हूमहे ।।
अधि न इन्द्रैषां विष्णो सजात्यानाम् । इता मरुतो अश्विना ।।
प्र भ्रातृत्वं सुदानवोऽध द्विता समान्या । मातुर्गर्भे भरामहे ।।
यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः । अधा चिद्व उत ब्रुवे ।।

९।५।११

विश्वे देवाः स्वाहाकृतिं पवमानस्या गत ।
वायुर्बृहस्पतिः सूर्योऽग्निरिन्द्रः सजोषसः ॥

९।१४।३

आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत । यदी गोभिर्वसायते ॥

९।१८।३

तव विश्वे सजोषसो देवासः पीतिमाशत । मदेषु सर्वधा असि ॥

९।६७।२७

पुनन्तु मां देवजनाः पुनन्तु वसवो धिया ।
विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा ॥

९।८०।४

तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः ।
नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान् देवाँ आ पवस्वा सहस्रजित् ॥

९।८१।५

उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता ।
भगो नृशंस उर्व१न्तरिक्षं विश्वे देवाः पवमानं जुषन्त ॥

९।९८।७

परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।
यो देवान् विश्वाँ इत् परि मदेन सह गच्छति ॥

९।१०२।५

अस्य व्रते सजोषसो विश्वे देवासो अद्रुहः । स्पार्हा भवन्ति रन्तयो जुषन्त
यत् ।

९।१०९।२,१५

इन्द्रस्ते सोम सुतस्य पेयाः क्रत्वे दक्षाय विश्वे च देवाः ।।
पिबन्त्यस्य विश्वे देवासो गोभिः श्रीतस्य नृभिः सुतस्य ।।

।। दशमं मण्डलम् ।।

१०।३१।१-११

आ नो देवानामुप वेतु शंसो विश्वेभिस्तुरैरवसे यजत्रः ।
तेभिर्वयं सुषखायो भवेम तरन्तो विश्वा दुरिता स्याम ।।
परि चिन्मर्तो द्रविणं ममन्यादृतस्य पथा नमसा विवासेत् ।
उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात् । ।
अधायि धीतिरससृग्रमंशास्तीर्थे न दस्ममुप यन्त्यूमाः ।
अभ्यानश्म सुवितस्य शूषं नवेदसो अमृतानामभूम ।।
नित्यश्चाकन्यात् स्वपतिर्दमूना यस्मा उ देवः सविता जजान ।
भगो वा गोभिरर्यमेमनज्यात् सो अस्मै चारुश्छदयदुत स्यात् ।।
इयं सा भूया उषसामिव क्षा यद्ध क्षुमन्तः शवसा समायन् ।
अस्य स्तुतिं जरितुर्भिक्षमाणा आ नः शग्मास उप यन्तु वाजाः ।।
अस्येदेषा सुमतिः पप्रथानाऽभवत् पूर्व्या भूमना गौः ।
अस्य सनीळा असुरस्य योनौ समान आ भरणे बिभ्रमाणाः ।।
किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरन्त ।।
नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति ।
त्वचं पवित्रं कृणुत स्वधावान् यदीं सूर्यं न हरितो वहन्ति ।।

स्तेनो न द्यामत्येति पृथ्वीं मिहं न वातो वि ह वाति भूम ।
मित्रो यत्र वरुणो अज्यमानोऽग्निर्वने न व्यसृष्ट शोकम् ।।
स्तरीर्यत् सूत सद्यो अज्यमाना व्यथिरव्यथीः कृणुत स्वगोपा ।
पुत्रो यत् पूर्वः पित्रोर्जनिष्ट शम्यां गौर्जगार यद्ध पृच्छान् ।।
उत कण्वं नृषदः पुत्रमाहुरुत श्यावो धनमादत्त वाजी ।
प्र कृष्णाय रुशदपिन्वतोधर्ऋतमत्र नकिरस्मा अपीपेत् ।।

१०।३३।१

प्र मा युयुज्रे प्रयुजो जनानां वहामि स्म पूषणमन्तरेण ।
विश्वे देवासो अध मामरक्षन् दुःशासुरागादिति घोष आसीत् ।।

१०।३५।१-१४

अबुध्रमु त्य इन्द्रवन्तो अग्नयो ज्योतिर्भरन्त उषसो व्युष्टिषु ।
मही द्यावापृथिवी चेततामपोऽद्या देवानामव आ वृणीमहे ।।
दिवस्पृथिव्योरव आ वृणीमहे मातॄन् त्सिन्धून् पर्वताञ्छर्यणावतः ।
अनागास्त्वं सूर्यमुषासमीमहे भद्रं सोमः सुवानो अद्या कृणोतु नः ।।
द्यावा नो अद्य पृथिवी अनागसो मही त्रायेतां सुविताय मातरा ।
उषा उच्छन्त्यप बाधतामघं स्वस्त्य१ग्निं समिधानमीमहे ।।
इयं न उस्रा प्रथमा सुदेव्यं रेवत् सनिभ्यो रेवती व्युच्छतु ।
आरे मन्युं दुर्विदत्रस्य धीमहि स्वस्त्य१ग्निं समिधानमीमहे ।।
प्र याः सिस्रते सूर्यस्य रश्मिभिर्ज्योतिर्भरन्तीरुषसो व्युष्टिषु ।
भद्रा नो अद्य श्रवसे व्युच्छत स्वस्त्य१ग्निं समिधानमीमहे ।।
अनमीवा उषस आ चरन्तु न उदग्नयो जिहतां ज्योतिषा बृहत् ।
आयुक्षातामश्विना तूतुजिं रथं स्वस्त्य१ग्निं समिधानमीमहे ।।
श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमा सुव स हि रत्नधा असि ।
रायो जनित्रीं धिषणामुप ब्रुवे स्वस्त्य१ग्निं समिधानमीमहे ।।

पिपर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुष्या ३ अमन्महि ।
विश्वा इदुस्राः स्पळुदेति सूर्यः स्वस्त्य१ग्निं समिधानमीमहे ।।
अद्वेषो अद्य बर्हिषः स्तरीमणि ग्राव्णां योगे मन्मनः साध ईमहे ।
आदित्यानां शर्मणि स्था भुरण्यसि स्वस्त्य१ग्निं समिधानमीमहे ।।
आ नो बर्हिः सधमादे बृहद्दिवि देवाँ ईळे सादया सप्त होतृन् ।
इन्द्रं मित्रं वरुणं सातये भगं स्वस्त्य१ग्निं समिधानमीमहे ।।
त आदित्या आ गता सर्वतातये वृधे नो यज्ञमवता सजोषसः ।
बृहस्पतिं पूषणमश्विना भगं स्वस्त्य१ग्निं समिधानमीमहे ।।
विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ।।
यं देवासोऽवथ वाजसातौ यं त्रायध्वे यं पिपृथात्यंहः ।
यो वो गोपीथे न भयस्य वेद ते स्याम देववीतये तुरासः ।।

१०।३६।१-१४

उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा ।
इन्द्रं हुवे मरुतः पर्वताँ अप आदित्यान् द्यावापृथिवी अपः स्वः ।।
द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसो रिषः ।
मा दुर्विदत्रा निर्ऋतिर्न ईशत तद्देवानामवो अद्या वृणीमहे ।।
विश्वस्मान्नो अदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः ।
स्वर्वज्ज्योतिरवृकं नशीमहि तद्देवानामवो अद्या वृणीमहे ।।
ग्रावा वदन्नप रक्षांसि सेधतु दुष्ष्वप्न्यं निर्ऋतिं विश्वमत्रिणम् ।
आदित्यं शर्म मरुतामशीमहि तद्देवानामवो अद्या वृणीमहे ।।
एन्द्रो बर्हिः सीदतु पिन्वतामिळा बृहस्पतिः सामभिर्ऋक्वो अर्चतु ।
सुप्रकेतं जीवसे मन्म धीमहि तद्देवानामवो अद्या वृणीमहे ।।
दिविस्पृशं यज्ञमस्माकमश्विना जीराध्वरं कृणुतं सुम्नमिष्टये ।
प्राचीनरश्मिमाहुतं घृतेन तद्देवानामवो अद्या वृणीमहे ।।

उप ह्वये सुहवं मारुतं गणं पावकमृष्वं सख्याय शंभुवम् ।
रायस्पोषं सौश्रवसाय धीमहि तद् देवानामवो अद्या वृणीमहे ।।
अपां पेरुं जीवधन्यं भरामहे देवाव्यं सुहवमध्वरश्रियम् ।
सुरश्मिं सोममिन्द्रियं यमीमहि तद् देवानामवो अद्या वृणीमहे ।।
सनेम तत् सुसनिता सनित्वभिर्वयं जीवा जीवपुत्रा अनागसः ।
ब्रह्मद्विषो विष्वगेनो भरेरत तद् देवानामवो अद्या वृणीमहे ।।
ये स्था मनोर्यज्ञियास्ते शृणोतन यद्वो देवा ईमहे तद्ददातन ।
जैत्रं क्रतुं रयिमद्वीरवद्यशस्तद् देवानामवो अद्या वृणीमहे ।।
महदद्य महतामा वृणीमहेऽवो देवानां बृहतामनर्वणाम् ।
यथा वसु वीरजातं नशामहै तद् देवानामवो अद्या वृणीमहे ।।
महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद् देवानामवो अद्या वृणीमहे ।।
ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः ।
ते सौभगं वीरवद्गोमदप्नो दधातन द्रविणं चित्रमस्मे ।।
सविता पश्चातात् सविता पुरस्तात् सवितोत्तरात्तात् सविताधरात्तात् ।
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ।।

१०।५१।१-९

महत् तदुल्बं स्थविरं तदासीद्येनाविष्टितः प्रविवेशिथापः ।
विश्वा अपश्यद् बहुधा ते अग्ने जातवेदस्तन्वो देव एकः ।।
को मा ददर्श कतमः स देवो यो मे तन्वो बहुधा पर्यपश्यत् ।
क्वाह मित्रावरुणा क्षियन्त्यग्नेर्विश्वाः समिधो देवयानीः ।।
ऐच्छाम त्वा बहुधा जातवेदः प्रविष्टमग्ने अप्स्वोषधीषु ।
तं त्वा यमो अचिकेच्चित्रभानो दशान्तरुष्यादतिरोचमानम् ।।
होत्रादहं वरुण बिभ्यदायं नेदेव मा युनजन्नत्र देवाः ।
तस्य मे तन्वो बहुधा निविष्टा एतमर्थं न चिकेताहमग्निः ।।

एहि मनुर्देवयुर्यज्ञकामोऽरंकृत्या तमसि क्षेष्यग्ने ।
सुगान् पथः कृणुहि देवयानान् वह हव्यानि सुमनस्यमानः ।।
अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाध्वानमन्वावरीवुः ।
तस्माद्भिया वरुण दूरमायं गौरो न क्षेप्नोरविजे ज्यायाः ।।
कुर्मस्त आयुरजरं यदग्ने यथा युक्तो जातवेदो न रिष्याः ।
अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजात ।।
प्रयाजान् मे अनुयाजाँश्च केवलानूर्जस्वन्तं हविषो दत्त भागम् ।
घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः ।।
तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः ।
तवाग्ने यज्ञोऽयमस्तु सर्वस्तुभ्यं नमन्तां प्रदिशश्चतस्रः ।।

१०।५२।१-६

विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै यन्निषद्य ।
प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानि ।।
अहं होता न्यसीदं यजीयान् विश्वे देवा मरुतो मा जुनन्ति ।
अहरहरश्विनाध्वर्यवं वां ब्रह्मा समिद्भवति साहुतिर्वाम् ।।
अयं यो होता किरु स यमस्य कमप्यूहे यत् समञ्जन्ति देवाः ।
अहरहर्जायते मासिमास्यथा देवा दधिरे हव्यवाहम् ।।
मां देवा दधिरे हव्यवाहमपम्लुक्तं बहु कृच्छ्रा चरन्तम् ।
अग्निर्विद्वान् यज्ञं नः कल्पयाति पञ्चयामं त्रिवृतं सप्ततन्तुम् ।।
आ वो यक्ष्यमृतत्वं सुवीरं यथा वो देवा वरिवः कराणि ।
आ बाह्वोर्वज्रमिन्द्रस्य धेयामथेमा विश्वाः पृतना जयाति ।।
त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन् घृतैरस्तृणन् बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ।।

१०।५३।१-११

यमैच्छाम मनसा सोऽयमागाद्यज्ञस्य विद्वान् परुषश्चिकित्वान् ।
स नो यक्षद् देवताता यजीयान् नि हि षत्सदन्तरः पूर्वो अस्मत् ।।

अराधि होता निषदा यजीयानभि प्रयांसि सुधितानि हि ख्यत् ।
यजामहै यज्ञियान् हन्त देवाँ ईळामहा ईड्याँ आज्येन ॥
साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्याम् ।
स आयुरागात् सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य ॥
तदद्य वाचः प्रथमं मसीय येनासुराँ अभि देवा असाम ।
ऊर्जाद उत यज्ञियासः पञ्च जना मम होत्रं जुषध्वम् ॥
पञ्च जना मम होत्रं जुषन्तां गोजाता उत ये यज्ञियासः ।
पृथिवी नः पार्थिवात् पात्वंहसोऽन्तरिक्षं दिव्यात् पात्वस्मान् ॥
तन्तुं तन्वन् रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् ।
अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनम् ॥
अक्षानहो नह्यतनोत सोम्या इष्कृणुध्वं रशना ओत पिंशत ।
अष्टावन्धुरं वहताभितो रथं येन देवासो अनयन्नभि प्रियम् ॥
अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र तरता सखायः ।
अत्रा जहाम ये असन्नशेवाः शिवान् वयमुत्तरेमाभि वाजान् ॥
त्वष्टा माया वेदपसामपस्तमो बिभ्रत् पात्रा देवपानानि शंतमा ।
शिशीते नूनं परशुं स्वायसं येन वृश्चादेतशो ब्रह्मणस्पतिः ॥
सतो नूनं कवयः सं शिशीत वाशीभिर्याभिरमृताय तक्षथ ।
विद्वांसः पदा गुह्यानि कर्तन येन देवासो अमृतत्वमानशुः ॥
गर्भे योषामदधुर्वत्समासन्यपीच्येन मनसोत जिह्वया ।
स विश्वाहा सुमना योग्या अभि सिषासनिर्वनते कार इज्जितिम् ॥

१०।५६।१-७

इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशने तन्व१श्चारुरेधि प्रियो देवानां परमे जनित्रे ॥
तनूष्टे वाजिन् तन्वं१ नयन्ती वाममस्मभ्यं धातु शर्म तुभ्यम् ।
अह्रुतो महो धरुणाय देवान् दिवीव ज्योतिः स्वमा मिमीयाः ॥
वाज्यसि वाजिनेना सुवेनीः सुवितःस्तोमं सुवितो दिवं गाः ।
सुवितो धर्म प्रथमानु सत्या सुवितो देवान् त्सुवितोऽनु पत्म ॥

महिम्न एषां पितरश्चनेशिरे देवा देवेष्वदधुरपि क्रतुम् ।
समविव्यचुरुत यान्यत्विषुरैषां तनूषु नि विविशुः पुनः ॥
सहोभिर्विश्वं परि चक्रमू रजः पूर्वा धामान्यमिता मिमानाः ।
तनूषु विश्वा भुवना नि येमिरे प्रासारयन्त पुरुध प्रजा अनु ॥
द्विधा सूनवोऽसुरं स्वर्विदमास्थापयन्त तृतीयेन कर्मणा ।
स्वां प्रजां पितरः पित्र्यं सह आवरेष्वदधुस्तन्तुमाततम् ॥
नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिरति दुर्गाणि विश्वा ।
स्वां प्रजां बृहदुक्थो महित्वाऽवरेष्वदधादा परेषु ॥

१०।५७।१-६

मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः। मान्तः स्थुर्नो अरातयः ॥
यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः । तमाहुतं नशीमहि ॥
मनो न्वा हुवामहे नाराशंसेन सोमेन । पितॄणां च मन्मभिः ॥
आ त एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे ॥
पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातं सचेमहि ॥
वयं सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥

१०।६१।१-२७

इदमित्था रौद्रं गूर्तवचा ब्रह्म क्रत्वा शच्यामन्तराजौ ।
क्राणा यदस्य पितरा मंहनेष्ठाः पर्षत्पक्थे अहन्ना सप्त होतॄन्
स इद्दानाय दभ्याय वन्वञ्च्यवानः सूदैरमिमीत वेदिम् ।
तूर्वयाणो गूर्तवचस्तमः क्षोदो न रेत इतऊति सिञ्चत् ॥
मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता ।
आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ ॥
कृष्णा यद्गोष्वरुणीषु सीदद्दिवो नपाताश्विना हुवे वाम् ।
वीतं मे यज्ञमा गतं मे अन्नं ववन्वांसा नेषमस्मृतध्रू ॥
प्रथिष्ट यस्य वीरकर्ममिष्णदनुष्ठितं नु नर्यो अपौहत् ।
पुनस्तदा वृहति यत्कनाया दुहितुरा अनुभृतमनर्वा ॥

मध्या यत् कर्त्वमभवदभीके कामं कृण्वाने पितरि युवत्याम् ।
मनानग्रेतो जहतुर्वियन्ता सानौ निषिक्तं सुकृतस्य योनौ ॥
पिता यत् स्वां दुहितरमधिष्कन् क्ष्मया रेतः संजग्मानो नि षिञ्चत् ।
स्वाध्योऽजनयन् ब्रह्म देवा वास्तोष्पतिं व्रतपां निरतक्षन् ॥
स ईं वृषा न फेनमस्यदाजौ स्मदा परैदप दभ्रचेताः ।
सरत् पदा न दक्षिणा परावृङ् न ता नु मे पृशन्यो जगृभ्रे ॥
मक्षू न वह्निः प्रजाया उपब्दिरग्निं न नग्न उप सीददूधः ।
सनितेध्मं सनितोत वाजं स धर्ता जज्ञे सहसा यवीयुत् ॥
मक्षू कनायाः सख्यं नवग्वा ऋतं वदन्त ऋतयुक्तिमग्मन् ।
द्विबर्हसो य उप गोपमागुरदक्षिणासो अच्युता दुदुक्षन् ॥
मक्षू कनायाः सख्यं नवीयो राधो न रेत ऋतमित् तुरण्यन् ।
शुचि यत् ते रेक्ण आयजन्त सबर्दुघायाः पय उस्रियायाः ॥
पश्वा यत् पश्चा वियुता बुधन्तेति ब्रवीति वक्तरी रराणः ।
वसोर्वसुत्वा कारवोऽनेहा विश्वं विवेष्टि द्रविणमुप क्षु ॥
तदिन्न्वस्य परिषद्वानो अग्मन् पुरू सदन्तो नार्षदं बिभित्सन् ।
वि शुष्णस्य संग्रथितमनर्वा विदत् पुरुप्रजातस्य गुहा यत् ॥
भर्गो ह नामोत यस्य देवाः स्व१र्ण ये त्रिषधस्थे निषेदुः ।
अग्निर्ह नामोत जातवेदाः श्रुधी नो होतर्ऋतस्य होताध्रुक् ॥
उत त्या मे रौद्रावर्चिमन्ता नासत्याविन्द्र गूर्तये यजध्यै ।
मनुष्वद्वृक्तबर्हिषे रराणा मन्दू हितप्रयसा विक्षु यज्यू ॥
अयं स्तुतो राजा वन्दि वेधा अपश्च विप्रस्तरति स्वसेतुः ।
स कक्षीवन्तं रेजयत् सो अग्निं नेमिं न चक्रमर्वतो रघुद्रु ॥
स द्विबन्धुर्वैतरणो यष्टा सबर्धुं धेनुमस्वं दुहध्यै ।
सं यन्मित्रावरुणा वृञ्ज उक्थैर्ज्येष्ठेभिरर्यमणं वरूथैः ॥
तद्बन्धुः सूरिर्दिवि ते धियंधा नाभानेदिष्ठो रपति प्र वेनन् ।
सा नो नाभिः परमास्य वा घाऽहं तत् पश्चा कतिथश्चिदास ॥
इयं मे नाभिरिह मे सधस्थमिमे मे देवा अयमस्मि सर्वः ।
द्विजा अह प्रथमजा ऋतस्येदं धेनुरदुहज्जायमाना ॥

अधाशु मन्द्रो अरतिर्विभावाऽव स्यति द्विवर्तनिर्वनेषाट् ।
ऊर्ध्वा यच्छ्रेणिर्न शिशुर्दन् मक्षू स्थिरं शेवृधं सूत माता ।।
अधा गाव उपमातिं कनाया अनु श्वान्तस्य कस्य चित् परेयुः ।
श्रुधि त्वं सुद्रविणो नस्त्वं याळाश्वघ्नस्य वावृधे सूनृताभिः ।।
अध त्वमिन्द्र विद्ध्य१स्मान् महो राये नृपते वज्रबाहुः ।
रक्षा च नो मघोनः पाहि सूरीननेहसस्ते हरिवो अभिष्टौ।।
अध यद्राजाना गविष्टौ सरत् सरण्युः कारवे जरण्युः ।
विप्रः प्रेष्ठः स ह्येषां बभूव परा च वक्षदुत पर्षदेनान् ।।
अधा न्वस्य जेन्यस्य पुष्टौ वृथा रेभन्त ईमहे तदू नु ।
सरण्युरस्य सूनुरश्वो विप्रश्चासि श्रवसश्च सातौ ।।
युवोर्यदि सख्यायास्मे शर्धाय स्तोमं जुजुषे नमस्वान् ।
विश्वत्र यस्मिन्ना गिरः समीचीः पूर्वीव गातुर्दाशत् सूनृतायै ।।
स गृणानो अद्भिर्देववानिति सुबन्धुर्नमसा सूक्तैः ।
वर्धदुक्थैर्वचोभिरा हि नूनं व्यध्वेति पयस उस्रियायाः ।।
त ऊ षु णो महो यजत्रा भूत देवास ऊतये सजोषाः ।
ये वाजाँ अनयता वियन्तो ये स्था निचेतारो अमूराः ।।

१०।६२।१-११

ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश ।
तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ।।
य उदाजन् पितरो गोमयं वस्वृतेनाभिन्दन् परिवत्सरे वलम् ।
दीर्घायुत्वमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ।।
य ऋतेन सूर्यमारोहयन् दिव्यप्रथयन् पृथिवीं मातरं वि ।
सुप्रजास्त्वमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ।।
अयं नाभा वदति वल्गु वो गृहे देवपुत्रा ऋषयस्तच्छृणोतन ।
सुब्रह्मण्यमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ।।
विरूपास इदृषयस्त इद्गम्भीरवेपसः । ते अङ्गिरसः सूनवस्ते अग्नेः परि जज्ञिरे ।
ये अग्नेः परि जज्ञिरे विरूपासो दिवस्परि ।
नवग्वो नु दशग्वो अङ्गिरस्तमः सचा देवेषु मंहते ।।

इन्द्रेण युजा निः सृजन्त वाघतो व्रजं गोमन्तमश्विनम् ।
सहस्रं मे ददतो अष्टकर्ण्यः श्रवो देवेष्वक्रत ।।
प्र नूनं जायतामयं मनुस्तोक्मेव रोहतु । यः सहस्रं शताश्वं सद्यो दानाय मंहते ।।
न तमश्नोति कश्चन दिव इव सान्वारभम् ।
सावर्ण्यस्य दक्षिणा वि सिन्धुरिव पप्रथे ।।
उत दासा परिविषे स्मद्दिष्टी गोपरीणसा । यदुस्तुर्वश्च मामहे ।।
सहस्रदा ग्रामणीर्मा रिषन्मनुः सूर्येणास्य यतमानैतु दक्षिणा ।
सावर्णेर्देवाः प्र तिरन्त्वायुर्यस्मिन्नश्रान्ता असनाम वाजम् ।।

१०।६३।१-१७

परावतो ये दिधिषन्त आप्यं मनुप्रीतासो जनिमा विवस्वतः ।
ययातेर्ये नहुष्यस्य बर्हिषि देवा आसते ते अधि ब्रुवन्तु नः ।।
विश्वा हि वो नमस्यानि वन्द्या नामानि देवा उत यज्ञियानि वः ।
ये स्थ जाता अदितेरद्भ्यस्परि ये पृथिव्यास्ते म इह श्रुता हवम् ।।
येभ्यो माता मधुमत् पिन्वते पयः पीयूषं द्यौरदितिरद्रिबर्हाः ।
उक्थशुष्मान् वृषभरान् त्स्वप्नसस्ताँ आदित्याँ अनु मदा स्वस्तये ।।
नृचक्षसो अनिमिषन्तो अर्हणा बृहद्देवासो अमृतत्वमानशुः ।
ज्योतीरथा अहिमाया अनागसो दिवो वर्ष्माणं वसते स्वस्तये ।।
सम्राजो ये सुवृधो यज्ञमाययुरपरिह्वृता दधिरे दिवि क्षयम् ।
ताँ आ विवास नमसा सुवृक्तिभिर्महो आदित्याँ अदितिं स्वस्तये ।।
को वः स्तोमं राधति यं जुजोषथ विश्वे देवासो मनुषो यति ष्ठन ।
को वोऽध्वरं तुविजाता अरं करद् यो नः पर्षदत्यंहः स्वस्तये ।।
येभ्यो होत्रां प्रथमामायेजे मनुः समिद्धाग्निर्मनसा सप्त होतृभिः ।
त आदित्या अभयं शर्म यच्छत सुगा नः कर्त सुपथा स्वस्तये ।।
य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मन्तवः ।
ते नः कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये ।।
भरेष्विन्द्रं सुहवं हवामहेंऽहोमुचं सुकृतं दैव्यं जनम् ।
अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये ।।

सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् ।
दैवीं नावं स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ।।
विश्वे यजत्रा अधि वोचतोतये त्रायध्वं नो दुरेवाया अभिह्रुतः ।
सत्यया वो देवहूत्या हुवेम शृण्वतो देवा अवसे स्वस्तये ।।
अपामीवामप विश्वामनाहुतिमपारातिं दुर्विदत्रामघायतः ।
आरे देवा द्वेषो अस्मद्युयोतनोरु णः शर्म यच्छता स्वस्तये ।।
अरिष्टः स मर्तो विश्व एधते प्र प्रजाभिर्जायते धर्मणस्परि ।
यमादित्यासो नयथा सुनीतिभिरति विश्वानि दुरिता स्वस्तये ।।
यं देवासोऽवथ वाजसातौ यं शूरसाता मरुतो हिते धने ।
प्रातर्यावाणं रथमिन्द्र सानसिमरिष्यन्तमा रुहेमा स्वस्तये ।।
स्वस्ति नः पथ्यासु धन्वसु स्वस्त्य१प्सु वृजने स्वर्वति ।
स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरुतो दधातन ।।
स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति ।
सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा ।।
एवा प्लतेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी ।
ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ।।

१०।६४।१-१७

कथा देवानां कतमस्य यामनि सुमन्तु नाम शृण्वतां मनामहे ।
को मृळाति कतमो नो मयस्करत् कतम ऊती अभ्या ववर्तति ।।
क्रतूयन्ति क्रतवो हृत्सु धीतयो वेनन्ति वेनाः पतयन्त्या दिशः ।
न मर्डिता विद्यते अन्य एभ्यो देवेषु मे अधि कामा अयंसत ।।
नरा वा शंसं पूषणमगोह्यमग्निं देवेद्धमभ्यर्चसे गिरा ।
सूर्यामासा चन्द्रमसा यमं दिवि त्रितं वातमुषसमक्तुमश्विना ।।
कथा कविस्तुवीरवान् कया गिरा बृहस्पतिर्वावृधते सुवृक्तिभिः ।
अज एकपात् सुहवेभिर्ऋक्वभिरहिः शृणोतु बुध्न्यो३ हवीमनि ।।

दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरुणा विवाससि ।
अतूर्तपन्था: पुरुरथो अर्यमा सप्तहोता विषुरूपेषु जन्मसु ।।
ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रव: ।
सहस्रसा मेधसाताविव त्मना महो ये धनं समिथेषु जभ्रिरे ।।
प्र वो वायुं रथयुजं पुरंधिं स्तोमै: कृणुध्वं सख्याय पूषणम् ।
ते हि देवस्य सवितु: सवीमनि क्रतुं सचन्ते सचित: सचेतस: ।।
त्रि: सप्त सस्रा नद्यो महीरपो वनस्पतीन् पर्वताँ अग्निमूतये ।
कृशानुमस्तॄन् तिष्यं सधस्थ आ रुद्रं रुद्रेषु रुद्रियं हवामहे ।।
सरस्वती सरयु: सिन्धुरूर्मिभिर्महो महीरवसा यन्तु वक्षणी: ।
देवीरापो मातर: सूदयित्न्वो घृतवत् पयो मधुमन्नो अर्चत ।।
उत माता बृहद्दिवा शृणोतु नस्त्वष्टा देवेभिर्जनिभि: पिता वच: ।
ऋभुक्षा वाजो रथस्पतिर्भगो रण्व: शंस: शशमानस्य पातु न: ।।
रण्व: संदृष्टौ पितुमाँ इव क्षयो भद्रा रुद्राणां मरुतामुपस्तुति: ।
गोभि: ष्याम यशसो जनेष्वा सदा देवास इळया सचेमहि ।।
यां मे धियं मरुत इन्द्र देवा अददात वरुण मित्र यूयम् ।
तां पीपयत पयसेव धेनुं कुविद्गिरो अधि रथे वहाथ ।।
कुविदङ्ग प्रति यथा चिदस्य न: सजात्यस्य मरुतो बुबोधथ ।
नाभा यत्र प्रथमं संनसामहे तत्र जामित्वमदितिर्दधातु न: ।।
ते हि द्यावापृथिवी मातरा मही देवी देवाञ्जन्मना यज्ञिये इत: ।
उभे बिभृत उभयं भरीमभि: पुरू रेतांसि पितृभिश्च सिञ्चत: ।।
विषा होत्रा विश्वमश्नोति वार्यं बृहस्पतिररमति: पनीयसी ।
ग्रावा यत्र मधुषुदुच्यते बृहदवीवशन्त मतिभिर्मनीषिण: ।।
एवा कविस्तुवीरवाँ ऋतज्ञा द्रविणस्युर्द्रविणसश्चकान: ।
उक्थेभिरत्र मतिभिश्च विप्रो पीपयद्गयो दिव्यानि जन्म ।।
एवा प्लते: सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी ।
ईशानासो नरो अमर्त्येनाऽस्तावि जनो दिव्यो गयेन ।।

अग्निरिन्द्रो वरुणो मित्रो अर्यमा वायुः पूषा सरस्वती सजोषसः ।
आदित्या विष्णुर्मरुतः स्वर्बृहत् सोमो रुद्रो अदितिर्ब्रह्मणस्पतिः ॥
इन्द्राग्नी वृत्रहत्येषु सत्पती मिथो हिन्वाना तन्वा३ समोकसा ।
अन्तरिक्षं मह्या पप्रुरोजसा सोमो घृतश्रीर्महिमानमीरयन् ॥
तेषां हि मह्ना महतामनर्वणां स्तोमाँ इयर्म्यृतज्ञा ऋतावृधाम् ।
ये अप्सवमर्णवं चित्रराधसस्ते नो रासन्तां महये सुमित्र्याः ॥
स्वर्णरमन्तरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कम्भुरोजसा ।
पृक्षा इव महयन्तः सुरातयो देवाः स्तवन्ते मनुषाय सूरयः ॥
मित्राय शिक्ष वरुणाय दाशुषे या सम्राजा मनसा न प्रयुच्छतः ।
ययोर्धाम धर्मणा रोचते बृहद् ययोरुभे रोदसी नाधसी वृतौ ॥
या गौर्वर्तनिं पर्येति निष्कृतं पयो दुहाना व्रतनीरवारतः ।
सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते ॥
दिवक्षसो अग्निजिह्वा ऋतावृध ऋतस्य योनिं विमृशन्त आसते ।
द्यां स्कभित्व्य१प आ चक्रुरोजसा यज्ञं जनित्वी तन्वी३ नि मामृजुः ॥
परिक्षिता पितरा पूर्वजावरी ऋतस्य योना क्षयतः समोकसा ।
द्यावापृथिवी वरुणाय सव्रते घृतवत् पयो महिषाय पिन्वतः ॥
पर्जन्यावाता वृषभा पुरीषिणेन्द्रवायू वरुणो मित्रो अर्यमा ।
देवाँ आदित्याँ अदितिं हवामहे ये पार्थिवासो दिव्यासो अप्सु ये ॥
त्वष्टारं वायुमृभवो य ओहते दैव्या होतारा उषसं स्वस्तये ।
बृहस्पतिं वृत्रखादं सुमेधसमिन्द्रियं सोमं धनसा उ ईमहे ॥
ब्रह्म गामश्वं जनयन्त ओषधीर्वनस्पतीन् पृथिवीं पर्वताँ अपः ।
सूर्यं दिवि रोहयन्तः सुदानव आर्या व्रता विसृजन्तो अधि क्षमि ॥
भुज्युमंहसः पिपृथो निरश्विना श्यावं पुत्रं वध्रिमत्या अजिन्वतम् ।
कमद्युवं विमदायोहथुर्युवं विष्णाप्वं१ विश्वकायाव सृजथः ॥
पावीरवी तन्यतुरेकपादजो दिवो धर्ता सिन्धुरापः समुद्रियः ।
विश्वे देवासः शृणवन् वचांसि मे सरस्वती सह धीभिः पुरंध्या ॥

विश्वे देवा: सह धीभि: पुरंध्या मनोर्यजत्रा अमृता ऋतज्ञा: ।
रातिषाचो अभिषाच: स्वर्विद: स्व१र्गिरो ब्रह्म सूक्तं जुषेरत ।।
देवान वसिष्ठो अमृतान् ववन्दे ये विश्वा भुवनाभि प्रतस्थु: ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभि: सदा न: ।।

१०।६६।१-१५

देवान् हुवे बृहच्छ्रवस: स्वस्तये ज्योतिष्कृतो अध्वरस्य प्रचेतस: ।
ये वावृधु: प्रतरं विश्ववेदस इन्द्रज्येष्ठासो अमृता ऋतावृध: ।।
इन्द्रप्रसूता वरुणप्रशिष्टा ये सूर्यस्य ज्योतिषो भागमानशु: ।
मरुद्गणे वृजने मन्म धीमहि मघोने यज्ञं जनयन्त सूरय: ।।
इन्द्रो वसुभि: परि पातु नो गयमादित्यैर्नो अदिति: शर्म यच्छतु ।
रुद्रो रुद्रेभिर्देवो मृळयाति नस्त्वष्टा नो ग्नाभि: सुविताय जिन्वतु ।।
अदितिर्द्यावापृथिवी ऋतं महदिन्द्राविष्णू मरुत: स्वर्बृहत् ।
देवाँ आदित्याँ अवसे हवामहे वसून् रुद्रान् त्सवितारं सुदंससम् ।।
सरस्वान् धीभिर्वरुणो धृतव्रत: पूषा विष्णुर्महिमा वायुरश्विना ।
ब्रह्मकृतो अमृता विश्ववेदस: शर्म नो यंसन् त्रिवरूथमंहस: ।।
वृषा यज्ञो वृषण: सन्तु यज्ञिया वृषणो देवा वृषणो हविष्कृत: ।
वृषणा द्यावापृथिवी ऋतावरी वृषा पर्जन्यो वृषणो वृषस्तुभ: ।।
अग्नीषोमा वृषणा वाजसातये पुरुप्रशस्ता वृषणा उप ब्रुवे ।
यावीजिरे वृषणो देवयज्यया ता न: शर्म त्रिवरूथं वि यंसत: ।।
धृतव्रता: क्षत्रिया यज्ञनिष्कृतो बृहद्दिवा अध्वराणामभिश्रिय: ।
अग्निहोतार ऋतसापो अद्रुहोऽपो असृजन्ननु वृत्रतूर्ये ।।
द्यावापृथिवी जनयन्नभि व्रताऽऽप ओषधीर्वनिनानि यज्ञिया ।
अन्तरिक्षं स्व१रा पप्रुरूतये वशं देवासस्तन्वी३ नि मामृजु: ।।
धर्तारो दिव ऋभव: सुहस्ता वातापर्जन्या महिषस्य तन्यतो: ।
आप ओषधी: प्र तिरन्तु नो गिरो भगो रातिर्वाजिनो यन्तु मे हवम् ।।
समुद्र: सिन्धू रजो अन्तरिक्षमज एकपात् तनयित्नुरर्णव: ।
अहिर्बुध्न्य: शृणवद्वचांसि मे विश्वे देवास उत सूरयो मम ।।

स्याम वो मनवो देववीतये प्रान्चं नो यज्ञं प्र णयत साधुया ।
आदित्या रुद्रा वसव: सुदानव इमा ब्रह्म शस्यमानानि जिन्वत ।।
दैव्या होतारा प्रथमा पुरोहित ऋतस्य पन्थामन्वेमि साधुया ।
क्षेत्रस्य पतिं प्रतिवेशमीमहे विश्वान् देवाँ अमृताँ अप्रयुच्छत: ।।
वसिष्ठास: पितृवद्वाचमक्रत देवाँ ईळाना ऋषिवत् स्वस्तये ।
प्रीता इव ज्ञातय: काममेत्यास्मे देवासो व धूनुता वसु ।।
देवान् वसिष्ठो अमृतान् ववन्दे ये विश्वा भुवनाभि प्रतस्थु: ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभि: सदा न: ।।

१०।८५।१७,४७

सूर्यायै देवेभ्यो मित्राय वरुणाय च । ये भूतस्य प्रचेतस इदं तेभ्योऽकरं नम: ।।

समञ्जन्तु विश्वे देवा: समापो हृदयानि नौ ।
सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ।।

१०।९२।१-१५

यज्ञस्य वो रथ्यं विश्पतिं विशां होतारमक्तोरतिथिं विभावसुम् ।
शोचन्छुष्कासु हरिणीषु जर्भुरद् वृषा केतुर्यजतो द्यामशायत ।।
इममञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम् ।
अक्तुं न यह्वमुषस: पुरोहितं तनूनपातमरुषस्य निंसते ।।
बळस्य नीथा वि पणेश्च मन्महे वया अस्य प्रहुता आसुरत्तवे ।
यदा घोरासो अमृतत्वमाशतादिज्जनस्य दैव्यस्य चर्किरन् ।।
ऋतस्य हि प्रसितिर्द्यौरुरु व्यचो नमो मह्य१रमति: पनीयसी ।
इन्द्रो मित्रो वरुण: सं चिकित्रिरेऽथो भग: सविता पूतदक्षस: ।।
प्र रुद्रेण ययिना यन्ति सिन्धवस्तिरो महीमरमतिं दधन्विरे ।
येभि: परिज्मा परियन्नुरु ज्रयो वि रोरुवज्जठरे विश्वमुक्षते ।।
क्राणा रुद्रा मरुतो विश्वकृष्टयो दिव: श्येनासो असुरस्य नीळय: ।
तेभिश्चष्टे वरुणो मित्रो अर्यमेन्द्रो देवेभिरर्वशेभिरर्वश: ।।

इन्द्रे भुजं शशमानास आशत सूरो दृशीके वृषणश्च पौंस्ये ।
प्र ये न्वस्यार्हणा ततक्षिरे युजं वज्रं नृषदनेषु कारव: ।।
सूरश्चिदा हरितो अस्य रीरमदिन्द्रादा कश्चिद्भयते तवीयस: ।
भीमस्य वृष्णो जठरादभिश्वसो दिवेदिवे सहुरि: स्तन्नबाधित: ।।
स्तोम वो अद्य रुद्राय शिक्वसे क्षयद्वीराय नमसा दिदिष्टन ।
येभि: शिव: स्ववाँ एवयावभिर्दिव: सिषक्ति स्वयशा निकामभि: ।।
ते हि प्रजाया अभरन्त वि श्रवो बृहस्पतिर्वृषभ: सोमजामय: ।
यज्ञैरथर्वा प्रथमो वि धारयद्देवा दक्षैर्भृगव: सं चिकित्रिरे ।।
ते हि द्यावापृथिवी भूरिरेतसा नराशंसश्चतुरङ्गो यमोऽदिति: ।
देवस्त्वष्टा द्रविणोदा ऋभुक्षण: प्र रोदसी मरुतो विष्णुरर्हिरे ।।
उत स्य न उशिजामुर्विया कविरहि: शृणोतु बुध्न्यो ३ हवीमनि ।
सूर्यामासा विचरन्ता दिविक्षिता धिया शमीनहुषी अस्य बोधतम् ।।
प्र न: पूषा चरथं विश्वदेव्यो ऽपां नपादवतु वायुरिष्टये ।
आत्मानं वस्यो अभि वातमर्चत तदश्विना सुहवा यामनि श्रुतम् ।।
विशामासामभयानामधिक्षितं गीर्भिरु स्वयशसं गृणीमसि ।
ग्नाभिर्विश्वाभिरदितिमनर्वणमक्तोर्युवानं नृमणा अधा पतिम् ।।
रेभदत्र जनुषा पूर्वो अङ्गिरा ग्रावाण ऊर्ध्वा अभि चक्षुरध्वरम् ।
येभिर्विहाया अभवद्विचक्षण: पाथ: सुमेकं स्वधितिर्वनन्वति ।।

१०।६३।१-१५

मही द्यावापृथिवी भूतमुर्वी नारी यह्वी न रोदसी सदं न: ।
तेभिर्न: पातं सह्यस एभिर्न: पातं शूषणि ।।
यज्ञेयज्ञे स मर्त्यो देवान्त्सपर्यति । य: सुम्नैर्दीर्घश्रुत्तम आविवासात्येनान् ।।
विश्वेषामिरज्यवो देवानां वार्महः । विश्वे हि विश्वमहसो विश्वे यज्ञेषु यज्ञिया: ।।
ते घा राजानो अमृतस्य मन्द्रा अर्यमा मित्रो वरुण: परिज्मा ।
कद्रुद्रो नृणां स्तुतो मरुत: पूषणो भग: ।।
उत नो नक्तमपां वृषण्वसू सूर्यामासा सदनाय सधन्या ।
सचा यत्सा द्येषामहिर्बुध्नेषु बुध्न्य: ।।

उत नो देवावश्विना शुभस्पती धामभिर्मित्रावरुणा उरुष्यताम् ।
महः स राय एषतेऽति धन्वेव दुरिता ।।
उत नो रुद्रा चिन्मृळतामश्विना विश्वे देवासो रथस्पतिर्भगः ।
ऋभुर्वाज ऋभुक्षणः परिज्मा विश्ववेदसः ।।
ऋभुर्ऋभुक्षा ऋभुर्विधतो मद आ ते हरी जूजुवानस्य वाजिना ।
दुष्टरं यस्य साम चिदृधग्यज्ञो न मानुषः ।।
कृधी नो अह्रयो देव सवितः स च स्तुषे मघोनाम् ।
सहो न इन्द्रो वह्निभिर्न्येषां चर्षणीनां चक्रं रश्मिं न योयुवे ।।
ऐषु द्यावापृथिवी धातं महदस्मे वीरेषु विश्वचर्षणि श्रवः ।
पृक्षं वाजस्य सातये पृक्षं रायोत तुर्वणे ।।
एतं शंसमिन्द्रास्मयुष्ट्वं कूचित् सन्तं सहसावन्नभिष्टये सदा पाह्यभिष्टये ।
मेदतां वेदता वसो ।।
एतं मे स्तोमं तना न सूर्ये द्युतद्यामानं वावृधन्त नृणाम् ।
संवननं नाश्व्यं तष्टेवानपच्युतम् ।।
वावर्त येषां राया युक्तैषां हिरण्ययी ।नेमधिता न पौंस्या वृथेव विष्टान्ता ।।
प्र तद्दुःशीमे पृथवाने वेने प्र रामे वोचमसुरे मघवत्सु ।
ये युक्त्वाय पञ्च शतास्मयु पथा विश्राव्येषाम् ।।
अधीन्नवत्र सप्ततिं च सप्त च ।
सद्यो दिदिष्ट तान्वः सद्यो दिदिष्ट पार्थ्यः सद्यो दिदिष्ट मायवः ।।

१०।९८।१-१२

बृहस्पते प्रति मे देवतामिहि मित्रो वा यद्वरुणो वासि पूषा ।
आदित्यैर्वा यद्वसुभिर्मरुत्वान् त्स पर्जन्यं शंतनवे वृषाय ।।
आ देवो दूतो अजिरश्चिकित्वान् त्वद्देवापे अभि मामगच्छत् ।
प्रतीचीनः प्रति मामा ववृत्स्व दधामि ते द्युमतीं वाचमासन् ।।
अस्मे धेहि द्युमतीं वाचमासन् बृहस्पते अनमीवामिषिराम् ।
यया वृष्टिं शंतनवेवनाव दिवो द्रप्सो मधुमाँ आ विवेश ।।

आ नो द्रप्सा मधुमन्तो विशन्त्विन्द्र देह्यन्त्विन्द्र देह्यधिरथं सहस्रम् ।
नि षीद होत्रमृतुथा यजस्व देवान् देवापे हविषा सपर्य ।।
आर्ष्टिषेणो होत्रमृषिर्निषीदन् देवापिर्देवसुमतिं चिकित्वान् ।
स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि ।।
अस्मिन् त्समुद्रे अध्युत्तरस्मिन्नापो देवेभिर्निवृता अतिष्ठन् ।
ता अद्रवन्नार्ष्टिषेणेन सृष्टा देवापिना प्रेषिता मृक्षिणीषु ।।
यद्देवापिः शंतनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत् ।
देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत् ।।
यं त्वा देवापिः शुशुचानो अग्न आर्ष्टिषेणो मनुष्यः समीधे ।
विश्वेभिर्देवैरनुमद्यमानः प्र पर्जन्यमीरया वृष्टिमन्तम् ।।
त्वां पूर्व ऋषयो गीर्भिरायन् त्वामध्वरेषु पुरुहूत विश्वे ।
सहस्राण्यधिरथान्यस्मे आ नो यज्ञं रोहिदश्वोप याहि ।।
एतान्यग्ने नवतिर्नव त्वे आहुतान्यधिरथा सहस्रा ।
तेभिर्वर्धस्व तन्वः शूर पूर्वीर्दिवो नो वृष्टिमिषितो रिरीहि ।।
एतान्यग्ने नवतिं सहस्रा सं प्र यच्छ वृष्ण इन्द्राय भागम् ।
विद्वान् पथ ऋतुशो देवयानानप्यौलानं दिवि देवेषु धेहि ।।
अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षांसि सेध ।
अस्मात् समुद्राद्बृहतो दिवो नोऽपां भूमानमुप नः सृजेह ।।

१०।१००।१-१२

इन्द्र दृह्य मघवन् त्वावदिद्भुज इह स्तुतः सुतपा बोधि नो वृधे ।
देवेभिर्नः सविता प्रावतु श्रुतमा सर्वतातिमदितिं वृणीमहे ।।
भराय सु भरत भागमृत्वियं प्र वायवे शुचिपे क्रन्ददिष्टये ।
गौरस्य यः पयसः पीतिमानश आ सर्वतातिमदितिं वृणीमहे ।।
आ नो देवः सविता साविषद्वय ऋजूयते यजमानाय सुन्वते ।
यथा देवान् प्रतिभूषेम पाकवदा सर्वतातिमदितिं वृणीमहे ।।

इन्द्रो अस्मे सुमना अस्तु विश्वहा राजा सोमः सुवितस्याध्येतु नः ।
यथायथा मित्रधितानि संदधुरा सर्वतातिमदितिं वृणीमहे ।।
इन्द्र उक्थेन शवसा परुर्दधे बृहस्पते प्रतरीतास्यायुषः ।
यज्ञो मनुः प्रमतिर्नः पिता हि कमा सर्वतातिमदितिं वृणीमहे ।।
इन्द्रस्य नु सुकृतं दैव्यं सहाऽग्निर्गृहे जरिता मेधिरः कविः ।
यज्ञश्च भूद्विदथे चारुरन्तम आ सर्वतातिमदितिं वृणीमहे ।।
न वो गुहा चकृम भूरि दुष्कृतं नाविष्ट्यं वसवो देवहेळनम् ।
माकिर्नो देवा अनृतस्य वर्पस आ सर्वतातिमदितिं वृणीमहे ।।
अपामीवां सविता साविषन्न्य१ग्वरीय यदप सेधन्त्वद्रयः ।
ग्रावा यत्र मधुषुदुच्यते बृहदा सर्वतातिमदितिं वृणीमहे ।।
ऊर्ध्वो ग्रावा वसवोऽस्तु सोतरि विश्वा द्वेषांसि सनुतर्युयोत ।
स नो देवः सविता पायुरीड्य आ सर्वतातिमदितिं वृणीमहे ।।
ऊर्जं गावो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अङ्ग्ध्वे ।
तनूरेव तन्वो अस्तु भेषजमा सर्वतातिमदितिं वृणीमहे ।।
क्रतुप्रावा जरिता शश्वतामव इन्द्र इद्भद्रा प्रमतिः सुतावताम् ।
पूर्णमूधर्दिव्यं यस्य सिक्तय आ सर्वतातिमदितिं वृणीमहे ।।
चित्रस्ते भानुः क्रतुप्रा अभिष्टिः सन्ति स्पृधो जरणिप्रा अधृष्टाः ।
रजिष्ठया रज्या पश्व आ गोस्तूतूर्षति पर्यग्रं दुवस्युः ।।

१०।१०१।१-१२

उद्बुध्यध्वं समनसः सखायः समग्निमिन्ध्वं बहवः सनीळाः ।
दधिक्रामग्निमुषसं च देवीमिन्द्रावतो वसे नि ह्वये वः ।।
मन्द्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं कृणुध्वम् ।
इष्कृणुध्वमायुधारं कृणुध्वं प्राञ्चं यज्ञं प्र णयता सखायः ।।
युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत् सृण्यः पक्वमेयात् ।।
सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया ।।

निराहावान् कृणोतन सं वरत्रा दधातन् ।
सिञ्चामहा अवतमुद्रिणं वयं सुषेकमनुपक्षितम् ।।
इष्कृताहावमवतं सुवरत्रं सुषेचनम् । उद्रिणं सिञ्चे अक्षितम् ।।
प्रीणिताश्वान् हितं जयाथ स्वस्तिवाहं रथमित् कृणुध्वम् ।
द्रोणाहावमवतमश्मचक्रमंसत्रकोशं सिञ्चता नृपाणम् ।।
व्रजं कृणुध्वं स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि ।
पुरः कृणुध्वमायसीरधृष्टा मा वः सुस्रोच्चमसो दृंहता तम् ।।
आ वो धियं यज्ञियां वर्त ऊतये देवा देवीं यजतां यज्ञियामिह ।
सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ।।
आ तू षिञ्च हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः ।
परि ष्वजध्वं दश कक्ष्याभिरुभे धुरौ प्रति वन्हिं युनक्त ।।
उभे धुरौ वन्हिरापिब्दमानो ऽन्तर्योनेव चरति द्विजानिः ।
वनस्पतिं वन आस्थापयध्वं नि षू दधिध्वमखनन्त उत्सम् ।।
कपृन्नरः कपृथमुद्दधातन चोदयत खुदत वाजसातये ।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये ।।

१०।१०९।१-७

ते ऽवदन् प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलिलो मातरिश्वा ।
वीळुहरास्तप उग्रो मयोभूरापो देवीः प्रथमजा ऋतेन ।।
सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणीयमानः ।
अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय ।।
हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजायेयमिति चेदवोचन् ।
न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ।।
देवा एतस्यामवदन्त पूर्वे सप्तऋषयस्तपसे ये निषेदुः ।
भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ।।
ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमङ्गम् ।
तेन जायामन्वविन्दद्बृहस्पतिः सोमेन नीतां जुह्वं न देवाः ।।

पुनर्वै देवा अददु: पुनर्मनुष्या उत ।
राजान: सत्यं कृण्वाना ब्रह्मजायां पुनर्ददु: ।।
पुनर्दाय ब्रह्मजायां कृत्वी देवैर्निकिल्बिषम् ।
ऊर्जं पृथिव्या भक्त्वायोरुगायमुपासते ।।

१०।११३। १,८

तमस्य द्यावापृथिवी सचेतसा विश्वेभिर्देवैरनु शुष्ममावताम् ।
यदैत् कृण्वानो महिमानमिन्द्रियं पीत्वी सोमस्य क्रतुमाँ अवर्धत ।।
विश्वे देवासो अध वृष्ण्यानि ते वर्धयन्त्सोमवत्या वचस्यया ।
रद्धं वृत्रमहिमिन्द्रस्य हन्मनाऽग्निर्न जम्भैस्तृष्वन्नमावयत् ।।

१०।११४।१-१०

घर्मा समन्ता त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम ।
दिवस्पयो दिधिषाणा अवेषन् विदुर्देवा: सहसामानमर्कम् ।।
तिस्रो देष्ट्राय निर्ऋतीरुपासते दीर्घश्रुतो वि हि जानन्ति वह्नय: ।
तासां नि चिक्यु: कवयो निदानं परेषु या गुह्येषु व्रतेषु ।।
चतुष्कपर्दा युवति: सुपेशा घृतप्रतीका वयुनानि वस्ते ।
तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयम् ।।
एक: सुपर्ण: स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे ।
तं पाकेन मनसापश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरम् ।।
सुपर्णं विप्रा: कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति ।
छन्दांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्य मिमते द्वादश ।।
षट्त्रिंशांश्च चतुर: कल्पयन्तश्छन्दांसि च दधत आद्वादशम् ।
यज्ञं विमाय कवयो मनीष ऋक्सामाभ्यां प्र रथं वर्तयन्ति ।।
चतुर्दशान्ये महिमानो अस्य तं धीरा वाचा प्र णयन्ति सप्त ।
आप्नानं तीर्थं क इह प्र वोचद्येन पथा प्रपिबन्ते सुतस्य ।।
सहस्रधा पञ्चदशान्युक्था यावद् द्यावापृथिवी तावदित् तत् ।
सहस्रधा महिमान: सहस्रं यावद्ब्रह्म विष्ठितं तावती वाक् ।।

कश्छन्दसां योगमा वेद धीरः को धिष्ण्यां प्रति वाचं पपाद ।
कमृत्विजामष्टमं शूरमाहुर्हरी इन्द्रस्य नि चिकाय कः स्वित् ।।
भूम्या अन्तं पर्येके चरन्ति रथस्य धूर्षु युक्तासो अस्थुः ।
श्रमस्य दायं वि भजन्त्येभ्यो यदा यमो भवति हर्म्ये हितः ।।

१०।१२६।१-८

न तमंहो न दुरितं देवासो अष्ट मर्त्यम् ।
सजोषसो यमर्यमा मित्रो नयन्ति वरुणो अति द्विषः ।।
तद्धि वयं वृणीमहे वरुण मित्रार्यमन् ।
येना निरंहसो यूयं पाथ नेथा च मर्त्यमति द्विषः ।।
ते नूनं नोऽयमूतये वरुणो मित्रो अर्यमा ।
नयिष्ठा उ नो नेषणि पर्षिष्ठा उ नः पर्षण्यति द्विषः ।।
यूयं विश्वं परि पाथ वरुणो मित्रो अर्यमा ।
युष्माकं शर्मणि प्रिये स्याम सुप्रणीतयोऽति द्विषः ।।
आदित्यासो अति स्रिधो वरुणो मित्रो अर्यमा ।
उग्रं मरुद्भी रुद्रं हुवेमेन्द्रमग्निं स्वस्तयेऽति द्विषः ।।
नेतार ऊ षु णस्तिरो वरुणो मित्रो अर्यमा ।
अति विश्वानि दुरिता राजानश्चर्षणीनामति द्विषः ।।
शुनमस्मभ्यमूतये वरुणो मित्रो अर्यमा ।
शर्म यच्छन्तु सप्रथ आदित्यासो यदीमहे अति द्विषः ।।
यथा ह त्यद्वसवो गौर्यं चित् पदि षिताममुञ्चता यजत्राः ।
एवो ष्व१ स्मन्मुञ्चता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ।।

१०।१२८।१-९

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम ।
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ।।
मम देवा विहवे सन्तु सर्व इन्द्रवन्तो मरुतो विष्णुरग्निः ।
ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामे अस्मिन् ।।

मयि देवा द्रविणमा यजन्तां मय्याशीरस्तु मयि देवहूतिः ।
दैव्या होतारो वनुषन्त पूर्वेऽरिष्टाः स्याम तन्वा सुवीराः ।।
मह्यं यजन्तु मम यानि हव्याऽऽकूतिः सत्या मनसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं विश्वे देवासो अधि वोचता नः ।।
देवीः षळुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वम् ।
मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ।।
अग्ने मन्युं प्रतिनुदन परेषा मदब्धो गोपाः परि पाहि नस्त्वम् ।
प्रत्यञ्चो यन्तु निगुतः पुनस्तेऽ३मैषां चित्तं प्रबुधां वि नेशत् ।।
धाता धातॄणां भुवनस्य यस्पतिर्देवं त्रातारमभिमातिषाहम् ।
इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पान्तु यजमानं न्यर्थात् ।।
उरुव्यचा नो महिषः शर्म यंसदस्मिन् हवे पुरुहूतः पुरुक्षुः ।
स नः प्रजायै हर्यश्व मृळयेन्द्र मा नो रीरिषो मा परा दाः ।।
ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् ।
वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ।।

१०।१३७।१-७

उत देवा अवहितं देवा उन्नयथा पुनः ।
उतागश्चक्रुषं देवा देवा जीवयथा पुनः ।।
द्वाविमौ वातौ वात आ सिन्धोरा परावतः ।
दक्षं ते अन्य आ वातु परान्यो वातु यद्रपः ।।
आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वं हि विश्वभेषजो देवानां दूत ईयसे ।।
आ त्वागमं शन्तातिभिरथो अरिष्टतातिभिः ।
दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि ते ।।
त्रायन्तामिह देवास्त्रायतां मरुतां गणः ।
त्रायन्तां विश्वा भूतानि यथायमरपा असत् ।।

आप इद्वा उ भेषजीरापो अमीवचातनी: ।
आप: सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ।।
हस्ताभ्यां दशशाखाभ्यां जिह्वा वाच: पुरोगवी ।
अनामयित्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि ।।

१०।१४१।१-६

अग्ने अच्छा वदेह न: प्रत्यङ्० न: सुमना भव ।
प्र नो यच्छ विशस्पते धनदा असि नस्त्वम् ।।
प्र नो यच्छत्वर्यमा प्र भग: प्र बृहस्पति: ।
प्र देवा: प्रोत सूनृता रायो देवी ददातु न: ।।
सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे ।
आदित्यान् विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम् ।।
इन्द्रवायू बृहस्पतिं सुहवेह हवामहे ।
यथा न: सर्व इज्जन: संगत्यां सुमना असत् ।।
अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय ।
वातं विष्णुं सरस्वतीं सवितारं च वाजिनम् ।।
त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय ।
त्वं नो देवतातये रायो दानाय चोदय ।।

१०।१५४।१-५

सोम एकेभ्य: पवते घृतमेक उपासते ।
येभ्यो मधु प्रधावति ताँश्चिदेवापि गच्छतात् ।।
तपसा ये अनाधृष्यास्तपसा ये स्वर्ययु: ।
तपो ये चक्रिरे महस्ताँश्चिदेवापि गच्छतात् ।।
ये युध्यन्ते प्रधनेषु शूरासो ये तनूत्यज: ।
ये वा सहस्रदक्षिणास्ताँश्चिदेवापि गच्छतात् ।।
ये चित् पूर्व ऋतसाप ऋतावान ऋतावृध: ।
पितॄन तपस्वतो यम ताँश्चिदेवापि गच्छतात् ।।

सहस्रणीथा: कवयो ये गोपायन्ति सूर्यम् ।
ऋषीन् तपस्वतो यम तपोजाँ अपि गच्छतात् ।।

१०।१५५।५

परीमे गामनेषत पर्यग्निमहृषत ।
देवेष्वक्रत श्रव: क इमाँ आ दधर्षति ।।

१०।१५७।१-५

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवा: ।
यज्ञं च नस्तन्वं च प्रजां चा दित्यैरिन्द्र: सह चीक्लृपाति ।।
आदित्यैरिन्द्र: सगणो मरुभ्दिरस्माकं भूत्ववितता तनूनाम ।
हत्वाय देवा असुरान् यदायन् देवा देवत्वमभिरक्षमाणा: ।।
प्रत्यन्चमर्कमनयन्छचीभिरादित् स्वधामिषिरां पर्यपश्यन् ।।

१०।१६५।१-५

देवा: कपोत इषितो यदिच्छन् दूतो निर्ऋत्या इदमाजगाम ।
तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ।।
शिव: कपोत इषितो नो अस्त्वनागा देवा: शकुनोगृहेषु ।
अग्निर्हि विप्रो जुषतां हविर्न: परि हेति: पक्षिणी नो वृणक्तु ।।
हेति: पक्षिणी न दभात्यस्मानाष्ट्र्यां पदं कृणुते अग्निधाने ।
शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिंसीदिह देवा: कपोत: ।।
यदुलूको वदति मोघमेतद्यत् कपोत: पदमग्नौ कृणोति ।
यस्य दूत: प्रहित एष एतत् तस्मै यमाय नमो अस्तु मृत्यवे ।।
ऋचा कपोतं नुदत प्रणोदमिषं मदन्त: परि गां नयध्वम् ।
संयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्जं प्र पतात् पतिष्ठ: ।।

१०।१८१।१-३

प्रथश्च यस्य सप्रथश्च नामाऽऽनुष्टुभस्य हविषो हविर्यत् ।
धातुर्द्युतानात् सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठ: ।।

अविन्दन्तो अतिहितं यदासीद्यज्ञस्य धाम परमं गुहा यत् ।
धातुर्द्युतानात् सवितुश्च विष्णोर्भरद्वाजो बृहदा चक्रे अग्नेः ।।
तेऽविन्दन् मनसा दीध्याना यजुः ष्कन्नं प्रथमं देवयानम् ।
धातुर्द्युतानात् सवितुश्च विष्णोरा सूर्यादभरन् घर्ममेते ।।

ऋग्वेदीय बाष्कल संहितायां विश्वेदेवाः

बाष्कल संहिता, तस्या ब्राह्मणं, सूत्रन्च स्वतन्त्र रूपेणेदानीं यावत् नावलोकितम् । परन्च महाराष्ट्रान्तर्गत कोंकण - गोमान्तक- कारवार जनपदेषु प्राचीन हस्तलिखित ऋग्वेद शाकल संहितासु अन्तिमेभागे बाष्कल संहिता क्रमः सम्यग् लिखितो दृष्टः । स यथाः - आरम्भः - " अग्निमीळे इतिमन्त्रेणैव । परन्च समाप्तिः - तच्छंयोरा वृणीमहे गातुंयज्ञाये गातुंयज्ञपतये । दैवीस्वस्ति-रस्तुनः स्वस्ति मानुषेभ्यः । ऊर्ध्वंजिगातु भेषजं शन्नो अस्तु द्विपदे शं चतुष्पदे ।। इति षट्पदोक्त मन्त्रेण भवति । मन्त्रो यँ समानीव० " इति शाकल संहिताया अन्तिम मन्त्रान्ते लिखितः । अथच ऋषिक्रम भिन्नत्वान्मण्डलक्रमो पि भिन्न एव । तत्र शौनकोक्तानुक्रमण्यामुक्तं प्रमाणमपि सर्वासु पुस्तिकासु लिखितं दृश्यते । तथ्था - (श्लोक २१) । गौतमा दौशिजः कुत्सः परुच्छेपाः दृषोः परः । कुत्सादीर्घतमा इत्येषतु बाष्कलकः क्रमः ।। तेन शाकल संहिताया भिन्ना मण्डल व्यवस्था अस्यां सम्पद्यते । सा यथा :-

मण्डलक्रमः -	ऋषिः -	मण्डलारम्भः -	मण्डलसमाप्तिः ।
१	मधुच्छन्दावैश्वामित्रः ।	अग्निमीळे० ।	श्रुष्टिमन्तम् ।
२	कक्षीवानौशिजः ।	नासत्याभ्यां ० ।	जुषध्वम् ।
३	कुत्स आङ्गिरसः ।	इमंस्तोममर्हते ।	उतद्यौः ।
४	दीर्घतमा औचथ्यः ।	वेदिषदे० ।	हरिश्रियम् ।
५	भर्गः प्रागाथः ।	अग्नआयाह्यग्निभिः ।	सोमस्यपीतये ।
६	श्रुष्टिगुः काण्वः ।	यथामनौ० ।	चनसंनशे ।
७	तिरश्चिराङ्गिरसः ।	आत्वागिरो० ।	विद्मनेकम् ।
८	मेध्यः काण्वः	एकएवाग्निर्०।	सर्वम् ।
९	मेध्यः काण्वः ।	यमृत्विजो०।	संवित् ।
१०	मुर्धन्वा नाङ्गिरसः ।	यावन्मात्र मुषसो०।	शंचतुष्पदे । इति ।

अस्मिन्मण्डलारम्भविपर्यासे ऋषिविपर्यासे पि च मन्त्र भिन्नत्वा भावात् विश्वेदेवात्मक मन्त्रास्तु शाकलोक्ता एव । अतो मन्त्राणामपुनरावृत्तिः स्वीकृता ।

इति बाष्कल संहितायां विश्वेदेवाः ।

ऋग्वेदीय आश्वलायन संहितायां विश्वेदेवा:

श्रीमत् शौनकाचार्य विरचिते सर्व विद्यमान वैदिकेषु प्रचलिते च - चरणव्यूहे ऋग्वेदस्य शाखा: पञ्चविधा भवन्ति । शाकला - बाष्कला - आश्वलायना - शांखायना - माण्डूकायना चेति । तेषामध्ययन मध्यमया श्चतुर्णाष्टि मण्डलानि दशैवतु । इत्युक्तम् । तेनेदं ज्ञायते यदस्य चरणव्यूहस्य ग्रथनकाले पूर्वोक्त ग्रन्थान्तरेषूक्तानामृग्वेदस्य सप्त शाखानां मध्ये केवला: पञ्चैव शाखा वशिष्टा आसन् । इदानी मपि आश्वलायनीय श्रौत - गृह्य सूत्रे उपलभ्येते , नतु संहिता । परञ्च आश्वलायन सूत्र द्वयमपि शाकलशाखाया मन्त्र क्रमेषु सार्थकं भवति । कुत्रचित्सौत्र मन्त्रा अपि भवन्ति । ते नाधिका: । अत: इत्यनुमीयते यदुभय संहितयोर्मण्डलादि क्रम: समएवस्यात् । तदैवोपलब्ध सूत्रेण शाकलोक्त कार्याणि सम्पद्यन्ते । अन्यथा शाकल सूत्र निर्माण प्रसङ्ग: प्राप्त: स्यात् । अथवा दग्धाश्व रथन्यायेन शाकलाश्वलायनयो: सन्धि: स्यात् । यदेकेन संहिता ग्रथनमपरेण सूत्र ग्रथनञ्च कृत्वा परस्परयो: कार्यसिद्धि: भाव्या । परञ्च चरणव्यूहे शाखानां पञ्चविधत्व ज्ञापनात् आश्वलायन संहिताया: स्वतन्त्रमस्तित्वं बोध्यते । केचन केरलीया विप्रापि साक्षात्कृता ये स्वगोत्रप्रवरोच्चारे आश्वलायन शाखाध्यायी अमुकशर्माहं मिति वदन्ति । परञ्चाद्य यावत् सा महत्वपूर्णा आश्वलायन संहिता दृष्टिपथमनागता एव ।

अत: आश्वलायन संहिताया अस्तित्व स्वीकारे केवलमनुमानमेवशरणम् ।

तदनुरोधेन आश्वलायन सूत्रान्तर्गतानां वैश्वदेव मन्त्राणां केवलं प्रतीकान्यनुसन्धीयन्ते ।

अत्र अध्याय - खण्ड- प्रकरण- मन्त्र प्रतीकात्मकञ्च निदर्शनं क्रियते । तद्यथा - वर्मैमे० १-१ , तदद्यवाच: ० १-१, प्रवोवाजा० १-२, समिद्धोअग्न० १-२, इन्द्रमन्वा० १-३, नमोमहद्भ्यो० १-४, विश्वेदेवा:शास्तन० १-४, अराधिहोता० १-४, अतोदेवा० १-५, तच्छंयोरा० १-१०, देवानांपत्नी० १-१०, उतग्नाव्यन्तु० १-१०, आहंयज्ञंददे० १-१२, सन:पावक० २-१, भद्रान्न:श्रेय: ० २-१०, विश्वेदेवासआगत० २-१०, येकेचज्मा० २-१०, यज्ञेनयज्ञ० २-१६, अग्नेविश्वेभि: ० २-१७, पूर्णादर्वि० २-१८, समिद्धोअद्य३-२, विश्वेअद्य० ३-७, आनोदेवाना० ३-७, आनोविश्व० ३-७, विश्वेदेवा: शृणुतेमं०३-७, अग्नेयाहिदूत्यं० ३-७, अदितिर्ह्यजनिष्ट ३-८, सुत्रामाणं ३-८, महीमूषु० ३-८ ,

अदितिर्द्यौ० ३-८, देवींवाच० ३-८, चत्वारिवाक्० ३-८, दिव्यं सुपर्णं ३-८, प्रत्यवरोह० ३-१०, देवान्जनमगन० ३-१३, त्रयस्त्रिंशतन्तवो० ३-१४, अग्निर्मुखं०४-२, अग्निश्चविष्णो० ४-२, धारयन्त० ४-२, इमा आदित्या० ४-२, अनाधृष्ट० ४-५, ईळेद्यावापृथिवी० ४-६, उपव्हये० ४-७, समीवत्सं न० ४-७, संवत्सइव० ४-७, यस्तेस्तन:० ४-७, गौरमीमे० ४-७, सूयवसाद्०४-७, सोमो जिगाति० ४-१०, अस्तम्नाथा ४-१०, प्राची दिशां० ४-१२, वैरूपेसाम० ४-१२, द्रप्सश्चस्कन्द० ५-३, ये देवानामिह० ५-३, अग्नेपत्नी ५-५, अपामसोम० ५-६, अग्नइन्द्रश्च ५-८, विश्वेभि:सोम्यं० ५-१०, प्रनूनं० ५-१४, तत्सवितुर्वृणीमहे० ५-१८, अद्यानोदेव० ५-१८, अमूद्देव:सविता० ५-१८, प्रद्यावा० ५-१८, सुरूपकृत्नु०५-१८, तदात्रयं० ५-१८, अयंवेन० ५-१८, यम्योमाता०५-१८, आनोभद्रा: (सू०) ५-१८, घृतांहवनो: ५-१८, ऐभिरग्नेसरथं ५-१९, ममाग्नेवर्चो०६-६, स्वस्तिनोमिमिता० ६-९, यद्योदेवाश्चकृम० ६-१२, नतानशन्ति० ६-१४।

(उत्तरषट्के)

उदुष्यदेव: सविता० १-४, तेहिद्यावापृथिवी० १-४, यज्ञस्यवोरथ्यं० १-४, देवान्हुवे१-५, विश्वोदेवस्यनेतु० १-६, तत्सवितुर्वरेण्यं १-६, आविश्वदेवं० १-६, परावतोये० १-७, ततंमे अप० १-७, कदुप्रियाय० १-७, कतरापूर्वा० १-७, उषासानक्ता० १-७, सजूर्विश्वेभि० १-१०, येदेवासो० २-१, दोषोआगाद्० २-१, अद्रोघवाचं० २-१, इदमित्थारौद्रम्० २-१, ये यज्ञेन० २-१, अभिप्रव: सुराधसं० (वालखिल्य सू०) २-२, इमानुकं भुवना० २-३, अयावाजं० २-३, आदेवोयातु० २-८, प्रद्यावायज्ञै:० २-८, प्रऋभुभ्यो० २-८, प्रशुक्रैतु०२-८, महीद्यावापृथिवी० २-८, ऋभुर्विभ्वा० २-८, स्तुषेजनं २-८, किमुश्रेष्ठ० २८, २-८, उपनोवाजा० २-८, ऐभिरग्ने० २-९, देवानामिदवो० २-१०, येत्रिंशति० २-११, अग्नावग्निश्चरति० २-१४, अनुत्वाहिघ्ने० ३-५, तं प्रत्नथा० ३-१०, युवंदेवाक्रतुना० ३-११,

(अश्वलायन गृह सूत्रे)

यत्रवेत्थ० १-१३, प्रतेददामि० १-१५, सुश्रव: सुश्रवा० १-२२, विश्वेत्वादेवा० १-२४, सजूर्ऋतुभि:० २-२, विश्वेआदित्या० २-४, यादेवेषुतन्वा० २-१०, योनस्वो०३-५ , देवा: कपोत० ३-७, देवानां प्रतिष्ठे० ३-८, ममाग्नेवर्चो० (सू०) ३-९, स्वस्तिनो०३-११, प्रयोवांमित्रावरुणा० ३-१२, प्रधारयन्तुमधुनो० ३-१२, इममग्ने चमसं० ४-३, परीमे०४-६, शन्नइन्द्राग्नी० ४-९ ।

इति आश्वलायन संहितायां सौत्र मन्त्रानुसारी विश्वेदेवा: ।

--००--

संहितायामस्यां कानिचित्सूक्तानि शाकलादधिकानि । ऋग्विधाने तेषां व्यावहारिकोप योगो पि शौनकाचार्येण प्रदर्शित: । संहितेयं श्री नासिक दोत्रे स्वर्गीय म०म० श्री वेदमूर्ति श्रीधर अण्णशास्त्रिवारे महोदयानां सङ्ग्रहे तथा च श्री ब्रह्मर्षि म०म० श्रीपाद दामोदर सातवलेकर पारडी वासिनां सविधौ वर्तते । तैरपि गुर्जर प्रदेशा दियं संहिता समुपलव्धा । अप्रकाशिता एवायापि । शांखायन ब्राह्मणम् आरण्यकोपनिषदं च प्रकाशितं वर्तते एव । सूत्रमपि शांखायनीयं स्वतन्त्रमेव वर्तते । सर्वथा सुसमृध्देयं शाखा इति वक्तुं शक्यते सर्वेषां ग्रन्थानां शांखायनत्वात् । गुर्जर प्रदेशस्था: केचन काशीस्था अपि नागरोप जातीया ब्राह्मणा: शांखायन शाखाध्येतार: श्रौतस्मार्त निपुणा: सन्त्येव वर्तमाने । शाकल संहिताभ्यास काले परिशिष्ट रूपेण पठितानि कानिचित्सूक्तानि शांखायन संहितान्तर्गतान्येवेति बहुवारमन्विष्टम् । पूज्यपादै राघ शङ्कराचार्यैरपि शांखायनीयं हिरण्यवर्णा इति पन्चदशर्चं श्री सूक्तं स्वकीयं भाष्यं कृतमस्ति । सायण भाष्य मपि अस्य सूक्तस्योपलभ्यते अतस्तत्र शाकला द्विशिष्टा ये वैश्वदेविकामन्त्रास्ते प्रदर्श्यन्ते ।

शांखायनीया विश्वेदेवात्मका मन्त्रा:

गगनं नष्ट चन्द्रार्कं ज्योतिषां न प्रकाशते ।
देवता भय भीताश्च मारुतो नप्लवायति मारुतो नप्लवायत्योनम: ।।
कुहूर्देवानाममृतस्य पत्नी हव्यानो अस्य हविष: शृणोतु ।
संदाशुषे किरतु भूरिवामं रायस्पोषं यजमाने दधातु ।।
अनुनो द्यानुमतिर्यज्ञं देवेषु मन्यताम् ।।
अग्निश्च हव्य वाहनो भवतं दाशुषे मय: ।।
धाता ददातु दाशुषे वसूनि प्रजाकामाय मीळ्हुषे दुरोणे ।
तस्मै देवा अमृता: संव्ययन्तां विश्वेदेवासो अदिति: सजोषा: ।।
स्वस्त्ययनं तार्क्ष्यमरिष्टनेमि महद्भूतं वायसं देवतानाम् ।
असुरघ्न मिन्द्रसखं समत्सु बृहद्यशो नावमिवारुहेम ।।
पावमानी र्दिशन्तुन इमंलोकमथो अमुम ।
कामान्समर्धयन्तुनो देवीर्देवै: समाहिता: ।।

येन देवाः पवित्रेणात्मानं पुनते सदा ।
तेन सहस्रधारेण पावमान्यः पुनन्तु माम् ।।
ऋतस्य योनयो मृतस्य धाम विश्वादेवेभ्यः पुण्य गन्धाः ।।
तान आपः प्रवहन्तु पापं शुद्धामच्छामि सुकृतामु लोकं तत्पावमानीभिरहंपुनामि।।
पावमानीः पितृन्देवान ध्यायेधश्च सरस्वतीम् ।।
पितृंस्तस्योपवर्तेत क्षीरं सर्पिर्मधूदकम् ।
इडैववामनुवस्तां घृतेन यस्याः पदे पुनते देवयन्तः ।
घृतपदी शक्वरी सोमपृष्ठोपयज्ञमस्थित वैश्वदेवी ।।
वैश्वदेवीपुनती देव्यागाद्यस्यामिमा बह्व्य स्तन्वो वीतपृष्ठाः ।
तयामदन्तः सधमाद्येषु वयंस्याम पतयो रयीणाम् ।।
यत्रतत् परमं पदं विष्णोर्लोके महीयते ।
देवैः सुकृत कर्मभिस्तत्रमाममृतं कृधीन्द्रायेन्दो परिस्रव ।।
यत्र देवा महात्मानः सेन्द्राश्च समरुद्गणाः ।
ब्रह्मा च यत्र विष्णुश्च तत्रमाममृतं कृधीन्द्रायेन्दोपरिस्रव ।।
नतद्रक्षांसि नपिशाचाश्चरन्ति देवाना मोजः प्रथमजं ह्ये तत् ।
योविभर्ति दाक्षायणा हिरण्यं सदेवेषु कृणुते दीर्घ मायुः ।।
प्रियंमा कुरु देवेषु प्रियं राजसु मा कुरु ।
प्रियं विश्वेषु गोप्त्रेषु मयिधेहि रुचारुचम् ।
यांमेधां देवगणाः पितरश्चोपासते ।
तयामामद्य मेधयाग्नेमेधाविनं कुरु ।।
येमे मनो हृदयं येच देवा ये अन्तरिक्षं बहुधा कल्पयन्ति ।
ये श्रोत्रं च चक्षुषी संचरन्ति तन्मेमनः शिवसंकल्प मस्तु ।।
कैलास शिखरे रम्ये शंकरस्य गृहालयम् ।
देवतास्तत् प्रमोदन्ते तन्मेमनः शिवसङ्कल्प मस्तु ।।
येनेदं सर्वं जगतो बभूव यद्देवा अपि महतो जातवेदाः ।
यद्देवाग्रं तपसो ज्योतिरेकं तन्मेमनः शिव संकल्प मस्तु ।।

यत्कदाविां संवननं पुत्रो अङ्गिरसा भवेद् ।
तेन नो य विश्वेदेवाः सं प्रियां समजीजनन् ।।
यद्दारं भुत कृतं विश्वे देवा उपासते ।
महर्षि मस्य गोप्तारं जमदग्निरकुर्वतम् ।।
त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषमगस्त्यस्य त्र्यायायुषम् ।
यद्देवानांत्र्यायुषं तन्मे अस्तुत्र्यायुषं सर्वमस्तु शतायुषं बलायुषम् ।।

इति शांखायन संहितायां विश्वेदेवाः तन्मन्त्राश्च ।

--००--

ऋग्वेदस्य माण्डूकायन संहितायाम् विश्वेदेवा:

२००० तमे वैक्रमाब्दे इन्द्र प्रस्थीय यमुनाया अपरेकूले धर्मसंघ माध्यमेन अनन्त श्रीविभुषितानां स्वनाम धन्यानां श्री करपात्रिस्वामि पादानां तावावधाने सुसम्पन्ने शतमुख सावित्र कोटिहोमान्तर्गते " अ०भारतीय वैदिक शाखा सम्मेलने " त्रिचा: केरलीया माण्डूकायन शाखीया विप्रा: समागता आसन् ।

परन्च वयसालघुत्वात भाषा काठिन्यात कार्याधिक्याच्च तेषां समीचीन: साक्षात्कारो न सन्जात: । पुनर्भूतेषु वैदिक सम्मेलनेषुतु ते न पुनदृष्टा: । तेषां मुखाविलासो पि धर्मसंघ कार्यालयादिदानीं कोपलभ्यते । परन्च द्वाविंशति वर्षेभ्य: प्राक् नूनं माण्डूकायन श्रुति: सर्वेषां श्रुतिपथं समागतेतिसत्यम् । वाचनालयेस्वपि माण्डूकायन ग्रन्था संहिताब्राह्मणसूत्रादिकं नोपलभ्यते धुना । परन्च सा शाखा सर्वथा लुप्ता अलुप्तावेति विषये इदमित्थं लिखितु मक्षम: । संहिताया अदर्शनात् माण्डूकायन संहितान्तर्गतानां वैश्वदेव मन्त्राणामनुसन्धानं साधनाभावात् पिहित मेवाधुना ।

इति माण्डूकायन संहितायांमप्रकाशितो विश्वदेव विचार: ।

--००--

शुक्ल यजुर्वेदीय संहितायां विश्वेदेवा:

।। प्रथमोऽध्याय: ।।

अ० क० म०

१।८।१,२ धूरसि धूर्व धूर्वन्तं धूर्वं तं योऽस्मान्धूर्वति तं धूर्वं यं वयं धूर्वाम: ।
देवानामसि वन्हितमᳪ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ।।

१।१२।१,२,३ पवित्रे स्थो वैष्णव्यौ सवितुर्व: प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य -
रश्मिभि: ।
देवीरापो अग्रेगुवो अग्रेपुवोऽग्र इममद्य यज्ञं नयताग्रे यज्ञपतिᳪ सुधातुं यज्ञपतिं देवयुवम् ।।

१।१३।५ दैव्याय कर्मणे शुन्धध्वं देवयज्यायै यद्वो शुद्धा: पराजघ्नुरिदं वस्तच्छुन्धामि ।।

१।१५।१,३ अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि ।
स इदं देवेभ्यो हवि: शमीष्व सुशमि शमीष्व ।।

१।१७।३ देवयजं वह ।

१।२०।१ धान्यमसि धिनुहि देवान् ।

१।२४।१ आददेऽध्वरकृतं देवेभ्य ।

१।३०।४ अग्नेर्जिह्वासि सुहूर्देवेभ्यो धाम्ने धाम्ने मे भव यजुषे यजुषे ।।

१।३१।४ धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि ।।

।। द्वितीयोऽध्याय: ।।

२।२।३ र्णम्म्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यो ।

२।५।४ ऊर्णम्म्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्य ।

२।७।२ नमो देवेभ्य: ।

२।८।१ अस्कन्नमद्य देवेभ्य आज्यᳪ संभ्रियास ।

२।९।१ अग्ने वेर्होत्रं वेर्दूत्यमवतां त्वा द्यावापृथिवी अव त्वं द्यावापृथिवी स्विष्टकृद्देवेभ्य
इन्द्र आज्येन हविषा भूत्स्वाहा सं ज्योतिषा ज्योति: ।।

२।१३।१ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञᳪ समिमं दधातु ।
विश्वे देवास इह मादयन्तामो३ म्प्रतिष्ठ ।।

२।१८।१ सँ स्रवभागा स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः ।
इमां वाचमभि विश्वे गृणन्त आसद्यास्मिन् बर्हिषि मादयध्वꣳ स्वाहा वाट् ।।

२।२०।१ अग्नेऽदब्धायोऽशीतम पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि -
दुरद्मन्या अविषं नः ।।
पितुं कृणु सुषदा योनौ स्वाहा वाडग्नये संवेशपतये स्वाहा सरस्वत्यै यशोभगिन्यै स्वाहा ।

२।२१।१,२ वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदो भवस्तेन मह्यं वेदो भूयाः ।
देवा गातुविदो गातुं वित्वा गातुमित । मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः ।।

२।२२।१ संबर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सम्मरुद्भिः ।
समिन्द्रो विश्वेदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत् स्वाहा ।।

।। तृतीयोऽध्यायः ।।

३।४६।१ मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः ।
महश्चिद्यस्य मीढुषो यव्या हविष्मतो मरुतो वन्दते गीः ।।

३।४७।१ अक्रन् कर्म कर्मकृतः सह वाचा मयोभुवा । देवेभ्यः कर्म कृत्वास्तं प्रेत सचाभुवः ।।

३।४८।१ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ।।

३।६२।१ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम् ।

।। चतुर्थोऽध्यायः ।।

४।१।१ एदमगन्म देवयजनं पृथिव्या यत्र देवासो अजुषन्त विश्वे ।
ऋक्सामाभ्यां सन्तरन्तो यजुर्भी रायस्पोषेण समिषा मदेम ।।

४।५।१ आ वो देवास ईमहे वामं प्रयत्यध्वरे । आ वो देवास आशिषो यज्ञियासो हवामहे ।।

४।११।२,३ देवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसꣳ सुतीर्था नो असद्वशे ।
ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नो वन्तु ते नः पान्तु तेभ्यः स्वाहा ।।

४।१८।१ तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा ।
शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसि ।।

५।४।१ स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहा ।।

५।५।२ अनाधृष्टमस्यनाधृष्यं देवानामोजो नभिशस्त्यभिशस्तिपा अनभिशस्तेन्यमञ्जसा सत्यमुपगेषꣳ स्विते मा धाः ।।

५।६।१४ अनु त्वा देववीतये ।

५।१०।१,२,३ सिꣳ ह्यसि सपत्नसाही देवेभ्यः कल्पस्व सिꣳ ह्यसि सपत्नसाही देवेभ्यः शुन्धस्व सिꣳ ह्यसि सपत्नसाही देवेभ्यः शुम्भस्व ।।

५।१२।५ सिꣳ ह्यस्या वह देवान् यजमानाय स्वाहा ।।

५।१७।१ देवश्रुतौ देवेष्वा घोषतं ।

५।३०।४ वैश्वदेवमसि ।

५।३५।१ ज्योतिरसि विश्वरूपं विश्वेषां देवानाꣳ समित् ।

५।३६।२ स्तत्वं देव सोम देवो देवाँ२ उपागा इदमहं मनुष्यान्त्सह रायस्पोषेण ।

५।४२।१ अत्यन्याँ२ अगां नान्याँ२ उपागामर्वाक् त्वा परेभ्यो विदं परो वरेभ्यः । तं त्वा जुषामहे देव वनस्पते देवयज्यायै देवास्त्वा देवयज्यायै जुषन्तां ।।

।। षष्ठोऽध्यायः ।।

६।७।१ उपावीरस्युप देवान्देवीर्विशः प्रागुरुशिजो वन्हितमान् । देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् ।।

६।१०।२ पो देवीः स्वदन्तु स्वात्तं चित्सद्देवहविः ।

६।११।५ स्वाहा देवेभ्यो देवेभ्यः स्वाहा ।

६।१३।१ देवीरापः शुद्धा वोढ्वꣳ सुपरिविष्टा देवेषु सुपरिविष्टा वयं परिवेष्टारो भूयास

६।२४।४ विश्वेषां देवानां भागधेयी स्थ ।

६।२५।१ हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा । ऊर्ध्वमिममध्वरं दिवि देवेषु - होत्रा यच्छ ।।

६।२७।१ तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां भाग स्थ ।

७।१।२ देवो देवेभ्यः पवस्व येषां भागोऽसि ।।

७।३।१,२,३ स्वाङ्कृतोऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्याय ।
देवेभ्यस्त्वा मरीचिपेभ्यो ।
देवाꣳशो यस्मै त्वेडे तत्सत्यमुपरिप्रुता भङ्गेन हतोऽसौ ।

७।५।१ अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम् ।
सजूर्देवेभिरवरैः परैश्चान्तर्यामे मघवन् मादयस्व ।।

७।६।१,२ त्वा सुभव सूर्याय । देवेभ्यस्त्वा मरीचिपेभ्य ।

७।१०।१ राया वयꣳ ससवाꣳसो मदेम हव्येन देवा यवसेन गावः ।
तां धेनुं मित्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्ती ।

७।१२।५ देवास्त्वा शुक्रपाः प्र णयन्त्व ।

७।१७।३ देवास्त्वा मन्थिपाः प्र णयन्त्व ।

७।१९।१ ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ।।

७।२१।२,३ विश्वेभ्यस्त्वा देवेभ्य । एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ।

७।२२।३ देवेभ्यस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि ।

७।२३।१-६ मित्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामी न्द्राय त्वा देवाव्यं यज्ञस्यायुषे गृह्णामी । न्द्रा ग्निभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामी । न्द्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामी । न्द्राबृहस्पतिभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामी । न्द्राविष्णुभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि ।

७।२४।१ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ।।

७।२६।२ देवानामुत्क्रमणमसि ।

७।२८।४ विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथाम् ।

७।३३।१-३ ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वाꣳसो दाशुषः सुतम् ।
उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य । एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ।।

७।३४।१-३ विश्वे देवास आ गत शृणुता म इमᳯं हवम् । एदं बर्हिर्निषीदत ।
उपयामगृहीतो सि विश्वेभ्यस्त्वा देवेभ्य । एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ।
७।४२।१ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षᳯं सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा ।।
७।४३।१ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम स्वाहा ।।
७।४५।१ ऋतस्य पथा प्रेत चन्द्रदक्षिणा ।
७।४६।२ अस्मद्राता देवत्रा गच्छत प्रदातारमा विशत ।

।। अथाष्टमोऽध्यायः ।।

८।४।१ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।
आ वो र्वाची सुमतिर्ववृत्यादᳯंहोश्चिद्या वरिवोवित्तरासदा ।।
८।८।१,२ उपयामगृहीतोऽसि सुशर्माऽसि सुप्रतिष्ठानो बृहदुक्षाय नमः ।
विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ।।
८।६।२ अहं परस्तादहमवस्ताद्यदन्तरिक्षं तदु मे पिताऽभूत ।
अहᳯं सूर्यमुभयतो ददर्शाहं देवानां परमं गुहा यत् ।।
८।१३।१ देवकृतस्यैनसोऽवयजनमसि ।
८।१५।१ समिन्द्र णो मनसा नेषि गोभिः सᳯं सूरिभिर्मघवन्त्सᳯं स्वस्त्या ।
सं ब्रह्मणा देवकृतं यदस्ति सं देवानां सुमतौ यज्ञियानाᳯं स्वाहा ।।
८।१८।१ सुगा वो देवाः सदना अकर्म य आजग्मेदं सवनं जुषाणाः ।
भरमाणा वहमाना हवीᳯंष्यस्मे धत्त वसवो वसूनि स्वाहा ।।
८।१६।१ याँ२ आ वह उशतो देव देवाँस्तान् प्रेरय स्वे अग्ने सधस्थे ।
जक्षिवाᳯंसः पपिवाᳯंसश्च विश्वेऽसुं घर्मᳯं स्वरातिष्ठतानु स्वाहा ।।
८।२१।१ देवा गातुविदो गातुं वित्वा गातुमित । मनसस्पत इमं देव यज्ञᳯं स्वाहा वाते धाः ।
८।२७।१,२ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ।
अव देवैर्देवकृतमेनो यासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ।
देवानाᳯं समिदसि ।।

८।३८।४ अग्ने वर्चस्विन्वर्चस्वांस्त्वं देवेष्वसि वर्चस्वानहं मनुष्येषु भूयासम् ।।

८।३९।४ इन्द्रौजिष्ठौजिष्ठस्त्वं देवेष्वस्योजिष्ठोऽहं मनुष्येषु भूयासम् ।।

८।४०।४ सूर्यं भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासम् ।।

८।४३।१ इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिते सरस्वति महि विश्रुति ।
एता ते अघ्न्ये नामानि देवेभ्यो मा सुकृतं ब्रूतात् ।।

८।४७।३ विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसं गृह्णाम्य ।

८।५०।३ स्मत्सखा त्वं देव सोम विश्वेषां देवानां प्रियं पाथोऽपीहि ।

८।५२।१ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अमूम ।
दिवं पृथिव्या अध्याऽरुहामाविदाम देवान्त्स्वर्ज्योतिः ।।

८।५७।१ विश्वे देवा श्रं शृणु न्युप्तो ।

८।५८।१ विश्वे देवाश्चमसेषून्नीतो ।

८।६०।१ देवान्दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु।
पितृन्पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्टु यं कं च लोकमगन्यज्ञस्ततो मे भद्रमभूत् ।।

८।६१।१ चतुस्त्रिंश तन्तवो ये वितत्निरे य इमं यज्ञं स्वधया ददन्ते ।
तेषां छिन्नं सम्वेतद्दधामि स्वाहा घर्मो अप्येतु देवान् ।।

।। नवमोऽध्याय: ।।

९।२।७ पृथिविसदं त्वाऽन्तरिक्षसदं दिविसदं देवसदं नाकसद ।।

९।८।१ वातरंहा भव वाजिन्युज्यमान इन्द्रस्येव दक्षिण: श्रियेधि ।
युञ्जन्तु त्वा मरुतो विश्ववेदस आ ते त्वष्टा पत्सु जवं दधातु ।।

९।१६।१ शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रव: स्वर्का: ।
जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवा: ।।

९।१८।१ वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञा: ।
अस्य मध्व: पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानै: ।।

९।२१।८ स्वर्देवा अगन्मा ।

९।३३।४ विश्वे देवा द्वादशाक्षरेण जगतीमुदजयस्तामुज्जेषम् ।

९।३५।२-६ ऽग्निनेत्रेभ्यो देवेभ्य: पुर: सद्भ्य: स्वाहा यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्य: स्वाहा विश्वदेवनेत्रेभ्यो देवेभ्य: पश्चात्सद्भ्य: स्वाहा मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरासद्भ्य: स्वाहा सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दुवस्वद्भ्य: स्वाहा ।

६।३६।१-५ ये देवा अग्निनेत्राः पुरः सदस्तेभ्यः स्वाहा ये देवा यमनेत्रा दक्षिणासदस्तेभ्यः
स्वाहा ये देवा विश्वदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहा ये देवा मित्रावरुण-
नेत्रा वा मरुन्नेत्रा वोत्तरासदस्तेभ्यः स्वाहा ये देवाः सोमनेत्रा उपरिसदो
दुवस्वन्तस्तेभ्यः स्वाहा ।

६।४०।१ इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठाय महते जानराज्यायेन्द्रस्येन्द्रियाय
इममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥

॥ दशमोऽध्यायः ॥

१०।१।१ अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः ।
याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥

१०।६।५ वावित्तः पूषा विश्ववेदा ।

१०।१८।१ इममुष्य पुत्रममुष्यै पुत्रमस्यै विश ।

॥ एकादशोऽध्यायः ॥

११।३।१ युक्त्वाय सविता देवान्त्स्वर्यतो धिया दिवम् । बृहज्ज्योतिः करिष्यतः सविता -
प्र सुवाति तान् ॥

११।६।१ यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा ।
यः पार्थिवानि विममे स एतशो रजाꣳसि देवः सविता महित्वना ॥

११।८।१ इमं नो देव सवितर्यज्ञं प्र णय देवाव्यꣳ सखिविदꣳ सत्राजितं धनजितं स्वर्जितम् ।
ऋचा स्तोमं समर्धय गायत्रेण रथन्तरं बृहद्गायत्रवर्त्तनि स्वाहा ।

११।३५।१ सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञं सुकृतस्य योनौ ।
देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥

११।३६।२ यो देवानां चरसि प्राणथेन कस्मै देव वषडस्तु तुभ्यम् ॥

११।५४।१ रुद्राः सꣳसृज्य पृथिवीं बृहज्ज्योतिः समीधिरे ।तेषां भानुरजस्र इच्छुक्रो देवेषु-
रोचते ।

११।५८।४ विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाङ्गिरस्वद-
ध्रुवासि दिशोऽसि धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ
सजातान्यजमानाय ।

११।६०।४ विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्व ।

११।६१।१-६ अदितिष्ट्वा देवी विश्वदेव्यावती पृथिव्याः सधस्थे अङ्गिरस्वत् खनत्ववट
देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे अङ्गिरस्वद्दधतूखे
धिषणास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे अङ्गिरस्वदभीन्धतामुखे
वरूत्रीष्ट्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे अङ्गिरस्वदभीन्धतामुखे
ग्नास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे अङ्गिरस्वत्पचन्तूखे ।।
जनयस्त्वाछिन्नपत्रा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे अङ्गिरस्वत्पचन्तूखे।।

११।६५।४ विश्वे त्वा देवा वैश्वानरा आछृन्दन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वत् ।।

११।६७।१ विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम्। विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे-
स्वाहा ।

११।६९।१ दृꣳहस्व देवि पृथिवि स्वस्तय आसुरी माया स्वधया कृताऽसि ।
जुष्टं देवेभ्य इदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन् ।।

।। द्वादशोऽध्यायः ।।

१२।२।१ नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची ।
द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाः ।।

१२।३१।१ उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवस्त्वꣳ सुप्रतीको-
विभावसुः ।।

१२।४९।१ अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ२ ऊचिषे धिष्ण्या ये ।
या रोचने परस्तात् सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ।।

१२।५५।१ ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः। जन्मन्देवानां विशस्त्रिष्वा रोचने
दिवः ।

१२।६१।१ मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा ।
तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुञ्चतु ।।

१२।६७।१ सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया ।

१२।७०।१ घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमता मरुद्भिः. ।
ऊर्जस्वती पयसा पिन्वमानास्मान्त्सीते पयसाऽभ्या ववृत्स्व ।।

१२।७३।१ वि मुच्यध्वमघ्न्या देवयाना अगन्म तमसस्पारमस्य। ज्योतिरापाम ।।

१२।६०।१ मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत । अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात्

१२।१०४।१ अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियम् । तद्देवेभ्यो भरामसि ।।

।। त्रयोदशोऽध्यायः ।।

१३।१।१ मयि गृह्णाम्यग्रे अग्निं रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय। -
मामु देवताः सचन्ताम् ।।

१३।२३।१ या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः । इन्द्राग्नी ताभिः सर्वाभी -
रुचं नो धत्त बृहस्पते ।।

१३।२५।२ वासन्तिकावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद्
ध्रुवे सीदतम् ।।

१३।३४।१ ध्रुवाऽसि धरुणेतो जज्ञे प्रथममेभ्यो योनिभ्योऽअधि जातवेदाः ।
स गायत्र्या त्रिष्टुभा नुष्टुभा च देवेभ्यो हव्यं वहतु प्रजानन् ।।

१३।३७।१ युक्ष्वा हि देवहूतमाँ२ अश्वाँ२ अग्ने रथीरिव। नि होता पूर्व्यः सदः ।।

१३।४६।१ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आऽप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ।।

१३।५१।१ अजो ह्यग्नेरजनिष्ट शोकात्सो अपश्यज्जनितारमग्ने ।
तेन देवा देवतामग्रमायंस्तेन रोहमायन्नुप मेध्यासः ।
शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद ।
शरभं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ।।

।। चतुर्दशोऽध्यायः ।।

१४।३।१ स्वैर्दक्षैर्दक्षपितेह सीद देवानां सुम्ने बृहते रणाय ।
पितेवैधि सूनव आ सुशेवा स्वावेशा तन्वा संविशस्वाश्विनाऽध्वर्यू सादयतामिह त्वा ।।

१४।४।१ पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभि गृणन्तु देवाः।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणाऽऽयजस्वाश्विनाऽध्वर्यू सादयतामिह त्वा ।।

१४।६।१ शुक्रश्च शुचिश्च ग्रैष्मावृतू अग्नेरन्त: श्लेषो सि कल्पेतां द्यावापृथिवी कल्पन्तामाप
ओषधय: कल्पन्तामग्नय: पृथङ्०मम ज्यैष्ठ्याय सव्रता: ।
ये अग्नय: समनसो न्तरा द्यावापृथिवी इमे ।
ग्रैष्मावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ।।
१४।७।५ सजूर्ऋतुभि: सजूर्विधाभि: सजूर्विश्वेर्देवै: सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाऽ
ध्वर्यू सादयतामिह त्वा ।।
१४।७।१५ नभश्च नभस्यश्च वार्षिकावृतू अग्नेरन्त: श्लेषो सि कल्पेतां द्यावापृथिवी -
कल्पन्तामाप
ओषधय: कल्पन्तामग्नय: पृथङ्०मम ज्यैष्ठ्याय सव्रता: ।
ये अग्नय: समनसो न्तरा द्यावापृथिवी इमे ।
वार्षिकावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम्।।
१४।७।१६ इषश्चोर्जश्च शारदावृतू अग्नेरन्त: श्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप
ओषधय: कल्पन्तामग्नय: पृथङ्०मम ज्यैष्ठ्याय सव्रता: ।
ये अग्नय: समनसोऽन्तरा द्यावापृथिवी इमे ।
शारदावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ।।
१४।२०।६ विश्वे देवा देवता ।
१४।२६।२ ऋभूणां भगो सि विश्वेषां देवानामाधिपत्यं भूतꣳ स्पृतं त्रयस्त्रिꣳश स्तोम: ।।
१४।२७।१ सहश्च सहस्यश्च हैमन्तिकावृतू अग्नेरन्त: श्लेषो सि कल्पेतां द्यावापृथिवी कल्पन्ताम
ओषधय: कल्पन्तामग्नय: पृथङ्०मम ज्यैष्ठ्याय सव्रता: ।
ये अग्नय: समनसो न्तरा द्यावापृथिवी इमे ।
हैमन्तिकावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद्-
ध्रुवे सीदतम् ।।

।। पञ्चदशोऽध्याय: ।।

१५।३।३ अग्ने: पुरीषमस्यप्सो नाम तां त्वा विश्वे अभि गृणन्तु देवा: ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणा यजस्व ।।

१५।१४।१ अधिपत्न्यसि बृहती दिग्विश्वे ते देवा अधिपतयो बृहस्पतिर्हेतीनां प्रतिधर्त्ता त्रिणवत्रयस्त्रिंशौ त्वा स्तोमौ पृथिव्यां श्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथायै स्तभ्नीतां शाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ।।

१५।४६।१ एभिर्नो अर्कैर्भवा नो अर्वाङ्० स्वर्ण ज्योतिः।अग्ने विश्वेभिः सुमना अनीकैः ।।

१५।५०।१ तं पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः ।
नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ।।

१५।५३।१ सम्प्रच्यवध्वमुप सम्प्रयाताग्ने पथो देवयानान् कृणुध्वम् ।
पुनः कृण्वाना पितरा युवानाऽन्वाताꣳसीत् त्वयि तन्तुमेतम् ।।

१५।५४।१ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सꣳ सृजेथामयं च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ।।

१५।५७।१ ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
शैशिरावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद्ध्रुवे सीदतम् ।।

१५।६०।१ ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः। जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः

।। सप्तदशोऽध्यायः ।।

१७।८।१ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् वक्षि यक्षि च ।

१७।९।१ स नः पावक दीदिवोऽग्ने देवाँ२ इहा वह । उप यज्ञꣳ हविश्च नः ।।

१७।१३।१ ये देवा देवानां यज्ञिया यज्ञियानाꣳ संवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य ।।

१७।१४।१ ये देवा देवेष्वधि देवत्वमायन् ये ब्रह्मणः पुरएतारो अस्य ।
येभ्यो न ऋते पवते धाम किञ्चन न ते दिवो न पृथिव्या अधि स्नुषु ।।

१७।२७।१ यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तꣳ सम्प्रश्नं भुवना यन्त्यन्या ।।

१७।२९।१ परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
कꣳ स्विद् गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त पूर्वे ।।

१७।३०।१ तमिदगर्भं प्रथमं दध्र आपो यत्र देवा: समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थु: ।।
१७।४०।१ इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञ: पुर स्तु सोम: ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ।।
१७।४१।१ इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताᳬं शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ।।
१७।४३।१ अस्माकमिन्द्र: समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ२ उ देवा अवता हवेषु ।।
१७।४६।१ मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजा मृतेनानुवस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वाऽनु देवा मदन्तु ।।
१७।५१।१ इन्द्रेमं प्रतरां नय सजातानामसद्वशी । समेनं वर्चसा सृज देवानां भागदा असत् ।।
१७।५२।१ यस्य कुर्मो गृहे हविस्तमग्ने वर्धया त्वम् । तस्मै देवा अधि ब्रुवन्नयं च ब्रह्मणस्पति: ।।
१७।५३।१ उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभि: ।स नो भव शिवस्त्वᳬं सुप्रतीको विभावसु: ।।
१७।५५।१ समिद्धे अग्नावधि मामहान उक्थपत्र ईड्यो गृभीत: ।
तप्तं घर्मं परिगृह्यायजन्तोर्जा यद्यज्ञमयजन्त देवा: ।।
१७।५६।१ दैव्याय धर्त्रे जोष्ट्रे देवश्री: श्रीमना: शतपया: ।
परिगृह्य देवा यज्ञमायन् देवा देवेभ्यो अध्वर्यन्तो अस्थु: ।।
१७।६२।१ देवहूर्यज्ञ आ च वक्षत्सुम्नहूर्यज्ञ आ च वक्षत् । यक्षदग्निर्देवो देवाँ२ आ च वक्षत् ।।
१७।६४।१ उदग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ।
अधा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम् ।।
१७।६५।१ क्रमध्वमग्निना नाकमुख्यᳬं हस्तेषु बिभ्रत: ।
दिवस्पृष्ठᳬं स्वर्गत्वा मिश्रा देवेभिराध्वम् ।।
१७।६६।१ अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् ।
इयक्षमाणा भृगुभि: सजोषा: स्वर्यन्तु यजमाना: स्वस्ति ।।
१७।७०।१ नक्तोषासा समनसा विरूपे धापयेते शिशुमेकᳬं समीची ।
द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन् द्रविणोदा: ।।
१७।७३।१ आजुह्वान: सुप्रतीक: पुरस्तादग्ने स्वं योनिमा सीद साधुया ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ।।

१७।७८।१ चित्तिं जुहोमि मनसा घृतेन यथा देवा इहागमन्वीतिहोत्रा ऋतावृधः ।
पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे विश्वाहाऽदाभ्यꣳ हविः ।।
१७।८९।१ समुद्रादूर्मिर्मधुमाँ२ उदारदुपाꣳशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ।।
१७।९२।१ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकꣳ सूर्य एकं जजान वेनादेकꣳ स्वधया निष्टतक्षुः ।।
१७।९८।१ अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ।।

।। अथाष्टादशोऽध्यायः ।।

१८।२९।१ आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन
कल्पतां वाग्यज्ञेन कल्पतां मनो यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां ब्रह्मा
यज्ञेन कल्पतां ज्योतिर्यज्ञेन कल्पताꣳ स्वर्यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां
यज्ञो यज्ञेन कल्पताम् ।
स्तोमश्च यजुश्च ऋक् च साम च बृहच्च रथन्तरं च ।
स्वर्देवा अगन्मामृता अभूम प्रजापतेः प्रजा अभूम वेट् स्वाहा ।।
१८।३१।१ विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसाऽऽगमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ।।
१८।३२।१ वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः। वाजो नो विश्वैर्देवैर्धनसाताविहावतु।
१८।३३।१ वाजो नो अद्य प्र सुवाति दानं वाजो देवाँ२ ऋतुभिः कल्पयाति ।
वाजो हि मा सर्ववीरं जजान विश्वा आशा वाजपतिर्जयेयम् ।।
१८।३४।१ वाजः पुरस्तादुत मध्यतो नो वाजो देवान् हविषा वर्धयाति ।
वाजो हि मा सर्ववीरं चकार सर्वा आशा वाजपतिर्भवेयम् ।।
१८।४७।१ या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ।।
१८।५७।१ इष्टो अग्निराहुतः पिपर्तु न इष्टꣳ हविः । स्वगेदं देवेभ्यो नमः ।।
१८।६०।१ एतं जानाथ परमे व्योमन् देवाः सधस्था विद रूपमस्य ।
यदागच्छात्पथिभिर्देवयानैरिष्टापूर्ते कृणवाथाविरस्मै ।।

१८।६१।१ अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ।।
१८।६२।१ येन वहसि सहस्रं यनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ।।
१८।६३।१ प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा । ऋचेमं यज्ञं नो नय स्वर्देवेषु गन्तवे।।
१८।६४।१ यद्दत्तं यत्परादानं यत्पूर्तं याश्च दक्षिणाः । तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो - दधत् ।।
१८।६५।१ यत्र धारा अनपेता मधोर्घृतस्य च याः । तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत्।।
१८।७५।१ वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने ।।
१८।७६।१ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः । सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः - शुभे ।।

।। अथैकोनविंशोऽध्यायः ।।

१९।५।१ ब्रह्म क्षत्रं पवते तेज इन्द्रियꣳ सुरया सोमः सुत आसुतो मदाय ।
शुक्रेण देव देवताः पिपृग्धि रसेनान्नं यजमानाय धेहि ।।
१९।७।१ नाना हि वां देवहितꣳ सदस्कृतं मा सꣳसृक्षाथां परमे व्योमन् ।
सुरा त्वमसि शुष्मिणी सोम एष मा मा हिꣳसीः स्वां योनिमाविशन्ती ।।
१९।१२।१ देवा यज्ञमतन्वत भेषजं भिषजाश्विना । वाचा सरस्वती भिषगिन्द्रायेन्द्रियाणि - दधतः ।।
१९।२६।१ अश्विभ्यां प्रातः सवनमिन्द्रेणैन्द्रं माध्यंदिनम् । वैश्वदेवꣳ सरस्वत्या तृतीयमाप्तꣳ - सवनम् ।।
१९।३२।१ सुरावन्तं बर्हिषदꣳ सुवीरं यज्ञꣳ हिन्वन्ति महिषा नमोभिः ।
दधानाः सोमं दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः ।।
१९।३९।१ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।।
१९।४४।१ वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ।
तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् ।।
१९।४७।१ द्वे सृती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ।।
१९।५२।१ त्वꣳ सोम प्र चिकितो मनीषा त्वꣳ रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ।।

१९।६५।१ यो अग्निः कव्यवाहनः पितॄन् यक्षदृतावृधः ।
प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥

॥ अथ विंशोऽध्यायः ॥

२०।११।१ त्रया देवा एकादश त्रयस्त्रिꣳशाः सुराधसः ।
बृहस्पतिपुरोहिता देवस्य सवितुः सवे । देवा देवैरवन्तु मा ॥

२०।१४।१ यद्देवा देवहेडनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥

२०।१८।१ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ।
अव देवैर्देवकृतमेनोऽयक्ष्यव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ॥

२०।२५।१ यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह । तँल्लोकं पुण्यं प्रज्ञेषं यत्र देवाः -
सहाग्निना ॥

२०।३८।१ ईडितो देवैर्हरिवाँ२ अभिष्टिराजुह्वानो हविषा शर्धमानः ।
पुरन्दरो गोत्रभिद्वज्रबाहुरा यातु यज्ञमुप नो जुषाणः ॥

२०।४१।१ उषासानक्ता बृहती बृहन्तं पयस्वती सुदुघे शूरमिन्द्रम् ।
तन्तुं ततं पेशसा संवयन्ती देवानां देवं यजतः सुरुक्मे ॥

२०।४४।१ त्वष्टा दधच्छुष्ममिन्द्राय वृष्णेऽपाकोऽचिष्टुर्यशसे पुरूणि ।
वृषा यजन्वृषणं भूरिरेता मूर्धन् यज्ञस्य समनक्तु देवान् ॥

२०।४६।१ स्तोकानामिन्दुं प्रति शूर इन्द्रो वृषायमाणो वृषभस्तुराषाट् ।
घृतप्रुषा मनसा मोदमानाः स्वाहा देवा अमृता मादयन्ताम् ॥

॥ एकविंशोऽध्यायः ॥

२१।६।१ सुत्रामाणं पृथिवीं द्यामनेहसꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् ।
दैवीं नावꣳ स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ॥

२१।११।१ वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥

२१।१७।१ उषे यह्वी सुपेशसा विश्वे देवा अमर्त्याः । त्रिष्टुप्छन्द इहेन्द्रियं पष्ठवाड्गौर्वयो -
दधुः ॥

२१।३९।१ होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुं भीमं न मन्युꣳ राजानं व्याघ्रं नमसाऽ-
श्विना भामं सरस्वती भिषगिन्द्राय दुह इन्द्रियं पयः सोमः परिस्रुता
घृतं मधु व्यन्त्वाज्यस्य होतर्यज ।।

२१।४०।१ होता यक्षदग्निꣳ स्वाहाऽऽज्यस्य स्तोकानाꣳ स्वाहा मेदसां पृथक् स्वाहा
छागमश्विभ्याꣳ स्वाहा मेषं सरस्वत्यै स्वाह ऋषभमिन्द्राय सिꣳहाय
सहस इन्द्रियं स्वाहाऽग्निं न भेषजꣳ स्वाहा सोममिन्द्रियꣳ स्वाहेन्द्रꣳ
सुत्रामाणꣳ सवितारं वरुणं भिषजां पतिं स्वाहा वनस्पतिं प्रियं
पाथो न भेषजꣳ स्वाहा देवा आज्यपा जुषाणो अग्निर्भेषजं पयः सोमः
परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होर्यज ।।

२१।४६।१ होता यक्षद्वनस्पतिमभि हि पिष्टतमया रभिष्ठया रशनयाधित । यत्राश्विनो-
श्छागस्य हविषः प्रिया धामानि यत्र सरस्वत्या मेषस्य हविषः प्रिया
धामानि यत्रेन्द्रस्य सुत्राम्णः प्रिया धामानि यत्र सवितुः प्रिया धामानि
यत्र वरुणस्य प्रिया धामानि यत्र वनस्पतेः प्रिया पाथाꣳसि यत्र देवानामा-
ज्यपानां करदेवं देवो वनस्पतिर्जुषताꣳ हविर्होतर्यज ।।

२१।४७।१ होता यक्षदग्निꣳ स्विष्टकृतमयाडग्निरश्विनोश्छागस्य हविषः प्रिया
धामान्ययाट् सरस्वत्या मेषस्य हविषः प्रिया धामान्ययाडिन्द्रस्य
ऋषभस्य हविषः प्रिया धामान्ययाडग्नेः प्रिया धामान्ययाट् सोमस्य
प्रिया धामान्ययाडिन्द्रस्य सुत्राम्णः प्रिया धामान्ययाट् सवितुः प्रिया
धामान्ययाड् वरुणस्य प्रिया धामान्ययाड् वनस्पतेः प्रिया पाथाꣳस्ययाड्
देवानामाज्यपानां प्रिया धामानि यक्षदग्नेर्होतुः प्रिया धामानि यक्षत्
स्वं महिमानमायजतमेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषताꣳ
हविर्होतर्यज ।।

२१।५३।१ देवा देवानां भिषजा होताराविन्द्रमश्विना ।

वषट्कारैः सरस्वती त्विषिं न हृदये मतिꣳ होतृभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तुयज ।।

२१।५८।१ देवो अग्निः स्विष्टकृद्देवान्यक्षद्यथायथꣳ होताराविन्द्रमश्विना वाचा वाचꣳ
सरस्वतीमग्निꣳ सोमꣳ स्विष्टकृत् स्विष्ट इन्द्रः सुत्रामा सविता वरुणो
भिषगिष्टो देवो वनस्पतिः स्विष्टा देवा आज्यपाः स्विष्टो अग्निरग्निना
होता होत्रे स्विष्टकृद्यशो न दधदिन्द्रियमूर्जमपचितिꣳ स्वधां वसुवने वसुधेयस्य
व्यन्तु यज ।।

२१।६१।१ त्वामद्य ऋष आर्षेय ऋषीणां नपादवृणीतायं यजमानो बहुभ्य आ
सङ्गतेभ्य एष मे देवेषु वसु वार्यायक्ष्यत इति ता या देवा देव
दानान्यदुस्तान्यस्मा आ च शास्स्वा च गुरस्वेषितश्च होतरसि
भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ।।

।। अथ द्वाविंशोऽध्यायः ।।

२२।४।१,३ स्वगा त्वा देवेभ्यः प्रजापतये । तं बधान देवेभ्यः प्रजापतये तेन राध्नुहि ।।
२२।५।४,५ विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि ।
२२।१४।१ देवस्य सवितुर्मतिमासवं विश्वदेव्यम् । धिया भगं मनामहे ।।
२२।१५।१ अग्निꣳ स्तोमेन बोधय समिधानो अमर्त्यम् । हव्या देवेषु नो दधत् ।।
२२।१७।१ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे । देवाँ२ आ सादयादिह ।।
२२।१९।२ देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितꣳ रक्षत ।
२२।२८।१७ विश्वेभ्यो देवेभ्यः स्वाहा ।

।। अथ त्रयोविंशोऽध्यायः ।।

२३।२।३ यस्ते हन्त्संवत्सरे महिमा सम्बभूव यस्ते वायावन्तरिक्षे महिमा सम्बभूव ।
यस्ते दिवि सूर्ये महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेभ्यः ।।
२३।४।३ यस्ते रात्रौ संवत्सरे महिमा सम्बभूव यस्ते पृथिव्यामग्नौ महिमा सम्बभूव ।
यस्ते नक्षत्रेषु चन्द्रमसि महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा।।
२३।८।४,५ भूर्भुवः स्व लाँजी३ञ्छाचीऽ३न्यव्ये गव्य एतदन्नमत्त देवा एतदन्नमद्धि प्रजापते ।।
२३।१६।१ न वा उ एतन्म्रियसे न रिष्यसि देवाँ२ इदेषि पथिभिः सुगेभिः ।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ।।
२३।३६।१ नार्यस्ते पत्न्यो लोम विचिन्वन्तु मनीषया । देवानां पत्न्यो दिशः सूचीभिः -
शम्यन्तु त्वा ।।

।। अथ चतुर्विंशोऽध्यायः ।।

२४।५।१ शिल्पा वैश्वदेव्यो रोहिण्यस्त्र्यवयो वाचे विज्ञाता अदित्यै सरूपा धात्रे
वत्सतर्यो देवानां पत्नीभ्यः ।।

२४।१४।१ कृष्णग्रीवा आग्नेया बभ्रव: सौम्या उपध्वस्ता: सावित्रा वत्सतर्य: सारस्वत्य: श्यामा: पौष्णा: पृश्नयो मारुता बहुरूपा वैश्वदेवा वशा द्यावापृथिवीया: ।।

२४।२४।१ सोमाय लबानालभते त्वष्ट्रे कौलीकान्गोषादीर्देवानां पत्नीभ्य: कुलीका देवजामिभ्योऽग्नये गृहपतये पारुष्णान् ।।

२४।२७।१ वसुभ्य ऋश्यानालभते रुद्रेभ्यो रुरूनादित्येभ्यो न्यङ्कून्विश्वेभ्यो देवेभ्य: पृषतान्त्साध्येभ्य: कुलुङ्गान् ।।

२४।४०।१ लङ्गो वैश्वदेव: श्वा कृष्ण: कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकर: सिंहो मारुत: कृकलास: पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषत: ।।

।। अथ पञ्चविंशोऽध्याय: ।।

२५।५।१ इन्द्राग्न्यो: पक्षति: सरस्वत्यै निपक्षतिर्मित्रस्य तृतीयापां चतुर्थी निर्ऋत्यै पञ्चम्यग्नीषोमयो: षष्ठी सर्पाणाᳬं सप्तमी विष्णोरष्टमी पूष्णो नवमी त्वष्टुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्यै त्रयोदशी द्यावापृथिव्योर्दक्षिणं पार्श्वं विश्वेषां देवानामुत्तरम् ।।

२५।६।१ मरुताᳬं स्कन्धा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वितीयाऽऽदित्यानां तृतीया वायो: पुच्छमग्नीषोमयोर्भासदौ क्रुञ्चौ श्रोणिभ्यामिन्द्राबृहस्पती ऊरुभ्यां मित्रावरुणावल्गाभ्यामाक्रमणᳬं स्थूराभ्यां बलं कुष्ठाभ्याम् ।।

२५।१३।१ य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवा: ।
यस्य च्छायामृतं यस्य मृत्यु: कस्मै देवाय हविषा विधेम ।।

२५।१४।१ आ नो भद्रा: क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिद: ।
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवे-दिवे ।।

२५।१५।१ देवानां भद्रा सुमतिर्ऋजूयतां देवानाᳬं रातिरभि नो निवर्त्तताम् ।
देवानाᳬं सख्यमुपसेदिमा वयं देवा न आयु: प्रतिरन्तु जीवसे ।।

२५।२०।१ पृषदश्वा मरुत: पृश्निमातर: शुभंयावानो विदथेषु जग्मय: ।
अग्निजिह्वा मनव: सूरचक्षसो विश्वे नो देवा अवसागमन्निह ।।

२५।२१।१ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहि देवहितं यदायुः ।।
२५।२२।१ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ।।
२५।२३।१ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ।।
२५।२६।१ एष छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत्पुरोडाशमर्वता त्वष्टेदेनं सौश्रवसाय जिन्वति ।।
२५।२७।१ यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ।।
२५।३०।१ उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ।।
२५।३१।१ यद्वाजिनो दाम सन्दानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये तृणं सर्वा ता ते अपि देवेष्वस्तु ।।
२५।३२।१ यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ।।
२५।३४।१ यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्भूम्यामाश्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ।।
२५।३७।१ मा त्वाऽग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ।।
२५।३८।१ निक्रमणं निषदनं विवर्तनं यच्च पड्वीशमर्वतः ।
यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ।।
२५।३९।१ यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
सन्दानमर्वन्तं पड्वीशं प्रिया देवेष्वा यामयन्ति ।।
२५।४४।१ न वा उ एतन्म्रियसे न रिष्यसि देवाँ२ इदेषि पथिभिः सुगेभिः ।
हरी ते युञ्जा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ।।
२५।४६।१ इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ।

।। अथ षड्विंशोऽध्याय: ।।

२६।२।१ यथेमां वाचं कल्याणीमावदानि जनेभ्य: ।
ब्रह्मराजन्याभ्यांꣳ शूद्राय चार्याय च स्वाय चारणाय च ।
प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे काम: समृध्यतामुप मादो नमतु ।।

२६।१९।१ अनु वीरैरनु पुष्यास्म गोभिरन्वश्वैरनु सर्वेण पुष्टै: ।
अनु द्विपदाऽनु चतुष्पदा वयं देवा नो यज्ञमृतुथा नयन्तु ।।

२६।२०।१ अग्ने पत्नीरिहा व देवानामुशतीरुप । त्वष्टारꣳ सोमपीतये ।।

२६।२४।१ अमेव न: सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मदस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभि: सुमद्गण: ।।

।। अथ सप्तविंशोऽध्याय: ।।

२७।८।१ बृहस्पते सवितर्बोधयैनꣳ सꣳशितं चित्सन्तराꣳ सꣳशिशाधि ।
वर्धयैनं महते सौभगाय विश्व एनमनु मदन्तु देवा: ।।

२७।९।१ अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्च:
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभि: ।।

२७।१२।१ तनूनपादसुरो विश्ववेदा देवो देवेषु देव: । पथो अनक्तु मध्वा घृतेन ।।

२७।२१।१ वनस्पते व सृजा रराणस्त्मना देवेषु । अग्निर्हव्यꣳ शमिता सूदयाति ।

२७।२२।१ अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम् । विश्वे देवा हविरिदं जुषन्ताम्

२७।२५।१ आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानाꣳ समवर्ततासुरेक: कस्मै देवाय हविषा विधेम ।।

२७।२६।१ यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम् ।
यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम ।।

।। अथाष्टाविंशोऽध्याय: ।।

२८।३।१ होता यक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् ।
देवो देवै: सवीर्यो वज्रहस्त: पुरन्दरो वेत्वाज्यस्य होतर्यज ।।

२८।११।१ होता यक्षदिन्द्रꣳ स्वाहाज्यस्य स्वाहा मेदसः स्वाहा स्तोकानाꣳ स्वाहा - स्वाहाकृतीनाꣳ स्वाहा हव्यसूक्तीनाम् । स्वाहा देवा आज्यपा जुषाणा इन्द्र आज्यस्य व्यन्तु होतर्यज ।।

२८।१२।१ देवं बर्हिरिन्द्रꣳ सुदेवं देवैर्वीरवत्स्तीर्णं वेद्यामवर्धयत् ।
वस्तोर्वृतं प्राक्तोर्भृतꣳ राया बर्हिष्मतो त्यगाद्वसुवने वसुधेयस्य वेतु यज ।।

२८।२०।१ देवो देवैर्वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रमवर्धयत् ।
दिवमग्रेणास्पृक्षदान्तरिक्षं पृथिवीमदृꣳहीद्वसुवने वसुधेयस्य वेतु यज ।।

२८।३०।१ होता यक्षत्प्रचेतसा देवानामुत्तमं यशो होतारा दैव्या कवी सयुजेन्द्रं वयोधसम्।
जगतीं छन्द इन्द्रियमनड्वाहं गां वयो दधद्वीतामाज्यस्य होतर्यज ।।

।। अथैकोनत्रिंशोऽध्यायः ।।

२९।१।१ समिद्धो अञ्जन् कृदरं मतीनां घृतमग्ने मधुमत्पिन्वमानः ।
वाजी वहन् वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम् ।।

२९।२।१ घृतेनाञ्जन्त्सं पथो देवयानान् प्रजानन् वाज्यप्येतु देवान् ।
अनु त्वा सप्ते प्रदिशः सचन्ताꣳ स्वधामस्मै यजमानाय धेहि ।।

२९।३।१ ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते ।
अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ।।

२९।४।१ स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् ।
देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ।।

२९।१०।१ अश्वो घृतेन त्मन्या समक्त उप देवाँ२ ऋतुशः पाथ एतु ।
वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ।

२९।११।१ प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ।।

२९।१६।१ अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम् ।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ।।

२९।२०।१ हिरण्यशृङ्गो यो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इदस्य हविरद्यमायन् यो अर्वन्तं प्रथमो अध्यतिष्ठत् ।।

२९।२४।१ उप प्रागात्परमं यत्सधस्थमर्वाँ२ अच्छा पितरं मातरं च ।
अद्या देवाञ्जुष्टतमो हि गम्या अथा शास्ते दाशुषे वार्याणि ।।

२६।२५।१ समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ।।
२६।२७।१ नराशꣳसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियन्धाः स्वदन्ति देवा उभयानि हव्या ।।
२६।२८।१ आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ।।
२६।२६।१ प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्ने अन्हाम् ।
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्यानम् ।।
२६।३०।१ व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ।।
२६।३५।१ उपावसृज त्मन्या समञ्जन् देवानां पाथ ऋतुथा हवीꣳषि ।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ।।
२६।३६।१ सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत् पुरोगाः ।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतꣳ हविरदन्तु देवाः ।।
२६।५५।१ उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ।।
२६।५८।१ आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः
शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कल्माष
ऐन्द्राग्नः सꣳहितोऽधोरामः सावित्रो वारुणः कृष्ण एकशितिपात्पेत्वः ।
२६।५६।१ अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी
वैश्वदेवौ पिशङ्गौ तूपरौ मारुतः कल्माष आग्नेयः कृष्णोऽजः सारस्वती
मेषी वारुणः पेत्वः ।।
२६।६०।१ अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय
बार्हतायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो
द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशाभ्यां वैराजाभ्यां
पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय चरुः सवित्र औष्णिहाय
त्रयस्त्रिꣳशाय रैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै
चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्या अष्टाकपालः ।।

।। अथ त्रिंशो ऽध्याय: ।।

३०।१२।५ देवलोकाय पेशितारं ।

--

।। अथैकत्रिंशोऽध्याय: ।।

३१।६।१ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रत: । तेन देवा अयजन्त साध्या -
ऋषयश्च ये ।।

३१।१४।१ यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्म: -
शरद्धवि: ।।

३१।१५।१ सप्तास्यासन् परिधयस्त्रि: सप्त समिध: कृता: । देवा यद्यज्ञं तन्वाना -
अबध्नन् पुरुषं पशुम् ।।

३१।१६।१ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमान: सचन्त यत्र पूर्वे साध्या: सन्ति देवा: ।।

३१।२०।१ यो देवेभ्य आतपति यो देवानां पुरोहित:।पूर्वो यो देवेभ्यो जातो नमो रुचाय -
ब्राह्मये ।।

३१।२१।१ रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा -
असन् वशे ।।

।। अथ द्वात्रिंशोऽध्याय: ।।

३२।१०।१ स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त ।।

३२।१६।१ इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ।।

।। अथ त्रयस्त्रिंशोऽध्याय: ।।

३३।३।१ यजा नो मित्रावरुणा यजा देवाँ२ ऋतं बृहत् । अग्ने यक्षि स्वं दमम् ।।

३३।१५।१ श्रुधि श्रुत्कर्ण वन्हिभिर्देवैरग्ने सयावभि: ।
आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् ।

३३।१६।१ विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् ।
अग्निर्देवानामव आवृणान: सुमृडीको भवतु जातवेदा: ।।

३३।१७।१ महो अग्ने: समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितु: सवीमनि तद्देवानामवो अद्या वृणीमहे ।।

३३।२६।१ इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवास: शवसामदन्ननु ।।

३३।४०।१ बट् सूर्य श्रवसा महाँ२ असि सत्रा देवा महाँ२ असि ।
मन्हा देवानामसुर्य: पुरोहितो विभु ज्योतिरदाभ्यम् ।।

३३।४२।१ अद्या देवा उदिता सूर्यस्य निरꣳहस: पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदिति: सिन्धु: पृथिवी उत द्यौ: ।।

३३।४८।१ अग्न इन्द्र वरुण मित्र देवा: शर्ध: प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अध ग्ना: पूषा भग: सरस्वती जुषन्त ।।

३३।५०।१ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषा: ।
य: शꣳसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ२ अवन्तु देवा: ।।

३३।५१।१ अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्रा: ।।

३३।५२।१ विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नय: समिद्धा: ।
विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ।।

३३।५३।१ विश्वे देवा: शृणुतेमꣳ हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ।।

३३।५४।१ देवेभ्यो हि प्रथमं यज्ञियेभ्यो ऽमृतत्वꣳ सुवसि भागमुत्तमम् ।।

३३।६०।१ नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर एतारमग्ने: ।
एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवा: ।।

३३।६२।१ उपास्मै गायता नर: पवमानायेन्दवे । अभि देवाँ२ इयक्षते ।।

३३।६८।१ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्त: ।
आ वो ऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासत् ।।

३३।८९ प्रैतु ब्रह्मणस्पति: प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं-
नयन्तु न ।।

३३।९१ देवं देवं वो ऽवसे देवं देवमभिष्टये । देवं-देवꣳ हुवेम वाजसातये गृणन्तो देव्या
धिया ।।

३३।९४ देवासो हि ष्मा मनवे समन्यवो विश्वे साकꣳ सरातय: ।
ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोविद: ।।

॥ अथ चतुस्त्रिंशोऽध्यायः ॥

३४।६।१ अनु नो द्यानुमतिर्यज्ञं देवेषु मन्यताम् । अग्निश्च हव्यवाहनो भवतं दाशुषे मयः॥

३४।१०।१ सिनीवालि पृथुष्टुके या देवानामसि स्वसा । जुषस्व हव्यमाहुतं प्रजां देवि - दिदिड्ढि नः ॥

३४।१२।१ त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा ।
तव व्रते कवयो विद्मनापसो जायन्त मरुतो भ्राजदृष्टयः ॥

३४।३७।१ उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदिता मघवन्त्सूर्यस्य वयं देवानाꣳ सुमतौ स्याम ॥

३४।३८।१ भग एव भगवाँ२ अस्तु देवास्तेन वयं भगवन्तः स्याम ।
तं त्वा भग सर्व इज्जोहवीति स नो भग पुर एता भवेह ॥

३४।४७।१ आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना ।
प्रायुस्तारिष्टं नी रपाꣳसि मृक्षतꣳ सेधतं द्वेषो भवतꣳ सचाभुवा ॥

३४।५१।१ न तद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमज' ह्येतत् ।
यो बिभर्ति दाक्षायणꣳ हिरण्यꣳस देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥

३४।५३।१ उत नो हिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु ॥

३४।५७।१ प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकाꣳसि चक्रिरे ॥

३४।५८।१ ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥

॥ अथ पञ्चत्रिंशोऽध्यायः ॥

३५।७।१ परं मृत्यो अनु परेहि पन्थां यस्ते अन्य इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् ॥

३५।१३।१ अनड्वाहमन्वारभामहे सौरभेय' स्वस्तये । स न इन्द्र इव देवेभ्यो वन्हिः सन्तारणो - भव ॥

३५।१८।१ परीमे गामनेषत पर्यग्निमहृषत । देवेष्वक्रत श्रवः क इमाँ२ आ दधर्षति ॥

३५।१९।१ क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥

।।अथ षट्त्रिंशोऽध्याय: ।।

३६।१७।१ वन द्यौ: शान्तिरन्तरिक्ष शान्ति: पृथिवी शान्तिराप: शान्तिरोषधय: - शान्ति: ।।

वनस्पतय: शान्तिर्विश्वे देवा: शान्तिर्ब्रह्म शान्ति: सर्वं

शान्ति: शान्तिरेव शान्ति: सा मा शान्तिरेधि ।।

।। अथ सप्तत्रिंशोऽध्याय: ।।

३७।७।१ प्रैतु ब्रह्मणस्पति: प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु न:

३७।१४।१ गर्भो देवानां पिता मतीनां पति: प्रजानाम्।सं देवो देवेन सवित्रा गत सं सूर्येण - रोचते ।।

३७।१६।१ धर्ता दिवो वि भाति तपसस्पृथिव्यां धर्ता देवो देवानाममर्त्यस्तपोजा: ।

वाचमस्मे नि यच्छ देवायुवम् ।।

३७।१८।१ विश्वासां भुवां पते विश्वस्य मनसस्पते विश्वस्य वचसस्पते सर्वस्य वचसस्पते ।

देवश्रुत्वं देव धर्म देवो देवान् पाह्यत्र प्रावीरनु वां देववीतये ।

मधु माध्वीभ्यां मधु माधूचीभ्याम् ।।

।। अथाष्टात्रिंशोऽध्याय: ।।

३८।८।५ बृहस्पतये त्वा विश्वदेव्यावते स्वाहा ।।

३८।१०।१ विश्वा आशा दक्षिणसद्विश्वान् देवानयाडिह।स्वाहाकृतस्य घर्मस्य मधो पिबतमश्विना

३८।१५।६ स्वाहा विश्वेभ्यो देवेभ्य: ।।

।। अथैकोनचत्वारिंशोऽध्याय: ।।

३९।५।३ वैश्वदेव: स सन्नो ।

३९।६।१२ विश्वे देवा द्वादशे ।

३९।१३।६ विश्वेभ्यो देवेभ्य: स्वाहा ।

।। अथ चत्वारिंशो ध्याय: ।।

४०।४।१ अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्शत् ।

तद्धावतो न्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ।।

४०।१६।१ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ।।

॥ श्रीः ॥

शुक्ल यजुर्वेदीय काण्व संहितायां

विश्वेदेवाः

॥ प्रथमोऽध्यायः ॥

अध्याय मन्त्र

१ । १२ देवानामसि सस्नितमं वन्हितमं पप्रितमं जुष्टतमं देवहूतमम् ।
अह्रुतमसि हविर्धानं दृंहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ॥

१।२३ बृहन् ग्रावासि वानस्पत्यः स इदं देवेभ्यः । हव्यंशमीष्व सुशमी शमीष्व हविष्कृदेहि।

१।३५ वेदोसि वेद येन त्वं देव वेद देवेभ्यो वेदोऽभवः। तेन मह्यं वेदो भव ॥

१।४० देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आददे ध्वरकृतं देवेभ्यः।
इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजाः । वायुरसि तिग्मतेजा द्विषतो वधः

१।४६ तेजो सि शुक्रमस्यमृतमसि धाम नामासि । प्रियं देवानामनाधृष्टं देवयजनम् ॥

१।५० यस्ते प्राणः पशुषु प्रविष्टो देवानां विष्ठामनु यो वितस्थे ।
आत्मन्वान्त्सोमघृतवान्हि भूत्वाग्निं गच्छ स्वर्यजमानाय विन्द ॥

॥ द्वितीयोऽध्यायः ॥

२।२ अदित्यै व्युन्दनमसि विष्णो स्तुपो सि । ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यः

२।७ ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यः।आ त्वा वसवो रुद्रा आदित्याः सदन्तु।

२।१०,११ अग्ने वाजजिद्वाजं त्वा सरिष्यन्तं वाजजितंसम्मार्ज्मि ।
नमो देवेभ्यः स्वधा पितृभ्यः सुयमे मे भूयास्तम् ॥
अस्कन्नमद्याज्यं देवेभ्यः संभ्रियासम् । अङ्घ्रिणा विष्णो मा त्वावक्रमिषम् ॥

२।१४ स्विष्टकृद्देवेभ्य इन्द्र आज्येन हविषा भूत् स्वाहा । सं ज्योतिषा ज्योतिः ॥

२।२० म मनो गायत्र्यै गायत्री त्रिष्टुभे त्रिष्टुब्जगत्यै जगत्यनुष्टुभे ।
अनुष्टुप्प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यः ॥

२।२१ बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणाम् । भूर्भुवः स्वर्निरस्तः पाप्मेदमहं बृहस्पतेः सदसि सीदामि।।

२।२६ मनोज्योतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोतु ।
अरिष्टं यज्ञँ समिमं दधातु विश्वे देवास इह मादयन्तामों प्रतिष्ठ ।।

२।३५ सँ स्रवभागा स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयश्च देवाः ।
इमां वाचमभि विश्वे गृणन्त आसद्यास्मिन् बर्हिषि मादयध्वँ स्वाहा वाट्
घृताची स्थो धुर्यौ पातँ सुम्ने स्थः सुम्ने मां धत्तम् ।।

२।३६ देवा गातुविदो गातुमित्वा गातुमित । मनसस्पत इमं देव यज्ञँ स्वाहा वाते धाः ।।

२।४० संबर्हिरङ्क्ताँ हविषा घृतेन समादित्यैर्वसुभिः सं मरुद्भिः ।
समिन्द्रो विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत् स्वाहा ।।

।। तृतीयोऽध्यायः ।।

३।५५,५६ अक्रन् कर्म कर्मकृतः सह वाचा मयो भुवा । देवेभ्यः कर्म कृत्वास्तं प्रेत सचाभुवः ।।
अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ।

३।७१ वाजिनां वाजोऽवतु मद्यो अस्मान् रेतः सिक्तममृतं बलाय ।
विश्वे देवा अभि यत् संबभूवुस्तन्मा धिनोतु प्रजया धनेन ।।

३।७४ कश्यपस्य त्र्यायुषं जमदग्नेस्त्र्यायुषम् । यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम् ।।

।। चतुर्थोऽध्यायः ।।

४।१ एदमगन्म देवयजनं पृथिव्या यत्र देवासो अजुषन्त विश्वे ।
ऋक्सामाभ्याँ सन्तरन्तो यजुर्भी रायस्पोषेण समिषा मदेम ।।

४।६ आ वो देवास ईमहे वामं प्रयत्यध्वरे । आ वो देवास आशिषो यज्ञियासो हवामहे।।

४।१६ ये देवा मनोजाता मनोयुजो दक्षक्रतवः । ते नोऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ।

४।२४ तस्यास्ते सत्यसवसः प्रसवे तनूयन्त्रमशीय स्वाहा ।
चन्द्रमसि शुक्रमस्यमृतमसि वैश्वदेवमसि ।।

।। पञ्चमोऽध्यायः ।।

५।६ अनाधृष्टमस्यनाधृष्यं देवानामोजः । अनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यम् ।।
५।१४ विदेरग्नेर्नभो नामाग्ने अङ्गिरः आयुना नाम्नेहि ।
योऽस्यां पृथिव्यामसि यत्तेनाधृष्टं नाम यज्ञियं तेन त्वा दधे ।
विदेरग्नेर्नभो नामाग्ने अङ्गिरः आयुना नाम्नेहि ।
यो द्वितियस्यां पृथिव्यामसि यत्तेनाधृष्टं नाम यज्ञियं तेन त्वा दधे ।
विदेरग्नेर्नभो नामाग्ने अङ्गिरः आयुना नाम्नेहि ।
यस्तृतीयस्यां पृथिव्यामसि यत्तेनाधृष्टं नाम यज्ञियं तेन त्वा दधे ।
अनु त्वा देववीतये सिँह्यसि सपत्नसाही देवेभ्यः कल्पस्व सिँह्यसि
सपत्नसाही देवेभ्यः शुन्धस्व सिँह्यसि सपत्नसाही देवेभ्यः शुम्भस्व ।।
५।१७ सिँह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहा सिँह्यसि सुप्रजावनी रायस्पोषवनिः स्वाहा ।
सिँह्यस्यावह देवान्यजमानाय स्वाहा भूतेभ्यस्त्वा ।।
५।२२ देवश्रुतौ देवेष्वाघोषतम् । प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम्।।
५।२८ बृहन्नसि बृहद्रवा बृहतीमिन्द्राय वाचं वद । रक्षोहणं वलगहनं वैष्णवीम् ।।
५।३८ इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवोऽसि । ऐन्द्रमसि वैश्वदेवमसि ।।
५।४४ ज्योतिरसि विश्वरूपं विश्वेषां देवानाँ समित् । त्वँ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः ।
उरु यन्तासि वरूथं स्वाहा । जुषाणो अप्तुराज्यस्य वेतु स्वाहा।।
५।५३ तं त्वा जुषामहे देव वनस्पते देवयज्यायै । देवास्त्वा देवयज्यायै जुषन्तां विष्णवे त्वा।

।। षष्ठोऽध्याय: ।।

६।८ उपावीरस्युप देवान् दैवीर्विश: प्रागुरुशिजो वन्हितमान् ।
देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् ।।

६।१५ वर्षो वर्षीयसि यज्ञे यज्ञपतिं धा: । स्वाहा देवेभ्यो देवेभ्य: स्वाहा ।
माहिर्भूर्मा पृदाकु: ।।

६।१७ देवीराप: शुद्धा वोढ्वँ सुपरिविष्टा देवेषु । सुपरिविष्टा वयं परिवेष्टारो भुयास्म।

६।३४ अग्नेर्वोऽपन्नगृहस्य सदसि सादयामि । इन्द्राग्न्योर्भागधेयी स्थ मित्रावरुणयोर्भागधेयी स्थ ।

६।३६ हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा।ऊर्ध्वो अध्वरं दिवि देवेषु होत्रा यच्छ ।।

६।४० तं देवेभ्यो देवत्रा दात शुक्रपेभ्य:। येषां भाग स्थ स्वाहा ।।

।। सप्तमोऽध्याय: ।।

७।१,२,३ वाचस्पतये पवस्व वृष्णो अँशुभ्यां गभस्तिपूत: ।
देवो देवेभ्य: पवस्व येषां भागोऽसि मधुमतीर्नं इषस्कृधि ।।
यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा ।
स्वाहोर्वन्तरिक्षमन्वेमि स्वाङ्०कृतोऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्य:पार्थिवेभ्य:
मनस्त्वाष्टु स्वाहा त्वा स्वभव: सूर्याय । देवेभ्यस्त्वा मरीचिपेभ्यो देवाँशो यस्मैत्वे
सत्सत्यमुपरिप्लुता भङ्०गेन हतोसो फट् । प्राणाय त्वा व्यानाय त्वा ।।

७।५ अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम् ।
सजूर्देवेभिरवरै: परैश्चान्तर्यामे मघवन् मादयस्व ।
स्वाहोर्वन्तरिक्षमन्वेमि स्वाङ्०कृतो सि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्य: पार्थिवे
मनस्त्वाष्टु स्वाहा त्वा स्वभव: सूर्याय। देवेभ्यस्त्वा मरीचिपेभ्य उदानाय त्वा ।।

७।६ तां धेनुं मित्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीम् । एष ते योनिर्ऋतायुभ्यां त्वा

७।१७ एष ते योनि: प्रजा: पाह्यपमृष्टो मर्को देवास्त्वा मन्थिपा: प्रणयन्त्वनाधृष्टासि।
सुप्रजा: प्रजा: प्रजनयन् परीह्यभि रायस्पोषेण यजमानम् ।
संजग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा निरस्तो मर्को मन्थिनोऽधिष्ठानमसि।

७।२० ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ।।

७।२३ अस्मै ब्रह्मणे पवतेऽस्मै क्षत्राय पवतेऽस्मै सुन्वते यजमानाय पवते ।
इष ऊर्जे पवते ऽद्भ्य ओषधीभ्य: पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते ब्रह्मवर्चसाय-पवते ।
विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य: ।।

७।२५ देवेभ्यस्त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्राग्निभ्यां त्वा देवायुवं गृह्णामि-यज्ञस्यायुषे ।
इन्द्राय त्वा देवायुवं गृ ह्णामि यज्ञस्यायुष इन्द्राग्निभ्यां त्वा देवायुवं गृह्णामि-यज्ञस्यायुषे ।
इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्रावरुणाभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे ।
इन्द्राबृहस्पतिभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्राविष्णुभ्यां
त्वा देवायुवं गृह्णामि यज्ञस्यायुषे ।।

७।२६ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविँ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवा: ।।

७।२६ यस्ते द्रप्स स्कन्दति यस्ते अँशुर्ग्रावच्युतो धिषणयोरुपस्थात् ।
अध्वर्योर्वा परि वा य: पवित्रात्तं ते जुहोमि मनसा ।।
वषट्कृतँ स्वाहा देवानामुत्क्रमणमसि ।।

७।३३,३४ उपयामगृहीतो सि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य: ।।

विश्वे देवास आगत शृणुता म इमँ हवम् । एदं बर्हिर्निषीदत ।
उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य: ।।

।। अष्टमोऽध्याय: ।।

८।३ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्त: ।
आ वो र्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वा ।
विवस्वाँ३ आदित्यैष ते सोमपीथस्तस्मिन् मत्स्व ।।

८।७ उपयामगृहीतो सि सुशर्मासि सुप्रतिष्ठानो बृहदुक्षाय नम: ।
विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य: ।।

८।९ अहं परस्तादहमवस्ताद्यदन्तरिक्षं तदु मे पितास ।
अहꣳसूर्यमुभयतो ददर्शाहं देवानां परमं गुहा यत्

८।२९ उपयामगृहीतो स्यग्नये त्वा गायत्रछन्दसं गृह्णामीन्द्राय त्वा त्रिष्टुप्छन्दसं गृह्णामि
विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसं गृह्णाम्यनुष्टुप्तेऽभिगर: ।।

८।३२ उशिक् त्वं देव सोमाग्ने: प्रियं पाथोऽपीहि वशी त्वं देव सोमेन्द्रस्य प्रियं -
पाथोऽपीहि ।
अस्मत्सखा त्वं देव सोम विश्वेषां देवानां प्रियं पाथोऽपीहि ।।

।। नवमोऽध्याय: ।।

९।३ आत्मने मे वर्चोदा वर्चसे पवस्वौजसे मे वर्चोदा वर्चसे पवस्वायुषे मे वर्चोदा वर्चसे -
पवस्व ।
विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथाम् ।।

९।१५ समिन्द्र णो मनसा नेषि गोभि: सꣳसूरिभिर्मघवन्त्सꣳस्वस्त्या ।
सं ब्रह्मणा देवकृतं यदस्ति सं देवानाꣳसुमतौ यज्ञियानाम् ।।

९।१८,१९ सुगा वो देवा: सदना अकर्म य आजग्मेदꣳसवनं जुषाणा: ।
भरमाणा वहमाना हवीꣳष्यस्मे धत्त वसवो वसूनि ।।
याँ ३ आवह उशतो देव देवाꣳस्तान्प्रेरय स्वे अग्ने सधस्थे ।
जक्षिवाꣳस: पपिवाꣳसश्च विश्वे सुं घर्मꣳस्वरातिष्ठतानु ।।

६।२१ देवा गातुविदो गातुमित्वा गातुमित । मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः ।।

६।२६ देवीराप एष वो गर्भस्तꣳ सुप्रीतꣳसुभृतं बिभृत ।
देव सोमैष ते लोकः परि च वक्षि शं च वक्षि । अवभृत निचुम्पुण निचेरुरसि -
निचुम्पुण ।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ।
देवानाꣳ समिदसि ।।

६।३३ हव्ये काम्य इळे रन्ते चन्द्रे ज्योतेऽदिते सरस्वति महि विश्रुति ।
एता ते अघ्न्ये नामानि देवेषु मा सुकृतं ब्रूतात् ।।
अगन्म ज्योतिरमृता अभूम दिवं पृथिव्या अध्यारुहाम ।
अविदाम देवान्त्स्वर्ज्योतिः ।।

६।४१ अग्निराग्नीध्र इन्द्रो हविर्धाने । अथर्वोपावह्रियमाणो विश्वे देवा अꣳशुषु -
न्युप्यमानेषु ।।

६।४३ शुक्रः क्षीरश्रीर्मन्थी सक्तुश्रीः । विश्वे देवाश्चमसेषून्नीतोऽसुर्होमायोद्यतः ।।

६।४६ देवान् दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु
पितॄन् पृथिवीमगन्यज्ञः ततो मा द्रविणमष्टु यं कं च
लोकमगन्यज्ञस्ततो मे भद्रमभूत् ।।

।। दशमोऽध्यायः ।।

१०।२६ जाय एहि स्वो रोहाव । प्रजापतेः प्रजा अभूम स्वर्देवा अगन्मामृता अभूम ।।

१०।४२ इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जेषं विश्वे ।
देवा द्वादशाक्षरेण जगतीमुदजयꣳस्तामुज्जेषम् ।।

।। एकादशोऽध्याय: ।।

११।१।१,२ एष ते निर्ऋते भागस्तं जुषस्व स्वाहा ग्निनेत्रेभ्यो देवेभ्य: पुर: सम्दय: स्वाहा
यमनेत्रेभ्यो देवेभ्यो दक्षिणसम्दय: स्वाहा ।
विश्वदेवनेत्रेभ्यो देवेभ्य: पश्चात्सम्दय: स्वाहा मित्रावरुणनेत्रेभ्यो
वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरसम्दय: स्वाहा ।
सोमनेत्रेभ्यो देवेभ्य उपरिसम्दयो दुवस्वम्दय: स्वाहा ।।
ये देवा अग्निनेत्रा: पुर: सदस्तेभ्य: स्वाहा ये देवा यमनेत्रा दक्षिणसदस्तेभ्य: स्वाहा
ये देवा विश्वदेवनेत्रा: पश्चात्सदस्तेभ्य: स्वाहा ये देवा
मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरसदस्तेभ्य: स्वाहा ।
ये देवा: सोमनेत्रा उपरिसदो दुवस्वन्तस्तेभ्य: स्वाहा ।।

११।१० इमं देवा असपत्नँ सुवध्वं महते क्षत्राय महते ज्येष्ठयाय ।
इमममुममुष्य पुत्रममुष्या: पुत्रस्यै विशे ।।

।। द्वादशोऽध्याय: ।।

१२।३ युक्त्वाय सविता देवान्त्स्वर्यतो धिया दिवम् ।
बृहज्ज्योति: करिष्यत: सविता प्रसुवाति तान् ।।

१२।६ यस्य प्रयाणमन्वन्य ययुर्देवा देवस्य महिमानमोजसा ।
य:पार्थिवानि विममे स स्तशो रजाँसि देव: सविता महित्वना ।।

१२।६२,६३ अदितिष्ट्वा देवी विश्वदेव्यावती । पृथिव्या: सधस्थे अङ्गिरस्वत् खनत्ववट ।।
देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावती:।पृथिव्या: सधस्थे अङ्गिरस्वद्दधतूखे ।
धिषणास्त्वा देवीर्विश्वदेव्यावती: । पृथिव्या: सधस्थे अङ्गिरस्वदभीन्धतामुखे ।
वरूत्रीष्ट्वा देवीर्विश्वदेव्यावती: । पृथिव्या: सधस्थे अङ्गिरस्वच्छ्रपयन्तूखे ।
ग्नास्त्वा देवीर्विश्वदेव्यावती: । पृथिव्या: सधस्थे अङ्गिरस्वत्पचन्तूखे ।
जनयस्त्वाछिन्नपत्रा देवीर्विश्वदेव्यावती: । पृथिव्या: सधस्थे अङ्गिरस्वत्पचन्तूखे।

१२।७० दृ॑ंहस्व देवि पृथिवि स्वस्तय आसुरी माया स्वधया कृतासि ।
जुष्टं देवेभ्य इदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन् ।।

।। त्रयोदशोऽध्याय: ।।

१३।२ नक्तोषासा समनसा विरूपे धापयेते शिशुमेक॑ं समीची ।
द्यावाक्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन्द्रविणोदा: ।।

१३।५६ ता अस्य सूददोहस: सोम॑ं श्रीणन्ति पृश्नय: । जन्मन्देवानां विशस्त्रिष्वा रोचने -
दिव: ।।

१३।६२ मातेव पुत्रं पृथिवी पुरीष्यमग्नि॑ं स्वे योना अभारुखा ।
तां विश्वैर्देवैर्ऋतुभि: संविदान: प्रजापतिर्विश्वकर्मा विमुञ्चतु ।।

१३।६८ सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् । धीरा देवेषु सुम्नया ।।

१३।७१ घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमता मरुद्भि:।
ऊर्जस्वती पयसा पिन्वमानास्मान्त्सीते पयसाभ्याववृत्स्व ।।

१३।१०३ अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियम् । यद्देवेभ्यो भरामसि ।।

।। चतुर्दशोऽध्याय: ।।

१४।२३ या वो देवा: सूर्ये रुचो गोष्वश्वेषु या रुच: ।
इन्द्राग्नी ताभि: सर्वाभी रुचं नो धत्त बृहस्पते ।।

१४।२६ वासन्तिका ऋतू अभिकल्पमाना इन्द्रमिव
देवा अभिसंविशन्तु तथा देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ।।

१४।५३ अजो ह्यग्नेरजनिष्ट शोकात्सो अपश्यज्जनितारमग्रे ।
तेन देवा देवतामग्रमाय॑ंस्तेन रोहमायन्नुप मेध्यास: ।
शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ।
शरभं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ।।

।। पन्चदशोऽध्याय: ।।

१५।३,४,५ स्वैर्दक्षैर्दक्षपितेह सीद देवाना ँ सुम्ने बृहते रणाय ।

पितेवैधि सूनव आ सुशेवा स्वावेशा तन्वा संविशस्वाश्विनाध्वर्यू सादयतामिह त्वा

पृथिव्या: पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवा: ।

स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्वाश्विनाध्वर्यू सादयतामिह - त्वा ।।

अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीं विष्टम्भनीं दिशामधिपत्नीं - भुवनानाम् ।

ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाध्वर्यू सादयतामिह त्वा ।

शुक्रश्च शुचिश्च ग्रैष्मा ऋतू अग्नेरन्त: श्लोषे सि ।

कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधय: कल्पन्तामग्नय: पृथङ्मम - ज्यैष्ठ्याय सव्रता: ।

ये अग्नय: समनसो न्तरा द्यावापृथिवी इमे ।

ग्रैष्मा ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु

तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ।।

१५।३१ यवानां भागोऽस्ययवानामाधिपत्यं प्रजा स्पृताश्चतुश्चत्वारिँ श स्तोम: ।

ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूत ँ स्पृतं त्रयस्त्रिँ श स्तोम:

सहश्च सहस्यश्च हैमन्तिका ऋतू अग्नेरन्त: श्लेषो सि ।

कल्पेतां द्यावपृथिवी कल्पन्तामाप ओषधय: कल्पन्तामग्नय: पृथङ् मम - ज्यैष्ठ्याय सव्रता: ।

ये अग्नय: समनसो न्तरा द्यावापृथिवी इमे ।

हैमन्तिका ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु

तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ।।

।। षोडशोऽध्यायः ।।

१६।३ अग्ने पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व ।।

१६।२८-३० अधिपत्न्यसि बृहती दिग्विश्वे ते देवा अधिपतयः ।
बृहस्पतिर्हेतीनां प्रतिधर्ता ।।
त्रिणवत्रयस्त्रिँ शौ त्वा स्तोमौ पृथिव्याँ श्रयतां वैश्वदेवाग्निमारुते उक्थे -
अव्यथायै स्तम्भीताम् । शाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्षे ।।
ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु ।
विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य
पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ।।

१६।७२ तं पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः ।
नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधिरोचने दिवः ।।

१६।७६ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सँ सृजेथामयं च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ।।

१६।८१ ता अस्य सूददोहसः सोमँ श्रीणान्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वारोचने दिवः ।।

।। सप्तदशोऽध्यायः ।।

(मुद्रभागः) नास्ति

--

।। अष्टादशोऽध्यायः ।।

१८।६,१० अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान्वक्षि यक्षि च ।।
स नः पावक दीदिवोऽग्ने देवाँ ३ इहावह । उप यज्ञँ हविश्च नः ।।

१८।१३ ये देवा देवानां यज्ञिया यज्ञियानाँ संवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य ।।

१८।१४ ये देवा देवेष्वधि देवत्वमायन्ये ब्रह्मणः पुर स्तारो अस्य ।
येभ्यो न ऋते पवते धाम किञ्चन न ते दिवो न पृथिव्या अधि स्नुषु ।।

१८।२७ यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तँ संप्रश्नं भुवना यन्त्यन्या ।।

१८।२९,३० परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
कँ स्विद् गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त पूर्वे ।।
तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभा अध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः ।।

१८।४१ इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताँ शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ।।

१८।४३ अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ३ उ देवा अवता हवेषु ।।

१८।४९ मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानुवस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ।।

१८।५१-५३

इन्द्रेमं प्रतरां नय सजातानामसद्वशी । समेनं वर्चसा सृज देवानां भागदा असत् ।।
यस्य कुर्मो गृहे हविस्तमग्ने वर्धया त्वम् । तस्मै देवा अधिब्रुवन्नयं च ब्रह्मणस्पतिः ।।
उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवस्त्वं सुप्रतीको विभावसुः ।।

१८।५५,५६ समिद्धे अग्ना अधि मामहान उक्थपत्र ईड्यो गृभीतः ।
तप्तं घर्मं परिगृह्यायजन्तोर्जा यद्यज्ञमयजन्त देवाः ।।
दैव्याय धर्त्रे जोष्ट्रे देवश्रीः श्रीमणाः शतपयाः ।
परिगृह्य देवा यज्ञमायन् देवा देवेभ्यो अध्वर्यन्तो अस्थुः ।।

१८।६२

देवहूर्यज्ञ आ च वक्षत्सुम्नहूर्यज्ञ आ च वक्षत् । यक्षदग्निर्देवो देवाँ३ आ च वक्षत् ।।

१८।६४ उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ।
अधा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम् ।।

१८।७० नक्तोषासा समनसा विरूपे धापयेते शिशुमेकँ समीची ।
द्यावाक्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन् द्रविणोदाः ।।

१८।७३ आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वं योनिमासीद साधुया ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ।।

१८।७८ चित्तिं जुहोमि मनसा घृतेन यथा देवा इहागमन्वीतिहोत्रा ऋतावृधः ।
पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे विश्वाहादाभ्यँ हविः ।।

।। एकोनविंशोऽध्यायः ।।

१९।४३ स्तोमश्च यजुश्च ऋक् च साम च बृहच्च रथन्तरं च ।
स्वर्देवा अगन्मामृता अभूम प्रजापतेः प्रजा अभूम वेट् स्वाहा ।।

।। विंशोऽध्यायः ।।

२०।२,३,४,५ विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसागमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ।।
वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः । वाजो नो विश्वैर्देवैर्धनसाताविहावतु ।।
वाजो नो अद्य प्रसुवाति दानं वाजो देवाँ३ ऋतुभिः कल्पयाति ।
वाजो हि मा सर्ववीरं चकार सर्वा आशा वाजपतिर्भवेयम् ।।
वाजः पुरस्तादुत मध्यतो नो वाजो देवान् हविषा वर्धयाति ।
वाजो हि मा सर्ववीरं चकार विश्वा आशा वाजपतिर्जयेयम् ।।

२०।१७ या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ।।

२०।३०,३१ सं जानाथ परमे व्योमन्देवाः सधस्था विद रूपमस्य ।
यदागच्छात्पथिभिर्देवयानैरिष्टापूर्ते कृणवथाविरस्मै ।।
उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सँ सृजेथामयं च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ।।

२०।४४,४५ वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने ।।
धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः ।
सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः शुभे ।।

।। एकविंशोऽध्यायः ।।

२१।१२ देवा यज्ञमतन्वत भेषजं भिषजाश्विना ।
वाचा सरस्वती भिषागिन्द्रायेन्द्रियाणि दधतः ।।
२१।२६ अश्विभ्यां प्रातः सवनमिन्द्रेणैन्द्रं माध्यंदिनम् ।
वैश्वदेवं सरस्वत्या तृतीयमाप्तँ सवनम् ।।

२१।४१

पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।।

२१।४६,४७ वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ।
तया मदन्तः सधमादेषु वयं स्याम पतयो रयीणाम् ।।
ये समानाः समनसः पितरो यमराज्ये ।
तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ।।
२१।४८ द्वे सृती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ।।

२१।५२ त्वँ सोम प्रचिकितो मनीषा त्वँ रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ।।

२१।१०३ त्रया देवा एकादश त्रयस्त्रिँशाः सुराधसः ।
बृहस्पतिपुरोहिता देवस्य सवितुः सवे । देवा देवैरवन्तु मा ।।

।। द्वाविंशोऽध्यायः ।।

२२।६

यद्देवा देवहेळनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वँ हसः ।।

२२।१०

यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह । तं लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ।।

२२।३१ स्तोकानामिन्दुं प्रति शूर इन्द्रो वृषायमाणो वृषभस्तुराषाट् ।
घृतप्रुषा मनसा मोदमानाः स्वाहा देवा अमृता मादयन्ताम् ।।

।। त्रयोविंशोऽध्यायः ।।

२३।१८

उषे यह्वी सुपेशसा विश्वे देवा अमर्त्याः । त्रिष्टुप् छन्द इहेन्द्रियं पष्ठवाड् गौर्वयो दधुः ।।

२३।२४-२६

वसन्तेन ऋतुना देवा वसवस्त्रिवृता स्तुताः । रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ।।
ग्रीष्मेण ऋतुना देवा रुद्राः पञ्चदशे स्तुताः । बृहता यशसा बलँ हविरिन्द्रे वयो दधुः ।।
वर्षाभिर्ऋतुनादित्या स्तोमे सप्तदशे स्तुताः ।
वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ।।
शारदेन ऋतुना देवा एकविँश ऋभव स्तुताः ।
वैराजेन श्रिया श्रियँ हविरिन्द्रे वयो दधुः ।।
हेमन्तेन ऋतुना देवास्त्रिणवे मरुत स्तुताः । बलेन शक्वरीः सहो हविरिन्द्रे वयो दधुः ।।
शैशिरेण ऋतुना देवास्त्रयस्त्रिँशे मृता स्तुताः ।
सत्येन रेवतीः क्षत्रँ हविरिन्द्रे वयो दुधः ।।

२३।५२

देवा देवानां भिषजा होतारा इन्द्रमश्विना वषट्कारैः सरस्वती त्विषिं न हृदये मतिम्
होतृभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ।।

।। चतुर्विंशोऽध्याय: ।।

२४।३,४ अभिधा असि भुवनमसि यन्तासि धर्ता ।
स त्वमग्निं वैश्वानरं सप्रथसं गच्छ स्वाहाकृत: स्वगा त्वा देवेभ्य: ।।
प्रजापतये ब्रह्मन्नश्वं भन्त्स्यामि देवेभ्य: प्रजापतये तेन राध्यासम् ।
तं बधान देवेभ्य: प्रजापतये तेन राध्नुहि ।
२४।२१,२२ तं त्वा घृतस्न ईमहे चित्रभानो स्वर्विदम् । देवाँ२ आ वीतये वह ।।
अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे । देवाँ२ आ सादयादिह ।।
२४।२५ देवा आशापाला एतं देवेभ्यो श्वं मेधाय प्रोक्षितँ रक्षत ।
इह रन्तिरिह रमतामिह धृतिरिह स्वधृति: स्वाहा ।।

।। पञ्चविंशोऽध्याय: ।।

२५।६ भूर्भुव: स्वर्लाजी३ञ्छाचीन्३ यव्ये गव्ये ।
एतदन्नमत्त देवा एतदन्नमद्धि प्रजापते ।।
२५।१८ न वा उ एतन्म्रियसे न रिष्यसि देवाँ२ इदेषि पथिभि: सुगेभि: ।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देव: सविता दधातु ।।
२५।३१ यद्देवासो ललामगुं प्र विष्टीमिनमाविषु: ।
सक्न्था देदिश्यते नारी सत्यस्याक्षिभुवो यथा ।।
२५।३८ नार्यस्ते पत्न्यो लोम विचिन्वन्तु मनीषया ।
देवानां पत्न्यो दिश: सूचीभि: शम्यन्तु त्वा ।।

।। षड्विंशोऽध्याय: ।।

२६।६ शिल्पा वैश्वदेव्यो रोहिण्यस्त्र्यवयो वाचेऽविज्ञाता अदित्यै ।
सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्य: ।।
२६।१३ कृष्णग्रीवा आग्नेया बभ्रव: सौम्या: श्वेता वायव्या अविज्ञाता अदित्यै ।
सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्य: ।।
२६।१८

कृष्णग्रीवा आग्नेया बभ्रव: सौम्या उपध्वस्ता: सवित्रा वत्सतर्य: सारस्वत्य: श्यामा: पौष्ण
पृश्नयो मारुता बहुरूपा वैश्वदेवा वशा द्यावापृथिवीया: ।।

२६।२८ सोमाय लबानालभते त्वष्ट्रे कौलीकान्गोषादीर्देवानां पत्नीभ्यः ।
कुलीका देवजामिभ्योऽग्नये गृहपतये पारुष्णान् ।।

२६।३१ वसुभ्य ऋश्यानालभते रुद्रेभ्यो रुरूनादित्येभ्यो न्यङ्कून् ।
विश्वेभ्यो देवेभ्यः पृषतान्त्साध्येभ्यः कुलुङ्गान् ।।

२६।४४ खड्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः ।
सिँहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः ।।

।। सप्तविंशोऽध्यायः ।।

२७।८,९ इन्द्राग्न्योः पक्षतिः सरस्वत्यै निपक्षतिर्मित्रस्य तृतीया सोमस्य चतुर्थी ।
निर्ऋत्यै पञ्चम्यग्नीषोमयोः षष्ठी सर्पाणाँ सप्तमी विष्णोरष्टमी ।
पूष्णो नवमी त्वष्टुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्यै त्रयोदशी ।
द्यावापृथिव्योर्दक्षिणं पार्श्वं विश्वेषां देवानामुत्तरम् ।।

मरुताँ स्कन्धा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वितीयादित्यानां तृतीया वायोः
पुच्छमग्नीषोमयोर्भासदौ । क्रुञ्चौ श्रोणिभ्यामिन्द्राबृहस्पती ऊरुभ्यां मित्रावरुणा
अल्गाभ्यामाक्रमणँ स्थूराभ्यां बलं कुष्ठाभ्याम् ।।

२७।१८-२७ आ नो भद्राः क्रतवो यन्तु विश्वतो दब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ।।
देवानां भद्रा सुमतिर्ऋजूयतां देवानाँ रातिरभि नो निवर्तताम् ।
देवानाँ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ।।
तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्त्रिधम् ।
अर्यमणं वरुणँ सोममश्विना सरस्वती नः सुभगा मयस्करत् ।।
तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद् ग्रवाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ।।
तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ।।
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।।

पृषदश्वा मरुत: पृश्निमातर: शुभंयावानो विदथेषु जग्मय: ।
अग्निजिह्वा मनव: सूरचक्षसो विश्वे नो देवा अवसागमन्निह ।।
भद्रं कर्णेभि: शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा: ।
स्थिरैरङ्गैस्तुष्टुवा ँ सस्तनूभिर्व्यशेम देवहितं यदायु: ।।
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तो: ।।
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्र: ।
विश्वे देवा अदिति: पञ्च जना अदितिर्जातमदितिर्जनित्वम् ।।

२७।३० एष च्छाग: पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्य: ।
अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेन ँ सौश्रवसाय जिन्वति ।।

२७।३४-३६ उप प्रागात्सुमन्मे धायि मन्म देवानामाशा उप वीतपृष्ठ: ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ।।
यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये तृण ँ सर्वा ता ते अपि देवेष्वस्तु ।।
यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयो: शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ।।

२७।४४ इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवा: ।
आदित्यैरिन्द्र: सगणो मरुद्भिरस्मभ्यं भेषजा करत् ।।
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्र: सह सीषधाति ।।

।। अष्टाविंशोऽध्याय: ।।

२८।३ ब्रह्मराजन्याभ्या ँ शूद्राय चार्याय च स्वाय चारणाय च ।
प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे काम: समृध्यतामुप मादो नमतु ।।

२८।१३ अनु वीरैरनु पुष्यास्म गोभिरन्वश्वैरनु सर्वेण पुष्टै: ।
अनु द्विपदानु चतुष्पदा वयं देवा नो यज्ञमृतुथा नयन्तु ।।

३२।२६ इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु ।।
३२।४२ अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः
३२।४८ अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त ।
३२।५०-५४ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ२ अवन्तु देवाः ।।
अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ।।
विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ।।
विश्वे देवाः शृणुतेमँ हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ।।
देवेभ्यो हि प्रथमं यज्ञियेभ्यो मृतत्वँ सुवसि भागमुत्तमम् ।
आदिद्दामानं सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ।।
३२।६० नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर एतारमग्नेः ।
एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ।।
३२।६२ उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँ २ इयक्षते ।।
३२।६८ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादँहोश्चिद्या वरिवोवित्तरासत् ।।

।। त्रयस्त्रिंशोऽध्यायः ।।

३३।६ त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा ।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ।।
३३।३६ न तद्रक्षांसि न पिशाचास्तरन्ति देवानामोजः प्रथमजं ह्येतत् ।
यो बिभर्ति दाक्षायणँ हिरण्यँ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः
३३।४१ उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु ।।

३३।४५,४६ प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकाँ सि चक्रिरे ।।
ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ।
स इमा विश्वा विश्वकर्मा यो नः पितान्नपतेऽन्नस्य नो देहि ।।

।। चतुस्त्रिंशोऽध्यायः ।।

नास्ति

।। पञ्चत्रिंशोऽध्यायः ।।

३५।२१ एवं ब्राह्मं जनयन्तो देवा अग्ने तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे ।।
३५।२६ स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त ।।
३५।३३,३४ यां मेधां देवगणाः पितरश्चोपासते । तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ।
इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ।।
३५।४६ अनड्वाहमन्वारभामहे स्वस्तये ।
स न इन्द्र इव देवेभ्यो वन्हिः संतारणो भव ।।
३५।५१,५२ परीमे गामनेषत पर्यग्निमहृषत । देवेष्वक्रत श्रवः क इमाँ२ आ दधर्षति ।।
क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ।।

।। सप्तत्रिंशोऽध्यायः ।।

३७।१४ गर्भो देवानां पिता मतीनां पतिः प्रजानाम् ।
सं देवो देवेन सवित्रा गत सँ सूर्येण रोचते ।।
३७।१६ धर्ता दिवो वि भाति तपसस्पृथिव्यां धर्ता देवो देवानाममर्त्यस्तपोजाः ।
वाचमस्मे नि यच्छ देवायुवम् ।।

॥ अष्टत्रिंशोऽध्यायः ॥

३८।८ इन्द्राय त्वा वसुमते रुद्रवते स्वाहेन्द्राय त्वादित्यवते स्वाहा ।
इन्द्राय त्वाभिमातिघ्ने स्वाहा सवित्रे त्व ऋभुमते विभुमते वाजवते स्वाहा
बृहस्पतये त्वा विश्वदेव्यावते स्वाहा ॥

३८।१५ स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः ।
स्वाहा पितृभ्य ऊर्ध्वबर्हिभ्यो घर्मपावभ्यः स्वाहा
द्यावापृथिवीभ्याँ स्वाहा विश्वेभ्यो देवेभ्यः ॥

॥ एकोनचत्वारिंशोऽध्यायः ॥

३९।४,५

प्रजापतिः संभ्रियमाणः सम्राट् संभृतो वैश्वदेवः स सन्नो घर्मः प्रवृक्तस्तेज उद्यत आश्विनः
पयस्यानीयमाने पूषा विष्यन्दमाने मारुतः क्वथन् ।
मैत्रः शरसि संताप्यमाने वायव्यो ह्रियमाण आग्नेयो हूयमानो वाग्घुतः ॥
सविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीय आदित्यश्चतुर्थे
चन्द्रमाः पञ्चम ऋतुः षष्ठे मरुतः सप्तमे बृहस्पतिरष्टमे ।
मित्रो नवमे वरुणो दशम इन्द्र एकादशे विश्वे देवा द्वादशे ॥

३९।१२ यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा ।
ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्याँ स्वाहा ॥

॥ चत्वारिंशोऽध्यायः ॥

४०।४ अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥

अथ कृष्णयजुर्वेदीय तैत्तिरीय संहितायां विश्वेदेवा: ।।

अत: पूर्वासु शाकल- वाष्कल- माध्यन्दिन- काण्व - कौथुम- जैमिनीय - पिप्पला- शौनकादि संहितासु ऋग्रूपाणां मन्त्राणां विद्यमानत्वात् कृत्स्ना वैश्वदेविका मन्त्रा: सङ्गृहीता: । इदानीं कृष्णयजुर्वेदस्योपलब्धासु तैत्तिरीय- काठक - कपिष्ठल कठ मैत्रायण्यादि संहितासु संहिता ब्राह्मणयोर्मिश्रण रूपेण संघातेन ग्रहणा तत्तद्देवतानां स्वतन्त्रो मन्त्र सङ्ग्रहो ति दुष्कर: । अत्रतु संयुक्त शब्दानां वाक्यानान्च भेदं कृत्वा देवतामन्त्र भागा वाक्यरूपेण गृह्यन्ते । तत्र न मन्त्रत्व मपितु यजुष्ट्वम् । उक्तन्च कात्यायन श्रौतसूत्रे १ अध्याये नियत पादा- दारावसानाश्छन्दोषद्धाऋच: । अनियत पादादारा वसानानि यजूंषि । अतएवस्मिन्प्रकरणे वैश्वेदीयकानां यजुर्भागानां क्रमाङ्कन सहित: केवल: प्रतीकोल्लेख: प्रस्तूयते । अत्र काण्ड- प्रपाठक- अनुवाक- मन्त्र भागादीनां क्रम: सङ्गृहीत: । सयथा:-

काण्डम् - प्रपाठक:- अनुवाक: - मन्त्रभाग: - प्रतीकम्

१ - १ - १ - ५ - आप्यायध्व०

१-१-२-३ देवानांपरि० । १-१-३-१ शुन्धध्वं० । १-१-४-१ कर्मणेवां० । ५ त्वं- देवानामसि० । ११ इदं देवानाम् । १-१-५-१० अद्रिरसि० । १-१-६-६ देवस्यत्वा०। १-१-११-६ ऊर्णं म्रदसंत्वा० । १-१-१३-१४ संप्रावभागा० । १८ देवागातुविदो० । १-१-१४-१० आदेवाना० । १४- यद्वोवयं० । १-२-१-१६ आवोदेवास० । १-२-२-६ विश्वेदेवस्यनेतु० । १-२-३-२ ये देवा मनोजाता० । ५- विश्वेदेवा अभि० । २१ एदमगन्म० । १-२-४-४ वैश्वदेवं हवि:० । १-२-१०-१० वारुणमसि० । १-२-१२-११ देवेभ्य: शुन्धस्व०। २१ सिंहीरस्यावह० । १-२-१३-२ युवाग्देव दुर्यां० । १-३-४-५ सोमोजिगाति० । ६ - तत्त्वं सोम० । १०- इदमहं० । १-३-७-२ उपवीरस्युपोदेवान्० । १४- अग्नावाग्नि० । १-३-८-२ ऋतस्यत्वा० । १-३-१२-६ विश्वेषां देवानां । १-३-१३-४ देवीरापो० । १-३-१४-२५ अग्नेपावक० । २६ सन: पावक० । १-४-१-२ ग्रावास्यध्वरकृत० । ३- इन्द्रायत्वा० । १-४-२-१ वाचस्पतेय पवस्व० । २- स्वाङ्कृतो सि० । १-४-३-१ उपयाम० । २ स्वाङ्कृतो सि० । ६ देवेभ्यस्त्वा० । १-४-१०-१० ये देवा० । १-४-११-११ त्रिंशस्त्रयश्च०

१-४-१३-१३ मुर्धानं० । १-४-१६-१६ ओमास० । १-४-२२-३ यज्ञोदेवानां० । १-४-२६-१ सुशर्मासि० । १-४-४४-३ समिन्द्रणो० । ५- सुगावो० । ६- यानावह०। १-४-४५-६ अवमृथ० । ८- देवीरापएषवोगर्भ० । १-५-१०-१ देवासुरा:०। १५- वीरहावा० । १-५-२-७ मनोज्योति० । १-५-५-६ अग्नेपावक० । १०- सन: - पावक० । १-५-१०-४ त्वत्यिमारो०। १-५-११-६ त्वमग्ने० । १-६-१-२ आज्यमसि० १५ मुरस्माकं० । १-६-३-३ सुरूपवर्षा० । १-६-४-१३ सङ्ग्रामं च० । १५ रोहितेनत्वा० । १६- हरिभ्यांत्वेन्द्रो० । १७- एतशेनत्वा० । १८- वितेमुन्चामि०। १-६-५-१ आप्यायतां० । ४ प्रात्यां दिशिदे वा० । १-६-६-१५ यज्ञोवभूव० । १-६-७-१,२ यथावै० । उतदै० । ६- अग्निर्वैदेवानां० । ६ मनुष्या न्वा० । १-६-८-१२ योवैदेवेभ्य:० । १-६-१०-३ यज्ञस्य० । १-६-११-३ देवावैसत्र० । ४- वसन्तऋतूनां० । १-७-१-३ यज्ञंवैदेवा० । १-७-२-८ यायज्ञेदीयते० । १-७-३-१ परोक्षंवा०। १-७-४-२ दर्शपूर्णमासयोर्वै० । १३- वेदोसि० । १-७-५-८ सदसिसन्मे०। १-७-६-२८ सवर्दैवां अगन्म० । १-७-११-१२ विश्वेदेवा० । १-८-१-११ ऐन्द्राग्नं। १-८-२-१ आग्नेयमष्टाकपालं० । १-८-७-११ ऐन्द्राग्नं० । १-८-१६-१ समहं० । १-८-१६-१ वैश्वदेवंचरुम्० । १-८-२२-५ बृहस्पते० । ६- एवामित्रे ११- मद्यूदेववतो०। १२ नयजमान० ।

।। इति प्रथमं काण्डम् ।।

।। अथ द्वितीयं काण्डम् ।।

२-१-२-४ सुवर्भानुरासुर:० । २-१-४-१ असावादित्यो० । ७- संवत्सरस्य० । ६- देवाश्चवैयमश्च० । २-१-६-१३ वैश्वदेवं बहुरूपं० । २-१-७-१ वषट् कारोवै०। ६- वैश्वदेवीं बहुरूपा० । २-१-८-१ असावादित्यो० । २-१-६-७ देवावै पुष्टिं०। २-१-११-५ मरेष्विन्द्रं० । ६- ममग्न: । ११- ययादित्या० । १४- यज्ञोदेवानां० । १६- धारयन्त० । २-२-४-१५ दित: प्रथमं० । २-२-५-६ वीरहावाएषं० । ११- मारुतोभवति० । २-२-६-२ वैश्वानरं द्वादश कपालं० । २-२-७-२ चरुर्भवति० २-२-६-१ आग्नावैष्णव० । ३ - एतयैव०। ४,५,१०, आग्नावैष्णव०। २-२-१०-१ असावादित्योन० । २-२-११-४ ऐन्द्रमेकादश० । ६- देवासुरा:० । २-३-२-१ देवावै मृत्यो० । २-३-३-१ देवावैसत्र० । २-३-६-१ प्रजापति देवेभ्यो०।

२-३-७-१ देवासुरा: । २ य इन्द्रियकामो० । ५- द्वादशकपालं० । २-३-८-२ यश्चक्षुष्काम: स्यात् ०। २-३-६-४ आमनमस्याम्०। ६,७ वैश्वदेवी०। १०- आमनम०। २-३-१०-५ विश्वेषां देवानां० । १०- इममग्न० । १५- देवा आयुष्मन्त० । २-३-११-४ अश्विनो: प्राणो सि० । ११- इममग्न० । १२- अग्निरायुष्मान० । २-३-१४-१५ सहज्जनेन० । २३ प्रयोजन्ने०। २-४-१-१ देवामनुष्या:०। २-४-२-१ देवासुरा:० । २-४-५-५ येनदेवा अमृतं० । २-४-६-४ अथैता आहुतीर्जुहोत्येतै० । २-४-८-१ देवानरुव्या० । ८- ये देवा दिविभागा० । २-४-११-१० देवताभ्योवा एष० । २-४-१३-१ देवावैराजन्या० । २-४-१४-१ नवोमवो० । १६- विश्वेदेवा ऋतावृध० । १७, विश्वेदेवा: श्रृणतेम्०। २-५-३-१० यत्पूतीकैर्वा० । २-५-४-२ देवस्त्वैमयज्ञे० । २-५-५-७ पूर्णमासेवै०। ८,६,११ पिच० । २-५-६-१ एगावेदेवरथो० । ४,५,६,७,६,११-१२-५ पिच० । २-५-७-१ देवावैनर्चि० । २-५-८-२ अग्निमुष्मिन-ल्लोके० । २-५-६-१ अग्नेमहां०। २,३,६,७,८,६,१४,१५०, पिच । २-५-११-१ ~~निवि~~ निवीतं मनुष्यणाम् । ६ देवावैसमिध्माने०। १५,१८,१६,२५,२-६-१-६ समिधायिज-त्यस्मिन्० । ७ देवासुरा:०। १० देवानांवाअनिष्टा० । २-६-२-५ राजानोवा०। १६ गायत्रीपुरोनुवाक्या० । २-६-३-१ प्रजापतिर्देवम्भ्यो० । २,३,४,६ प्रच्युतंवा० । २-६-४-१ देवस्यत्वा० । ११ दक्षिणतो० । २-६-६-१ अग्नेस्त्रयो। १०- अग्निरमुष्मिं लोके० ।२-६-७-१३ दैव्याअध्वर्यैव० । १८ उत्तरस्यां० । २-६-८-६ विवारतवज्ञं छिन्दन्ति । ७- देवावैयज्ञा दुद्र० ।११ तत्पूष्णो० । १३ सो बिभेत्मप्रतिगृण्हन्त० । २-६-६-६ आश्राव्याह० । १०,११,१७,२१ अपि० । २-६-१०-१ देवावैयज्ञस्य० । ५- सोमंयजतिरेतएव० । २-६-११-१ कुदवा हि० । २,८,१० इत्यपि । २-६-१२-२ त्वंसोमप्रचिकितो० ।

।। अथतृतीय काण्डम् ।।

३-१-१-७ विश्वेदेवा यदजुषन्त० । ३-१-४-२ इमंपशुं पशुपते० । ३-१-५-८ पुरस्तात्स्वाहाकृयो० । ३-१-६-१ योवा अयथा० । ३-१-७-७ देवता सुवारते० । ३-१-६-१ योवैदेवान्० । ३-१-१०-५ यस्तेद्रप्सो० । ३-१-११-८ पिशङ्गरूप:०।३-२-१-३ उपयाम० । ३-२-२-४ देवावैयज्ञे०। ३-२-३-१ परिभूरग्निं० । ३-२-४-६ उपदेवा:० ३-२-५-१० अपामसोम०। ३-२-६-१ महीनांपयोसि० । ३-२-७-३ यज्ञोषमुव० ।

३-२-८-२० नमः पितृभ्यो० । २२- अभियेनो०। ३-२-६-१५ यदासीन:० ।
३-२-१०-४देवेभ्यस्त्वा०। ३-१-११-६ त्रीण्यायूंषि० । ३-१-२-१ अग्नेतेजस्वि०।
३-३-२-१ वायुर्हिंकर्ता०। ३-३-३-३ अतर्दत्यास्त्वा०। ३-३-५-१६ ऋतस्यत्वा०।
३-३-६१ देवावैयवज्ञेन० । ३-३-७-१ प्रजापतिर्देवा० । ३-३-६-२ नमोमहिम्न० ।
३-३-१०-२ यस्यास्ते०। ३-३-११-१० धाता ददातु० । ३-४-२-७ त्वंतुरीया० ।
३-४-४-१४ देवासुरा:०। ३-४-६-१ देवावै०। ३-४-११-४ ब्रह्मादेवानां० । ३-५-१-१ पूर्णायज्ञ्वा०। ३-५-२-३ रश्मिरसि०। ३-५-२-३ विश्वेभिर्देवेभि:० । ३-५-४-२१ येदेवा-यज्ञ हेनो०। इत्यत: २,४,५,७,८,१०,११,१२ इमे पिमन्त्रा: । ३-५-६-६ वसुभ्योरुद्रेभ्य०।
३-५-७-२ तृतीयस्यामितो०। ३-५-८-१ उपयाम० । ३-५-६-१ यांवा अध्वर्युश्च० ।
३-५-११-५ अग्नेविश्वेभि:० ।

॥ अथ चतुर्थं काण्डम् ॥

४-१-१-२ युक्त्वायमनसा०। ४-१-२-१ इमामगृभ्णन्० । ४-१-३-१० सीदहोत:० ।
४-१-४-१ संतेवायु:०। ४-१-५-६ विश्वेत्वादेवा० । ८,६,१०,११,१३,२२ इमे पि मन्त्रा:०
४-१-७-८ बृहस्पतेसवित० । ४-१-८-१२ अग्नेस्वाहा० । ४-१-६-६ दृंहस्वदेवी०।
४-१-१०-१३ नक्तोषासा०। ४-१-११-१४,१५,१६-१६ ये सहांसि सहसा० । ४-२-३-२ उदुत्वा०। ४-२-४-६ अग्नेदिवो०। ४-२-५-५ मातेवपुत्रं० । २० घृतेन० । ४-२-६-१४ यावोदेवा:० । २२- तस्मिन्तुपर्णो० । ४-२-१०-१० अजाह्यग्ने० । ४-३-३-३ प्रतीचीं-दिशां० । ४-३-४-४ अग्ने: पुरीषमसि० । ६ सक्रतुभि० । ४-३-७-३२ विश्वेदेवा -देवता० । ४-३-६-१० ऋभूणांभागोसि० । ४-३-११-८ एकाष्टका० । ४-३-१२-५ ,७,१३ अपि । सेनानीकेन० । ४-४-२-४ राज्ञ्यसिप्राची० पूर्णो नुवाक: । ४-४-६-१०-१४ देवानामग्ने० । ४-४-६-२३ वैश्वदेव उन्नीतां० । ४-४-१०-१६ अषाढा० । ४-४-११-११, १२ तपश्चतपस्यश्च० । ४-४-१२-५-६ प्राची दिशां० । वैरूपेसाम० ।

॥ पन्चमे प्रपाठके रुद्र नमकानुवाका: ॥

४-६-१-६ अग्नेपावक, १०, १६,१६,२२ अधिकामंत्राग्गृह्यन्ते । ४-६-२-३,६,७ अग्नेयन्त योन: पिता० । ४-६-३-२ इन्द्रेमं०। अत्र ३,४,७,६,१३, १५ मंत्रा अधिका: ।

४-६-४-६ इन्द्रस्यवृष्णो० । ४-६-५-६ नक्तोषासावर्ण० । ४-६-७-८,६ अन्वुत्वारथो० इत्यादि० । ४-६-८-३ एषष्ठाम: । ४-६-६-३ निक्रमणं० । ४-७-६-२ विश्वेचमेदेवा:। ४-७-१२-१ वाजीन: सप्तप्रदिश० । २,३,४,५,८ ।४-७-१३-७तंपत्नीभि० । ४-७-१४-२ ममदेवा० । अन्ते ३,४,५,७ मन्त्रा: । ४-७१५- १३ देवानांमन्वे ।

।। अथ पन्चमं काण्डम् ।।

५-१-१-४ छन्दांसि देवेभ्यो० । ५-१-२-१२ पुरीषामतनो० । ५-१-६-६ रुद्रा: - सम्भृत्य० । ५-१-७-४ देवानांत्वा पत्नी० । ५-१-६-१४ अग्निर्देवेभ्यो० । ५-१-१०-१० एकविंशति० । ५-१-११-१ समिद्धो अन्जन०। ५-२-१-१ विष्णुमुखावै० । १५ स्तोमेनवै० । ५-२-२-४ उदुत्वा० । ५-२-३-२ कृष्णग्रेणवा० । ५-२-११-५ नारीस्ते० । ५-२-१२-३ दैव्या अध्वर्यंव० । ५-३-२-६ अघृतेववा० । ५-३-३-१ देवावै० । ५-३-४-१६ नवाइदंदिवा० । ५-३-५-१२ यानिवै० । ५-३-७-१ नाकसदभिर्वै० । ५-३-८-१ छन्दांस्युपदधाति० । ५-३-६-१-४ सर्वाभ्योवै० । ५-३-१०-४ संयानीभिर्वै० । ५-३-११-१ देवासुरा:० । ५-३-१२-१ प्रजापते० । ५-४-१-१-३ देवासुरा: संयत्ता० । ५-४-२-१-११ सम्पूर्णो नुवाक:। ५-४-३-१० एतावै देवता:०। ५-४-५-४ हुतादेवा०। ५-४-६-४ उदुत्वा०। ५-४-७-१ प्राचीमनु० । ५,१२,२६ मन्त्राश्च । ५-४-८-६ अर्धेन्द्राणि० । ५-४-६-१ अग्निर्देवेभ्यो० । ५-४-१०-१ सुवर्गाय० । ५-४-११-१४ षाण्मार्जालीये० । ५-५-१-२ ऐन्द्रा:पशवो० । ५-५-२-१ प्रजापति: प्रजा:० । ५-५-३-७ देवासुरा:० । ५-२-४-७ चित्तिं जुहोमि० । ५-५-५-६ एतावैदेवता० । ५-२-६-३ ब्रह्मवादिनो० । ५-२-६-१३ आदित्यास्त्वा० । ५-५-१०-७ तावैदेवता० । ५-५-१७-१ पृषतोवैश्वदेव: । ५-५-२२-६ शिल्पोवैश्वदेव:० । ५-५-२४-४ वैश्वदेवो पिङ्गो० । ५-६-१-३ यासांदेवा० । ५-६-२-१५ बार्हस्पत्योभवति०। ५-६-३-२ सुयतेवा० । ५-६-४-७ दर्भस्तम्बे० । ५-६-५-१ संवत्सुरमुख्यं० । ५-६-६-१ प्रजापतिरग्नि० । ५-६-७-११ अग्नेर्वैदीक्षाया० । ५-६-११-३ पृषतीस्थूलपृषती० । ५-६-१२-४ तिस्र: शिल्पा० । ५-६-१७-५ तिस्र: पष्ठौह्यो० । ५-६-२०-४ शिल्पास्त्रयो० ५-७-१-१ योवा अयथा० । ५-७-२-५ -१४ येन देवाज्योतिषोर्ध्वा० इत्यादय:० । ५-७-३-५ देवासुरा: संयत्ता० । ५-७-४-४ ब्रह्मवादिनो० । ५-७-५-१६ य एवंविद्वानग्निं० ५-७-६-६ यावोदेवा:० । ५-७-७-३-१० जानीतादेवमित्यादय:० । ५-७-८-६ ब्रह्मसमिद्-भवति० । ५-७-२-४ ब्रह्मवादिनो० । ५-७-१७-११ विश्वेषांदेवानांषष्ठि० । २५

५-७-२१-१२ विश्वेषां देवानां द्वादशी० । ५-७-२४-१ क्रमैरत्यक्रमीद्वाजी० ।

।। अथ षष्ठं काण्डम् ।।

६-१-१-१ प्राचीनवंशं करोति० । ६-१-२-१ यावन्तोवैदेवा० । १०,१७ अपि ।
६-१-३-१ ऋक्सामेवै०। ६-१-४-१ वाग्वैदेवेभ्यो० । अत्र- ६, १२,१४,१७,२० मन्त्राश्च।
६-१-५-१ देवावै देवयजन०। ६-१-६-१२ -१४ ते देवा अब्रुवन० । ६-१-७-१० यदबद्धास्या० ।
६-१-८-१४ यदैतावानेवसोम:० । ६-१-१०-२ अजया क्रीणाति० । ६- देवावैयेन० ।
६-१-११-२,३ इन्द्रस्योरु माविश० । ६-२-१-१० देवावैया० । ६-२-२-१ देवासुरा:० ।
अत्र ५,७,१० मन्त्राश्च । ६-२-३-१ तेषामसुराणां० । ६-२-४-५ यज्ञोदेवेभ्यो० ।
६-२-५-६ त्रिव्रतोवै० । ६-२-६ सम्पूर्णो नुवाक: । ६-२-७-१ तेभ्यउत्तरवेदि:०। ६,८ च।
६-२-८-१ सोत्तरवेदिरब्रवीत्०। ६-२-१०-१ देवस्यत्वा० । ६-२-११-४ असुरावै० ।
६-३-१-२ देवावैयज्ञं० । अत्र ७,६,१४ मन्त्राश्च । ६-३-२-३ देवानवै० । १४,१५,१६
मन्त्राश्च । ६-३-४-१२,१३ यं कामयेत्०। १६,२०,२३,२३, मन्त्राश्च । ६-३-५-१
साध्यावैदेवा० । ६-३-६-३ उपोदेवान्० । ६-३-७-१ अग्निनावैहोत्रा० । ४,५,७,१६
मन्त्राश्च । ६-३-८-७ उपप्रेष्य०। ६-३-६-१४ अग्निनापुरस्तादेति० । १५,२० अपिच ।
६-३-१०-३,६,१३ ,१४ पृषदाज्य स्योपहत्यत्रि:० । ६-४-२-१ देवावै० । ६-४-३-१
ब्रह्मवादिनो० । ६-४-४-१ देवस्यत्वा० । ६-४-५-५ वृष्णो अंशुभ्या० । ६,७ च ।
६-४-६-१ देवावै०। ६-४-७,-२,३,५ वायुंदेवा अब्रुवन० । ६-४थय्थ१ मित्रंदेवा० ।
६-४-८,१,२ यज्ञस्य शिरो० । ६-४-१०-१ बृहस्पतिर्देवानां० । ६-४-११-१ देवावैयवज्ञे कुर्वत
६-५-२-७ असुरावा० । १०- वैश्वदेव्यामृचि० । ६-५-३-११ यज्ञेनवैदेवा:० । ६-५-४-८,४
वैश्वदेवं शुक्रपात्रेण० । ६-५-५-८ इन्द्रोवृत्रमहनत्० । ६-५-६-१ अदिति: पुत्रकामा० ।
३,४- अपिच । ६-५-७-२-६ एषवैगायत्रोदेवानां० । ६-५-८-३ देवावाइतस्त:० ।
६-६-१-७ तुथोवो विश्ववेदा० । ६-६-२-६ वासिष्ठोह० । ६-६-४-६ असुरावैदेवान्० ।
६-६-५-२,३ प्रैवाग्नेयेन वापयति० । ६-६-७-२ यदुच्चरार्चि० । ६-६-८-१,६,७ देवावा-इन्द्रियं० । ६-६-६-१,२ देवावै० । ६-६-१०-१ देवावै प्रबाहु० । ६-६-११-१ प्रजापति-र्देवेभ्यो० ।

।। अथ सप्तमं काण्डम् ।।

७-१-१-१ प्रजननंज्योति० । ८- मध्यत: सप्तदशं० । ७-१-३-६ यस्यत्रय - स्त्रिंश० । ७-१-५-२,३ तस्यामश्चाम्यत्० । ७-१-६-१८,१६ इडेरन्तेदिति० । ७-१-७-११ यजमानमम्युत्० । ७-१-११-२ आमगृभ्णन्० । ७-१-१२-५-६,११,१२ स्वाहा विश्वेभ्यो० । ७-१-१८-१ भुवोदेवानां० । ७-१-२०-६ स्वः ऋतस्यपन्था असि० । ७-२-१-१-२,१० साध्यावै० । ७-२-५-७-११,१६ देवासुरा: संयत्ता० । ७-२-७-४ आश्विनाग्रान० । ७-२-८-१४ छन्दांस्यन्योन्यस्य० । ७-२-१०-१ नवाएणो० । ७-३-१-२ अथोखल्वाहु० । ७-३-५-१ प्रजापति: सुवर्गं । ७-३-६-१,३ इन्द्रोवैसदृङ० । ७-३-८-३ असत्रंवा० । ७-३-६-१ साविराड० । ७-३-१०-१,८ असावादित्यो० । ७-३-११-३ यज्ञस्य यज्ञस्ययत्० । ६,८ च । ७-३-१४-४ इन्द्रेण देवान्० । ७-३-१५-१-२२ स्वाहाध्मिाधीतायस्वाहा० । ७-४-१-१ बृहस्पतिरकायत० । ७-४-२-१ यथावैमनुष्या० । ७-४-३-१३,१४ चतुर्विंशात्० । ७-४-४-१ प्रजापति: सुवर्गलोक० । ७-४-५-१,२ देवाव देवसत्रे० । ७-४-११-३ अग्निष्टोमावभित:० । ७-४-१७-३,४ या देवेषु तनुव० । ७-४-२०-८ लाजी० । ७-५-१-१२,१३ ब्रह्मवादिनो० । ७-५-४-२ अन्यदन्यत्साम० । ७-५-६-७,८,११,१३ पूर्णमासेवै० । ७-५-७-७-७,८,१०,११ तदग्नये वसुमते० । ७-५-८-१,१३,१७ देवानांवा अन्नं० । ७-५-१-२ उत्क्रोदं कुर्वते० । ७-५-१०-३ उदकुम्भा० ।७-५-१४-३ विश्वेभ्योदेवेभ्यो० । ७-५-१५-५ एतयावा० । ७-५-१७-१ य आत्मदा० ।७-५-२२-७ विश्वेभ्योदेवेभ्य० ।

।। इति तैत्तिरीय संहितायां वैश्वदेव प्रतीकानि ।।

=-००--

अथकृष्ण यजुर्वेदी काठक संहितायां विश्वेदेवा:

अत्राङ्०काङ्०कनं तु स्थानक- अनुवाक- मन्त्रभाग- प्रतीक रुपेण कृतमे यथा
स्थानम् - अनुवाक - मन्त्रभाग: - प्रतीकम् -
१ - २ - ६ - तदाहरन्ति० ।
१-४-१७ देवानामसि०। १-५-२० देवस्यत्वा० । १-६-२१ अवधूतं० । १-६-२६, २७ इमांनर: ० । १-१०-३२, ३३ अग्नेगृहपत० । १-११-३४-३७ सवितुर्बाहू० । १-१२-४३, ४८त: ५० उद्ग्राभन्च० । २-२-६ विश्वोदेवस्य० । २-४-१५ येदेवा० । २-४-२१ एदमगन्म० । २-५-२४ शुक्रमसि० । २-६-२६देवसूर्यसोमं० । २-६-४७ देवस्यत्वा० । २-१०-४६, ५०, ५२, ५३ - २-१५-१०२, १०३, १०६, १०७, ११०, १११, ११२, ११६ स्विबृमग्ने० इत्यादीनि० । ३-१-१ ज्योतिरसि० । ७- देवसवितरेष० । ३-४-१८ इषे त्वोपा० । २० अग्ना० । ३-५-२१ देवस्यत्वा० । ३-६-२२ घृतेनाक्त पशुं० । ३-६-३२ अग्नेर्वोपन्न० ३४- देवीरापो० । ४-१-२ वाजिन् वृष्णो० । ४-१-३ अन्तर्यच्छ० । ४ मधुमतीर्न: । ४-४-१८ अपनुत्ताशण्डामर्कौ०। ४-४-२२ स्वाहात्वा० । ~~इन्न्मधुमतीन~~ ४-५-२३ येदेवा०। २४ उमयाम० । २६- मूर्धानं० । ४-६-२८ उपयाम० । ४-७-३२ओमास०। ३३- उपयाम० । ४-६-४७ चित्रं देवाना० । ४-१०-६१ उपयाम० । ४-१२-७२ समिन्द्रनो० ७४ सुगावो० । ७५ यानावह०। ७७ यज्ञयज्ञाच्छ० । ४-१३-८२ स्वाहावभृय०। ८८-संमाग्ने ४-१४-६१ अग्निर्होता० । ६५- मनोसि प्राजापत्यं० । ४-१६-१४४ अग्नि १२४- बृहस्पते जुषस्वनो० । ५-१-२ सरस्वत्या अहं० । ३- अतीतपथ । ५-२-१२ सामेसत्याशी० । १४ वितेमन्चामि० । ५-४-२० देवेभ्यस्तनू० । ५-६-२८ देवान्जनमगन०। ५-६-२६ येदेवा० । ३१, ३३ मन्त्रौच । ६-५-६ इध्मोवा० ६-७-१३ वाचावेसह० । १५ रेतोवा० । १६- तदजाम्याहुत्यो० । ६-१०-२६ वेत्थाहि० । ३०- अग्नेनय० । ७-४-२७ अग्निहोत्रे स्तोमो० । ७-६-३० अहर्वै देवानां० । ७-७-३२ अभ्मस्येत्यम्भो० । ७-६-३५ महित्रीणा० । ७-१०-३८ अहर्वावासीन्न० । ३६ देवावा अन्हो०। ७-१२-४१ प्रवेघसे० । तथाच- ४६, ५३, ५४, ५६ मन्त्रा: । ७-१३-५६ इतएव० । तथा ६०, ६७, ७१, मन्त्राश्च । ७-१४-८४ प्रनूनं ब्रह्मणस्पति० । ८-२-५ नवाक्त० । ८-४-८ अङ्गिगरसांत्व ६- ततोमनुष्या० । ८-७-१४ निरुप्तं० । १५ सहवैदेवाश्च० । ८-१०-१६ देवान्वैयज्ञो० ८-११-२१ यदात्मना लभेत० । ८-१४-२६ पुनराधेय०। २७ यत्वमन्यु० । ३० पुनस्त्वा० ८-१५-३५ देवाश्चवा० । ८-१६-३६ अनुर्तदायि० । तथाच- ४५, ५२, ५३, ५८, ६५, ७०

इत्यादि मन्त्र प्रतीकानि । ६-४-८ आग्नेयाष्टाकपाला० । १०,१२- मन्त्रौच ।
६-११-३६- प्रजापति रकामयत० । ६-१४-४६ त: ४८- य: प्रजया पशुभि:०।
१०-५-७ अग्नये पथिकृते० । १०-७-१०,११- अग्नये यविष्ठाय० । १२-१२-४१
नवोनवो० । १०-१३-४६ अग्निरुक्थे० । ४८- येते अर्यमन्० । ११-७-१६ इममग्न० ।
११-६-२६ सृजावृष्टिंदिव० । ११-१०-३१ देवावसव्या० । ११-१२-३४ मद्रू० । ४५
धारयन्त० । १२-७-१७ देवावा ओषधीषु० । १३-२-५ पशुं बध्नामि० । १३-८-१६
छन्दांसिवै० । १३-६-२६ देवानामेष० । १३-११-३६ वशासिवाशिनि० । १३-१५-५८
सदासुग:० । १३-१५-६१ शुक्मणि० । ६४- विश्वेदेवा० ।६५ येकेचज्मा० । ६८,७४
अपिच । १३-१६-७६ या ओषधी:० । १४-५-२६ देवावै नानैव० । १५-१-३ ये देवा:
पुरस्सदो० । १५-६-१३ रुद्रयच्चे० । १५-११-३५ मुत्त्वाय सविता० । ३८,४७,५४,६४
मन्त्राश्च । १६-४-३६ सन्तेवायु० । १६-५-५६ वसवस्त्वा० । १६-६-६० अदितिस्त्वो-
देवी० । १६-६-६४ मित्रेतांत उखां० । १६-८-८३ नचाकेषासा०० । १६-१०-११०
उदुत्वा० । १६-११-१३७ मातेवपुत्रं० । १६-१२-१४६ घृतेनसीता० । १६-१३-१६६
यास्सोमराज्ञी० । १६-१६-२०१ यावोदेवा० । १६-१७-२२२ अर्जाहयग्ने० । १६-१६-२२
ताअस्य० । १६-२०२२६- २३६ समिद्धो० । १६-२१-२४० - २४२ अग्निर्होतानो० ।
१७-११-४ अग्ने: पुरीष० । ७- सञ्जैतुभि:० । १६-६-१८ पृथिव्या: पुरीष० १७-१०-
२७ ये अग्नयस्समनसो० । १७-७-८०, ८१ ये देवा देवानां० । १७-१८-८८ एवापित्रे० ।
१८-१-५, ८,६ योन: पिता० इत्यादय: ० । १८-१-१६-२१,२३,२६,३०, इन्देमं प्रतरं०
इत्यादय:० । १८-४-३३,३७,३८,४० इत्यन्तं यावत् ०। १८-१३-६५,६७- ६६ मन्त्रा-
भागश्च । १८-१६-६० बृहस्पते० । ६३ तनूनपादसुरो० । १८-७-१०२,१०३ वनस्पतेवसृज०
१८-१८-१०५,१०६,१०७, ११२ इत्यादयो मन्त्रभागा: । १८-२१-१२८ देवेभ्योवनस्पते०।
१३४ अग्निं सुदीतिं० । २१-१३-४६ सेनानीकेन० । २१-१४-६६ सपूर्वया० । २२-१०-२८
येनदेवाज्योतिषोर्ध्वां० । २०-१४-४०,४१ प्राची दिशां० । २२-१५-६४,६५ विश्वेषां
देवानां० २३-११-२६ इन्द्राषर्वता० । ३० ममक्रु:० । ३०-५-२५ अग्नेयत्वा प्रवृहामि०
२७ विश्वेदेवामरुत० । ३०-८-३७ ,४२,४४,४६,४७ मन्त्राभागा पि वैश्वदेविका: ।
३१-१४-३४ आरोहपथो० । ३४-१६-३३ मनोज्योति:०। ३४ मयस्त्रिंशत्० । ३५-१-१-
भद्रं कर्णेभि: इत्यादय:० । ३५-३-२२ अयंयज्ञो० । ३५-५-३४,३५,३६,४०,४१,४६,५४,
५८,६५ मानोध्वारिषुरित्यादय: । ३६-१-१ इन्द्रस्यवै वृत्रं० । ३६-३-६ वैश्वदेवेन

अथ कृष्णयजुर्वेदीय कपिष्ठकठ संहितायां विश्वेदेवा:

संहितायामस्यामष्टाध्याय युत: प्रथमाष्टकोपलब्ध: । द्वितीयतृतीयाष्टकौ लुप्तावनुपलब्धौवा धुना । चतुर्थाष्टक: सप्ताध्यायात्मक: । पञ्चमाष्टकेप्यार्थौ द्वावध्यायौच ग्रन्थेन्यूनौ । अष्टको यं चतुस्त्रिंशत्तमाध्यायात्प्रारभ्यते । चत्वारिंशत्तमाध्यायान्ते वस्यते । षष्ठाष्टके अष्टावध्याया: सम्पूर्णा: सन्ति । अस्यान्ते एव ग्रन्थ समाप्तिरपि । उपलब्धेष्वध्यायेष्वप्यध्यायारम्भो बहुषु स्थानेष्वनुपलब्धएव गम्यते । स्वाध्याय परम्परालोपादनुपलब्ध भाग प्राप्तिरपि दुरूहा एव । अतएवापूर्णत्वादस्या: संहिताया, मन्त्रब्राह्मण मिश्रितत्वाच्च केवलं विश्वेदेवानां मन्त्र प्रतीकाएव लिख्यन्ते । अत्राष्टकाध्याय यजुर्मन्त्र प्रतीक भाग क्रमेणाङ्कनं विधीयते । तद्यथा:-

अष्टक: - अध्याय: - यजुर्मन्त्र: - प्रतीक भाग:

१ - १ - ६ - इमांनरा:० । एवमग्रे पि ।

१-१-१२ संभ्रावभागा०, देवागातुविदो० । १-१-१६ येदेवामनुजाता०, एदमगन्म० । १-१-१७ शुक्रमसि० । १-२-३ सिंहयसि० । १-२-८ ज्योतिरसि० । १-२-११ उपदेवान्० ऋषीणांपुत्रो० । १-२-१२ आवहदेवान्० । १-२-१३ देवेभ्य: शुन्धध्व०+ देवीरापो० । १-३-१ विश्वेभ्य इन्दियेभ्य: ० । १-३-३ तूर्योसि जनधाया: । १-३-४ येदेवा० । १-३-५ मूर्धानं दिवो० । १-३-५ ओमास० । १-३-८ यज्ञोदेवानां० १-३-१० समिन्द्रणो० अन्तंयावत् । १-५-५ अहर्वै देवानाम्० । १-५-६ देवावाजन्हो १-६-२ मयिगृण्हा० । ~~१-६-६ अहर्वै देवानाम्०~~ १-६-६ ये वै देवानामङ्गिरस:० । १-७-४ प्रतूनं० । १-८-१ अहुतादो० । १-८-२ यच्चे मन्युपरोप्तस्य० । १-८-३ देवाश्चवा असुरा० ।

।। अथचतुर्थाष्टकम् ।।

४-१-१ उदुत्वा विश्वेदेवा० । ४-१-२ मातेवपुत्रं० । ४-१-३ उदिह्पतिंगामविं०। ४-१-६ ताअस्य० ।४-१-१० सजूर्ऋतुभि:० । ४-२-३ ऋभूणांभागो सि० । ४-२-५ पृथिव्या: पुरीष० । ४-२-७ अधिपत्न्यसि बृहती दिक्० । ४-२-६ इमेवासन्तिकावृतू० । ४-४-१ ये देवा देवानां० । ४-४-२ परोदिवा० । ४-४-३ इन्द्रेमंप्रतरं० ।

४-४-४ आजुव्हान: सुप्रतीक:० । ४-५-२ विश्वेअद्य० । ४-५-४ बृहस्पते सवित० । ४-५-५ अग्नेस्वाहाकृणुहि० । ४-५-६ उद्बुध्यस्वाग्ने० । ४-६-५ अदितिस्त्वादेवी० ।

।। पन्चमाष्टके ।।

५-१-८ मातेवपुत्रं० । ५-२-१ अग्निनावैदेवा: ० । ५-२-४ येनदेवाज्योतिषोर्ध्वा० । ५-२-८ यज्ञ: सृष्टो० । ५-४-८ प्रच्यवस्व भुवनस्पतइति० ।

।। षष्ठाष्टके ।।

६-१-५ स्तध्यावै नामदेवा० । ६-१६ आपोवैसर्वदेवता:० । ६-१-७ त्रयस्त्रिंशद्वै देवा: सोमपा:० । ६-३-१ आयु: प्रजानां० । ६-८-२ ग्रुत्कर्णाय० । ६-८-४ विश्वे-षांदेवानां० । अयंयज्ञो । ६-८-६ मानोध्वारिषु:० । सप्तर्त्विज: ० । ६-८-१८ देवाश्चवा असुराश्चास्मिंल्लोकआसन्० ।

इति कपिष्ठलकठ संहितायां वैश्वदेवमन्त्र प्रतीकानि

--००--

अत्र कृष्ण यजुर्वेदीय मैत्रायणी संहितायां विश्वेदेवाः

अत्र काण्ड- प्रपाठक - अनुवाक- मन्त्रप्रतीक- क्रमेणाङ्०कनं विधीयते ।

।। अथ प्रथमं काण्डम् ।।

यथा:- काण्डम् - प्रपाठकम् - अनुवाकः - मन्त्रभागः प्रतीकम् ।

१ - १ - ११ - २५ प्रत्युष्टंरक्षः ० ।

२८ धामासिप्रियं० । १-१-१२-३२ वर्षिष्ठे अधिनाके० । १-१-१३-४० उद्ग्राभश्च० । ४२- संग्राव० । ४३ देवागातुविदो० । १-२-२-२० आवोदेवास० । १-२-१०-७३ संपृशस्मा० । १-२-१५-१०७ शमितार उपतेन० । १-२-१६-१११ पृथिव्यैत्वा० । १-३-१-२ अग्नेर्वोपन्न० । १-३-३८ देवस्यत्वा० । १-३-४-१४ वाचस्पतये०। १-३-५-१६ वाकत्वाष्ट्र० । १३-६-२८ उपयाम० । १-३-१३-४० ये देवा० । ४१ उपयाम० । १-३-१४-४४ एषतेयोनि० । ४५ मुर्धनिं० । १-३-१८ -५३, ५४ ओमास० ।१-३-२६-७३ यशोदेवानां० । १-३-२८-७६ एषतेयोनि० । १-३-३६-६६ ककुभं रूपं० । १३-३८-२ १०८ समिन्द्रनो० । १-३-३८-११० सुगावो० । १११ यानावह० । १-४-१-३ अग्नि० होतारं० । ७- सामेसत्याशी० । ८- अरेडता० । १-४-३-१३, १४, १६, १७, १६, २० येदेवा यज्ञवाहनः ० इत्यादयः० । १-४-४-३२ धामासि प्रियं० । ३३ भूरस्माकं० । १-४-६ -३६ धामासिप्रियं ० । ४० इति प्रयतं० । १-५-१-११ अग्नेपावक० । १-६-१, १, ६, १३ प्रवांवाजा० इत्यादयः । १-७-१-२, ५, ६ यत्वेमन्यु० इत्यादयः ० । १-८-८-४६ इतएव प्रथमंजज्ञे० । १-८-६-५६ त्रयस्त्रिंशत्० । १६-५-१७- तैवैस्वर्यन्तो०। १-६-६-१८ यः प्रजयां पशुभिः० । १-१०-२-७ अक्रनकर्म० । १-१०-१८-४४ -४६ इत्यन्वाहो० ।

।। अथद्वितीयं काण्डम् ।।

२-२-५-१६ इत्यग्निरेवास्मै० । २०- इतियो स्यप्रियः । २-२-६-२८ सङ्०च्छध्वम्० । २-३-२-४ वैश्वदेवं चरुम्० । ६- एतेवैसजाताः० । २-३-४-१७ इममग्ना० । २-३-७-२ देवा अरुणाणां० । २-४-७-२६-२८ देवावसव्या० । ३२ सृजावृष्टिंदिव० । २-५-६-७ पशुंबध्नामि० । २-५-१०-१३- १७ नमोमहिम्ने०। २-६-३-१२ ये देवाः पुरः सदो० । २-६-६-१६ सवितात्वा० । २-६-८-२४ रुद्रयचेगिरिपरं० । २-६-११-२६ अग्नेयेस्वाह २-६-१२-३२ इयदस्या० । २-७-१-६ यस्यप्रयाण० । २-७-४-४६ सन्तेवायु० ।

२-७-६-६६ वसवस्त्वाधूपयन्तु० । ७४- वसवस्त्वा कृन्दन्तु० ।२-७-१०-११८ उद्रुत्वा विश्वेदेवा० । २-७-११-१५४ मातेवपुत्रं० । २-७-१६-२३२ क्रतुं देवानां०। २-७-२०-२५१ प्रतीची दिक्० । २-८-१-२ ता असद्यूददोह्स:० । २-८-१-५ स्वैर्दक्षैर्दक्षा० । ६- पृथिव्या: पुरीष्य० । ८- सञ्ज्ञैतुभि: ० । २-८-७-१८ अग्ने: पुरीष०। २-१०-१-११,१२ येदेवा० इतिद्वौ । २-१०-२-२७,२८ परो दिव:० इतिद्वौ० । २-१०-५-४६ समिद्धे० अग्ना० । २-१०-५-४६,५० देवा देवे० इतिद्वौ । २-१०-६-६३ आजुव्हान:० । ६८ चितिजुहोमि० । २-१२-१-४ विश्वेनोअद्य० इत्यतश्चत्वार: । २-१२-४-१७ तंपत्नीभि० । २-१२-४-२०,२१ अग्नेच्यवस्व०इतिद्वौ । २-१२-५-३२ बृहस्पतेसवित० । २-१२-६-३६ तनूनपाद्धुरो० । २-१२-६-४६ अग्नेस्वाहाकृणुहि० ।

।। अथ तृतीयं काण्डम् ।।

३-८-३-११ इति तद्वेदेवा० । ३-८-७-२० आवामुपस्थ० । ३-११-८-६२ त्रयोदेवा० । ३-११-१०-६७ वैश्वदेवीपुनती०। ३-११-११-११८ उषोयव्ही० । ११६ दैव्याहोतारा० । ३-११-१२-१२४- १२६ मन्त्र भागाश्च । ३-१३-६-१० शिल्पाविश्वदेवी० । ३-१३-१२-१६ कृष्णग्रीवा० । ३-१४-६-६ वसुभ्यो ऋष्यानालभते० । ३-१४-२१-२१ खड्गोवैश्वदेव:०। ३-१६-१-३-५ एषच्छाग: इत्यादय: । ३-१६-२-२७ प्रजापतेस्तपसा० । ३-१६-४-५४, ५५ प्राचीदिशां० इतिद्वौ । ३-१६-५-८२,८३ देवानांमन्वे० इतिद्वौ० ।

।। अथचतुर्थं काण्डम् ।।

४-२-१-१ प्रजापतिर्वा एक आसीत्० । ४-३-२-२ देवा ओषधीषु० । ४-५-३-१०-१२ देवेभ्यो वै मनुष्येभ्य:० । ४-५-८-२३ वाग्वा ऐन्द्रवायव: ० । ४-६-४-१६ प्रजापतिर्वा आग्रायणो० । ४-६-८-५६ आदित्या०। ४-६-१-४ प्रैतुब्रह्मणस्पति:०। ४-६-१-२८ अदितिष्ट्वादेवी० । ४-६-५-८३,८४ बृहस्पतिष्टवा विश्वेदेवै० । ४-६-६-८६-६४ गर्भोदेवानां० । ४-१०-३-८४-८६ विश्वेदेवाऋता० । ४-१०-४-६५ अग्नेविश्वेभि:० । ४-११-२-६३,६४ ~~मन्त्र~~ बृहस्पते० इतिद्वौ । ४-११-२-७३ यंत्वादेवापि:० । ४-११-६-१३४ मानोदेवानां० । ४-१२-१-७ धारयन्त० । ४-१२-१-२३,२४ विश्वेदेवा० इतिद्वौ। ४-।१२-३८ नवोनवो० । ४-१२-३-५३,५४ अनुत्वाहिघ्ने० ।-~~स-स~~

४-१२-४-८५ विश्वेदेवास: परमे० । ४-१२-६-१४७,१४८,१५१,१६० अवश्विोअया० इत्यादय: । ४-१२-६-१६६ आ विश्वेदवं० । ४-१३-४-२६ अग्निशुश्च० । ४-१३-५-४४ अग्निं सुदीतिं०। ४-१४-१-१३ प्रजापतेत्वं० । १५- प्रजापति: प्रथमं० । २० कुविदङ्ग ४-१४-२-२७-२६ देवानां मद्रा० । ३१ उतदेवा० । ४-१४४-५७ अदितिर्यौ० ।
७-१४-६-७८,७५ विष्णुं देवं० इतिद्वौ० । ७-१४-६-७८-७६ विष्णूवरुणा० ।
७-१४-८-१०५ पिशङ्गरूप:०। ७-१४-११-१४५-१४७ आनो विश्वे इतित्रय:०।
७-२४-१७-२४२ देवाजीवन काम्या० ।

इति मैत्रायणी संहितायां वैश्वदेव प्रतीकानि ।

--००--

।। साम वेदे कौथुमशाखायां विश्वेदेवा: ।।

।। प्रथमं पूर्वार्चिक माग्नेय काण्डम् ।।

(अत्र अध्याय - खण्ड मन्त्राणामङ्कका लिखिता:)

१।१७।३, ५, ६

इदं त एकं पर उ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशनस्तन्वे३ चारुरेधि प्रियो देवानां परमे जनित्रे ।।
मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविꣳ सम्राजमतिथिं जनानामासन्न: पात्रं जनयन्त देवा: ।।
वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवा: ।
तं त्वा गिर: सुष्टुतयो वाजयन्त्याजिं न गिर्ववाहो जिग्युरश्वा: ।।

१।१०।१

सोमꣳ राजानं वरुणमग्निमन्वारभामहे ।आदित्यं विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम् ।।

१।११।६

अप त्यं वृजिनꣳ रिपुꣳ स्तेनमग्ने दुराध्यम् । दविष्ठमस्य सत्पते कृधी सुगम् ।।

२।३।४

देवानामिदवो महत्तदा वृणीमहे वयम् । वृष्णामस्मभ्यमूतये ।।

२।११।५

ऋजुनीती नो वरुणो मित्रो नयति विद्वान् । अर्यमा देवै: सजोषा: ।।

४।२।६

अमी ये देवा स्थन मध्य आ रोचने दिव: । कद ऋतं कदमृतं का प्रत्ना व आहुति: ।।

४।७।६

चन्द्रमा अप्स्वा३न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमय: पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ।।

४।८।८

न तमँ हो न दुरितं देवासो अष्ट मर्त्यम् ।
सजोषसो यमर्यमा मित्रो नयति वरुणो अति द्विष: ।।

४।१०।६

सदा गाव: शुचयो विश्वधायस: सदा देवा अरेपस: ।।

४।११।६-९

इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवा: ।।
वि ह्रुतयो यथा पथा इन्द्र त्वद्यन्तु रातय: ।।
अया वाजं देवहितँ सनेम मदेम शतहिमा: सुवीरा: ।।
ऊर्जा मित्रो वरुण: पिन्वतेडा: पीवरीमिषं कृणुही न इन्द्र ।।

४।१२।५

अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु त्यच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।
यद्ध क्राणा विवस्वते नाभा सन्दाय नव्यसे। अध प्र नूनमुप यन्ति धीतयो देवाँ अच्छा न धीतय:।।

६।१।६

इमं वृषणं कृणुतैकमिन्माम् ।।

६।२।५

प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।
धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठ: ।।

६।३।६

विश्वे देवा मम श्रृण्वन्तु यज्ञमुभे रोदसी अपां नपाच्च मन्म ।
मा वो वचाँसि परिचक्ष्याणि वोचँ सुम्नेष्विद्वो अन्तमा मदेम ।।

एवाह्येऽ३ऽ३ऽ३ व । एवा ह्यग्ने । एवाहीन्द्र ।एवा हि पूषन्। एवा हि देवा: ऊँ एवाहि देवा:

७।७।२३

इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवा: ।।
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्र: सह सीषधातु ।।
आदित्यैरिन्द्र: सगणो मरुद्भिरस्मभ्यं भेषजा करत् ।।

१४।२।६

अग्ने विश्वेभिरग्निभिर्जोषि ब्रह्म सहस्कृत । ये देवत्रा य आयुषु तेभिर्नो महया गिर: ।।
प्र स विश्वेभिरग्निभिरग्नि: स यस्य वाजिन: । तनये तोके अस्मदा सम्यङ्वाजै: परीवृत: ।।
त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय । त्वं नो देवतातये रायो दानाय चोदय ।।

१६।३।१३

उप न: सूनवो गिर: शृण्वन्त्वमृतस्य ये । सुमृडीका भवन्तु न: ।।

२०।५।५,६

इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तँ राधसो मह: ।
रातिं वामस्य सुभगां महीमिषं दधासि सानसिँरयिम् ।।
ऋतावानं महिषं विश्वदर्शतमग्निँ सुम्नाय दधिरे पुरो जना ।
श्रुत्कर्णँसप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ।।

२१।१।६।२,३)

भद्रं कर्णेभि: शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा: ।
स्थिरैरङ्गैस्तुष्टुवाँ सस्तनूभिर्व्यशेमहि देवहितं यदायु: ।।
स्वस्ति न इन्द्रो वृद्धश्रवा: स्वस्ति न: पूषा विश्ववेदा: ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमि: स्वस्ति नो बृहस्पतिर्दधातु ।।
ऊँ स्वस्ति नो बृहस्पतिर्दधातु ।।

--००--

।। श्री ।।

सामवेदीय जैमिनीय संहितायां विश्वेदेवा: ।।

।। अत्र- काण्ड सूक्त- मन्त्र क्रमेणाङ्को ल्लेख: ।।

१+५+२ शेणो वनेषु मातृषु सं त्वा मर्तास इन्धते ।
अतन्द्रो हव्यं वहसि हविष्कृत आद् इद् देवेषु राजसि ।।

१।५।६ श्रुधि श्रुत्कर्ण वन्हिभिर् देवैर् अग्ने सयावभि: ।
आ सीदतु बर्हिषि मित्रो अर्यमा प्रातर्यावभिर् अध्वरे ।।

१।६।२ प्रैतु ब्रह्मणस् पति: प्र देव्य् एतु सूनृता ।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु न: ।।

१।७।३, ५, ६ इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशनस् तन्वे चारुर् एधि प्रियो देवानां परमे जनित्रे ।
मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरम् ऋत आ जातम् अग्निम् ।
कविं सम्राजम् अतिथिं जनानाम् आसन्न: पात्रं जनयन्त देवा: ।।
वि त्वद् आपो न पर्वतस्य पृष्ठाद् उक्थेभिर् अग्ने जनयन्त देवा: ।
तं त्वा गिर: सुष्टुतयो वाजयन्त्य् आजिं न गिर्ववाहो जिग्युर् अश्वा: ।।

१।१२।३ तं गूर्धया स्वर्णरं देवासो देवम् अरतिं दधन्विरे ।
देवत्रा हव्यम् ऊहिषे ।।

१।१५।४ देवानाम् इद् अवो महत् तद् आ वृणीमहे वयम् ।
वृष्णाम् अस्मभ्यम् ऊतये ।।

१।१८।८ ये ते पन्था अधो दिवो येभिर् व्यश्वम् ऐरय: ।
उत श्रोषन्तु नो भुव: ।।

१।१९।२ न कि देवा इनीमसि न क्या आ योपयामसि ।
मन्त्रश्रुत्यं चरामसि ।।

१।२३।५ ऋजुनीती नो वरुणो मित्रो नयति विद्वान् ।
अर्यमा देवै: सजोषा: ।।

१।३३।३ कु ष्ठ: कोवाम् अश्विना तपानो देवा मर्त्यः ।
घ्नता वाम् अश्नया क्षापमाणोऽंशुनेत्थम् उ आद् व् अन्यथा ।।
१।३४।२ वृत्रस्य त्वा श्वसथाद् ईषमाणा विश्वे देवाअजहुर ये सखाय: ।
मरुद्भिर् इन्द्र सख्यं ते अस्त्व अथेमा विश्वा: पृतना जयासि ।।
१।३५।७ इन्द्रापर्वता बृहता रथेन वामीर् इष आ वक्षं सुवीरा: ।
वीतं हव्यान्य् अध्वरेषु देवा वर्धेथां गीर्भिर् इडया मदन्ता ।।
१।३६।७ एन्द्र याहि हरिभिर् उप कण्वस्य सुष्टुतिम् ।
देवा अमुष्य शासतो दिवं यय दिवावसो ।।
१।३८।६,१० अमी ये देवा स्थन मध्ये ये रोचने दिव: ।
कद् व ऋतं कद् अमृतं का प्रत्ना व आहुति: ।।
ऋचं साम यजामहे याभ्यां कर्माणि कृण्वते ।
वि ते सदसि राजतो यज्ञं देवेषु वक्षत: ।।
१।४१।८ न तम् अंहो न दुरितं देवासो अष्ठ मर्त्यम् ।
सजोषसो यम् अर्यमा मित्रो नयन्ति वरुणो अति द्विष: ।।
१।४२।३ पवस्व सोम महान् समुद्र: पिता देवानां विश्वाभि धाम ।।
१।४६।५ शं पदं मघं रयीषिणे न कामम् अव्रतो हिनोति न
स्पृशद् रयिम् ।।
१।४७।६ इमा नु कं भुवना सीषधेमेन्द्रश् च विश्वे च देवा: ।।
१।४९।८ पवस्व दक्षसाधनो देवेभ्य: पीतये हरे ।
मरुद्भ्यो वायवे मद: ।।
१।५१।१ उपो षु जातम् अप्तुरं गोभिर् भङ्गं परिष्कृतम् ।
इन्दुं देवा अयासिषु: ।।
१।५३।११ पवस्व वाजसातमोऽभि विश्वानि वार्या ।
त्वं समुद्र: प्रथमे विधर्मन् देवेभ्य: सोम मत्सर: ।।
१।५४।२,४ प्र काव्यम् उशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रत: शुचिबन्धु: पावक: पदा वराहो अभ्य् एति रेभन् ।।
अस्य प्रेषा हेमना पूयमानो देवो देवेभि: सम् अपृक्त रसम् ।
सुत: पवित्रं पर्य् एति रेभन मितेव सद्म पशुमन्ति होता ।।

१।३३।३ कु ष्ठ: कोवाम् अश्विना तपानो देवा मर्त्यः ।
घ्नता वाम् अश्नया क्षापमाणोऽंशुनेत्थम् उ आद् व् अन्यथा ।।
१।३४।२ वृत्रस्य त्वा श्वसथाद् ईषमाणा विश्वे देवाअजहुर् ये सखाय: ।
मरुभ्दिर् इन्द्र सख्यं ते अस्त्व अथेमा विश्वा: पृतना जयासि ।।
१।३५।७ इन्द्रापर्वता बृहता रथेन वामीर् इष आ वक्षं सुवीरा: ।
वीतं हव्यान्य् अध्वरेषु देवा वर्धेथां गीर्भिर् इळया मदन्ता ।।
१।३६।७ एन्द्र याहि हरिभिर् उप कण्वस्य सुष्टुतिम् ।
देवा अमुष्य शासतो दिवं यय दिवावसो ।।
१।३८।६,१० अमी ये देवा स्थन मध्ये ये रोचने दिव: ।
कद् व ऋतं कद् अमृतं का प्रत्ना व आहुति: ।।
कथं साम यजामहे याभ्यां कर्माणि कृण्वते ।
वि ते सदसि राजतो यज्ञं वेदेषु वक्षात: ।।
१।४१।८ न तम् अंहो न दुरितं देवासो अष्ठ मर्त्यम् ।
सजोषसो यम् अर्यमा मित्रो नयन्ति वरुणो अति द्विष: ।।
१।४२।३ पवस्व सोम महान् समुद्र: पिता देवानां विश्वाभि धाम ।।
१।४६।५ शं पदं मघं रयीषिणे न कामम् अव्रतो हिनोति न
स्पृशद् रयिम् ।।
१।४७।६ इमा नु कं भुवना सीषधेमेन्द्रश् च विश्वे च देवा: ।।
१।४६।८ पवस्व दक्षासाधनो देवेभ्य: पीतये हरे ।
मरुभ्दयो वायवे मद: ।।
१।५१।१ उपो षु जातम् अप्तुरं गोभिर् भङ्ग परिष्कृतम् ।
इन्दुं देवा अयासिषु: ।।
१।५३।११ पवस्व वाजसातमोऽभि विश्वानि वार्या ।
त्वं समुद्र: प्रथमे विधर्मन् देवेभ्य: सोम मत्सर: ।।
१।५४।२,४ प्र काव्यम् उशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रत: शुचिबन्धु: पावक: पदा वराहो अभ्य् एति रेभन् ।।
अस्य प्रेषा हेमना पूयमानो देवो देवेभि: सम् अपृक्त रसम् ।
सुत: पवित्रं पर्य् एति रेभन मितेव सद्म पशुमन्ति होता ।।

१।५५।३ प्र गायताभ्य् अर्चाम देवान् सोमं हिनोता महते धनाया ।
स्वादुः पवताम् अति वारम् अव्यम् आ सीदतु कलशं देव इन्दुः ।।
१।५५।६ महत् तत् सोमो महिषश् चकारापां यद् गर्भोऽवृणीत देवान् ।
अदधाद् इन्द्रे पवमान ओजोऽजनयत् सूर्ये ज्योतिर् इन्दुः ।।
१।५६।४,५ परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।
यो देवान् विश्वं इत् परि मदेन सह गच्छति ।।
सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ।।
१।५७।२,५ अचोदसो नो धन्वन्त्व् इन्दवः प्र स्वानासो बृहद् देवेषु हरयः ।
वि चिद् अश्नाना इषयो अरातयोऽर्यो नः सन्तु सनिषन्तु नो धियः ।।
धर्ता दिवः पवते कृत्वियो रसो दक्षो देवनाम् अनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर् वृथा पाजांसि कृणुषे नदीष्व् आ ।।

२।१।५ इदं छन्दो जमदग्ने ऋतावृधो येन देवासो अमृतत्वम् आयन् ।
तत्र द्यावापृथिवी धत्तम् अस्मान् यत्र देवानां गुह्यं निधाम ।।
२।२।४,८ विश्वे देवा मम शृण्वन्तु यज्ञम् उभे रोदसी अपां नपाच् च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्व् इद् वो अन्तम् आ वदेम ।।
पात्य् अग्निर् विपो अग्रं पदं वेः पाति यह्वश् चरणं सूर्यस्य ।
पाति नामा सप्तशीर्षाणम् अग्निः पाति देवानाम् उपमादम् ऋष्वः ।।
२।४।१,२,६ यत् पुरुषेण हविषा देवा यज्ञम् अतन्वत ।
वसन्त एषाम् आसीद् आज्यं ग्रीष्म इध्मः शरद् धविः ।।
सप्तास्यासन् परिधयस् त्रिः सप्त समिधः कृताः ।
देवा यद् यज्ञं तन्वाना अबन्धन् पुरुषं हविः ।।
चित्रं देवानाम् उद् अगाद् अनीकं चक्षुर् मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस् तस्थुषश् च ।।
२।७।४ एवा ह्य् एवा । एवा ह्य् अग्ने । एवा हीन्द्र ।
एवा हि पूषन् । एवा हि देवाः ।।

३।१।२ गायत्रं त्रैष्टुभं जगद् विश्वा रूपाणि संभृतम् ।
देवा ओकांसि चक्रिरे ।।

३।३।७ स्वायुधः पवते देव इन्दुर् अशस्तिहा वृजना रक्षमाणः ।
पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ।।

३।७।६,१२ इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति ।
यन्ति प्रमादम् अतन्द्राः ।।
त्रिकद्रुकेषु चेतनं देवासो यज्ञम् अत्नत ।
तम् इद् वर्धन्तु नो गिरः ।।

३।८।६ नहि त्वा शूर देवा न मर्तासो दित्सन्तम् ।
भीमं न गां वारयन्ते ।।

३।९।११ स प्रथमे व्योमनि देवानां सदने वृधः ।
सुपारः सुश्रवस्तमः सम् अप्सुजित् ।।

३।११।४,५,८ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
हरिः पवित्रे अर्षति ।।
एष प्रत्नेन मन्मना देवो देवेभ्यस् परि ।
कविर् विप्रेण वावृधे ।।
उपो षु जातम् अप्तुरं गोभिर् भङ्गं परिष्कृतम् ।
इन्दुं देवा अयासिषुः ।।

३।२०।६,७ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ।।
इन्दुर् इन्द्राय पवत इति देवासो अब्रुवन् ।
वाचस् पतिर् मखस्यते विश्वस्येशान ओजसा ।।

३।२१।१३,२०,२१ अक्षुर् अर्षा बृहन्मते परि प्रियेण धाम्ना ।
यत्र देवा इति ब्रुवन् ।।
पवमान रुचारुचा देव देवेभ्यः सुतः ।
विश्वा वसून्य् आ विश ।।
आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।
इषे पवस्व संयतम् ।।

३।२३।१,२ पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
मरुद्भ्यो वायवे मदः ।।
सं देवैः शोभते वृषा कविर् योनाव् अधि प्रियः।
पवमानो अदाभ्यः ।।

३।२४।५,४४ येना नवग्वा दध्यङ्ङ् अपोर्णुते येन विप्रास आपिरे ।
देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्य् आशत ।।
अयं विश्वा अभि श्रियो अग्निर् देवेषु पत्यते ।
आ वाजैर् उप नो गमत् ।।

३।३०।६ पवस्व वाजसातये पवित्रे धारया सुतः ।
इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ।।

३।३१।१ ज्योतिर् यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।
दधाति रत्नं स्वधयोरे अपीच्यं मदिंतमो मत्सर इन्द्रियो रसः ।।

३।३३।५ पुनानो वारे पवमानो अव्यये वृषो अचिक्रदद् वने ।
देवानां सोम पवमान निष्कृतं गोभिर् अञ्जानो अर्षसि ।।

३।३४।३,८,१८ त्वे विश्वे सजोषसो देवासः पीतिम् आशत ।
मदेषु सर्वधा असि ।।
अयं दक्षाय साधनोऽयं शर्धाय वीतये ।
अयं देवेभ्यो मधुमत्तमः सुतः ।।
इमा नु कं भुवना सीषधेमेन्द्रश्च च विश्वे च देवाः ।।

३।३५।१ प्र काव्यम् उशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्य् एति रेभन् ।।

३।३८।४-६,८,९ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरम् ऋत आ जातम् अग्निम् ।
कविं सम्राजम् अतिथिं जनानाम् आसन्नः पात्रं जनयन्त देवाः ।।
त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते ।।
तव क्रतुभिर् अमृतत्वम् आयन् वैश्वानर यत् पित्रोर् अदीदेः ।
नाभिं यज्ञानां सदनं रयीणां महाम् आहावम् अभि सं नवन्त ।
वैश्वानरं रथ्यम् अध्वराणां यज्ञस्य केतुं जनयन्त देवाः ।।

सम्राजा या घृतयोनी मित्रश् चोभा वरुणश् च ।
देवा देवेषु प्रशस्ता ।।
ता न: शक्तं पार्थिवस्य महो रायो दिव्यस्य ।
महि वां क्षत्रं देवेषु ।।

३।४०।११ ते नो वृष्टिं दिवस् परि पवन्ताम् आ सुवीर्यम् ।
स्वाना देवास इन्दव: ।।

३।४१।६,८ इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय ।
देवानां योनिम् आसदम् ।।
देवेभ्यस् त्वा मदाय कं सृजानम् अति मेष्य: ।
सं गोभिर् वासयामसि ।।

३।४२।७ ते न: सहस्रिणं रयिं पवन्ताम् आ सुवीर्यम् ।
स्वाना देवास इन्दव: ।।

३।४८।७,८,११ पवस्व सोम महान् समुद्र: पिता देवानां विश्वाभि धाम ।।
शुक्र: पवस्व देवेभ्य: सोम दिवे पृथिव्यै शं च प्रजाभ्य: ।।
कविम् इव प्रशंस्यं यं देवास इति द्विता ।
नि मर्त्येष्व आदधु: ।।

३।४६।२,३ महत् तत् सोमो महिषश् चकारापां यद् गर्भो ऽवृणीत देवान् ।
अदधाद् इन्द्रे पवमान ओजो ऽजनयत् सूर्ये ज्योतिर् इन्दु: ।।
मत्सि वायुम् इष्टये राधसे नो मत्सि मित्रावरुणा पूयमान:
मत्सि शर्धो मारुतं मत्सि देवान् मत्सि द्यावापृथिवी देव सोम ।।

३।५०।२ एष प्रत्नेन जन्मना देवो देवेभ्य: सुत: ।
हरि: पवित्रे अर्षति ।।

३।५१।६ एष पवित्रे अक्षरत् सोमो देवेभ्य: सुत: ।
विश्वा वसून्य् आविशन् ।।

३।५४।८ यं धारयन्त देवा: सुदक्षा दक्षपितरा ।
असुर्याय प्रमहसा ।।

३।५६।५,७,११,१३ तव त्यष्या उदप्रुत इन्द्रं मदाय वावृधुः ।
त्वां देवासो अमृताय कं पपुः ।।
परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।
यो देवान् विश्वं इत् परि मदेन सह गच्छति ।।
शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ।।
उपो षु जातम् अप्तुरं गोभिर् भङ्गं परिष्कृतम् ।
इन्दुं देवा अयासिषुः ।।
३।५७।२ मधुमन्तं तनूनपाद् यज्ञं देवेषु नः कवे ।
अद्या कृणुहि वीतये ।।
३।५६।११ इन्द्रस् ते सोम सुतस्य पेयात् क्रत्वे दक्षाय विश्वे च देवाः ।।
४।१।७ प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या ।
देवान् जिगाति सुम्नयुः ।।
४।२।२ प्रत्यङ् देवानां विशः प्रत्यङ्ङ् उद् एषि मानुषान् ।
प्रत्यङ् विश्वं स्वर् दृशे ।।
४।३।३ बट् सूर्य श्रवसा महं असि सत्रा देव महं असि ।
मन्हा देवानाम् असुर्यः पुरोहितो विभु ज्योतिर् अदाभ्यम् ।।
४।१०।६ यस्या देवा उपस्थे व्रता विश्वे धारयन्ते ।
सूर्यामासा दृशे कम् ।।
४।१५।२ साह्वान् विश्वा अभियुजः क्रतुर् देवानाम अमृक्तः ।
अग्निस् तुविश्रवस्तमः ।।
४।१८।१-३ अग्ने विश्वेभिर् आ गहि देवेभिर् हव्यदातये ।
होतारं त्वा वृणीमहे ।।
यजमानाय सुन्वत आग्ने सुवीर्यं वह ।
देवैर् आ सत्सि बर्हिषि ।।
समिधानः सहस्त्रजिद् अग्ने धर्माणि पुष्यसि ।
देवानां दूत उक्थ्यः ।।

४।१६।४ त्वे इद् अग्ने सुभगे यविष्ठ्य विश्वम् आ हूयते हविः ।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान् सुवीर्या ।।

४।२१।२ तं होतारम् अध्वरस्य प्रचेतसं वन्हिं देवा अकृण्वत ।
दधाति रत्नं विधते सुवीर्यम् अग्निर् जनाय दाशुषे ।।

४।२४।४,६ तं गाथया पुराण्या पुनानम् अभ्य् अनूषत ।
उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ।।
अग्ने विश्वेभिर् अग्निभिर् देवेभिर् महया गिरः ।
यज्ञेषु ये उ चायवः ।।

४।२५।३ ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः ।
जन्मन् देवानां विशस् त्रिष्व् आ रोचने दिवः ।।

४।२६।३ तं गृध्या स्वर्णरं देवासो देवम् अरतिं दधन्विरे ।
देवत्रा हव्यम् ऊहिषे ।।

४।३०।२ स न ऊर्जे व्य् अव्ययं पवित्रं धाव धारया ।
देवासः शृणवन् हि कम् ।।

--००--

।। श्री ।।

।। अथर्व वेद शौनक संहितायां विश्वेदेवा ।।

(अत्र काण्ड - सूक्त - मन्त्राणा मङ्कनं विधीयते)

।। प्रथमं काण्डम् ।।

१।६।१,२

अस्मिन्वसु वसवो धारयन्त्विन्द्रः पूषा वरुणो मित्रो अग्निः ।
इममादित्या उत विश्वे च देवा उत्तरस्मिन् ज्योतिषि धारयन्तु ।।
अस्य देवाः प्रदिशि ज्योतिरस्तु सूर्यो अग्निरुत वा हिरण्यम् ।
सपत्ना अस्मदधरे भवन्तूत्तमं नाकमधि रोहयेमम् ।।

१।११।२

चतस्रो दिवः प्रदिशश्चतस्रो भूम्या उत ।
देवा गर्भं समैरयन् तं व्यूर्णुवन्तु सूतवे ।।

१।१८।२

निररणिं सविता साविषक् पदोर्निर्हस्तयोर्वरुणो मित्रो अर्यमा ।
निरस्मभ्यमनुमती रराणा प्रेमां देवा असाविषुः सौभगाय ।।

१।१९।४

यः सपत्नो योऽसपत्नो यश्च द्विषन् छपाति नः ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ।।

१।२६।१

आरे ३ सावस्मदस्तु हेतिर्देवासो असत् । आरे अश्मा यमस्यथ ।।

१।३०।१-४

विश्वे देवा वसवो रक्षतेममुतादित्या जागृत यूयमस्मिन् ।
मेमं सनाभिरुत वान्यनाभिर्मेमं प्रापत् पौरुषेयो वधो यः ।।

ये वो देवा: पितरो ये च पुत्रा: सचेतसो मे शृणुतेदमुक्तम् ।
सर्वेभ्यो व: परि ददाम्येतं स्वस्त्ये(नं जरसे वहाथ ।।
ये देवा दिवि ष्ठ ये पृथिव्यां ये अन्तरिक्ष ओषधीषु पशुष्वप्स्वन्त: ।
ते कृणुत जरसमायुरस्मै शतमन्यान्परि वृणक्तु मृत्यून् ।।
येषां प्रयाजा उत वानुयाजा हुतभागा अहुतादश्च देवा: ।
येषां व: पन्च प्रदिशो विभक्तास्तान्वो अस्मै सत्रसद: कृणोमि ।।

१।३१।२

य आशानामाशापालाश्चत्वार स्थन देवा: ।
ते नो निर्ऋत्या: पाशेभ्यो मुञ्चतांहसोअंहस: ।।

१।३३।२

यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति ।
या अग्निं गर्भं दधिरे सुवर्णास्ता न आप: शं स्योना भवन्तु ।।

१।३५।२,४

नैनं रक्षांसि न पिशाचा: सहन्ते देवानामोज: प्रथमजं ह्येऽतत् ।
यो बिभर्ति दाक्षायणं हिरण्यं स जीवेषु कृणुते दीर्घमायु: ।।
समानां मासामृतुभिष्ट्वा वयं संवत्सरस्य पयसा पिपर्मि ।
इन्द्राग्नी विश्वे देवास्तेऽनु मन्यन्तामहृणीयमाना: ।।

२।१।३,५

स नः पिता जनिता स उत बन्धुर्धामानि वेद भुवनानि विश्वा ।
यो देवानां नामध एक एव तं संप्रश्नं भुवना यन्ति सर्वा ।।
परि विश्वा भुवनान्यायमृतस्य तन्तुं विततं दृशे कम् ।
यत्र देवा अमृतमानशानाः समाने योनावध्यैरयन्त ।।

२।९।४

देवास्ते चीतिमविदन्ब्रह्माण उत वीरुधः ।
चीतिं ते विश्वे देवा अविदन्भूम्यामधि ।।

२।१०।८

सूर्यमृतं तमसो ग्राह्या अधि देवा मुञ्चन्तो असृजन्निरेणसः ।
एवाहं त्वां क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुञ्चामि वरुणस्य पाश
अनागसं ब्रह्मणा त्वा कृणामि शिवे ते द्यावापृथिवी उभे स्ताम् ।।

२।१२।२,५

इदं देवाः शृणुत ये यज्ञिया स्थ भरद्वाजो मह्यमुक्थानि शंसति ।
पाशे स बद्धो दुरिते नि युज्यतां यो अस्माकं मन इदं हिनस्ति ।।
द्यावापृथिवी अनु मा दीधीथां विश्वे देवासो अनु मा रभध्वम् ।
अङ्गिरसः पितरः सोम्यासः पापमार्छत्वपकामस्य कर्ता ।।

२।१३।४,५

एह्यश्मानमा तिष्ठाश्मा भवतु ते तनूः ।
कृण्वन्तु विश्वे देवा आयुष्टे शरदः शतम् ।।
यस्य ते वासः प्रथमवास्यं१ हरामस्तं त्वा विश्वेऽवन्तु देवाः ।
तं त्वा भ्रातरः सुवृधा वर्धमानमनु जायन्तां बहवः सुजातम् ।।

२।१६।४

अग्ने वैश्वानर विश्वैर्मा देवैः पाहि स्वाहा ।।

२।२६।१,५

पार्थिवस्य रसे देवा भगस्य तन्वो३ बले ।
आयुष्य्मस्मा अग्नि: सूर्यो वर्च आ धाद्बृहस्पति: ।।
ऊर्जमस्मा ऊर्जस्वती धत्तं पयो अस्मै पयस्वती धत्तम् ।
ऊर्जमस्मै द्यावापृथिवी अधातां विश्वे देवा मरुत ऊर्जमाप: ।।

२।३४।२

प्रमुञ्चन्तो भुवनस्य रेतो गातुं धत्त यजमानाय देवा: ।
उपाकृतं शशमानं यदस्थात्प्रियं देवानामप्येतु पाथ: ।।

२।३५।५

यज्ञस्य चक्षु: प्रभृतिर्मुखं च वाचा श्रोत्रेण मनसा जुहोमि ।
इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु सुमनस्यमाना: ।।

।। तृतीयं काण्डम् ।।

३।३।१,२,५

अचिक्रदत्स्वपा इह भुवदग्ने व्यचस्व रोदसी उरूची ।
युञ्जन्तु त्वा मरुतो विश्ववेदस आमुं नय नमसा रातहव्यम् ।।
दूरे चित्सन्तमरुषास इन्द्रमा च्यावयन्तु सख्याय विप्रम् ।
यद्गायत्रीं बृहतीमर्कमस्मै सौत्रामण्या दधृषन्त देवा: ।।
ह्वयन्तु त्वा प्रतिजना: प्रति मित्रा अवृषत् ।
इन्द्राग्नी विश्वे देवास्ते विशि क्षेममदीधरन् ।।

३।४।४,६

अश्विना त्वाग्रे मित्रावरुणोभा विश्वे देवा मरुतस्त्वा ह्वयन्तु ।
अधा मनो वसुदेयाय कृणुष्व ततो न उग्रो वि भजा वसूनि ।।
इन्द्रेन्द्र मनुष्या३: परेहि सं ह्यज्ञास्था वरुणै: संविदान: ।
स त्वायमह्वत्स्वे सधस्थे स देवान्यक्षत्स उ कल्पयाद्विश: ।।

३।५।३

य निदधुर्वनस्पतौ गुह्यं देवाः प्रियं मणिम् ।
तमस्मभ्यं सहायुषा देवा ददतु भर्तवे ।।

३।८।३,४

हुवे सोमं सवितारं नमोभिर्विश्वानादित्याँ अहमुत्तरत्वे ।
अयमग्निर्दीदायद्दीर्घमेव सजातैरिद्धो प्रतिब्रुवद्भिः ।।
इहेदसाथ न परो गमाथेर्यो गोपाः पुष्टपतिर्व आजत् ।
अस्मै कामायोप कामिनीर्विश्वे वो देवा उपसंयन्तु ।।

३।९।१-६

कर्शफस्य विशफस्य द्यौः पिता पृथिवी माता ।
यथाभिचक्र देवास्तथाप कृणुता पुनः ।।
अश्रेष्माणो अधारयन्तथा तन्मनुना कृतम् ।
कृणोमि वध्रि विष्कन्धं मुष्काबर्हो गवामिव ।।
पिशङ्गे सूत्रे खृगलं तदा बध्नन्ति वेधसः ।
श्रवस्युं शुष्मं काबवं वध्रिं कृण्वन्तु बन्धुरः ।।
येना श्रवस्यवश्चरथ देवा इवासुरमायया ।
शुनां कपिरिव दूषणो बन्धुरा काबवस्य च ।
दुष्ट्यै हि त्वा भत्स्यामि दूषयिष्यामि काबवम् ।
उदाशवो रथा इव शपथेभिः सरिष्यथ ।।
एकशतं विष्कन्धानि विष्ठिता पृथिवीमनु ।
तेषां त्वामग्र उज्जहरुर्मणिं विष्कन्धदूषणम् ।।

३।१०।२,७,११,१२

यां देवाः प्रतिनन्दन्ति रात्रिं धेनुमुपायतीम् ।
संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली ।।
आ मा पुष्टे च पोषे च रात्रि देवानां सुमतौ स्याम ।
पूर्णा दर्वे परा पत सुपूर्णा पुनरा पत ।
सर्वान्यज्ञान्त्संभुञ्जतीषमूर्जं न आ भर ।।

इडया जुह्वतो वयं देवान्घृतवता यजे ।
गृहानलुभ्यतो वयं सं विशेमोप गोमतः ।।
एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् ।
तेन देवा व्यसहन्त शत्रून्हन्ता दस्यूनामभवच्छचीपतिः ।।

३।१२।५

मानस्य पत्नि शरणा स्योना देवी देवेभिर्निमितास्यग्रे ।
तृणं वसाना सुमना असस्त्वमथास्मभ्यं सहवीरं रयिं दाः ।।

३।१५।१-८

इन्द्रमहं वणिजं चोदयामि स न ऐतु पुरएता नो अस्तु ।
नुदन्नरातिं परिपन्थिनं मृगं स ईशानो धनदा अस्तु मह्यम ।।
ये पन्थानो बहवो देवयाना अन्तरा द्यावापृथिवी संचरन्ति ।।
ते मा जुषन्तां पयसा घृतेन यथा क्रीत्वा धनमाहराणि ।।
इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय ।
यावदीशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम् ।।
इमामग्ने शरणिं मीमृषो नो यमध्वानमगाम दूरम् ।
शुनं नो अस्तु प्रपणो विक्रयश्च प्रतिपणः फलिनं मा कृणोतु ।
इदं हव्यं संविदानो जुषेथां शुनं नो अस्तु चरितमुत्थितं च ।।
येन धनेन प्रपणं चरामि धनेन देवा धनमिच्छमानः ।
तन्मे भूयो भवतु मा कनीयोऽग्ने सातघ्नो देवान्हविषा नि षेध ।।
येन धनेन प्रपणं चरामि धनेन देवा धनमिच्छमानः ।
तस्मिन्म इन्द्रो रुचिमा दधातु प्रजापतिः सविता सोमो अग्निः ।।
उप त्वा नमसा वयं होतर्वैश्वानर स्तुमः ।
स नः प्रजास्वात्मसु गोषु प्राणेषु जागृहि ।।
विश्वाहा ते सदमिद्भरेमाश्वायेव तिष्ठते जातवेदः ।
रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम ।।

३।१६।४

उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदितौ मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम ।।

३।१७।९

घृतेन सीता मधुना समक्ता विश्वैर्देवैरनुमता मरुद्भिः ।
सा नः सीते पयसाभ्याववृत्स्वोर्जस्वती घृतवत्पिन्वमाना ।।

३।१९।१-८

संशितं म इदं ब्रह्म संशितं वीर्य१ बलम् ।
संशितं क्षत्रमजरमस्तु जिष्णुर्येषामस्मि पुरोहितः ।।
समहमेषां राष्ट्रं स्यामि समोजो वीर्य१ बलम् ।
वृश्चामि शत्रूणां बाहूननेन हविषाहम् ।।
नीचैः पद्यन्तामधरे भवन्तु ये नः सूरिं मघवानं पृतन्यान ।
क्षिणामि ब्रह्मणामित्रानुन्नयामि स्वानहम् ।।
तीक्ष्णीयांसः परशोरग्नेस्तीक्ष्णतरा उत ।
इन्द्रस्य वज्रात्तीक्ष्णीयांसो येषामस्मि पुरोहितः ।।
एषामहमायुधा सं स्याम्येषां राष्ट्रं सुवीरं वर्धयामि ।
एषां क्षत्रमजरमस्तु जिष्ण्वे३षां चित्तं विश्वेऽवन्तु देवाः ।।
उद्धर्षन्तां मघवन्वाजिनान्युद्वीराणां जयतामेतु घोषः ।
पृथग्घोषा उलुलयः केतुमन्त उदीरताम् ।
देवा इन्द्रज्येष्ठा मरुतो यन्तु सेनया ।।
प्रेता जयता नर उग्रा वः सन्तु बाहवः ।
तीक्ष्णेषवोऽबलधन्वनो हतोग्रायुधा अबलानुग्रबाहवः ।।
अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते ।
जयामित्रान्प्र पद्यस्व जह्येषां वरंवरं मामीषां मोचि कश्चन ।।

३।२२।१-६

हस्तिवर्चसं प्रथतां बृहद्यशो अदित्या यत्तन्वः संबभूव ।
तत्सर्वे समदुर्मह्यमेतद्विश्वे देवा अदितिः सजोषाः ।।
मित्रश्च वरुणश्चेन्द्रो रुद्रश्च चेततु । देवासो विश्वधायसस्ते माञ्जन्तु वर्चसा ।।
येन हस्ती वर्चसा संबभूव येन राजा मनुष्येष्वप्स्व१न्तः ।
येन देवा देवतामग्र आयन्तेन माभद्य वर्चसाग्ने वर्चस्विनं कृणु ।।

यत्ते वर्चो जातवेदो बृहद्भवत्याहुते: ।
यावत्सूर्यस्य वर्च आसुरस्य च हस्तिन: ।।८
तावन्मे अश्विना वर्च आ धत्तां पुष्करस्रजा ।।
यावच्चतस्र: प्रदिशश्चक्षुर्यावत्समश्नुते ।
तावत्समैत्विन्द्रियं मयि तद्धस्तिवर्चसम् ।।
हस्ती मृगाणां सुषदामतिष्ठावान्बभूव हि ।
तस्य भगेन वर्चसाभि षिञ्चामि मामहम् ।।

३।२६।१-६

येऽ३ स्यां स्थ प्राच्यां दिशि हेतयो नाम देवास्तेषां वो अग्निरिषव: ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो व: स्वाहा ।।
येऽ३ स्यां स्थ दक्षिणायां दिश्य1विष्यवो नाम देवास्तेषां व: काम इषव: ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो व: स्वाहा ।।
येऽ३ स्यां स्थ प्रतीच्यां दिशि वैराजा नाम देवास्तेषां व आप इषव: ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो व: स्वाहा ।।
येऽ३स्यां स्थोदीच्यां दिशि प्रविध्यन्तो नाम देवास्तेषां वो वात इषव: ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो व: स्वाहा ।।
येऽ३ स्यां स्थ ध्रुवायां दिशि निलिम्पा नाम देवास्तेषां व ओषधीरिषव: ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो व: स्वाहा ।।
येऽ३ स्यां स्थोर्ध्वायां दिश्यवस्वन्तो नाम देवास्तेषां वो बृहस्पतिरिषव: ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो व: स्वाहा ।।

३।३०।४,७

येन देवा न वियन्ति नो च विद्विषते मिथ: ।
तत्कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्य: ।।
सध्रीचीनान्व: संमनसस्कृणोम्येकश्नुष्टीन्त्संवननेन सर्वान् ।
देवा इवामृतं रक्षमाणा: सायंप्रात: सौमनसो वो अस्तु ।।

३।३१।१,७

वि देवा जरसावृतन्वि त्वमग्ने अरात्या ।
व्य1हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ।।
प्राणेन विश्वतोवीर्यं देवा: सूर्यं समैरयन् ।
व्य1हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ।।

।। चतुर्थं काण्डम् ।।

४।१।३

प्र यो जज्ञे विद्वानस्य बन्धुर्विश्वा देवानां जनिमा विवक्ति ।
ब्रह्म ब्रह्मण उज्जभार मध्यान्नीचैरुच्चैः स्वधा अभि प्र तस्थौ ।।

४।२।१

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
योऽ२स्येशे द्विपदो यश्चतुष्पदः कस्मै देवाय हविषा विधेम ।।

४।८।२

अभि प्रेहि माप वेन उग्रश्चेत्ता सपत्नहा ।
आ तिष्ठ मित्रवर्धन तुभ्यं देवा अधि ब्रवन् ।।

४।९।१

एहि जीवं त्रायमाणं पर्वतस्यास्यक्ष्यम् । विश्वेभिर्देवैर्दत्तं परिधिर्जीवनाय कम् ।।

४।१०।५,७

समुद्राज्जातो मणिर्वृत्राज्जातो दिवाकरः ।
सो अस्मान्त्सर्वतः पातु हेत्या देवासुरेभ्यः ।।
देवानामस्थि कृशनं बभूव तदात्मन्वच्चरत्यप्स्व१न्तः ।
तत्ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वाय शतशारदाय कार्शनस्त्वाभि रक्षतु ।।

४।११।२,६

अनड्वानिन्द्रः स पशुभ्यो वि चष्टे त्रयां छक्रो वि मिमीते अध्वनः ।
भूतं भविष्यद्भुवना दुहानः सर्वा देवानां चरति व्रतानि ।।
येन देवाः स्व१रारुरुहुर्हित्वा शरीरममृतस्य नाभिम् ।
तेन गेष्म सुकृतस्य लोकं घर्मस्य व्रतेन तपसा यशस्यवः ।।

४।१३।१-७

उत देवा अवहितं देवा उन्नयथा पुनः ।
उतागश्चक्रुषं देवा देवा जीवयथा पुनः ।।
द्वाविमौ वातौ वात आ सिन्धोरा परावतः ।
दक्षं ते अन्य आवातु व्य१न्यो वातु यद्रपः ।।

आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वं हि विश्वभेषज देवानां दूत ईयसे ।।
त्रायन्तामिमं देवास्त्रायन्तां मरुतां गणाः ।
त्रायन्तां विश्वा भूतानि यथायमरपा असत् ।।
आ त्वागमं शंतातिभिरथो अरिष्टतातिभिः ।
दक्षं त उग्रमाभारिषं परा यक्ष्मं सुवामि ते ।।
अयं मे हस्तो भगवानयं मे भगवत्तरः ।
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ।।
हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी ।
अनामयित्नुभ्यां हस्ताभ्यां ताभ्यां त्वाभि मृशामसि ।।

४।१४।१,२,५

अजो ह्यग्नेरजनिष्ट शोकात्सो अपश्यज्जनितारमग्रे ।
तेन देवा देवतामग्र आयन्तेन रोहान्रुरुहुर्मेध्यासः ।।
क्रमध्वमग्निना नाकमुख्यान्हस्तेषु बिभ्रतः ।
दिवस्पृष्ठं स्वर्गत्वा मिश्रा देवेभिराध्वम् ।।
अग्ने प्रेहि प्रथमो देवतानां चक्षुर्देवानामुत मानुषाणाम् ।
इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति ।।

४।१६।१

बृहन्नेषामधिष्ठाता अन्तिकादिव पश्यति ।
य स्तायन्मन्यते चरन्त्सर्वं देवा इदं विदुः ।।

४।१८।१

यो देवाः कृत्यां कृत्वा हरादविदुषो गृहम् ।
वत्सो धारुरिव मातरं तं प्रत्यगुप पद्यताम् ।।

४।१९।४

यददो देवा असुरांस्त्वयाग्रे निरकुर्वत ।
ततस्त्वमध्योषधेऽपामार्गो अजायथाः ।

४।२१।३

न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति ।
देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह ।।

४।२३।२,६

यथा हव्यं वहसि जातवेदो यथा यज्ञं कल्पयसि प्रजानन् ।
एवा देवेभ्यः सुमतिं न आ वह स नो मुञ्चत्वंहसः ।।
येन देवा अमृतमन्वविन्दन्येनौषधीर्मधुमतीरकृण्वन् ।
येन देवाः स्व१राभरन्त्स नो मुञ्चत्वंहसः ।।

४।२७।६

यदीदिदं मरुतो मारुतेन यदि देवा दैव्येनेदृगार ।
यूयमीशिध्वे वसवस्तस्य निष्कृतेस्ते नो मुञ्चन्त्वंहसः ।।

४।२८।५

ययोर्वधान्नापपद्यते कश्चनान्तर्देवेषूत मानुषेषु ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ।।

४।३०।१,३

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ।।
अहमेव स्वयमिदं वदामि जुष्टं देवानामुत मानुषाणाम् ।
यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ।।

४।३४।३

विष्टारिणमोदनं ये पचन्ति नैनानवर्तिः सचते कदा चन ।
आस्ते यम उप याति देवान्त्सं गन्धर्वैर्मदते सोम्येभिः ।।

४।३५।७

अव बाधे द्विषन्तं देवपीयुं सपत्ना ये मेऽप ते भवन्तु ।
ब्रह्मौदनं विश्वजितं पचामि शृण्वन्तु मे श्रद्दधानस्य देवाः ।।

४।३६।५

ये देवास्तेन हासन्ते सूर्येण मिमते जवम् ।
नदीषु पर्वतेषु ये सं तैः पशुभिर्विदे ।।

४।३९।९,१०

अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपा उ ।
नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुया कर्म भागम् ।।
हृदा पूतं मनसा जातवेदो विश्वानि देव वयुनानि विद्वान् ।
सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स जुषस्व हव्यम् ।।

।। पञ्चमं काण्डम् ।।

५।३।३,४,५,६,९

मम देवा विहवे सन्तु सर्व इन्द्रवन्तो मरुतो विष्णुरग्निः ।
ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामायास्मै ।।
मह्यं यजन्तां मम यानीष्टाकूतिः सत्या मनसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं विश्वे देवा अभि रक्षन्तु मेह ।।
मयि देवा द्रविणमा यजन्तां मय्याशीरस्तु मयि देवहूतिः ।
दैवा होतारः सनिषन्न एतदरिष्टाः स्याम तन्वा सुवीराः ।।
दैवीः षडुर्वीरुरु नः कृणोत विश्वे देवास इह मादयध्वम् ।
मा नो विददभिभा मो अशस्तिर्मा नो विदद्वृजिना द्वेष्या या ।।
धाता विधाता भुवनस्य यस्पतिर्देवः सविताभिमातिषाहः ।
आदित्या रुद्रा अश्विनोभा देवाः पान्तु यजमानं निर्ऋथात् ।।

५।४।३,४,७

अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि ।
तत्रामृतस्य चक्षणं देवाः कुष्ठमवन्वत ।।
हिरण्ययी नौरचरद्धिरण्यबन्धना दिवि ।
तत्रामृतस्य पुष्पं देवाः कुष्ठमवन्वत ।।

देवेभ्यो अधि जातो[ऽ]सि सोमस्यासि सखा हित: ।
स प्राणाय व्यानाय चक्षुषे मे अस्मै मृड ।।

५।५।१

रात्री माता नभ: पितार्यमा ते पितामह: ।
सिलाची नाम वा असि सा देवानामसि स्वसा ।।

५।७।३,४

प्र णो वनिर्देवकृता दिवा नक्तं च कल्पताम् ।
अरातिमनुप्रेमो वयं नमो अस्त्वरातये ।।
सरस्वतीमनुमतिं भगं यन्तो हवामहे ।
वाचं जुष्टां मधुमतीमवादिषं देवानां देवहूतिषु ।।

५।८।१,३

वैकङ्कतेनेध्मेन देवेभ्य आज्यं वह ।
अग्ने ताँ इह मादय सर्व आ यन्तु मे हवम् ।।
यदसावमुतो देवा अदेव: संश्चिकीर्षति ।
मा तस्याग्निर्हव्यं वाक्षीद्धवं देवा अस्य मोप गुर्ममैव हवमेतन ।।

५।१२।१,३,४,५,१०,११

समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेद: ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूत: कविरसि प्रचेता: ।।
आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभि: सजोषा: ।
त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ।।
प्राचीनं बर्हि: प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अन्हाम् ।
व्यु[ऽ]प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ।।
[illegible] व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनय: शुम्भमाना: ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणा: ।।
उपावसृज त्मन्या समञ्जन्देवानां पाथ ऋतुथा हवींषि ।
वनस्पति: शमिता देवो अग्नि: स्वदन्तु हव्यं मधुना घृतेन ।।

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः ।
अस्य होतुः प्रशिष्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः ।।

५।१४।३,७

इष्यस्येव परीशासं परिकृत्य परि त्वचः ।
कृत्यां कृत्याकृते देवा निष्कमिव प्रति मुञ्चत ।
यदि वासि देवकृता यदि वा पुरुषैः कृता ।
तां त्वा पुनर्णयामसीन्द्रेण सयुजा वयम् ।।

५।१७।५,६,१०,११

ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमङ्गम् ।
तेन जायामन्वविन्दद्बृहस्पतिः सोमेन नीतां जुह्वं१ न देवाः ।।
देवा वा एतस्यामवदन्त पूर्वे सप्तऋषयस्तपसा ये निषेदुः ।
भीमा जाया ब्राह्मणस्यापनीता दुर्धां दधाति परमे व्योमन् ।।
पुनर्वै देवा अददुः पुनर्मनुष्या अददुः ।
राजानः सत्यं गृह्णाना ब्रह्मजायां पुनर्ददुः ।।
पुनर्दाय ब्रह्मजायां कृत्वा देवैर्निकिल्बिषम् ।
ऊर्जं पृथिव्या भक्त्वोरुगायमुपासते ।।

५।१८।१,८,१३

नैतां ते देवा अददुस्तुभ्यं नृपते अत्तवे ।
मा ब्राह्मणस्य राजन्य गां जिघत्सो अनाद्याम् ।।
जिह्वा ज्या भवति कुल्मलं वाङ्नाडीका दन्तास्तपसाभिदिग्धाः ।
तेभिर्ब्रह्मा विध्यति देवपीयून्हृद्बलैर्धनुर्भिर्देवजूतैः ।।
देवपीयुश्चरति मर्त्येषु गरगीर्णो भवत्यस्थिभूयान् ।
यो ब्राह्मणं देवबन्धुं हिनस्ति न स पितृयाणमप्येति लोकम् ।।

५।१९।१२,१३,१४

यां मृतायानुबध्नन्ति कूद्यं पदयोपनीम् ।
तद्वै ब्रह्मज्य ते देवा उपस्तरणमब्रुवन् ।।
अश्रूणि कृपमाणस्य यानि जीतस्य वावृतुः ।
तं वै ब्रह्मज्य ते देवा अपां भागमधारयन् ।।

येन मृतं स्नपयन्ति श्मश्रूणि येनोन्दते ।
तं वै ब्रह्मज्य ते देवा अपां भागमधारयन् ।।

५।२०।४

संजयन्पृतना ऊर्ध्वमायुर्गृह्या गृह्णानो बहुधा वि चक्ष्व ।
दैवीं वाचं दुन्दुभ आ गुरस्व वेधाः. शत्रूणामुप भरस्व वेदः ।।

५।२१।७,१२

परामित्रान्दुन्दुभिना हरिणस्याजिनेन च ।
सर्वे देवा अतित्रसन्ये संग्रामस्येशते ।।
एता देवसेनाः सूर्यकेतवः सचेतसः । अमित्रान्नो जयन्तु स्वाहा ।।

५।२५।६

वि जिहीष्व बार्हत्सामे गर्भस्ते योनिमा शयाम् ।
अदुष्टे देवाः पुत्रं सोमपा उभयाविनम् ।।

५।२७।२,१२

देवो देवेषु देवः पथो अनक्ति मध्वा घृतेन ।
अग्ने स्वाहा कृणुहि जातवेदः । इन्द्राय यज्ञं विश्वे देवा हविरिदं जुषन्ताम् ।।

५।२८।६,१०,११

दिवस्त्वा पातु हरितं मध्यात्त्वा पात्वर्जुनम् ।
भूम्या अयस्मयं पातु प्रागाद्देवपुरा अयम् ।।
इमास्तिस्रो देवपुरास्तास्त्वा रक्षन्तु सर्वतः ।
तास्त्वं बिभ्रद्वर्चस्व्युत्तरो द्विषतां भव ।।
पुरं देवानाममृतं हिरण्यं य आबेधे प्रथमो देवो अग्रे ।
तस्मै नमो दश प्राचीः कृणोम्यनु मन्यतां त्रिवृदाबधे मे ।।

५।२९।२,३

तथा तदग्ने कृणु जातवेदो विश्वेभिर्देवैः सह संविदानः ।
यो नो दिदेव यतमो जघास यथा सो अस्य परिधिष्पताति ।
यथा सो अस्य परिधिष्पताति तथा तदग्ने कृणु जातवेदः ।
विश्वेभिर्देवैः सह संविदानः ।।

५।३०।१७

अयं लोकः प्रियतमो देवानामपराजितः। यस्मै त्वमिह मृत्यवे दिष्टः पुरुषः जज्ञिषे ।
स च त्वानु ह्वयामसि मा पुरा जरसो मृथाः ।।

।। अथषष्ठं काण्डम् ।।

६।७।३

येन देवा असुराणामोजांस्यवृणीध्वम् । तेना नः शर्म यच्छत ।।

६।१२।२

यद् ब्रह्मभिर्यदृषिभिर्यद्देवैर्विदितं पुरा । यद्भूतं भव्यमासन्वत्तेना ते वारये विषम् ।।

६।१९।१

पुनन्तु मा देवजनाः पुनन्तु मनवो धिया । पुनन्तु विश्वा भूतानि पवमानः पुनातु मा ।।

६।२१।२

श्रेष्ठमसि भेषजानां वसिष्ठं वीरुधानाम् । सोमो भग इव यामेषु देवेषु वरुणो यथा ।

६।२७।१-३

देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम् ।
तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ।।
शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहं नः ।
अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु ।।
हेतिः पक्षिणी न दभात्यस्मानाष्ट्री पदं कृणुते अग्निधाने ।
शिवो गोभ्य उत पुरुषेभ्यो नो अस्तु मा नो देवा इह हिंसीत्कपोतः ।।

६।२८।२

परीमेऽग्निमर्षत परीमे गामनेषत ।
देवेष्वक्रत श्रवः क इमाँ आ दधर्षति ।।

६।३०।१

देवा इमं मधुना संयुतं यवं सरस्वत्यामधि मणावचर्कृषुः ।
इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानवः ।।

६।४१।३

मा नो हासिषुर्ऋषयो दैव्या ये तनूपा ये नस्तन्व॒स्तनूजाः ।
अमर्त्या मर्त्याँ अभि नः सचध्वमायुर्धत्त प्रतरं जीवसे नः ।।

६।४६।१,२

यो न जीवो सि न मृतो देवानाममृतगर्भो॒ऽसि स्वप्न ।
वरुणानी ते माता यमः पितारुर्नामासि ।।
विद्म ते स्वप्न जनित्रं देवजामीनां पुत्रो॒ऽसि यमस्य करणः ।।
अन्तकोऽसि मृत्युरसि ।।

६।४७।२

विश्वे देवा मरुत इन्द्रो अस्मानस्मिन्द्वितीये सवने न जह्युः ।
आयुष्मन्तः प्रियमेषां वदन्तो वयं देवानां सुमतौ स्याम ।।

६।५१।३

यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्या३श्चरन्ति ।
अचित्त्या चेत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ।।

६।५५।१

ये पन्थानो बहवो देवयाना अन्तरा द्यावापृथिवी संचरन्ति ।
तेषामज्यानिं यतमो वहाति तस्मै मा देवाः परि धत्तेह सर्वे ।।

६।५६।१,२

मा नो देवा अहिर्वधीत्सतोकान्त्सहपूरुषान् ।
संयतं न वि ष्परद्व्यात्तं न सं यमन्नमो देवजनेभ्यः ।।
नमोऽस्त्वसिताय नमस्तिरश्चिराजये ।
स्वजाय बभ्रवे नमो नमो देवजनेभ्यः ।।

६।५८।२

यथेन्द्रो द्यावापृथिव्योर्यशस्वान्यथाप ओषधीषु यशस्वतीः ।
एवा विश्वेषु देवेषु वयं सर्वेषु यशसः स्याम ।।

६।६१।१

मह्यमापो मधुमदेरयन्तां मह्यं सूरो अभरज्ज्योतिषे कम् ।
मह्यं देवा उत विश्वे तपोजा मह्यं देवः सविता व्यचो धात् ।।

६।६४।१

सं जानीध्वं सं पृच्यध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ।।

६।६५।२

निर्हस्तेभ्यो नैर्हस्तं यं देवाः शरुमस्यथ ।
वृश्चामि शत्रूणां बाहूननेन हविषाहम् ।।

६।७१।३

यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत संगृणामि ।
वैश्वानरस्य महतो महिम्ना शिवं मह्यं मधुमदस्त्वन्नम् ।।

६।८०।१,२

ये त्रयः कालकान्जा दिवि देवा इव श्रिताः ।
तान्त्सर्वानह्व उतयेऽस्मा अरिष्टतातये ।।

६।८५।१,२

वरणो वारयाता अयं देवो वनस्पतिः । यक्ष्मो यो अस्मिन्नाविष्टस्तमु देवा अवीवरन् ।।
इन्द्रस्य वचसा वयं मित्रस्य वरुणस्य च । देवानां सर्वेषां वाचा यक्ष्मं ते वारयामहे ।।

६।८६।३

सम्राडस्यसुराणां ककुन्मनुष्याणाम् । देवानामर्धभागसि त्वमेकवृषो भव ।।

६।९३।१,३

यमो मृत्युरघमारो निर्ऋथो बभ्रुः शर्वोऽस्ता नीलशिखण्डः ।
देवजनाः सेनयोत्तस्थिवांसस्ते अस्माकं परि वृञ्जन्तु वीरान् ।।
त्रायध्वं नो अघविषाभ्यो वधाद्विश्वे देवा मरुतो विश्ववेदसः ।
अग्नीषोमा वरुणः पूतदक्षा वातापर्जन्ययोः सुमतौ स्याम ।।

शौ।६५।१,२

अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि । तत्रामृतस्य चक्षणं देवाः कुष्ठमवन्वत ।।
हिरण्ययी नौरचरद्धिरण्यबन्धना दिवि । तत्रामृतस्य पुष्पं देवाः कुष्ठमवन्वत ।।

शौ।१००।१-३

देवा अदुः सूर्यो अदाद् द्यौरदात्पृथिव्य्ऽदात् ।
तिस्रः सरस्वतीरदुः सचित्ता विषदूषणम् ।।

यद्वो देवा उपजीका आसिञ्चन्धन्वन्युदकम् । तेन देवप्रसूतेनेदं दूषयता विषम् ।।
असुराणां दुहितासि सा देवानामसि स्वसा । दिवस्पृथिव्याः संभूता सा चकर्थारसं विषम् ।।

शौ।१०८।२

मेधामहं प्रथमां ब्रह्मण्वतीं ब्रह्मजूतामृषिष्टुताम् । प्रपीतां ब्रह्मचारिभिर्देवानामवसे हुवे ।।

शौ।१०९।१,३

पिप्पली क्षिप्तभेषज्यू३ तातिविद्धभेषजी । तां देवाः समकल्पयन्नियं जीवितवा अलम् ।।
असुरास्त्वा न्यऽखनन्देवास्त्वोदवपन्पुनः । वातीकृतस्य भेषजीमथो क्षिप्तस्य भेषजीम् ।।

शौ।१११।४

पुनस्त्वा दुरप्सरसः पुनरिन्द्रः पुनर्भगः । पुनस्त्वा दुर्विश्वे देवा यथानुन्मदितोऽससि ।।

शौ।११२।१

मा ज्येष्ठं वधीदयमग्न एषां मूलबर्हणात्परि पाह्येनम् ।
स ग्राह्याः पशान्वि चृत प्रजानन्तुभ्यं देवा अनु जानन्तु विश्वे ।।

शौ।११३।१,३

त्रिते देवा अमृजतैतदेनस्त्रित एनन्मनुष्येऽषु ममृजे ।
ततो यदि त्वा ग्राहिरानशे तां ते देवा ब्रह्मणा नाशयन्तु ।।
द्वादशधा निहितं त्रितस्यापमृष्टं मनुष्यैनसानि ।
ततो यदि त्वा ग्राहिरानशे तां ते देवा ब्रह्मणा नाशयन्तु ।।

शौ।११४।१-३

यद्देवा देवहेडनं देवासश्चकृमा वयम् । आदित्यास्तस्मान्नो यूयमृतस्यर्तेन मुञ्चत ।
ऋतस्यर्तेनादित्या यजत्रा मुञ्चतेह नः । यज्ञं यद्यज्ञवाहसः शिक्षन्तो नोपशेकिम ।।

मेदस्वता यजमानाः स्रुचाज्यानि जुह्वतः ।
अकामा विश्वे वो देवाः शिक्षन्तो नोप शेकिम ।।

६।११५।१-३

यद्विद्वांसो यदविद्वांस एनांसि चकृमा वयम् ।
यूयं नस्तस्मान्मुञ्चत विश्वे देवाः सजोषसः ।।
यदि जाग्रद्यदि स्वपन्नेन एनस्योऽकरम् ।
भूतं मा तस्माद्भव्यं च द्रुपदादिव मुञ्चताम् ।।
द्रुपदादिव मुमुचानः स्विन्नः स्नात्वा मलादिव ।
पूतं पवित्रेणेवाज्यं विश्वे शुम्भन्तु मैनसः ।।

६।११७।३

अनृणा अस्मिन्ननृणाः परस्मिन्तृतीये लोके अनृणाः स्याम ।
ये देवयानाः पितृयाणाश्च लोकाः सर्वान्पथो अनृणा आ क्षियेम ।।

६।११८।३

यस्मा ऋणं यस्य जायामुपैमि यं याचमानो अभ्यैमि देवाः ।
ते वाचं वादिषुर्मोत्तरां मद्देवपत्नी अप्सरसावधीतम् ।।

६।११९।२

वैश्वानराय प्रति वेदयामि यदृणं संगरो देवतासु ।
स एतान्पाशान्विचृतं वेद सर्वानथ पक्वेन सह सं भवेम ।।

६।१२३।१-५

एतं सधस्थाः परि वो ददामि यं शेवधिमावहाज्जातवेदाः ।
अन्वागन्ता यजमानः स्वस्ति तं स्म जानीत परमे व्योमन् ।
जानीत स्मैनं परमे व्योमन्देवाः सधस्था विद लोकमत्र ।
अन्वागन्ता यजमानः स्वस्तीष्टापूर्तं स्म कृणुताविरस्मै ।।
देवाः पितरः पितरो देवाः । यो अस्मि सो अस्मि ।।
स पचामि स ददामि स यजे स दत्तान्मा यूषम् ।।
नाके राजन्प्रति तिष्ठ तत्रैतत्प्रति तिष्ठतु ।
विद्धि पूर्तस्य नो राजन्त्स देव सुमना भव ।।

६।१२५।३

इन्द्रस्यौजो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
स इमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ।।

६।१२६।१

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते वन्वतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ।।

६।१३१।१,२

नि शीर्षतो नि पत्तत आध्यो३ नि तिरामि ते । देवाः प्र हिणुत स्मरमसौ मामनु शोचतु
अनुमतेऽन्विदं मन्यस्वाकूते समिदं नमः । देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ।।

६।१३२।१,२

यं देवाः स्मरमसिञ्चन्नप्स्व१न्तः शोशुचानं सहाध्या ।
तं ते तपामि वरुणस्य धर्मणा ।
यं विश्वे देवाः स्मरमसिञ्चन्नप्स्व१न्तः शोशुचानं सहाध्या ।
तं ते तपामि वरुणस्य धर्मणा ।।

६।१४१।३

यथा चक्रुर्देवासुरा यथा मनुष्या उत । एवा सहस्रपोषाय कृणुतं लक्ष्माश्विना ।।

।। अथ सप्तमं काण्डम् ।।

७।५।१-५

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।।
यज्ञो बभूव स आ बभूव स प्र जज्ञे स उ वावृधे पुनः
स देवानामधिपतिर्बभूव सो अस्मासु द्रविणमा दधातु ।।

७।६।१

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ।।

७।७।१

दितेः पुत्राणामदितेरकारिषमव देवानां बृहतामनर्मणाम् ।
तेषां हि धाम गभिषक्समुद्रियं नैनान्नमसा परो अस्ति कश्चन ।।

७।११।१

यस्ते पृथु स्तनयित्नुर्य ऋष्वो दैवः केतुर्विश्वमाभूषतीदम् ।
मा नो वधीर्विद्युता देव सस्यं मोत वधी रश्मिभिः सूर्यस्य ।।

७।१६।१

बृहस्पते सवितर्वर्धयैनं ज्योतयैनं महते सौभगाय ।
संशितं चित्संतरं सं शिशाधि विश्व एनमनु मदन्तु देवाः ।।

७।१७।३

धाता विश्वा वार्या दधातु प्रजाकामाय दाशुषे दुरोणे ।
तस्मै देवा अमृतं सं व्ययन्तु विश्वे देवा अदितिः सजोषाः ।।

७।१८।१

प्र नभस्व पृथिवि भिन्द्धीऽदं दिव्यं नभः ।
उद्नो दिव्यस्य नो धातरीशानो वि ष्या दृतिम् ।।

७।२०।१

अन्वद्य नोऽनुमतिर्यज्ञं देवेषु मन्यताम् ।
अग्निश्च हव्यवाहनो भवतां दाशुषे मम ।।

७।२४।१

यन्न इन्द्रो अखनद्यदग्निर्विश्वे देवा मरुतो यत्स्वर्काः ।
तदस्मभ्यं सविता सत्यधर्मा प्रजापतिरनुमतिर्नि यच्छात् ।।

७।२७।१

इडैवास्माँ अनु वस्तां व्रतेन यस्याः पदे पुनते देवयन्तः ।
घृतपदी शक्वरी सोमपृष्ठोप यज्ञमस्थित वैश्वदेवी ।।

७।२८।१

वेद: स्वस्तिद्रुघण: स्वस्ति: परशुर्वेदि: परशुर्न: स्वस्ति ।
हविष्कृतो यज्ञिया यज्ञकामास्ते देवासो यज्ञमिमं जुषन्ताम् ।।

७।३५।१

प्रान्यान्त्सपत्नान्त्सहसा सहस्व प्रत्यजातान् जातवेदो नुदस्व ।
इदं राष्ट्रं पिपृहि सौभगाय विश्व एनमनु मदन्तु देवा: ।।

७।३८।२,३

येना निचक्र आसुरीन्द्रं देवेभ्यस्परि । तेना नि कुर्वे त्वामहं यथा तेऽसानि सुप्रिया ।।
प्रतीची सोममसि प्रतीच्युत सूर्यम् । प्रतीची विश्वान्देवान्तां त्वाच्छावदामसि ।।

७।४६।१

सिनीवालि पृथुष्टुके या देवानामसि स्वसा । जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि न:

७।४७।२

कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषो जुषेत ।
शृणोतु यज्ञमुशती नो अद्य रायस्पोषं चिकितुषी दधातु ।।

७।४९।१,२

देवानां पत्नीरुशतीरवन्तु न: प्रावन्तु नस्तुजये वाजसातये ।
या: पार्थिवासो या अपामपि व्रते ता नो देवी: सुहवा: शर्म यच्छन्तु ।
उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्यग्नाय्यश्विनी राट् ।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ।।

७।५०।५,६

अंजेषं त्वा संलिखितमजेषमुत संरुधम् । अविं वृको यथा मथदेवा मन्था
वृत

उत प्रहामतिदीवा जयति कृतमिव श्वघ्नी वि चिनोति काले ।
यो देवकामो न धनं रुणाद्धि समित्तं राय: सृजति स्वधाभि: ।।

७।५३।१

अमुत्रभयादधि यदमस्य बृहस्पतेरभिशस्तेरमुञ्च: ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभि: ।।

७।५४।१

कचं साम यजामहे याभ्यां कर्माणि कुर्वते । ते सदसि राजतो यज्ञं देवेषु यच्छत: ।।

७।७०।२

यातुधाना निर्ऋतिरादु रक्षास्ते अस्य घ्नन्त्वनृतेन सत्यम् ।
इन्द्रेषिता देवा आज्यमस्य मन्थन्तु मा तत्सं पादि यदसौ जुहोति ।।

७।७५।२

पदज्ञा स्थ रमतय: संहिता विश्वनाम्नी: । उप मा देवीर्देवेभिरेत ।।
इमं गोष्ठमिदं सदो घृतेनास्मान्त्समुक्षत ।।

७।७६।१,२

यत्ते देवा अकृण्वन्भागधेयममावास्ये संवसन्तो महित्वा ।
तेना नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरम् ।।
अहमेवास्म्यमावास्या३ मामा वसन्ति सुकृतो मयीमे ।
मयि देवा उभये साध्याश्चेन्द्रज्येष्ठा: समगच्छन्त सर्वे ।।

७।८०।१

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यत: पौर्णमासी जिगाय ।
तस्यां देवै: संवसन्तो महित्वा नाकस्य पृष्ठे समिषा मदेम ।।

७।८१।२,६

नवोनवो भवसि जायमानो ह्नां केतुरुषसामेष्यग्रम ।
भागं देवेभ्यो वि दधास्यायन्प्र चन्द्रमस्तिरसे दीर्घमायु: ।।
यं देवा अंशुमाप्याययन्ति यमक्षितमक्षिता भक्षयन्ति ।
तेनास्मानिन्द्रो वरुणो बृहस्पतिरा प्याययन्तु भुवनस्य गोपा: ।।

७।८२।१

अभ्य१र्चत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ताम् ।।

७।८४।२

इन्द्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनाम् ।
अपानुदो जनममित्रायन्तमुरुं देवेभ्यो अकृणोरु लोकम् ।।

७।८५।१

त्यमू षु वाजिनं देवजूतं सहोवानं तरुतारं रथानाम् ।
अरिष्टनेमि पृतनाजिमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम ।।

७।८६।२

सं माग्ने वर्चसा सृज सं प्रजया समायुषा। विद्युर्मे अस्य देवा इन्द्रो विद्यात्सह ऋषिभिः ।।

७।६७।२,३,४,७,८

समिन्द्र नो मनसा नेष गोभिः सं सूरिभिर्हरिवन्त्सं स्वस्त्या ।
सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमतौ यज्ञियानाम् ।।
यानावह उशतो देव देवांस्तान्प्रेरय स्वे अग्ने सधस्थे ।
जक्षिवांसः पपिवांसो मधून्यस्मै धत्त वसवो वसूनि ।
सुगा वो देवाः सदना अकर्म य आजग्म सवने मा जुषाणाः ।
वहमाना भरमाणाः स्वा वसूनि वसुं घर्मं दिवमा रोहतानु ।।
वषड्हुतेभ्यो वषडहुतेभ्यः । देवा गातुविदो गातुं वित्त्वा गातुमित ।।
मनसस्पत इमं नो दिवि देवेषु यज्ञम् ।
स्वाहा दिवि स्वाहा पृथिव्यां स्वाहान्तरिक्षे स्वाहा वाते धां स्वाहा ।

७।६८।१

सं बर्हिरक्तं हविषा घृतेन समिन्द्रेण वसुना सं मरुद्भिः ।
सं देवैर्विश्वदेवेभिरक्तमिन्द्रं गच्छतु हविः स्वाहा ।।

७।१०३।१

को अस्या नो द्रुहोऽवद्यवत्या उन्नेष्यति क्षत्रियो वस्य इच्छन् ।
को यज्ञकामः क उ पूर्तिकामः को देवेषु वनुते दीर्घमायुः ।।

७।१०५।१

अपक्रामन्पौरुषेयाद्वृणानो दैव्यं वचः । प्रणीतिरभ्यावर्तस्व विश्वेभिः सखिभिः सह ।

७।१०९।२,७

घृतमप्सराभ्यो वह त्वमग्ने पांसूनक्षेभ्यः सिकता अपश्च ।
यथा भागं हव्यदातिं जुषाणा मदन्ति देवा उभयानि हव्या ॥
देवान्यन्नाथितो हुवे ब्रह्मचर्यं यदूषिम । अक्षान्यद्बभ्रूनालभे ते नो मृडन्त्वीदृशे ॥

७।१११।१

इन्द्रस्य कुक्षिरसि सोमधान आत्मा देवानामुत मानुषाणाम् ।
इह प्रजा जनय यास्त आसु या अन्यत्रेह तास्ते रमन्ताम् ॥

७।११८।१

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥

॥ अष्टमं काण्डम् ॥

८।१।१७,१८

मा ते मनस्तत्र गान्मा तिरो भून्मा जीवेभ्यः प्र मदो मानु गाः पितॄन् ।
विश्वे देवा अभि रक्षन्तु त्वेह ॥
अयं देवा इहैवास्त्वयं मामुत्र गादितः । इमं सहस्रवीर्येण मृत्योरुत्पारयामसि ॥

८।२।१६,२१,२७

देवानां हेतिः परि त्वा वृणक्तु पारयामि त्वा रजस उत्त्वा मृत्योरपीपरम् ।
आरादग्निं क्रव्यादं निरूहं जीवातवे ते परिधिं दधामि ॥
शतं तेऽयुतं हायनान्द्वे युगे त्रीणि चत्वारि कृण्मः ।
इन्द्राग्नी विश्वे देवास्तेऽनु मन्यन्तामहृणीयमानाः ॥
ये मृत्यव एकशतं या नाष्ट्रा अतितार्याः ।
मुञ्चन्तु तस्मात्त्वां देवा अग्नेर्वैश्वानरादधि ॥

८।३।१२, १३, १४

अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेद: समिद्ध: ।
आ जिह्वया मूरदेवान्रभस्व क्रव्यादो वृष्ट्वापि धत्स्वासन् ।।
परा शृणीहि तपसा यातुधानान्पराग्ने रक्षो हरसा शृणीहि ।
परार्चिषा मूरदेवाञ्छृणीहि परासुतृप: शोशुचत: शृणीहि ।।
पराद्य देवा वृजिनं शृणन्तु प्रत्यगेनं शपथा यन्तु सृष्टा: ।
वाचास्तेनं शरव ऋच्छन्तु मर्मन्विश्वस्यैतु प्रसितिं यातुधान: ।।

८।४।११, १४, २४

पर: सो अस्तु तन्वा३ तना च तिस्र: पृथिवीरधो अस्तु विश्वा: ।
प्रति शुष्यतु यशो अस्य देवा यो मा दिवा दिप्सति यश्च नक्तम् ।।
यदि वाहमनृतदेवो अस्मि मोघं वा देवाँ अप्यूहे अग्ने ।
किमस्मभ्यं जातवेदो हृणीषे द्रोघवाचस्ते निर्ऋथं सचन्ताम् ।।
इन्द्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानाम् ।
विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम् ।।

८।५।५, ९, १०, १४, १६

तदग्निराह तदु सोम आह बृहस्पति: सविता तदिन्द्र: ।
ते मे देवा: पुरोहिता: प्रतीची: कृत्या: प्रतिसरैरजन्तु ।।
अन्तर्दधे द्यावापृथिवी उताहरुत सूर्यम् ।
ते मे देवा: पुरोहिता: प्रतीची: कृत्या: प्रतिसरैरजन्तु ।।
उभयीस्ता: परा यन्तु परावतो नवतिं नाव्या३ अति ।
अस्मै मणिं वर्म बध्नन्तु देवा इन्द्रो विष्णु: सविता रुद्रो अग्नि: ।।
अभिभूस्त्वेन्द्रो मानुषे बिभ्रत्संश्रेषिणेऽजयत् ।
मणिं सहस्रवीर्यं वर्म देवा अकृण्वत ।।
ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नाति विध्यन्ति सर्वे ।
तन्मे तन्वं त्रायतां सर्वतो बृहदायुष्मां जरदष्टिर्यथासानि ।।

८।७।४

अंशुमती: काण्डिनीर्या विशाखा ह्वयामि ते वीरुधो वैश्वदेवीरुग्रा: पुरुषजीवनी:

८।८।१३,१५

विश्वे देवा उपरिष्टादुब्जन्तो यन्त्वोजसा । मध्येन घ्नन्तो यन्तु सेनामङ्गिरसो महीम
गन्धर्वाप्सरसः सर्वान्देवान्पुण्यजनान्पितॄन् । दृष्टानदृष्टानिष्णामि यथा सेनाममूं हनन् ।।

८।६।२४

देवलीन्द्राय दुदुहे हि गृष्टिर्वशी पीयूषं प्रथमं दुहाना ।
अथातर्पयच्चतुरश्चतुर्धा देवान्मनुष्याँ३ असुरानुत ऋषीन् ।।

८।१०।५

यन्त्यस्य देवा देवहूतिं प्रियो देवानां भवति य एवं वेद ।
सोदक्रामत्सा दक्षिणाग्नौ न्यक्रामत् ।।

८।१०।७

ओषधीरेव रथन्तरेण देवा अदुह्रन्व्यचो बृहता ।।

८।१०।५,६

सोदक्रामत्सा देवानागच्छत्तां देवा अघ्नत सार्धमासे समभवत् ।।
तस्माद्देवेभ्योऽर्धमासे वषट् कुर्वन्ति प्र देवयानं पन्थां जानाति य एवं वेद ।।

८।१०।१,४

सोदक्रामत्सा देवानागच्छत्तां देवा उपाह्वयन्तोर्ज एहीति ।।
तामूर्जां देवा उप जीवन्त्युपजीवनीयो भवति य एवं वेद ।।

९।१।५,१५

मधोः कशामजनयन्त देवास्तस्या गर्भो अभवद्विश्वरूपः ।

तं जातं तरुणं पिपर्ति माता स जातो विश्वा भुवना वि चष्टे ।।

सं माग्ने वर्चसा सृज सं प्रजया समायुषा ।

विद्युर्मे अस्य देवा इन्द्रो विद्यात्सह ऋषिभिः ।।

९।२।७,१३,१७-१९

अध्यक्षो वाजी मम काम उग्रः कृणोतु मह्यमसपत्नमेव ।

विश्वे देवा मम नाथं भवन्तु सर्वे देवा हवमा यन्तु म इमम् ।।

अग्निर्यव इन्द्रो यवः सोमो यवः ।

यवयावानो देवा यावयन्त्वेनम् ।।

येन देवा असुरान्प्राणुदन्त येनेन्द्रो दस्यूनधमं तमो निनाय ।

तेन त्वं काम मम ये सपत्नास्तानस्माल्लोकात्प्र णुदस्व दूरम् ।।

यथा देवा असुरान्प्राणुदन्त यथेन्द्रो दस्यूनधमं तमो बबाधे ।

तथा त्वं काम मम ये सपत्नास्तानस्माल्लोकात्प्र णुदस्व दूरम् ।।

कामो जज्ञे प्रथमो नैनं देवा आपुः पितरो न मर्त्याः ।

ततस्त्वमसि ज्यायान्विश्वहा महांस्तस्मै ते काम नम इत्कृणोमि ।।

९।३।७,२५-३१

हविर्धानमग्निशालं पत्नीनां सदनं सदः ।

सदो देवानामसि देवि शाले ।।

प्राच्या दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।

दक्षिणाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।

प्रतीच्या दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।

उदीच्या दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।

ध्रुवाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।

ऊर्ध्वाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।

दिशोदिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।

९।४।३,५,७,११,१५,१८,२७

पुमानन्तर्वान्त्स्थविरः पयस्वान्वसोः कबन्धमृषभो बिभर्ति ।
तमिन्द्राय पथिभिर्देवयानैर्हुतमग्निर्वहतु जातवेदाः ।।
देवानां भाग उपनाह एषोऽपां रस ओषधीनां घृतस्य ।
सोमस्य भक्षमवृणीत शक्रो बृहन्नद्रिरभवद्यच्छरीरम् ।
सोमेन पूर्णं कलशं बिभर्षि त्वष्टा रूपाणां जनिता पशूनाम् ।।
आज्यं बिभर्ति घृतमस्य रेतः साहस्रः पोषस्तमु यज्ञमाहुः ।
इन्द्रस्य रूपमृषभो वसानः सो अस्मान्देवाः शिव ऐतु दत्तः ।।
य इन्द्र इव देवेषु गोष्वेति विवावदत् ।
तस्य ऋषभस्याङ्गानि ब्रह्मा सं स्तौतु भद्रया ।।
क्रोड आसीज्जामिशंसस्य सोमस्य कलशो धृतः ।
देवाः संगत्य यत्सर्व ऋषभं व्यकल्पयन् ।।
शतयाजं स यजते नैनं दुन्वन्त्यग्नयः ।
जिन्वन्ति विश्वे तं देवा यो ब्राह्मण ऋषभमाजुहोति ।।
गावः सन्तु प्रजाः सन्त्वथो अस्तु तनूबलम् ।
तत्सर्वमनु मन्यन्तां देवा ऋषभदायिने ।।

९।५।१३

अजो ह्यग्नेरजनिष्ट शोकाद्विप्रो विप्रस्य सहसो विपश्चित् ।
इष्टं पूर्तमभिपूर्तं वषट्कृतं तद्देवा ऋतुशः कल्पयन्तु ।।

९।६।२,१०

बृहस्पतिरूर्जयोद्गायति त्वष्टा पुष्ट्या प्रति हरति विश्वे देवा निधनम् ।।
स उपहूतो देवेषु भक्षायत्युपहूतस्तस्मिन्यद्देवेषु विश्वरूपम् ।।

९।७।६,१६,२४

देवानां पत्नीः पृष्ट्य उपसदः पर्शवः ।।
देवजना गुदा मनुष्या आन्त्राण्यत्रा उदरम् ।।
युज्यमानो वैश्वदेवो युक्तः प्रजापतिर्विमुक्तः सर्वम् ।।

६।६।६,१६

पाकः पृच्छामि मनसाविजानन्देवानामना निहिता पदानि ।
वत्से बष्कये धि सप्त तन्तून्वि तत्निरे कवय ओतवा उ ।।
साकंजानां सप्तथमाहुरेकजं षडिद्यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामश स्थात्रे रेजन्ते विकृतानि रूपशः ।।

६।१०।१८

ऋचो अक्षरे परमे व्यो॒मन्यस्मिन्देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्ते अमी समासते ।।

॥ दशमं काण्डम् ॥

१०।२।४,२२,२३

कति देवाः कतमे त आसन्य उरो ग्रीवाश्चिक्युः पुरुषस्य ।
कति स्तनौ व्य॒दधः कः कफोडौ कति स्कन्धान्कति पृष्टीरचिन्वन् ।।
केन देवाँ अनु क्षियति केन दैवजनीर्विशः । केनेदमन्यन्नक्षत्रं केन सत्क्षत्रमुच्यते ।।
ब्रह्म देवाँ अनु क्षियति ब्रह्म दैवजनीर्विशः । ब्रह्मेदमन्यन्नक्षत्रं ब्रह्म सत्क्षत्रमुच्यते ।।

१०।३।२,५,२५

प्रैणाञ्छृणीहि प्र मृणा रभस्व मणिस्ते अस्तु पुरएता पुरस्तात् ।
अवारयन्त वरणेन देवा अभ्याचारमसुराणां श्वः श्वः ।।
वरणो वारयाता अयं देवो वनस्पतिः ।
यक्ष्मो यो अस्मिन्नाविष्टस्तमु देवा अवीवरन् ।।
यथा देवेष्वमृतं यथैषु सत्यमाहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा ।।

१०।४।१

इन्द्रस्य प्रथमो रथो देवानामपरो रथो वरुणस्य तृतीय इत् ।

अहीनामपमा रथ स्थाणुमारदथार्षत् ।।

१०। ५।ग७।४७,४६,५०

सं माग्ने वर्चसा सृज सं प्रजया समायुषा ।

विद्युर्मे अस्य देवा इन्द्रो विद्यात्सह ऋषिभि: ।।

परा शृणीहि तपसा यातुधानान्पराग्ने रक्षो हरसा शृणीहि ।

परार्चिषा मूरदेवां छृणीहि परासुतृप: शोशुक्त: शृणीहि ।।

अपामस्मै वज्रं प्र हरामि चतुर्भृष्टिं शीर्षभिद्याय विद्वान् ।

सो अस्याङ्गानि प्र शृणातु सर्वा तन्मे देवा अनु जानन्तु विश्वे ।।

१०।६।५,१६,२२-२६,३२

तस्मै घृतं सुरां मध्वन्नमन्नं क्षदामहे ।

स न: पितेव पुत्रेभ्य: श्रेय: श्रेयश्चिकित्सतु भूयोभूय: श्व: श्वो देवेभ्यो मणिरेत्य।

यमबध्नाद्बृहस्पतिर्वाताय मणिमाशवे । तं देवा बिभ्रतो मणिं सर्वाल्लोकान्युधाजयन् ।

स एभ्यो जितिमिद् दुहे भूयोभूय: श्व: श्वस्तेन त्वं द्विषतो जहि ।।

यमबन्धाद्बृहस्पतिर्देवेभ्यो असुरक्षितिम् । स मायं मणिरागमद्रसेन सह वर्चसा ।।

यमबन्धाद्बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।

स मायं मणिरागमत्सह गोभिरजाविभिरन्नेन प्रजया सह ।।

यमबन्धाद्बृहस्पतिर्देवेभ्यो असुराक्षितिम् ।

स मायं मणिरागमत्सह व्रीहियवाभ्यां महसा भूत्या सह ।।

यमबन्धाद्बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।

स मायं मणिरागमन्मधोर्घृतस्य धारया कीलालेन मणि: सह ।।

यमबन्धाद्बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।

स मायं मणिरागमदूर्जया पयसा सह द्रविणेन श्रिया सह ।।

यमबन्धाद्बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।

स मायं मणिरागमत्तेजसा त्विष्या सह यशसा कीर्त्या सह ।।

यमबध्नाद्बृहस्पतिर्देवेभ्यो असुरक्षितिम् । स मायं मणिरागमत्सर्वाभिर्भूतिभि: सह ।।
तमिमं देवता मणिं मह्यं ददतु पुष्टये । अभिभुं क्षत्रवर्धनं सपत्नदम्भनं मणिम् ।।
यं देवा: पितरो मनुष्या उपजीवन्ति सर्वदा । मायमधि रोहतु मणि: श्रैष्ठ्याय मूर्धत: ।।

१०।७।१३,२३-२५,२७,३८,३९

यस्य त्रयस्त्रिंशद्देवा अङ्गे सर्वे समाहिता: ।
स्कम्भं तं ब्रूहि कतम: स्विदेव स: ।।
यस्य त्रयस्त्रिंशद्देवा निधिं रक्षन्ति सर्वदा ।
निधिं तमद्य को वेद यं देवा अभिरक्षथ ।।
यत्र देवा ब्रह्मविदो ब्रह्म ज्येष्ठमुपासते ।
यो वै तान्विद्यात्प्रत्यक्षं स ब्रह्मा वेदिता स्यात् ।।
बृहन्तो नाम ते देवा येऽसत: परि जज्ञिरे ।
एकं तदङ्ग स्कम्भस्यासदाहु: परो जना: ।।
यस्य त्रयस्त्रिंशद्देवा अङ्गे गात्रा विभेजिरे । तान्वै त्रयस्त्रिंशद्देवानेके ब्रह्मविदो विदु: ।।
महद्यक्षं भुवनस्य मध्ये तपसि क्रान्तं सलिलस्य पृष्ठे ।
तस्मिन् छ्रयन्ते य उ के च देवा वृक्षस्य स्कन्ध: परित इव शाखा: ।।
यस्मै हस्ताभ्यां पादाभ्यां वाचा श्रोत्रेण चक्षुषा ।
यस्मै देवा: सदा बलिं प्रयच्छन्ति विमितेऽमितं स्कम्भं तं ब्रूहि कतम: स्विदेव स: ।

१०।८।१८,३४,३५,४०

सहस्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पतत: स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन्याति भुवनानि विश्वा ।।
यत्र देवाश्च मनुष्याश्चारा नाभाविव श्रिता: ।
अपां त्वा पुष्पं पृच्छामि यत्र तन्मायया हितम् ।।
येभिर्वात इषित: प्रवाति ये ददन्ते पञ्च दिश: सध्रीची: ।
य आहुतिमत्यमन्यन्त देवा अपां नेतार: कतमे त आसन् ।।
अप्स्वासीन्मातरिश्वा प्रविष्ट: प्रविष्टा देवा: सलिलान्यासन् ।
बृहन्ह तस्थौ रजसो विमान: पवमानो हरित आ विवेश ।।

१०।९।९,११,१२

देवाः पितरो मनुष्या गन्धर्वाप्सरसश्च ये ।
ते त्वा सर्वे गोप्स्यन्ति सातिरात्रमति द्रव ॥
घृतं प्रोक्षन्ती सुभगा देवी देवान्गमिष्यति । पक्तारमघ्न्ये मा हिंसीर्दिवं प्रेहि शतौदने ॥
ये देवा दिविषदो अन्तरिक्षसदश्च ये ये चेमे भूम्यामधि ।
तेभ्यस्त्वं धुक्ष्व सर्वदा क्षीरं सर्पिरथो मधु ॥

१०।१०।५,६,२६,३४

शतं कंसाः शतं दोग्धारः शतं गोप्तारो अधि पृष्ठे अस्याः ।
ये देवास्तस्यां प्राणन्ति ते वशां विदुरेकधा ॥
यज्ञपदीराक्षीरा स्वधाप्राणा महीलुका ।
वशा पर्जन्यपत्नी देवाँ अप्येति ब्रह्मणा ॥
वशामेवामृतमाहुर्वशां मृत्युमुपासते ।
वशेदं सर्वमभवद्देवा मनुष्या३ असुराः पितर ऋषयः ॥
वशां देवा उप जीवन्ति वशां मनुष्या३ उत ।
वशेदं सर्वमभवद्यावत्सूर्यो विपश्यति ॥

॥ एकादशं काण्डम् ॥

११।१।२,४,५,१०,२०,२२,३३,३६,३७

कृणुत धूमं वृषणः सखायोऽद्रोघाविता वाचमच्छ ।
अयमग्निः पृतनाषाट् सुवीरो येन देवा असहन्त दस्यून् ॥
तेः
समिद्धो अग्ने समिधा समिध्यस्व विद्वान्देवान्यज्ञियाँ एह वक्षः ।
तेभ्यो हविः श्रपयं जातवेद उत्तमं नाकमधि रोहयेमम् ॥
त्रेधा भागो निहितो यः पुरा वो देवानां पितॄणां मर्त्यानाम् ।
अंशान् जानीध्वं वि भजामि तान्वो यो देवानां स इमां पारयाति ॥
गृहाण ग्रावाणौ सकृतौ वीर हस्त आ ते देवा यज्ञिया यज्ञमगुः ।
त्रयो वरा यतमांस्त्वं वृणीषे तास्ते समृद्धीरिह राधयामि ॥

सहस्रपृष्ठः शतधारो अक्षितो ब्रह्मौदनो देवयानः स्वर्गः ।
अमूंस्त आ दधामि प्रजया रेषयैनान्बलिहाराय मृडतान्मह्यमेव ।।
अभ्यावर्तस्व पशुभिः सहैनां प्रत्यङेनां देवताभिः सहैधि ।
मा त्वा प्रापच्छपथो माभिचारः स्वे क्षेत्रे अनमीवा वि राज ।।
आर्षेयेषु नि दध ओदन त्वा नानार्षेयाणामप्यस्त्यत्र ।
अग्निर्मे गोप्ता मरुतश्च सर्वे विश्वे देवा अभि रक्षन्तु पक्वम् ।।
समाचिनुष्वानुसंप्रयाह्यग्ने पथः कल्पय देवयानान् ।
एतैः सुकृतैरनु गच्छेम यज्ञं नाके तिष्ठन्तमधि सप्तरश्मौ ।।
येन देवा ज्योतिषा द्यामुदायन्ब्रह्मौदनं पक्त्वा सुकृतस्य लोकम् ।
तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम् ।।

११।२।२८,३१

भव राजन्यजमानाय मृड पशूनां हि पशुपतिर्बभूथ ।
यः श्रद्दधाति सन्ति देवा इति चतुष्पदे द्विपदेऽस्य मृड ।।
नमस्ते घोषिणीभ्यो नमस्ते केशिनीभ्यः ।
नमो नमस्कृताभ्यो नमः संभुञ्जतीभ्यः ।।
नमस्ते देव सेनाभ्यः स्वस्ति नो अभयं च नः

११।४।११

प्राणो मृत्युः प्राणस्तक्मा प्राणं देवा उपासते । प्राणो ह सत्यवादिनमुत्तमे लोक आ दधत् ।

११।५।१,२,३,५,८,१६,२३,२४

ब्रह्मचारीष्णंश्चरति रोदसी उभे तस्मिन्देवाः संमनसो भवन्ति ।
स दाधार पृथिवीं दिवं च स आचार्य१ तपसा पिपर्ति ।।
ब्रह्मचारिणं पितरो देवजनाः पृथग्देवा अनुसंयन्ति सर्वे ।
गन्धर्वा एनमन्वायन्त्रयस्त्रिंशत्त्रिशताः षट्सहस्राः ।।
सर्वान्त्स देवांस्तपसा पिपर्ति ।।
आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ।।

पूर्वो जातो ब्रह्मणो ब्रह्मचारी घर्मं वसानस्तपसोदतिष्ठत् ।
तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम् ।।
आचार्यस्ततक्ष नभसी उभे इमे उर्वी गम्भीरे पृथिवीं दिवं च ।
ते रक्षति तपसा ब्रह्मचारी तस्मिन्देवाः संमनसो भवन्ति ।।
ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत । इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्वराभरत् ।।
देवानामेतत्परिषूतमनभ्यारूढं चरति रोचमानम् ।
तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम् ।।
ब्रह्मचारी ब्रह्म भ्राजद्बिभर्ति तस्मिन्देवा अधि विश्वे समोताः ।
प्राणापानौ जनयन्नाद्व्यानं वाचं मनो हृदयं ब्रह्म मेधाम् ।।

११।८।१२,१३,१८,१९,२०,२२

ये देवा दिविषदो अन्तरिक्षसदश्च ये । पृथिव्यां शक्रा ये श्रितास्ते नो मुञ्चन्त्वंहसः ।।
आदित्या रुद्रा वसवो दिवि देवा अथर्वाणः। अङ्गिरसो मनीषिणास्ते नो मुञ्चन्त्वंहसः।।
या देवा दक्षिणतः पश्चात्प्राञ्च उदेत ।
पुरस्तादुत्तराच्छक्रा विश्वे देवाः समेत्य ते नो मुंचन्त्वंहसः ।।
विश्वान्देवानिदं ब्रूमः सत्यसंधानृतावृधः। विश्वाभिः पत्नीभिः सह ते नो मुन्चन्त्वंहसः ।।
सर्वान्देवानिदं ब्रूमः सत्यसंधानृतावृधः । सर्वाभिः पत्नीभिः सह ते नो मुन्चन्त्वंहसः ।।
या देवीः पन्च प्रदिशो ये देवा द्वादशर्तवः । संवत्सरस्य ये दंष्ट्रास्ते नः सन्तु सदा शिवाः ।।

११।७।४,२३-२७

दृढो दृंहस्थिरो न्यो ब्रह्म विश्वसृजो दश ।
नाभिमिव सर्वतश्चक्रमुच्छिष्टे देवताः श्रिताः ।।
यच्च प्राणति प्राणेन यच्च पश्यति चक्षुषा ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ।।
ऋचः सामानि छन्दांसि पुराणं यजुषा सह ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ।।
प्राणापानौ चक्षुः श्रोत्रमक्षितिश्च क्षितिश्च या ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ।।
आनन्दा मोदाः प्रमुदोऽभीमोदमुदश्च ये ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ।।

देवा: पितरो मनुष्या॑ गन्धर्वाप्सरसश्च ये ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रित: ।।

११।८।३, १०, १३, १७, १८, १६, २६-३२

दश साकमजायन्त देवा देवेभ्य: पुरा ।
यो वै तान्विद्यात्प्रत्यक्षं स वा अद्य महद्वदेत् ।।
ये त आसन्दश जाता देवा देवेभ्य: पुरा ।
पुत्रेभ्यो लोकं दत्वा कस्मिंस्ते लोक आसते ।।
संसिचो नाम ते देवा ये संभारान्त्समभरन् ।
सर्वं संसिच्य मर्त्यं देवा: पुरुषमाविशन् ।।
सर्वे देवा उपाशिक्षन्तदजानाद्वधू: सती ।
ईशा वशस्य या जाया सास्मिन्वर्णमाभरत् ।।
यदा त्वष्टा व्यतृणत्पिता त्वष्टुर्य उत्तर: ।
गृहं कृत्वा मर्त्यं देवा: पुरुषमाविशन् ।।
स्वप्नो वै तन्द्रीर्निर्ऋति: पाप्मानो नाम देवता: ।
जरा खालत्यं पालित्यं शरीरमनु प्राविशन् ।।
अस्थि कृत्वा समिधं तदष्टापो असादयन् ।
रेत: कृत्वाज्यं देवा: पुरुषमाविशन् ।।
या आपो याश्च देवता या विराड् ब्रह्मणा सह ।
शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापति: ।।
सूर्यश्चक्षुर्वात: प्राणं पुरुषस्य वि भेजिरे ।
अथास्येतरमात्मानं देवा: प्रायच्छन्नग्नये ।।
तस्माद्वै विद्वान्पुरुषमिदं ब्रह्मेति मन्यते ।
सर्वा ह्यस्मिन्देवता गावो गोष्ठ इवासते ।।

११।९।२, ५, २४, २६

उत्तिष्ठत सं नह्यध्वं मित्रा देवजना यूयम् । संदृष्टा गुप्ता व: सन्तु या नो मित्राण्यर्बुदे ।।
उत्तिष्ठ त्वं देवजनार्बुदे सेनया सह । भञ्जन्नमित्राणां सेनां भोगेभि: परि वारय ।।
वनस्पतीन्वानस्पत्यानोषधीरुत वीरुध: । गन्धर्वाप्सरस: सर्वान्देवान्पुण्यजनान्पितॄन् ।
सर्वांस्ताँ अर्बुदे त्वममित्रेभ्यो दृशे कुरूदारांश्च प्र दर्शय ।।

तेषां सर्वेषामीशाना उत्तिष्ठत सं नह्यध्वं मित्रा देवजना युयम् ।

इमं संग्रामं संजित्य यथालोकं वि तिष्ठध्वम् ।।

११।१०।५,६,११,१२,१४,१५

उत्तिष्ठ त्वं देवजनार्बुदे सेनया सह । अयं बलिर्व आहुतस्त्रिषंधेराहुतिः प्रिया ।।

यामिन्द्रेण संधां समधत्था ब्रह्मणा च बृहस्पते ।

तयाहमिन्द्रसंधया सर्वान्देवानिह हुव इतो जयत मामुत ।।

येनासौ गुप्त आदित्य उभाविन्द्रश्च तिष्ठतः । त्रिषंधिं देवा अभजन्तौज से च बलाय च ।।

सर्वाल्लोकान्त्समजयन्देवा आहुत्यानया ।

बृहस्पतिराङ्गिरसो वज्रं यमसिञ्चतासुरक्षयणं वधम् ।।

सर्वे देवा अत्यायन्ति ते अश्नन्ति वषट् कृतम् । इमां जुषध्वमाहुतिमितो जयत मामुतः ।।

सर्वे देवा अत्यायन्तु त्रिषंधेराहुतिः प्रिया । संधां महतीं रक्षत ययाग्रे असुरा जिताः ।।

।। द्वादशं काण्डम् ।।

१२।१।५,७,२२,४३,५३,५५

यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन् ।

गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु ।।

यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम् ।

सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा ।।

भूम्यां देवेभ्यो ददति यज्ञं हव्यमरंकृतम् । भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्याः ।।

सा नो भूमिः प्राणमायुर्दधातु जरदष्टिं मा पृथिवी कृणोतु

यस्याः पुरो देवकृताः क्षेत्रे यस्या विकुर्वते ।

प्रजापतिः पृथिवीं विश्वगर्भामाशामाशां रण्यां नः कृणोतु ।।

द्यौश्च म इदं पृथिवी चान्तरिक्षं च मे व्यचः ।

अग्निः सूर्य आपो मेधां विश्वे देवाश्च सं ददुः ।।

अदो यद्देवि प्रथमाना पुरस्ताद्देवैरुक्ता व्यसर्पो महित्वम् ।

आ त्वा सुभूतविशत्तदानीमकल्पयथाः प्रदिशश्चतस्रः ।।

१२।२।८, १०, १७, २१, २८, ४१, ४४, ५०

क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः ।
इहायमितरो जातवेदा देवो देवेभ्यो हव्यं वहतु प्रजानन् ।।
क्रव्यादमग्निं शशमानमुक्थ्यं१ प्र हिणोमि पथिभिः पितृयाणैः।
मा देवयानैः पुनरा गा अत्रैवैधि पितृषु जागृहि त्वम् ।।
यस्मिन्देवा अमृजत यस्मिन्मनुष्या उत ।
तस्मिन्घृतस्तावो मृष्ट्वा त्वमग्ने दिवं रुह ।।
परं मृत्यो अनु परेहि पन्थां यस्त एष इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमीहेमे वीरा बहवो भवन्तु ।।
वैश्वदेवीं वर्चस आ रभध्वं शुद्धा भवन्तः शुचयः पावकाः ।
अतिक्रामन्तो दुरिता पदानि शतं हिमाः सर्ववीरा मदेम ।।
ता अधरादुदीचीराववृत्रन्प्रजानतीः पथिभिर्देवयानैः ।
पर्वतस्य वृषभस्याधि पृष्ठे नवाश्चरन्ति सरितः पुराणीः ।।
अन्तर्धिर्देवानां परिधिर्मनुष्याणामग्निर्गार्हपत्य उभयानन्तरा श्रितः ।।
ते देवेभ्य आ वृश्चन्ते पापं जीवन्ति सर्वदा ।
क्रव्याद्यानग्निरन्तिकादश्व इवानुवपते नडम् ।।

१२।३।१०, १५, १६, ३२, ३३, ३७, ३८-४६, ५०, ५३

उत्तरं राष्ट्रं प्रजयोत्तरावद्दिशामुदीची कृणवन्नो अग्रम् ।
पाङ्क्तं छन्दः पुरुषो बभूव विश्वैर्विश्वाङ्गैः सह सं भवेम ।।
वनस्पतिः सह देवैर्न आगन्रक्षः पिशाचाँ अपबाधमानः ।
स उच्छ्रयातै प्र वदाति वाचं तेन लोकाँ अभि सर्वान् जयेम ।।
सप्त मेधान्पशवः पर्यगृह्णन्य एषां ज्योतिष्माँ उत यश्चकर्श ।
त्रयस्त्रिंशद्देवतास्तान्त्सचन्ते स नः स्वर्गमभि नेष लोकम् ।।
नवं बर्हिरोदनाय स्तृणीत प्रियं हृदश्चक्षुषो वल्ग्वस्तु ।
तस्मिन्देवाः सह दैवीर्विशन्त्विमं प्राश्नन्त्वृतुभिर्निषद्य ।।
वनस्पते स्तीर्णमा सीद बर्हिरग्निष्टोमैः संमितो देवताभिः ।
त्वष्ट्रेव रूपं सुकृतं स्वधित्यैना एहाः परि पात्रे ददृश्राम् ।।

उप स्तृणीहि प्रथय पुरस्ताद् घृतेन पात्रमभि घारयैतत् ।
वाश्रेवोस्रा तरुणं स्तनस्युमिमं देवासो अभिहिङ्कृणोत ।।
उपास्तरीरकरो लोकमेतमुरुः प्रथतामसमः स्वर्गः ।
तस्मिञ्छ्रयातै महिषः सुपर्णो देवा एनं देवताभ्यः प्र यच्छान् ।।
सत्याय च तपसे देवताभ्यो निधिं शेवधिं परि दद्म एतम् ।
मा नो द्यूतेऽव गान्मा समित्यां मा स्मान्यस्मा उत्सृजता पुरा मत् ।।
समग्नयो विदुरन्यो अन्यं य ओषधीः सचते यश्च सिन्धून् ।
यावन्तो देवा दिव्या३ तपन्ति हिरण्यं ज्योतिः पचतो बभूव ।।
वर्ष वनुष्वापि गच्छ देवांस्त्वचो धूमं पर्युत्पातयासि ।
विश्वव्यचा घृतपृष्ठो भविष्यन्त्सयोनिर्लोकमुप याह्येतम् ।।

१२।४।२, ६, १०, ११, १२, १७, २०-२४, २८, २९, ३१, ३२, ४१, ४२, ४६, ५०, ५३

प्रजया स वि क्रीणीते पशुभिश्चोप दस्यति ।
य आर्षेयेभ्यो याचद्भ्यो देवानां गां न दित्सति ।।
यो अस्याः कर्णावास्कुनोत्या स देवेषु वृश्चते ।
लक्ष्म कुर्व इति मन्यते कनीयः कृणुते स्वम् ।।
जायमानाभि जायते देवान्त्सब्राह्मणान्वशा ।
तस्माद्ब्रह्मभ्यो देयैषा तदाहुः स्वस्य गोपनम् ।।
य एनां वनिमायन्ति तेषां देवकृता वशा ।
ब्रह्मज्येयं तदब्रुवन्य एनां निप्रियायते ।।
य आर्षेयेभ्यो याचद्भ्यो देवानां गां न दित्सति ।
आ स देवेषु वृश्चते ब्राह्मणानां च मन्यवे ।।
य एनामवशामाह देवानां निहितं निधिम् ।
उभौ तस्मै भवाशर्वौ परिक्रम्येषुमस्यतः ।।
देवा वशामयाचन्मुखं कृत्वा ब्राह्मणम् ।
तेषां सर्वेषामददद्धेडं न्येति मानुषः ।।
हेडं पशूनां न्येति ब्राह्मणेभ्योऽददद्वशाम् ।
देवानां निहितं भागं मर्त्यश्चेन्निप्रियायते ।।

यदन्ये शतं याचेयुर्ब्राह्मणा गोपतिं वशाम् ।
अथैनां देवा अब्रुवन्नेवं ह विदुषो वशा ।।
य एवं विदुषे ऽदत्त्वाथान्येभ्यो ददद्वशाम् ।
दुर्गा तस्मा अधिष्ठाने पृथिवी सहदेवता ।।
देवा वशामयाचन्यस्मिन्नग्रे अजायत ।
तामेतां विद्यान्नारदः सह देवैरुदाजत ।।
यो अस्या ऋच उपश्रुत्याथ गोष्वचीचरत् ।
आयुश्च तस्य भूतिं च देवा वृश्चन्ति हीडिताः ।।
वशा चरन्ती बहुधा देवानां निहितो निधिः ।
आविष्कृणुष्व रूपाणि यदा स्थाम जिघांसति ।।
मनसा सं कल्पयति तद्देवाँ अपि गच्छति ।
ततो ह ब्रह्माणो वशामुपप्रयन्ति याचितुम् ।।
स्वधाकारेण पितृभ्यो यज्ञेन देवताभ्यः ।
दानेन राजन्यो ऽवशाया मातुर्हेडं न गच्छति ।।
या वशा उदकल्पयन्देवा यज्ञादुदेत्य ।
तासां विलिप्त्यं भीमामुदाकुरुत नारदः ।।
तां देवा अमीमांसन्त वशेया३ मवशेति ।
तामब्रवीन्नारद एषा वशानां वशतमेति ।।
देवा वशां पर्यवदन्न नोऽदादिति हीडिताः ।
एताभिर्ऋग्भिर्भेदं तस्माद्वै स पराभवत् ।।
उतैनां भेदो नाददाद्वशामिन्द्रेण याचितः ।
तस्मात्तं देवा आगसोऽवृश्चन्नहमुत्तरे ।।
यदि हुतां यद्यहुताममा च पचते वशाम् ।
देवान्त्सब्राह्मणानृत्वा जिह्मो लोकान्निर्ऋच्छति ।।

१२। ५। ५३

वैश्वदेवी ह्यु१च्यसे कृत्या कूल्बजमावृता ।।

।। त्रयोदशं काण्डम् ।।

१३।१।७,१३,२५,२७,३५,४०

रोहितो द्यावापृथिवी अदृंहत्तेन स्व॑ स्तभितं तेन नाकः ।
तेनान्तरिक्षं विमिता रजांसि तेन देवा अमृतमन्वविन्दन् ।।
रोहितो यज्ञस्य जनिता मुखं च रोहिताय वाचा श्रोत्रेण मनसा जुहोमि ।
रोहितं देवा यन्ति सुमनस्यमाना स मा रोहैः सामित्ये रोहयतु ।।
यो रोहितो वृषभस्तिग्मशृङ्गः पर्यग्निं परि सूर्यं बभूव ।
यो विष्टभ्नाति पृथिवीं दिवं च तस्माद्देवा अधि सृष्टीः सृजन्ते ।।
वि मिमीष्व पयस्वतीं घृताची देवानां धेनुरनपस्पृगेषा ।
इन्द्रः सोमं पिबतु क्षेमो अस्त्वग्निः प्र स्तौतु वि मृधो नुदस्व ।।
ये देवा राष्ट्रभृतोऽभितो यन्ति सूर्यम् ।
तैष्टे रोहितः संविदानो राष्ट्रं दधातु सुमनस्यमानः ।।
देवो देवान्मर्चयस्यन्तश्चरस्यर्णवे ।
समानमग्निमिन्धते तं विदुः कवयः परे ।।

१३।२। १३,१५,२०

उभावन्तौ समर्षसि वत्सः संमातराविव ।
नन्वे३तदितः पुरा ब्रह्म देवा अमी विदुः ।।
तं समाप्नोति जूतिभिस्ततो नाप चिकित्सति ।
तेनामृतस्य भक्षं देवानां नाव रुन्धते ।।
प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषीः। प्रत्यङ् विश्वं स्व॑र्दृशे ।।

१३।३।१२,१४,१६,२१,२३,२४

बृहदन्यतः पक्ष आसीद्रथंतरमन्यतः सबले सध्रीची ।
यद्रोहितमजनयन्त देवाः ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ।।

सत्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन्याति भुवनानि विश्वा ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ।।
अष्टधा युक्तो वहति वह्निरुग्रः पिता देवानां जनिता मतीनाम् ।
ऋतस्य तन्तुं मनसा मिमानः सर्वा दिशः पवते मातरिश्वा ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ।।
निम्रुचस्तिस्रो व्युषो ह तिस्रस्त्रीणि रजांसि दिवो अङ्ग तिस्रः ।
विद्मा ते अग्ने त्रेधा जनित्रं त्रेधा देवानां जनिमानि विद्म ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ।।
त्वमग्ने क्रतुभिः केतुभिर्हितोऽर्कः समिद्ध उदरोचथा दिवि ।
किमभ्यार्चन्मरुतः पृश्निमातरो यद्रोहितमजनयन्त देवाः ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ।
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः । योऽस्येशे द्विपदो - यश्चतुष्पदः ।।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ।।

१३।४।१३

एते अस्मिन्देवा एकवृतो भवन्ति ।।

१३।५।२१

सर्वे अस्मिन्देवा एकवृतो भवन्ति । य एतं० ।।

१४।१।१५,२४,३२,३३,५०

यदयातं शुभस्पती वरेयं सूर्यामुप ।
विश्वे देवा अनु तद्वामजानन्पुत्रः पितरावमवृणीत पूषा ।।
नवोनवो भवसि जायमानोऽह्नां केतुरुषसामेष्यग्रम् ।
भागं देवेभ्यो वि दधास्यायन्प्र चन्द्रमस्तिरसे दीर्घमायुः ।।
इहेदसाथ न परो गमाथेमं गावः प्रजया वर्धयाथ ।
शुभं यतीरुस्रियाः सोमवर्चसो विश्वे देवाः क्रन्निह वो मनांसि ।।
इमं गावः प्रजया सं विशाथायं देवानां न मिनाति भागम् ।
अस्मै वः पूषा मरुतश्च सर्वे अस्मै वो धाता सविता सुवाति ।।
गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ।।

१४।२।१०,२५,३२,३६,५३-५८,६६

ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनाँ अनु ।
पुनस्तान्यज्ञिया देवा नयन्तु यत आगताः ।।
वि तिष्ठन्तां मातुरस्या उपस्थान्नानारूपाः पशवो जायमानाः ।
सुमङ्गल्युप सीदेममग्निं संपत्नी प्रति भूषेह देवान् ।।
देवा अग्रे न्यपद्यन्त पत्नीः समस्पृशन्त तन्वस्तनूभिः ।
सूर्येव नारि विश्वरूपा महित्वा प्रजावती पत्या सं भवेह ।।
राया वयं सुमनसः स्यामोदितो गन्धर्वमावीवृताम ।
अगन्त्स देवः परमं सधस्थमगन्म यत्र प्रतिरन्त आयुः ।।
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । वर्चो गोषु प्रविष्टं यत्तेनेमां सं सृजामसि ।।
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । तेजो गोषु प्रविष्टं यत्तेनेमां सं सृजामसि ।।
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । भगो गोषु प्रविष्टो यस्तेनेमां सं सृजामसि ।।
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । यशो गोषु प्रविष्टं यत्तेनेमां सं सृजामसि ।।
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । पयो गोषु प्रविष्टं यत्तेनेमां सं सृजामसि ।।
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । रसो गोषु प्रविष्टो यस्तेनेमां सं सृजामसि ।।

तन्मा प्रापत्पृथिवीं मोत देवान्दिवं मा प्रापदुर्वन्तरिक्षम् ।
अपो मा प्रापन्मलमेतदग्ने यमं मा प्रापत्पितृंश्च सर्वान् ।

।। पञ्चदशं काण्डम् ।।

१५।१।५

स देवानामीशां पर्येत्स ईशानोऽभवत् ।।

१५।२।१-४

स उदतिष्ठत्स प्राचीं दिशमनु व्यचलत् ।।
तं बृहच्च रथन्तरं चादित्याश्च विश्वे च देवा अनुव्यचलन् ।।
बृहते च वै स रथन्तराय चादित्येभ्यश्च विश्वेभ्यश्च ।
देवेभ्य आ वृश्चते य एवं विद्वांसं व्रात्यमुपवदति ।।
बृहतश्च वै स रथन्तरस्य चादित्यानां च विश्वेषां च ।
देवानां प्रियं धाम भवति तस्य प्राच्यां दिशि ।।

१५।३।१-११

स संवत्सरमूर्ध्वोऽतिष्ठत्तं देवा अब्रुवन्व्रात्य किं नु तिष्ठसीति ।।
सोऽब्रवीदासन्दीं मे सं भरन्त्विति ।।
तस्मै व्रात्यायासन्दीं समभरन् ।।
तस्या ग्रीष्मश्च वसन्तश्च द्वौ पादावास्तां शरच्च वर्षाश्च द्वौ ।।
बृहच्च रथंतरं चानूच्ये ३ आस्तां यज्ञायज्ञियं च वामदेव्यं च तिरश्च्ये ।।
ऋचः प्राञ्चस्तन्तवो यजूंषि तिर्यञ्चः ।।
वेद आस्तरणं ब्रह्मोपबर्हणम् ।।
सामासाद उद्गीथोऽपश्रयः ।।
तामासन्दीं व्रात्य आरोहत् ।।
तस्य देवजनाः परिष्कन्दा आसन्त्संकल्पाः प्राहाय्या३ विश्वानि भूतान्युपसदः ।।
विश्वान्येवास्य भूतान्युपसदो भवन्ति य एवं वेद ।।

१५। ६।२२,२३

स दिशोऽनु व्यचलत् विराडनु व्यचलत्सर्वे च देवाः सर्वाश्च देवताः ।।
विराजश्च वै स सर्वेषां च देवानां सर्वासां च देवतानां ।
प्रियं धाम भवति य एवं वेद ।।

१५।११।३

यदेनमाह व्रात्य क्वाऽवात्सीरिति पथ एव तेन देवयानानव रुन्द्धे ।।

१५।१२।५,६,९,१०

प्र पितृयाणं पन्थां जानाति प्र देवयानम् ।।
न देवेष्वा वृश्चते हुतमस्य भवति ।।
न पितृयाणं पन्थां जानाति न देवयानम् ।।
आ देवेषु वृश्चते अहुतमस्य भवति ।।

१५।१७।८

तस्य व्रात्यस्य । समानमर्थं परि यन्ति देवाः संवत्सरं वा ।
एतदृतवोऽनुपरियन्ति व्रात्यं च ।।

।। षोडशं काण्डम् ।।

१६।२।६

ऋषीणां प्रस्तरोऽसि नमोऽस्तु दैवाय प्रस्तराय ।।

१६।५।८

विद्म ते स्वप्न जनित्रं देवजामीनां पुत्रोऽसि यमस्य करणः । अन्तको० तं त्वा० ।।

१६।६।११

तदमुष्मा अग्ने देवाः परा वहन्तु वध्रिर्यथासद्विथुरो न साधुः ।।

१६।७।२

देवानामेनं घोरैः क्रूरैः प्रैषैरभिप्रेष्यामि ।।

१६।८।६

स देवजामीनां पाशान्मा मोचि ।

।। सप्तदशं काण्डम् ।।

१७।१।२

विषासहिं सहमानं सासहानं सहीयांसम् । सहमानं सहोजितं स्वर्जितं गोजितं संधनाजितम् ।
ईड्यं नाम ह्व इन्द्रं प्रियो देवानां भूयासम् ।।

।। अष्टादशं काण्डम् ।।

१८।१।६,२५,२६, ३०-३३,३५,३६,४७

न तिष्ठन्ति न नि मिषन्त्येते देवानां स्पश इह ये चरन्ति ।
अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ।।
श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुम् ।
आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ।।
यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र ।
रत्ना च यद्विभजासि स्वधावो भागं नो अत्र वसुमन्तं वीतात् ।।
देवो देवान्परिभूर्ऋतेन वहा नो हव्यं प्रथमश्चिकित्वान् ।
धूमकेतुः समिधा भाऋजीको मन्द्रो होता नित्यो वाचा यजीयान् ।।
अर्चामि वां वर्धायापो घृतस्नू द्यावाभूमी शृणुतं रोदसी मे ।
अहा यद्देवा असुनीतिमायन्मध्वा नो अत्र पितरा शिशीताम् ।।
स्वावृग्देवस्यामृतं यदी गोरतो जातासो धारयन्त उर्वी ।
विश्वे देवा अनु तत्ते यजुर्गुर्दुहे यदेनी दिव्यं घृतं वाः ।।
किं स्विन्नो राजा जगृहे कदस्याति व्रतं चकृमा को वि वेद ।
मित्रश्चिद्धि ष्मा जुहुराणो देवाञ्छ्लोको न यातामपि वाजो अस्ति ।।
यस्मिन्देवा विदथे मादयन्ते विवस्वतः सदने धारयन्ते ।
सूर्ये ज्योतिरदधुर्मास्य१क्तून्परि द्योतनिं चरतो अजस्रा ।।
यस्मिन्देवा मन्मनि संचरन्त्यपीच्ये न वयमस्य विद्म ।
मित्रो नो अत्रादितिरनागान्त्सविता देवो वरुणाय वोचत् ।।
मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
यांश्च देवा वावृधुर्ये च देवांस्ते नोऽवन्तु पितरो हवेषु ।।

१८।२।५, ५३, ५४

यदा शृतं कृणवो जातवेदो थे ममेनं परि दत्तात्पितृभ्य: ।
यदो गच्छात्यसुनीतिमेतामथ देवानां वशनीर्भवाति ।।
अग्नीषोमा पथिकृता स्योनं देवेभ्यो रत्नं दधथुर्वि लोकम् ।
उप प्रेष्यन्तं पूषणं यो वहात्यञ्जोयानै: पथिभिस्तत्र गच्छतम् ।।
पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपा: ।
स त्वैतेभ्य: परि ददत्पितृभ्योऽग्निर्देवेभ्य: सुविदत्रियेभ्य: ।।

१८।३।३, ७, १०, ११, २२, २३, २४, २९-३५, ३८, ४७, ४८, ५३, ६८

अपश्यं युवतिं नीयमानां जीवां मृतेभ्य: परिणीयमानाम् ।
अन्धेन यत्तमसा प्रावृतासीत्प्राक्तो अपाचीमनयं तदेनाम् ।।
इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशने तन्वा३ चारुरेधि प्रियो देवानां परमे सधस्थे ।।
वर्चसा मां पितर: सोम्यासो अञ्जन्तु देवा मधुना घृतेन ।
चक्षुषे मा प्रतरं तारयन्तो जरसे मा जरदष्टिं वर्धन्तु ।।
वर्चसा मां समनक्त्वग्निर्मेधां मे विष्णुर्न्यनक्त्वासन् ।
रयिं मे विश्वे नि यच्छन्तु देवा: स्योना मापः पवनै: पुनन्तु ।।
सुकर्माण: सुरुचो देवयन्तो अयो न देवा जनिमा धमन्त: ।
शुचन्तो अग्निं वावृधन्त इन्द्रमुर्वीं गव्यां परिषदं नो अक्रन् ।।
आ यूथेव क्षुमति पश्वो अख्यद्देवानां जनिमान्त्युग्र: ।
मर्तानां चिदुर्वशीरकृप्रन्वृधे चिदर्य उपरस्यायो: ।।
अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीरा: ।।

इन्द्रो मा मरुत्वान्प्राच्या दिश: पातु बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृत: पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।
धाता मा निर्ऋत्या दक्षिणाया दिश: पातु बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृत: पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।
अदितिर्मादित्यै: प्रतीच्या दिश: पातु बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृत: पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।

सोमो मा विश्वैर्देवैरुदीच्या दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥
धर्ता ह त्वा धरुणो धारयाता ऊर्ध्वं भानुं सविता द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥
प्राच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥
दक्षिणायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥
प्रतीच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥
उदीच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।
ध्रुवायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥
ऊर्ध्वायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥
इतश्च मामुतश्चावतां यमे इव यतमाने यदैतम् ।
प्र वां भरन्मानुषा देवयन्तो आ सीदतां स्वमु लोकं विदाने ॥
देवेभ्यः कमवृणीत मृत्युं प्रजायै किममृतं नावृणीत ।
बृहस्पतिर्यज्ञमतनुत ऋषिः प्रियां यमस्तन्व१ मा रिरेच ॥
ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः ।
आग्ने याहि सहस्रं देववन्दैः सत्यैः कविभिर्ऋषिभिर्घर्मसद्भिः ॥
ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं तुरेण ।
आग्ने याहि सुविदत्रेभिरर्वाङ्० परैः पूर्वैर्ऋषिभिर्घर्मसद्भिः ॥
इममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानाम् ।
अयं यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ताम् ॥
अपूपापिहितान्कुम्भान्यांस्ते देवा अधारयन् ।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ॥

देवा यज्ञऋतवः कल्पयन्ति हविः पुरोडाशं स्रुचो यज्ञायुधानि ।
तेभिर्याहि पथिभिर्देवयानैर्यैरीजानाः स्वर्गं यन्ति लोकम् ॥
यूयमग्ने शंतमाभिस्तनूभिरीजानमभि लोकं स्वर्गम् ।
अश्वा भूत्वा पृष्टिवाहो वहाथ यत्र देवैः सधमादं मदन्ति ॥
ईजानश्चितमारुक्षदग्निं नाकस्य पृष्ठाद्दिवमुत्पतिष्यन् ।
तस्मै प्र भाति नभसो ज्योतिषीमान्त्स्वर्गः पन्थाः सुकृते देवयानः ॥
अपूपवान्क्षीरवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥
अपूपवान्दधिवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।
अपूपवान्द्रप्सवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।
अपूपवान्घृतवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।
अपूपवान्मांसवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ । ।
अपूपवानन्नवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥
अपूपवान्मधुमांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥
अपूपवान्रसवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥
अपूपवानपवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥
अपूपापिहितान्कुम्भान्यांस्ते देवा अधारयन् ।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ॥
सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो हवन्ते सरस्वती दाशुषे वार्यं दात् ॥

इदं पितृभ्यः प्र भरामि बर्हिर्जीवं देवेभ्य उत्तरं स्तृणामि ।
तदा रोह पुरुष मेध्यो भवन्प्रति त्वा जानन्तु पितरः परेतम् ।।

।। एकोनविंशं काण्डम् ।।

१९।३।३,४

यस्ते देवेषु महिमा स्वर्गो या ते तनूः पितृष्वाविवेश ।
पुष्टिर्या ते मनुष्येषु पप्रथेऽग्ने तया रयिमस्मासु धेहि ।।
श्रुत्कर्णाय कवये वेद्याय वचोभिर्वाकैरुप यामि रातिम् ।
यतो भयमभयं तन्नो अस्त्वव देवानां यज हेडो अग्ने ।।

१९।४।४

बृहस्पतिर्म आकूतिमाङ्गिरसः प्रति जानातु वाचमेताम् ।
यस्य देवा देवताः संबभूवुः स सुप्रणीताः कामो अन्वेत्वस्मान् ।।

१९।६।१०,११,१४

यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।।
तं यज्ञं प्रावृषा प्रौक्षन्पुरुषं जातमग्रशः । तेन देवा अयजन्त साध्या वसवश्च ये ।।
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ।।

१९।९।११-१४

शं रुद्राः शं वसवः शमादित्याः शमग्नयः ।
शं नो महर्षयो देवाः शं देवाः शं बृहस्पतिः ।।
शं नो
ब्रह्म प्रजापतिर्धाता लोका वेदाः सप्तऋषयोऽग्नयः ।
तैर्मे कृतं स्वस्त्ययनमिन्द्रो मे शर्म यच्छतु ब्रह्मा मे शर्म यच्छतु ।।
विश्वे मे देवाः शर्म यच्छन्तु सर्वे मे देवाः शर्म यच्छन्तु ।।
यानि कानि चिच्छान्तानि लोके सप्तऋषयो विदुः ।
सर्वाणि शं भवन्तु मे शं मे अस्त्वभयं मे अस्तु ।।

पृथिवी शान्तिरन्तरिक्षं शान्तिर्द्यौः शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः ।
शान्तिर्विश्वे मे देवाः शान्तिः सर्वे मे देवाः शान्तिः शान्तिः शान्तिः शान्तिभिः ।
ताभिः शान्तिभिः सर्वं शान्तिभिः शमयामोऽहं यदिह घोरं यदिह क्रूरं
यदिह पापं तच्छान्तं तच्छिवं सर्वमेव शमस्तु नः ।।

१९।१०।३

शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः ।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु ।।

१९।११।२,५

शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु ।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ।।
ये देवानामृत्विजो यज्ञियासो मनोर्यजत्रा अमृता ऋतज्ञाः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ।।

१९।१३।९-११

इन्द्र एषां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्तु मध्ये ।।
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ।।
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्मान्देवासोऽवता हवेषु ।।

१९।१७।१०

बृहस्पतिर्मा विश्वैर्देवैरूर्ध्वाया दिशः पातु तस्मिन्क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि ।
स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ।।

१९।१८।१०

बृहस्पतिं ते विश्वदेववन्तमृच्छन्तु । ये माघायव ऊर्ध्वाया दिशोऽभिदासात् ।।

१९।१९।१०

देवा अमृतेनोदक्रामंस्तां पुरं प्र णयामि वः ।
ताभ्या [illegible] यच्छतु ।।

१६।२०।३,४

यस्ते तनूष्वनह्यन्त देवा द्युराजयो देहिन: । इन्द्रो यच्चक्रे वर्म तदस्मान्पातु विश्वत: ।।
वर्म मे द्यावापृथिवी वर्माहर्वर्म सूर्य: । वर्म मे विश्वे देवा: क्रन्मा मा प्रापत्प्रतीचिका ।।

१६।२४।१

येन देवं सवितारं परि देवा अधारयन् । तेनेमं ब्रह्मणस्पते परि राष्ट्राय धत्तन ।।

१६।२७। ६,६,११,१२,१३

मा व: प्राणं मा वोऽपानं मा हरो मायिनो दभन् । भ्राजन्तो विश्ववेदसो देवा दैव्येन धावत

देवानां निहितं निधिं यमिन्द्रोऽन्वविन्दत्पथिभिर्देवयानै: ।
आपो हिरण्यं जुगुपुस्त्रिवृद्भिस्तास्त्वा रक्षन्तु त्रिवृता त्रिवृद्भि: ।।
ये देवा दिव्येकादश स्थ ते देवासो हविरिदं जुषध्वम् ।
ये देवा अन्तरिक्ष एकादश स्थ ते देवासो हविरिदं जुषध्वम् ।।
ये देवा पृथिव्यामेकादश स्थ ते देवासो हविरिदं जुषध्वम् ।।

१६।३०।२

शतं ते दर्भ वर्माणि सहस्रं वीर्याणि ते । तमस्मै विश्वे त्वां देवा जरसे भर्तवा अदु: ।।

१६।३३।४

तीक्ष्णो राजा विषासही रक्षोहा विश्वचर्षणि: ।
ओजो देवानां बलमुग्रमेतत्तं ते बध्नामि जरसे स्वस्तये ।।

१६।३४।६

त्रिष्ट्वा देवा अजनयन्निष्ठितं भूम्यामधि । तमु त्वाङ्गिरा इति ब्राह्मणा: पूर्व्या विदु: ।।

१६।३५।१,२,५

इन्द्रस्य नाम गृह्णन्त ऋषयो जङ्गिडं ददु: ।
देवा यं चक्रुर्भेषजमग्रे विष्कन्धदूषणम् ।।
स नो रक्षतु जङ्गिडो धनपालो धनेव ।
देवा यं चक्रुर्ब्राह्मणा: परिपाणमरातिहम् ।।

य ऋण्वो देवकृता य उतो ववृतेऽन्य: ।
सर्वांस्तान्विश्वभेषजोऽरसां जङ्गिडस्करत् ।।

१९।३९।५

त्रि: शाम्बुभ्यो अङ्गिरेभ्यस्त्रिरादित्येभ्यस्परि । त्रिर्जातो विश्वदेवेभ्य: ।
स कुष्ठो विश्वभेषज: । साकं सोमेन तिष्ठति ।
तक्मानं सर्वं नाशय सर्वाश्च यातुधान्य: ।।

१९।४०।१

यन्मे छिद्रं मनसो यच्च वाच: सरस्वती मन्युमन्तं जगाम ।
विश्वैस्तद्देवै: सह संविदान: सं दधातु बृहस्पति: ।।

१९।४१।१

भद्रमिच्छन्त ऋषय: स्वर्विदस्तपो दीक्षामुपनिषेदुरग्रे ।
ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उपसंनमन्तु ।।

१९।४४।६

देवाञ्जन त्रैककुदं परि मा पाहि विश्वत: । न त्वा तरन्त्योषधयो बाह्या: पर्वतीया उत ।

१९।४६।४

इन्द्रस्य त्वा वर्मणा परि धापयामो यो देवानामधिराजो बभूव ।
पुनस्त्वा देवा: प्र णयन्तु सर्वे स्तृतस्त्वाभि रक्षतु ।।

१९।५४।४

कालो यज्ञं समैरयद्देवेभ्यो भागमक्षितम् । काले गन्धर्वाप्सरस: काले लोका: प्रतिष्ठिता: ।।

१९।५६।३,४

बृहद्गावासुरेभ्योऽधि देवानुपावर्तत महिमानमिच्छन् ।
तस्मै स्वप्नाय दधुराधिपत्यं त्रयस्त्रिंशास: स्व/रानशाना: ।।
नैतां विदु: पितरो नोत देवा येषां जल्पिश्चरत्यन्तरेदम् ।
त्रिते स्वप्नमदधुराप्त्ये नर आदित्यासो वरुणेनानुशिष्टा: ।।

१९।५७।३

देवानां पत्नीनां गर्भ यमस्य कर यो भद्र: स्वप्न ।
स मम य: पापस्तद् द्विषते प्र हिण्म: । मा तृष्टानामसि कृष्णशकुनेर्मुखम् ।

१९।५८। १,५,६

घृतस्य जूतिः समना सदेवा संवत्सरं हविषा वर्धयन्ती ।
श्रोत्रं चक्षुः प्राणोच्छिन्नो नो अस्त्वच्छिन्ना वयमायुषो वर्चसः ।।
यज्ञस्य चक्षुः प्रभृतिर्मुखं च वाचा श्रोत्रेण मनसा जुहोमि ।
इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु सुमनस्यमानाः ।।
ये देवानामृत्विजो ये च यज्ञिया येभ्यो हव्यं क्रियते भागधेयम् ।
इमं यज्ञं सह पत्नीभिरेत्य यावन्तो देवास्तविषा मादयन्ताम् ।।

१९।५९।२,३

यदो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः ।
अग्निष्टद्विश्वादा पृणातु विद्वान्त्सोमस्य यो ब्राह्मणाँ आविवेश ।।
आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनुप्रवोढुम् ।
अग्निर्विद्वान्त्स यजात्स इद्धोता सोऽध्वरान्त्स ऋतून्कल्पयाति ।।

१९।६३।१

उत्तिष्ठ ब्रह्मणस्पते देवान्यज्ञेन बोधय । आयुः प्राणं प्रजां पशून्कीर्तिं यजमानं च वर्धय ।।

१९।७०।१

इन्द्र जीव सूर्य जीव देवा जीवा जीव्यासमहम् । सर्वमायुर्जीव्यासम् ।।

१९।७२।१

यस्मात्कोशादुदभराम वेदं तस्मिन्नन्तरव दध्म एनम् ।
कृतमिष्टं ब्रह्मणो वीर्येण तेन मा देवास्तपसावतेह ।।

२०।६।३

इन्द्र प्र णो धितावानं यज्ञं विश्वेभिर्देवेभिः । तिर स्तवान विश्पते ।।

२०।११।७

युधेन्द्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः ।
विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति ।।

२०।१३।४

ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः ।
पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व ।।

२०।१८।३

इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति । यन्ति प्रमादमतन्द्राः ।।

२०।२५।२

आपो न देवीरुप यन्ति होत्रियमवः पश्यन्ति विततं यथा रजः ।
प्राचैर्देवासः प्र णयन्ति देवयुं ब्रह्मप्रियं जोषयन्ते वरा इव ।।

२०।३४।१,१६

यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ।।
जातो व्यख्यत्पित्रोरुपस्थे भुवो न वेद जनितुः परस्य ।
स्तविष्यमाणो नो यो अस्मद्व्रता देवानां स जनास इन्द्रः ।।

२०।३५।८

अस्मा इदु ग्नाश्चिद्देवपत्नीरिन्द्रायार्कमहिहत्य ऊवुः ।
परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परि ष्टः ।।

२०।४७।१७

प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषीः । प्रत्यङ् विश्वं स्वर्दृशे ।।

२०।४६।१

यज्ञा वामारुहन्नन्तरिक्षं सिषासथ: । तं देवा अमदन्तृणा ।।

२०।५८।४

बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।

मह्ना देवानामसुर्य्य: पुरोहितो विभु ज्योतिरदाभ्यम् ।।

२०।६२।६,७

त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचय: । विश्वकर्मा विश्वदेवो महाँ असि ।।

विभ्राजं ज्योतिषा स्व१ रगच्छो रोचनं दिव: । देवास्त इन्द्र सख्याय येमिरे ।।

२०।६३।१,२,३

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवा: ।

यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्र: सह चीक्लृपाति ।।

आदित्यैरिन्द्र: सगणो मरुद्भिरस्माकं भूत्वविता तनूनाम् ।

हत्वाय देवा असुरान्यदायन्देवा देवत्वमभिरक्षमाणा: ।।

प्रत्यञ्चमर्कमनयं छचीभिरादित्स्वधामिषिरां पर्यपश्यन् ।

अया वाजं देवहितं सनेम मदेम शतहिमा: सुवीरा: ।।

२०।६७।१,५

वनोति हि सुन्वन्क्षयं परीणस: सुन्वानो हि ष्मा यजत्यव द्विषो देवानामव द्वि

सुन्वान इत्सिषासति सहस्रा वाज्यवृत: ।

सुन्वानायेन्द्रो ददात्याभुवं रयिं ददात्याभुवम् ।।

आ वक्षि देवाँ इह विप्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु ।

प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात्तव भागस्य तृप्णुहि ।।

२०।८७।३

जज्ञान: सोमं सहसे पपाथ प्र ते माता महिमानमुवाच ।

एन्द्र पप्राथोर्व१न्तरिक्षं युधा देवेभ्यो वरिवश्चकर्थ ।।

२०।८८।६

एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः ।
बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम् ।।

२०।९२।८

अपस्कुरं गृभायत सोममिन्द्राय पातवे ।
वरुण इदिह क्षयत्तमापो अभ्यनूषत वत्सं संशिश्वरीरिव ।।

२०।१०१।३

अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे । असि होता न ईड्यः ।।

२०।१०७।१३

चित्रं देवानां केतुरनीकं ज्योतिष्मान्प्रदिशः सूर्य उद्यन् ।
दिवाकरोऽति द्युम्नैस्तमांसि विश्वातारीद्दुरितानि शुक्रः ।।

२०।१२४।४, ५, ६

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ।
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह चीक्लृपाति ।।
आदित्यैरिन्द्रः सगणो मरुद्भिरस्माकं भूत्वविता तनूनाम् ।
हत्वाय देवा असुरान्यदायन्देवा देवत्वमभिरक्षमाणाः ।।
प्रत्यञ्चमर्कमनयं छचीभिरादित्स्वधामिषिरां पर्यपश्यन् ।
अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ।।

।। कुन्तापसूक्तानि ।।

२०।१२८। १,४,५,१६

य: सभेयो विदथ्य्: सुत्वा यज्वाथ पूरुष: ।
सूर्यं चामू रिशादसस्तद्देवा: प्रागकल्पयन् ।।
यश्च पणि रघुजिष्ठ्यो यश्च देवाँ अदाशुरि: । धीराणां शश्वतामहं तदपागिति शुश्रुम ।।
ये च देवा अयजन्ताथो ये च परादद्वि: ।
सूर्यो दिवमिव गत्वाय मघवा नो वि रप्शते ।।
ये त्वा श्वेता अजैश्रवसो हार्यो युञ्जन्ति दक्षिणम् ।
पूर्वा नमस्य देवानां बिभ्रदिन्द्र महीयते ।।

२०।१३५।१०

देवा ददत्वासुरं तद्वो अस्तु सुचेतनम् ।
युष्माँ अस्तु दिवेदिवे प्रत्येव गृभायत ।।

२०।१३६।४

यद्देवासो ललामगुं प्रविष्टीमिनमाविषु: ।
सकुला देदिश्यते नारी सत्यस्याक्षिभुवो यथा ।।

२०।१३७।४, ५

सुतासो मधुमत्तमा: सोमा इन्द्राय मन्दिन:। पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदा: ।।
इन्दुरिन्द्राय पवत इति देवासो अब्रुवन् । वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ।।

२०।१४२।४

यदापीतासो अंशवो गावो न दुह्र ऊधभि: । यद्वा वाणीरनूषत प्र देवयन्तो अश्विना ।।

२०।१४३।५

आ नो यातं दिवो अच्छा पृथिव्या हिरण्ययेन सुवृता रथेन ।
मा वामन्ये नि यमन्देवयन्त: सं यद्ददे नाभि: पूर्व्या वाम् ।।

--oo--

अन्ते - स्वस्तये - प्रार्थना

विश्वेदेवा मम श्रृण्वन्तु यज्ञिया उभे रोदसी अपांनपाच्च मन्म ।
मा वो वचांसि परि चक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम ।।

।। प्रबन्धो यं श्री सद्गुरु चरणारविन्दार्पणमस्तु ।।

प्रबन्ध लेखनार्थमवलोकितानां सहायक ग्रन्थानां विभागानुसारिणी तालिका

संहिता:

१- ऋग्वेद संहिता-शाकलीया । पं० श्री०दा० सातवलेकर:, स्वाध्याय मण्डल, औंध। सन् १९४० ।

२- ऋग्वेद संहिता- शांखायनीया। हस्तलि० म०म० वारेशास्त्री संग्रहस्था, नासिक।

३- ऋग्वेद संहिता- बाष्कलीया । परिशिष्ट रूपा । स्वा०मं० औंध, १९४०।

४- कृष्णयजुर्वेद संहिता-तैत्तिरीया। पं० श्री० दा० सातवलेकर, औंध, १९४५।

५- ,, ,, काठकीया । ,, ,, १९४३।

६- ,, ,, मैत्रायणीया । ,, ,, १९४२ ।

७- ,, ,, कपिष्ठलकठ । डा० रघुवीर, दयानंद कालेज, लाहौर, १९३२।

८- शुक्लयजुर्वेद संहिता- माध्यन्दिनीया। पं० श्री०दा०सात०, औंध, वि०सं० १९८४।

९- ,, ,, काण्वशाखीया। ,, ,, वि०१९९७।

१०- सामवेद संहिता- कौथुमीया । ,, ,, १९९६ ।

११- ,, ,, जैमिनीया । डा० रघुवीर, सरस्वती विहार, लाहौर, १९९५

१२- अथर्ववेद संहिता- पैप्पलादीया । ,, ,, १९९३।

१३- ,, ,, शौनकीया । पं० श्री०दा० सातवलेकर, औंध, १९९९ ।

१४- दैवत संहिता-सर्ववेदीया, (प्र०भा०) ,, ,, ई०१९४२।

१५- ,, ,, (द्वि० भाग) ,, ,, १९४३।

संहिता भाष्याणि

१६-ऋ०शाकल सं० सायण भाष्यम्। वैदिक संशोधन मण्डलम्, पूना। ई० १९३३-४६

१७- ,, आर्य भाष्यम् । स्वामीदयानंद:, वैदिक यंत्रालय, अजमेर सं०१९

१८-कृ०य० तैत्तिरीय सं०सायणभा० । आनन्दाश्रम प्रकाशनम्, पूना। ई० १९०४ ।

१९- शु०य० काण्व सं० सायण भा०। चौखंबा सं० सि० बनारस वि० १९९५ ।

२०- ,, माध्यन्दिन सं० उव्वट-महीधर भा०। निर्णय सागर मु० बम्बई । ई० १९२९

२१- ,, ,, भाष्यम् । ब्रह्मदत्त जिज्ञासु। रामलाल कपूर टस्ट, लाहौर। ई०१९४

२२- सामवेद कौथुम सं० सायण भा०। एशियाटिक सोसायटी, बंगाल, ई० १८२५।
२३- ,, ,, भा० डा० कुन्हन राजा, अड्यार लाइब्रेरी, मद्रास, ई० १९४१।
२४- ,, सं० भा० । भगवदाचार्यः। प्रभुलाल भी० पटेल पेटलाद।२००४।
२५- अथर्ववेद शौनक सं० सायण भा०। विश्वेश्वरानन्द वै०शो०सं० ,होशियारपुर,१९६०।
२६- ,, ,, भाषा भा०। श्रीराम शर्मा आचार्यः, तपोभूमि मथुरा ,१९६०।
२७- ,, ,, सुबोध भाष्यम्। श्री सातवलेकर, औंध। ई० १९२७।
२८- ,, ,, भाष्यम् । क्षेमकरण दासः, नारायण प्रेस प्रयाग । १९२१
२९- ऋग्भाष्य टीका, मध्वजयतीर्थ वि०। कृष्णम्माचार्य, कुंभकोणम्। १९२३।

मूल ब्राह्मणानि - स भाष्याणि च

३०- ऐतरेय ब्रा० सायण भा०। आनन्दाश्रम , पूना । ई० १९३०।
३१- शांखायन ब्रा० मूलम् । ,, ,, १९११।
३२- कौषीतकि ब्रा० आंग्ल टिप्पणी। बी० लिंडनर , १८८७।
३३- तैत्तिरीय ब्रा० सायण भा० । आनन्दाश्रम, पूना, १९३४।
३४- ,, भट्टभास्कर भा०। महाराजा मैसूर प्र० ,मैसूर। १९०८।
३५- ,, महादेवाचार्यः। बी० ई० कलकत्ता । १९६०।
३६- शतपथ ब्रा० सायण भा० । लक्ष्मी व्यंकटेशप्रेस, कल्याण।१९४०।
३७- ,, काण्व शाखा० आंग्ल भा०। वी० कालण्ड, मोतीलाल ब० ,लाहौर, १९२६।
३८- तांड्य महाब्रा० सायण भाष्य । पं० चिन्नस्वामी शास्त्री, चौखंबा सं० सि०१९३५
३९- षड्विंश ब्रा० ,, ,, ,, ,, ,,
४०- ,, तथा दैवत ब्रा० । जीवानन्दः, ए०सो० बंगाल ।
४१- पंचविंश ब्रा० आंग्ल टि०। वी० कालण्ड, ए०सो० कलकत्ता। १९३१।
४२- आर्षेय ब्रा० आ० टि० । बर्नेल, मंगलूर। ई० १८७६।
४३- जैमिनीय ब्रा० टि०सं० । डा० रघुवीर, सरस्वती विहार नागपुर।२००६।
४४- सामविधान ब्रा० आं० टि०। ए०सी० बर्नेल, ट्रूबनर कं० लण्डन, १८७३।
४५- छान्दोग्य ब्रा० टि० सं० । दुर्गामोहन भट्टाचार्य, कलकत्ता । १९५८।
४६- गोपथ ब्रा० मूलम् । नारायण प्रेस, कलकत्ता, ई० १८९१।
४७- ,, ३३ सा० भा० । रा०ला० मित्र, ए०सो० कलकत्ता, १८७२।
४८- ,, ,, आंग्लटीका । ड्यूक गास्ट्रा, ई०जे० ब्रिल, लाइडेन, १९१९।

उपनिषद:

४९- १०८ उपनिषत्संग्रह, मूलम् । सर्वहितैषी कं० रामघाट, काशी। ई०१९३८।
५०- दशोपनिषद् भाष्यम्। सी० कुन्हन राजा, अड्यार ला०, मद्रास। १९३५।
५१- ऐतरेयारण्यकोपनिषद् सायण भा०। आनंदाश्रम- पूना। १९३६ ।
५२- ऐतरेयारण्यकम्, आंग्ल टि० । ए०बी० कीथ आक्सफोर्ड, १९०९ ।
५३- शांखायनारण्यकम्, मूलम् । आनंदाश्रम पूना । १९२२।
५४- ऐतरेयालोचनम्। संस्कृत स० सामश्रमी, कलकत्ता, १९०६ ।
५५- ऐतरेय पर्यालोचनम् । डा० मगंलदेव शास्त्री, काशी।

श्रौत-गृह्य- शुल्ब सूत्राणि

५६- आश्वलायन श्रौत सूत्रम्, नारायणवृत्ति:। आनंदाश्रम:, पूना। ई० १९१७।
५७- ,, गृह्य ,, ,, ,, ,, ,,
५८- ,, प्रयोगदीपिका, मंचन भट्टी। विद्याविलास प्रेस, काशी, १९०७ ।
५९- ,, गृह्यसू० हरदत्त भा०। सु०ग०प्रेस, त्रिवेन्द्रम् । १९२३।
६०- शांखायन श्रौ० सू० भा० वरदत्तसुत - आनर्तीकृतम्। इ०ने० अकेडेमी, नागपुर। १९५३
६१- ,, गृ०सू० नारायणभाष्यम् - मुक्र प्र० मुंशीराम मनो० दिल्ली , १९६०।
६२- सत्याषाढ़ श्रौतसू० भाष्यम् । आनंदाश्रम, पूना। १९०७। (माधवगोपीनाथ:)
६३- ,, गृह्य सू० । जे० किरस्ते, इंपीरि० अकेडेमी, वियेना, १८८९।
६४- आपस्तम्ब श्रौ० सू० टीका । चिन्न स्वामी, शास्त्री । चौ०सं० सि० ।१९
६५- ,, धूर्तस्वामी भाष्यम् । चौ०सं० सि०, बनारस, १९२८ ।
६६- बौधायन श्रौत सूत्रम् । वी० कालेण्ड, ए०सो० कलकत्ता, १९०४।
६७- ,, गृह्य सू० श्रीनिवासाचार्य: मैसूर गवर्न० प्रेस, १९०४ ।
६८- उपग्रन्थ सूत्रम्।स० सामश्रमी । ए०सो० कलकत्ता । १८९७ ।
६९- काठक गृह्य सूत्रम् । वी० कालेण्ड, दयानन्द का०, लाहौर, १९
७०- कात्यायन श्रौ०सू०, देवयाज्ञिक भा०। अच्युत ग्रन्थमाला, काशी, वि० १९८७।
७१- ,, ,, कर्क भा० । ,, ,, ,, ,, ।
७२- कौथुम गृह्य सूत्रम् । डा० सूर्यकान्त, ए०सो० कलकत्ता, १९५६ ।
७३- कौशिक सू० दारिल- केशव भा०। ब्लूम फील्ड, अमेरिकन ओ०सो० न्यू हेवन्
७४- कौषीतकि गृह्य सूत्रम्। ति०रा० चिन्तामणि, मद्रास वि०वि०१९४

७५-खादिर गृह्य सू० रुद्रस्कन्द टीका । मैसूर ग०प्रेस मैसूर, १९१३।
७६- जैमिनीय गृ०सू० आंग्ल टिप्पणी। श्रीनिवासाध्वरि, एस० एस० पंजाब ,लाहार।
७७- गोभिल गृह्य सू० टीका, मुकुन्दझा बक्शी। चौ०सं० सि० , काशी, १९३६ ।
७८- जैमिनीय गृह्य सू० भाष्यम् , वी० कालण्ड , मोतीलाल बनारसी दास,लाहौर,१९२
७९- द्राह्यायण श्रौतसूत्र , धन्विन भाष्य । (ह०लि०) ऋ०सं० त्रिपाठि सं० ।
८०- ,, गृह्य सू० रुद्रस्कन्द वृत्ति । आनन्दाश्रम पुना, १९१४।
८१- पारस्कर गृह्य सू० कर्क- जयराम- हरिहर, गदाधर भा०, गुजरात प्रिं० प्रेस,१९१७।
८२- भारद्वाज श्रौत सूत्रम्, आंग्ल टीका, डा० चिं० ग० काशकर: । वै०सं० म० पुना ।
८३- ,, गृ०सू० एच०जे० डब्लू सालोमन, ई० जे० ब्रिल लि० , १९१३। ~~लन्दन~~ ।
८४- मानव श्रौत सूत्रम् , कुमारिल स्वामी । ट्रिबुनर कं० लण्डन, १८६१ ।
८५- ,, गृ० सू० , अष्टावक्र: भाष्य । सेंट्रल लाय० बड़ोदा, १९२६ ।
८६- वाराह श्रौ० सू० वी० कालेण्ड, ए०सो० कलकत्ता ।
८७- ,, गृ०सू० ,, शास्त्र प्रकाशन भवन, मुजफ्फरपुर, १९३४ ।
८८- लाट्यान श्रौ०सू० अग्निस्वामी टीका । सेन्ट्रल ला० , बडोदा, १९२१।
८९- लौगाक्षि गृ० सू० , देवपाल भा० । काश्मीरदरबार , श्रीनगर, १९२८ ।
९०- वैखानस श्रौ०सू० , वि० कालेण्ड। ए०सो ० कलकत्ता, १९२६।
९१- ,, गृ० सू०, ,, ,, , १९२७ ।
९२- वैतान श्रौ० सू० , आंग्ल अनुवाद । कालण्ड, अमस्टर्डम् जान्समुल्लर, १९१०।
९३- उपनिदान सूत्र एस० बी०टी० बनारस, १८३१।
९४- अग्निवेश्य गृ० सू० , वी० कालण्ड । त्रिवेन्द्रम वि०वि०, १९४०।
९५- वैखानस श्रौ सू० , ,, ए०सो० कलकत्ता, १९४१।
९६- प्रतिहार सूत्रम् (ह०लि०)
९७- मशक कल्पसूत्रम ,, ।
९८- विष्टुति सूत्र भाष्यम् ,, ।
आहिताग्नि ऋषि शंकर दी० सोमयाजी , ह०लि० ग्रन्थ संग्रह , वाराणसी ।

९९- कात्यायन शुल्ब सूत्रम् कर्क भाष्यम्। गो०शा० नेने , चौ०सं० सि०,काशी, १९३६ ।
१००- बौधायन शुल्ब सूत्रम् (ह०लि०) देवबन्धु संग्रह: काशी ।
१०१- हिरण्यकेशी- आपस्तम्ब शु०सू० (ह०लि०) गणेशभट्ट बापट संग्रह , काशी ।

कर्मकाण्डम्

१०२- ऋग्विधानम् । निर्णयसागर प्रेस बम्बई ।
१०३- यजुर्विधानम् । पं० अण्णशा० वारे, नासिक, नि०सा० प्रेस, बम्बई।
१०४- सामविधानम्। ए०सी० बर्नेल लन्दन १८७३ ।
१०५- अथर्व विधानम् । (कौशिक पद्धति:) आठवले संग्रह : , काशी ।
१०६- ऋग्वेदीय ब्रह्मकर्म समुच्चय:। निर्णयसागर प्रेस , बम्बई । (पत्रात्मकम्)
१०७- हिरण्य केशी ब्रह्मकर्म समुच्चय: । ,, ,, ,,
१०८- शुक्लयजु: शाखीय ब्रह्मकर्म समु० । ,, ,, ,,
१०९- सामवेदीय ब्रह्मकर्म समुच्चय:। (ह०लि०) ऋषि शंकर, दी० संग्रह, काशी ।
११०- कातीयेष्टि दीपक: । नित्यानन्द पर्वतीय कृत: , चौ०सं० सि० १९२४ ।

वेदोपग्रन्था:

१११- शिक्षा संग्रह । आर०टी० एच० ग्रिफिथ, बनारस प्रि० प्रेस, १८९६।
११२- शिक्षा दिवेदषडङ्ग । कृ०म० गोरे बम्बई , १९१५।
११३- आत्मज्योतिषम् । मोती लाल बना० लाहोर, १९२४। (अथर्व वेदीयम्)
११४- कौशिक निघण्टु: । देवबन्धु संग्रह: । काशी । (ह०लि०)
११५- निरुक्तम् सभाष्यम् आनंदाश्रम पूना, १९२१ ।
११६- निविद:, कुन्ताप:, प्रैषाध्याय:। (ह०लि०) देवबन्धु संग्रह: ।
११७- ऋक् प्रातिशाख्यम् उव्वट भाष्यम् । ब्रजबीदास एण्ड कं० , काशी, १९०३।
११८- तैत्तिरीय प्रातिशाख्यम , त्रिभाष्य रत्न व्याख्या- मैसूर ग० प्रे० , १९०६ ।
११९- शु०यजु: प्रातिशाख्यम् उव्वट भाष्यम्, बनारस प्रि० प्रेस , १८८३ ।
१२०- साम प्रातिशाख्यम् । (पुष्पसूत्रम्) अजात शत्रु भाष्यम् । चौ०सं० काशी, १९२२।
१२१- अर्थ अथर्व प्रातिशाख्यम । वी०वी० शास्त्री लाहोर , १९२३ ।
१२२- चतुर्वेद भाष्य भूमिका संग्रह:। सायणीय: , पं० बलदेव उपाध्याय । १९३४।
१२३- नक्षत्र कल्प: । आङ्गिरस कल्प: । शान्ति कल्प: । (देववन्धु संग्रह:) काशी ।
१२४- ऋग्वेद सर्वानुक्रमणी , षड्गुरु शिष्य भाष्य।मैकडानल आक्सफर्ड यु० , १८८६ ।
१२५- यजु: सर्वानु क्रमणी । श्रीदा० सातवलेकर, औंध, वि०१९८६ ।
१२६- सामवेद सर्वानुक्रमणी । (ह०लि०) ऋषि शंकर दी० सोमयाजी संग्रह: , काशी ।
१२७- अथर्ववेद बृहत्सर्वानुक्रमणी - रामगोपाल शास्त्री दयानन्द का० लाहोर, १९२२ ।

१२८- बृहद्देवता (शौनकीया) मेक्डानल, ए०सो० कलकत्ता, १८६३ ।
१२९- मनुस्मृति- चौ०सं० सि० काशी, वि० १९९२ ।
१३० - याज्ञवल्क्य स्मृति: मिताक्षरा । नि०सा० प्रेस बम्बई, १९३६ ।
१३१- जटाधरस्मृति:(ह०लि०) ऋषिशंकर दी० सोमयाजीसंग्रह: ।काशी ।
~~१३२- आर्यो~~

राष्ट्र भाषीया: शोध रूपा विचार ग्रन्था:

१३२- आर्यों का आदिदेश (हिन्दी) डा० सम्पूर्णानन्द , वाराणसी ।
१३३- आर्याभिनय(हिन्दी) स्वामीदयानन्द लाहौर।
१३४- ऋगर्थसार। दिनकर भट्ट हे०डे०सं० ए०, १९६६।
१३५ - यज्ञमधुसूदन । श्रीमधुसूदन ओझा, १९३०।
१३६- यज्ञसरस्वती । मधुसूदन शर्मा, अलवर, वि० २००३।
१३७- विधान विद्युत् । मधुसूदन ओझा।
१३८- विमान शास्त्रम् भरद्वाज मुनि प्रणीतम् ।
१३९- वेदांचे० अपौरुषेयत्व(मराठी) श्री १०८ शंकराचार्य, (करवीपीठ) कोल्हापुर ।
१४०- वेदापौरूषेयत्वम् । (संस्कृत) पद्मभूषण, पण्डितराज श्री राजेश्वर शास्त्री।
१४१- वैदिक देवता विचार: पं० सातवलेकर औंध।
१४२- वैदिक कोष हिन्दी । मधुसूदन शर्मा, जयपुर, १९२८ ।
१४३- वैदिक कोष । हंसराज द०का० लाहौर । १९२६ ।
१४४- वैदिक ज्योति। वैद्यनाथ शास्त्री, पोरबन्दर, १९५५ ।
१४५- वैदिक पदानुक्रम कोष। विश्वबन्धु शास्त्री । वी०वी० आर०जे० लाहौर।
१४६- वैदिक मन्त्र कल्पलता । काश्मीर प्रताप स्टीम प्रेस, १९७०।
१४७- वैदिक विज्ञान और भारतीय संस्कृति। म०म० गिरिधर शर्मा चतुर्वेदीय ।
१४८- वेदातील राष्ट्र दर्शन (२ भाग) मराठी, पं० बालशास्त्री हरदास,नागपुर ।
१४९- वेदविद्या (विश्वकोष से) (मराठी) श्री डा० केतकर ।
१५०- वैदिक शब्दार्थ परिचय (हिन्दी) विश्वबन्धु शास्त्री , लाहौर, १९२९।
१५१- वैदिक साहित्य ,, रामगोविन्द त्रिवेदी । भा०ज्ञा०पीठ,काशी।
१५२- वैदिक साहित्य का इतिहास श्री भगवद्दत्त , लाहौर।
१५३- वैदिक देव शास्त्र डा० सूर्यकान्त , भारत भारतीय, प्र०१९६१।

१५४- श्रौत कोष: । डा० चिं० ग० काशीकर , वै०सं० मं० पूना, १६५८।
१५५- श्रौत पदार्थ निर्वचनम् । नागेश्वर शा० सोमण , ई० जे० ला०कं० बनारस, १६१६
१५६- श्री गणेशमीमांसा श्री हेरम्बार शास्त्री वि०२००४,रामघाटकाशी।
१५७- राजनीति का अग्रदूत श्री राजेश्वरशास्त्री द्राविड़। रामघाट काशी।
१५८- प्राचीन चरित्र कोष (हिन्दी) म०म० सिद्धेश्वर शास्त्री चित्राव, पूना १६६४ ।
१५६- प्राच्य विद्यालेख(केसरी प्रबोधे) पूना १६३४ ।
१६०- खालिड्यन सोरसूक(लेख) डा० रा०ग० हर्षे , चित्राव अ०ग्रन्थ । १६५४।
१६१- अमरकोष: सदाशिव शा० जोशी , चौ०सं० सि० वि० १६६८।
१६२- संघदर्शनम् । प्र०ब० दाणी ,राष्ट्रधर्म प्रकाशन, लखनऊ ।१६६५।
१६३- श्रीमद् भगवद्गीता (शंकरानन्दीटीका) निर्णय सा० प्रे०, बम्बई० १६३४ ।
१६४- ~~स्व~~म०म० वारेशास्त्री अभिनन्दन ग्रन्थ:। डा० राहूरकर पूना, १६६५
१६५- मन्त्र शास्त्र मन्त्र शक्तियोग त्र्यं० मा० खरे , अमरावती, १६४२ ।
१६६- वेद रहस्य । योगी अरविंद पाण्डेचेरी, मद्रास । १६४६।
१६७- संस्कृत हिन्दीकोष - वा०शि० आप्टे, मोतीलाल ब०दा० काशी, १६६६ ।
१६८- हिन्दू सं० अंक - कल्याण मासिक , गोरखपुर , १६५०।
१६६- गो अंक ,, ,, ,
१७०- भौतिक विद्यांचा इतिहास(लेख) प०कृ० गोड़े चित्राव अ०ग्र० पूना । १६५४ ।
१७१- अर्थ संग्रह: निर्णयसागर प्रेस बम्बई , १६२७।
१७२- एकात्म मानव वाद पं० दीनदयाल उपाध्याय: । श्रीराम प्रकाशनपूना, १६६५
१७३- हिन्दू विश्व विशेषाङ्क। प्र० विश्व हिन्दू परिषद्, बम्बई, १६६६ ।
१७४- वेदशास्त्र दीपिका । वेद शास्त्रोत्तेजक सभा पूना शके १८६३ ।
१७५- याज्ञ वल्क्य चरित्रम् । विज्ञान प्रेस नासिक शके १८५४ ।
१७६- शिवराजाभिषेक प्रयोग: । गागाभट्ट कृत: पी०पी० एच० बुकस्टाल,बम्बई, १६५६।
१७७- अग्निहोत्र प्रयोग: । सं० वैद्यनाथ दीक्षित: कल्चेरी, १६६१ ।
१७८- चिद्विलास । डा० सम्पूर्णानन्द , ज्ञानमण्डल काशी । वि० २००१ ।
~~१७६~~ -------

आंग्ल भाषीया: शोध रूपा विचार ग्रन्था:

१७९- अल्फा बेटिकल इण्डेक्स इन दी ऋग्वेद। निर्णयसागर प्रेस, बम्बई, १९०८ ।
१८०- ,, यजुर्वेद । ,, ,, , ९
१८१- ,, सामवेद । ,, ,,
१८२- ,, अथर्ववेद । ,, ,, १९०७ ।
१८३- जर्नल आफ वैदिक स्टडीज । डा०रघुवीर (भाग २) लाहौर , १९३४+३५।
१८४- वैदिक मिस्टिसिज्म । ,, ,, ,, , १९३८ ।
१८५- आर्टिक्ट होम इन दि वेदाज । लो० बा० गं० तिलक , पूना , १९२५ ।
१८६- इंडेक्स आफ ऐतरेय ब्राह्मण । बी०वी० जोशी, बम्बई, १९१६ ।
१८७- ऊबर डाई कोनिशिंग इन राजसूय। बेवर, बरलिन, १८९३ ।
१८८- एसेस आन दि ऋग्वेद एण्ड अदर टापिक्स। केडी० ताम्हनकर , पूना, १९३२ ।
१८९- ओरायन । लो० बा०गं० तिलक, पूना १८९१ ।
१९०- कन्ट्रिब्यूशन्स फ्राम दि जैमिनी ब्राह्मणास- एच० आर्टिल, १८९८ ।
१९१- कलेक्शन आफ फ्राग्मेंट्स आफ दी लास्ट ब्रह्मणाज, बी०के० घोष, कलकत्ता, १९३५।
१९२- क्रिटिकल स्टडी आन कात्यायन शु०य०प्रा० वी०वी० आर शर्मा, युनि०मद्रास, १९३५।
१९३- इन्टर प्रिटेशन आफ वैदिक सक्रिफाइस एस नरसिंहाचार्य ।
१९४- न्यू एप्रोच टु दि वेदास ए० के० कुमार स्वामी लन्दन , १९६३ ।
१९५- पुरूरवा एण्ड उर्वशी ए० लुडविग, १८९७ ।
१९६- ब्राह्मण आफ दि वेदाज मैकडोनल मद्रास १८९६ ।
१९७- मैथालाजिकल स्टडीज इन दि ऋग्वेद । मैकडानल जे० आर० एण्एस, १८९३ ।
१९८- रिलीजन आन दि ऋग्वेद एच०डी० देशमुख । आक्सफोर्ड यूनि०प्रे० १९२३।
१९९- लाइट आन दी वेदा ~~टीकिनि~~ टी०वी० कपालि शास्त्री ,मद्रास, १९४७
~~२००-वी०आर०अवर-नेशन-~~ ~~श्री-मा०सं०-गोवलकर~~
२००- वी आर अवर नेशन - श्री मा०स० गोल्वलकर गुरुजी, नागपुर ।
२०१- दी टेक्निकल आर्ट्स एण्ड सायन्सेस आफ दि एन्टशेण्ट्स , आल्बर्ट नायबुर्गर (जर्मनी)
२०२- वेदा: ०। प्रो० मेक्समुल्लर , लण्डन ।
२०३- वर्ड इण्डेक्स टु दि ऋग्वेद । मेक्समुल्लर ।
२०४- वैदिक क्रोनोलाजी । लो० बा०गं० तिलक, पूना, १९२५ ।

२०५- वैदिक मायथालाजी एण्ए० मैकडोनल, स्ट्रासबुर्ग, १८९७।
२०६- वैदिक मायथालाजी ए० हिलब्राण्ट, ब्रेसल, १८९९-१९०२ ।
२०७- वैदिक क्रिस्टोमेथी ,, ,, १८८५ ।
२०८- वैदिक वेट्रीज ए वेबर बर्लिन , १८६५-६८ ।
२०९- सोशल एण्ड रिलीजस लाइफ इन दि गृह्यसू० - बी० एम० आप्टे । अहमदाबाद।
२१०- हिम्स फ्राम दि ऋगवेद पी० पियर्सन बम्बई, १९३८ ।
२११- हिम्स फ्राम दि सामवेद ग्रीफिथ बनारस १८९३ ।
२१२- हिम्स आफ दि अथर्ववेद ब्लूमफील्ड आक्सफोर्ड, १८९७ ।
२१३- हिस्ट्री आफ धर्मशास्त्रास पी०वी० काणे , बम्बई ।

पुराणानि

२१४- वायु पुराणम् ।
२१५- ब्रह्माण्ड पुराणम् ।
२१६- मत्स्य पुराणम् ।
२१७- साम्ब पुराणम् ।
२१८- मारकण्डेय पुराणम् ।
२१९- वन्हि पुराणम् ।
२२०- श्रीमद् भागवतम् ।
२२१- हरिवंश उपपुराणम् ।
२२२- श्री महाभारतम् ।

२२३- अग्निहोत्र चन्द्रिका ।
२२४- अग्निहोत्र व्याख्या ।
२२५- अग्निचयन प्रयोगः ।
२२६- अग्निस्टोम शस्त्र क्लृप्तिः ।
२२७- अग्निष्टोम उद्गातृ प्रयोगः।
२२८- अग्निहोत्र चूडामणिः ।
२२९- अतिरात्र प्रयोगः ।
२३०- अत्यग्निष्टोम प्रयोगः ।
२३१- अन्त्येष्टि प्रयोगमणिः ।
२३२- अश्वमेध औद्गातृ पद्धतिः ।
२३३- आधान पद्धतिः ।
२३४- आपस्तम्ब श्रौत प्रयोग रत्नम् ।
२३५- आश्वलायनीया हौत्र पद्धतिः ।
२३६- आश्वलायनीया अग्निष्टोम हौत्र प० ।
२३७- उद्गातृ रत्नाकरः ।
२३८- सप्तसंस्थाकः उद्गातृ प्रयोगः ।
२३९- कात्यायनीया अग्निष्टोम पद्धतिः।
२४०- कात्यायनीया दर्शपूर्णमास पद्धतिः ।
२४१- क्रतुरत्नमाला।
२४२- क्रतु संख्या विवरणम् ।
२४३- चमस पद्धतिः ।
२४४- चयन कर्म दीपिका पद्धतिः ।
२४५- चरक सौत्रामणि प्रयोगः ।
२४६- चातुर्मास्य प्रयोगः ।
२४७- निगम परिशिष्टम् ।
२४८- पशु सूत्रम् ।
२४९- पुरुषमेध पद्धतिः ।
२५०- पौण्डरीक प्रयोगः ।
२५१- प्रकृति विकृति याग काल विशेषः।
२५२- भक्ष्य विचारः ।
२५३- बौधायनीया अग्निष्टोम पद्धतिः ।
२५४- बौधायनीया दर्शपूर्णमास पद्धतिः ।
२५५- याज्ञिक वल्लभा ।
२५६- राजसूय पद्धतिः ।
२५७- विकृति कौमुदी ।
२५८- विश्वजित् प्रयोगः ।
२५९- शांखायनीया हौत्र पद्धतिः ।
२६०- श्रौत चन्द्रिका ।
२६१- श्रौत सर्वस्वम् ।
२६२- श्रौत्र विहार कारिकाः ।
२६३- सत्रविधि प्रयोगः ।
२६४- सत्रात्मको द्वादशाहः ।
२६५- सर्वमेध पद्धतिः ।
२६६- हौत्रालोकः ।
२६७-

---००---